निवेदन.

—(०)—

आ 'समराइच्चकहा' छपाववानो प्रारंभ आजथी लगभग वे वरस पहेलां कर्यो हतो अने तेने जेम बने तेम जलदीथी छपावी वहार पाडवानो विचार हतो, परन्तु केटलाक अनिवार्य कारणोने लीधे तेम करवामां विलम्ब थयो छे. 'समराइच्चकहा' श्रीहरिभद्राचार्यनी प्रशमरसपूर्ण सुन्दर कृति छे, ते ग्रन्थने रोयल एशीयाटीक सोसाइटीए घणा वरस पहेला छपावी प्रसिद्ध कर्यो हतो, परन्तु ते प्राकृत भाषामां होवाथी तेनो जेटलो जोइए तेटलो प्रचार अने उपयोग थइ शक्यो नथी, वळी ते पुस्तकाकारे होवाथी साधुओने व्याख्यानमां तेनो उपयोग करवानी मुश्केली पडती हती, माटे अमे संस्कृत छाया साथे पत्राकारे छपावी प्रकाशित कर्यो छे. आ पुस्तकना प्रुफसंशोधन करवामा अने तेने छपाववामा मारा मित्र अने सहयोगी हीरालाल देवचन्द शाहे खूब सहाय करी छे, तेमज आ पुस्तकनुं समर्पण श्री राधनपुरनिवासी श्रीमान् शेठ कान्तिलाल ईश्वरलालने करवामां आव्युं छे अने तेमणे मारी इच्छाने मान आपी तेनो स्वीकार कर्यो छे माटे तेओनो आभार मानुं छुं. आ ग्रन्थनी प्रस्तावना, विषयानुक्रम अने शुद्धिपत्रक बीजा भागमां आपवामां आवशे. आ ग्रन्थनुं संशोधन ध्यान आपीने करवामां आव्युं छे, तो पण मुद्रायंत्रना दोषथी, बीबाओ उडी जवाथी के तूटी जवाथी, दृष्टिदोषथी, अथवा भ्रान्तिथी जे कंइ अशुद्धि रही होय तेने सुधारी लेवा विद्वानोने प्रार्थना छे.

प्रकाशक

समर्पण

राधनपुरनिवासी श्रीमान् शेठ कान्तिलाल ईश्वरलाल

आपनामा सरलतानी साथे धर्मप्रेम अने विद्याप्रेम बन्नेनो सहयोग थयेलो छे, एटलुज नहि पण आपनी नम्र अने उदार दाननिष्ठाए ए बन्नेनी सक्रियता पूरवार करी छे, आथी परमसत्यप्रिय श्रीमान् हरिभद्राचार्य विरचित प्रशमरसपूर्ण समरादित्यकथा आपने समर्पण करी हु कृतार्थतानो आनन्द अनुभवु छु

भगवानदास हरखचंद दोशी

ॐ

याकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय–भगवत्–श्रीहरिभद्र-
सूरिवररचिता—

समराइच्चकहा।

पणमह विजिअसुदुज्जय–निज्जिअसुरमणुअ–विसमसरपसरं। तिहुअणमङ्गलनिलयं वसहगइगयं जिणं उसहं ॥
परमसिरिवद्धमाणं पणट्ठमाणं विसुद्धवरनाणं। गयजोअं जोईसं सयंभुवं वद्धमाणं च ॥
सेसे च्चिय बावीसे जाइ–जरा–मरणबन्धणविमुक्के। तेलोक्कमत्थयत्थे तित्थयरे भावओ नमह ॥

प्रणमत विजितसुदुर्जय–निर्जितसुरमनुज–विषमशरप्रसरम्। त्रिभुवनमङ्गलनिलयं वृषभगतिगतं जिनम्–ऋषभम् ॥
परमश्रीवर्धमानं प्रनष्टमानं विशुद्धवरज्ञानम्। गतयोगं योगीशं स्वयंभुवं वर्धमानं च ॥
शेषांश्चैव द्वाविंशतिं जाति–जरा–मरणबन्धनविमुक्तान्। त्रैलोक्यमस्तकस्थान् तीर्थकरान् भावतो नमत ॥

उवणेउ मङ्गलं वो जिणाण मुहलालिजालसंवलिआ। तित्थपवत्तणसमए तिअसविमुक्का कुसुमवुट्ठी ॥
देउ सुहं वो सुर-सिद्ध-मणुअवन्देहि सायरं नमिआ। तित्थयरवयणपङ्कयविणिग्गया मणहरा वाणी ॥
अलं पवित्थरेण। सुणह सोअव्वाइं, पसंसह पसंसणिज्जाइं, परिहरह परिहरिअव्वाइं, आयरह आयरिअव्वाइं। तत्थ—

सोअव्वाइं नरा-ऽमर-सिवसुहजणयाइं अत्थसाराइं। सव्वन्नुभासिआइं भुवणम्मि पइट्ठिअजसाइं ॥
ताइं चिय विबुहाणं पसंसणिज्जाइं तह य जाइं च। तेहिं चिय भणिआइं सम्मत्त-न्नाण-चरणाइं ॥
परिहरिअव्वाइं तहा कुगईवासस्स हेउभूआइं। मिच्छत्तमाइआइं लोगविरुद्धाइं य तहेव ॥
आयरिअव्वाइं अणिस्सिएण सम्मत्त-नाण-चरणाइं। दोगच्चविउडणाइं चिन्तामणिरयणभूआइं ॥
एत्थं पुण अहिगारो ता सोअव्वेहि पत्थुअपबन्धे। सव्वन्नुभासिआइं सोअव्वाइं ति भणियमिणं ॥

उपनयतु मङ्गलं वो जिनानां मुखराऽलिजालसंवलिता। तीर्थप्रवर्तनसमये त्रिदशविमुक्ता कुसुमवृष्टिः ॥
ददातु सुखं वः सुर-सिद्ध-मनुजचन्द्रैः सादरं नता। तीर्थंकरवदनपङ्कजविनिर्गता मनोहरा वाणी ॥
अलं प्रविस्तरेण। शृणुत श्रोतव्यानि, प्रशंसत प्रशंसनीयानि, परिहरत परिहर्तव्यानि, आचरत आचरितव्यानि। तत्र—
श्रोतव्यानि नरा-ऽमर-शिवसुखजनकानि अर्थसाराणि। सर्वज्ञभाषितानि भुवने प्रतिष्ठितयशांसि ॥
तान्येव विबुधानां प्रशंसनीयानि तथा च यानि च। तैरेव भणितानि सम्यक्त्व-ज्ञान-चरणानि।
परिहर्तव्यानि तथा कुगतिवासस्य हेतुभूतानि। मिथ्यात्वादिकानि लोकविरुद्धानि च तथैव ॥
आचरितव्यानि अनिश्रितेन सम्यक्त्व-ज्ञान-चरणानि। दौर्गत्यविकुट्टनानि चिन्तामणिरत्नभूतानि ॥

वोच्छं तप्पडिबद्धं भवियजणाणन्दयारिणिं परमं । संखेवओ महत्थं चरिअकहं तं निसामेह ॥

तत्थ य 'तिविहं कहावत्थुं' ति पुव्वायरियपवाओ । तं जहा—दिव्वं, दिव्वमाणुसं, माणुसं च । तत्थ दिव्वं नाम जत्थ केवलमेव देवचरिअं वण्णिज्जइ । दिव्वमाणुसं पुण जत्थ दोण्हं पि दिव्वमाणुसाणं । माणुसं तु जत्थ केवलं माणुसचरियं ति । एत्थ सामन्नओ चत्तारि कहाओ हवन्ति । तं जहा—अत्थकहा, कामकहा, धम्मकहा, संकिण्णकहा य । तत्थ अत्थकहा नाम, जा अत्थोवायाणपडिबद्धा, असि–मसि–कसि–वाणिज्ज–सिप्पसंगया, विचित्तधाउवायाइपमुहमहोवायसंपउत्ता, साम–भेय–उवप्पयाण–दण्डाइपयत्थविरइआ सा अत्थकह त्ति भण्णइ । जा उण कामोवायाणविसया, वित्त–वपु–व्वय–कला–दक्खिण्णपरिगया, अणुरायपुलइअपडिवत्तिजोअसारा, दूईवावार–रमियभावाणुवत्तणाइपयत्थसंगया सा कामकह त्ति भण्णइ । जा उण धम्मोवायाणगोयरा, खमा–मद्दव–ऽज्जव–

अत्र पुनरधिकारस्तावत् श्रोतव्यैः प्रस्तुतप्रबन्धे । सर्वज्ञभाषितानि श्रोतव्यानीति भणितमिदम् ॥

वक्ष्ये तत्प्रतिबद्धां भव्यजनानन्दकारिणीं परमाम् । संक्षेपतो महार्थां चरितकथां तां निशाम्यत ॥

तत्र च 'त्रिविधं कथावस्तु' इति पूर्वाचार्यप्रवादः । तद्यथा—दिव्यम्, दिव्यमानुषम्, मानुषं च । तत्र दिव्यं नाम यत्र केवलमेव देवचरितं वर्ण्यते । दिव्यमानुषं पुनः यत्र द्वयोरपि दिव्यमानुषयोः (चरितम्) । मानुषं तु यत्र केवलं मानुषचरितमिति । अत्र सामान्यतः चतस्रः कथा भवन्ति । तद्यथा—अर्थकथा, कामकथा, धर्मकथा, संकीर्णकथा च । तत्र अर्थकथा नाम या अर्थोपादानप्रतिबद्धा, असि–मषी–कृषि–वाणिज्य–शिल्पसंगता, विचित्रधातुवादादिप्रमुखमहोपायसंप्रयुक्ता, साम–भेदो–पप्रदान–दण्डादिपदार्थविरचिता सा 'अर्थकथा' इति भण्यते । या पुनः कामोपादानविषया, वित्त–वपु–र्वयः–कला–दाक्षिण्यपरिगता, अनुरागपुलकितप्रतिपत्तियोगसारा, दूतीव्यापार–रतभावानुवर्तनादिपदार्थसंगता सा 'कामकथा' इति भण्यते । या पुनर्धर्मोपादानगोचरा, क्षमा–मार्दवा–ऽऽर्जव–मुक्ति–तपः–संयम–सत्य

मुत्ति-तव-संजम-सच्च-सोया-ऽऽकिंचन्न-बंभचेरपहाणा, अणुव्वय-दिसि-देसा-ऽणत्थदण्डविरई-सामाइय-पोसहोववासो-वभोग-परिभोगा-ऽतिहिसंविभागकलिया, अणुकम्पा-ऽकामनिज्जराइपयत्थसंपउत्ता सा धम्मकह त्ति । जा उण तिवग्गोवायाणसंबद्धा, कव्व-कहा-गन्थत्थवित्थरविरइया, लोइय-वेयसमयपसिद्धा,उयाहरण-हेउ-कारणोववेया सा संकिण्णकह त्ति वुच्चइ । एयाणं च कहाणं तिविहा सोयारो हवन्ति। तं जहा-अहमा, मज्झिमा, उत्तम त्ति । तत्थ जे कोह-माण-माया-लोह-समाच्छाइयमई, परलोयदंसणपरंमुहा, इह-लोगपरमत्थदंसिणो, निरणुकम्पा जीवेसु, ते तहाविहा तामसा अहमपुरिसा दुग्गइगमणकन्दुज्जयाए, सुगइपडिवक्खभूयाए, परमत्थओ अणत्थबहुलाए अत्थकहाए अणुसज्जन्ति । जे उण सद्दाइविसयविसमोहियमणा, भावरिउ-इन्दियाणुकूलवत्तिणो, अभावियपरमत्थमग्गा, 'इमं सुन्दरं, इमं सुन्दयरं' ति सुन्दरासुन्दरेसु अविणिच्छियमई, ते रायसा मज्झिमपुरिसा बुहजणोवहसणिज्जाए, विडम्बणमेत्तपडि-

-शौचा-ऽऽकिञ्चन्य-ब्रह्मचर्यप्रधाना, अनुव्रत-दिग्-देशा-ऽनर्थदण्डविरति-सामायिक-पौषधो-पवासो-पभोग-परिभोगा-ऽतिथिसंविभाग-कलिता, अनुकम्पा-ऽकामनिर्जरादिपदार्थसंप्रयुक्ता सा 'धर्मकथा' इति (भण्यते)। या पुनस्त्रिवर्गोपादानसंबद्धा, काव्य-कथा-ग्रन्थार्थवि-स्तरविरचिता, लौकिक-वेदसमयप्रसिद्धा, उदाहरण-हेतु-कारणोपेता सा 'संकीर्णकथा' इति उच्यते। एतासां च कथानां त्रिविधाः श्रोतारो भवन्ति। तद्यथा-अधमाः, मध्यमाः, उत्तमा इति। तत्र ये क्रोध-मान-माया-लोभसमाच्छादितमतयः, परलोकदर्शनपराङ्मुखाः, इहलोकपरमार्थदर्शिनः, निरनुकम्पा जीवेषु, ते तथाविधाः तामसा अधमपुरुषाः दुर्गतिगमन[1]कन्दोद्यतायाम्, सुगतिप्रतिपक्षभूतायाम्, परमार्थतः अनर्थबहुलायाम्-अर्थकथायाम्-अनुपजन्ति। ये पुनः शब्दादिविषयमोहितमनसः, भावरिपु-इन्द्रियानुकूलवर्तिनः, अभावित-परमार्थमार्गाः, 'इदं सुन्दरम्' 'इदं सुन्दरतरम्' इति सुन्दराऽसुन्दरेषु अविनिश्चितमतयः, ते राजसा मध्यमपुरुषा बहुजनोपहसनीयायाम्,

[1] कन्दं (दे) दुःखम्

बद्धाए, इह परभवे य दुक्खसंवड्ढियाए कामकहाए अणुसज्जन्ति । जे उण मणगं सुन्दरयरा, सावेक्खा उभयलोएसु, कुसला ववहारनयमएणं, परमत्थओ सारविन्नाणरहिया, खुड्डभोएसु अबहुमाणिणो, अवियण्हा उदारभोगाणं, ते किंचि सत्तिया मज्झिमपुरिसा चेव आसयविसेसओ सुगइ-दुग्गइवत्तिणीए, जीव-लोगसभावविब्भमाए, सयलरसनीसन्दसंगयाए, विविहभावपसूइनिबन्धणाए संकिण्णकहाए अणुसज्जन्ति। जे उण जाइ-जरा-मरणजणियवेरग्गा, जम्मन्तरम्मि वि कुसलभावियमई, [1]निव्विण्णा कामभोगाण, मुक्कपाया पावलेवेण, विन्नायपरमपयसरूवा, आसन्ना सिद्धिसंपत्तीए, ते सत्तिया उत्तिमपुरिसा सग्ग-निव्वाणसमारुहणवत्तिणीए, बुहजणपसंसणिज्जाए, सयलकहासुन्दराए, महापुरिससेवियाए धम्मकहाए चेव अणुसज्जन्ति ॥

तओ अहं पि इयाणिं दिव्व-माणुसवत्थुगयं धम्मकहं चेव कित्तइस्सामि । भणियं च अकयपरोवयारनिरएहिं, उवलद्धपरमपय-

---

विडम्बनमात्रप्रतिबद्धायाम्, इह परभवे च दुःखसंवर्धिकायां कामकथायाम्-अनुपजन्ति । ये पुनर्मनाक् सुन्दरतराः, सापेक्षा उभयलोकेषु, कुशला व्यवहारनयमतेन, परमार्थतः सारविज्ञानरहिताः, क्षुद्रभोगेषु अबहुमानिनः, अवितृष्णा उदारभोगानाम्, ते किञ्चित् सात्त्विका मध्यमपुरुषाश्चैव आशयविशेषतः सुगति-दुर्गतिवर्तिन्याम्, जीवलोकस्वभावविभ्रमायाम्, सकलरसनिःष्यन्दसंगतायाम्, विविधभावप्रसूतिनिबन्धनायां संकीर्णकथायाम्-अनुपजन्ति । ये पुनर्जाति-जरा-मरणजातवैराग्याः, जन्मान्तरेऽपि कुशलभावितमतयः, निर्विण्णाः कामभोगेभ्यः, मुक्तप्रायाः पापलेपेन, विज्ञातपरमपदस्वरूपाः, आसन्नाः सिद्धिसंप्राप्त्याः, ते सात्त्विका उत्तमपुरुषाः स्वर्ग-निर्वाणसमारोहणवर्तिन्याम्, बहुजनप्रशंसनीयायाम्, सकलकथासुन्दरायाम्, महापुरुषसेवितायां धर्मकथायामेव अनुपजन्ति ॥

ततोऽहमपि इदानीं दिव्य-मानुषवस्तुगतां धर्मकथामेव कीर्तयिष्यामि । भणितं च अकृतपरोपकारनिरतैः, उपलब्धपरमपदमार्गैः, सम-

---

[1] निव्विण्णकामभोगा क

मग्गेहिं, समतिण-मणि-मुत्त-लेट्ठु-कञ्चणेहिं गामयसिवसोक्खबद्धराएहिं धम्मसत्थयारेहिं—

धम्मेण कुलपसूई धम्मेण य दिव्वरूवसंपत्ती । धम्मेण धणसमिद्धी धम्मेण सुवित्थडा कित्ती ॥
धम्मो मङ्गलमउलं ओसहमउलं च सव्वदुक्खाणं । धम्मो बलमवि विउलं धम्मो ताणं च सरणं च ॥
किं जंपिएण बहुणा ? जं जं दीसइ समत्थजियलोए । इन्दिय-मणाभिरामं तं तं धम्मप्फलं सव्वं ॥
भीमम्मि मरणकाले मोत्तूणं दुक्खसंविढत्त पि । अत्थं देहं सयणं धम्मो च्चिय होइ सुसहाओ ॥
पावेइ य सुरलोयं तत्तो वि सुमाणुसत्तणं धम्मो । तत्तो दुक्खविमोक्खं सासयसोक्खं लहुं मोक्खं ॥
तं कुणइ जाणमाणो, जाणइ य सुणेइ जो उ मज्झत्थो । कुसलो य धम्मियाओ कहाउ सव्वन्नुभणियाओ ॥
ता पढमं धम्मगुणं पडुच्च चरियं अहं पवक्खामि । आराहगे-यराणं गुणदोसविभावणं परमं ॥

तृण-मणि-मुक्ता-लेष्टु-काञ्चनैः शाश्वतशिवसौख्यबद्धरागैर्धर्मशास्त्रकारैः—

धर्मेण कुलप्रसूतिः, धर्मेण च दिव्यरूपसंप्राप्तिः । धर्मेण धनसमृद्धिः, धर्मेण सुविस्तृता कीर्तिः ॥
धर्मो मङ्गलमतुलम्, औषधमतुलं च सर्वदुःखानाम् । धर्मो बलमपि विपुलं धर्मः त्राणं च शरणं च ॥
किं जल्पितेन बहुना ? यद् यद् दृश्यते समस्तजीवलोके । इन्द्रिय-मनोऽभिरामं तत् तद् धर्मफलं सर्वम् ॥
भीमे मरणकाले मुक्त्वा दुःखसमर्जितमपि । अथ देहं स्वजनं, धर्मश्चैव भवति सुसहायः ॥
प्रापयति च सुरलोकम्, ततोऽपि सुमनुष्यत्वं धर्मः । ततो दुःखविमोक्षं शाश्वतसौख्यं लघु मोक्षम् ॥
तं करोति जानन्, जानाति च शृणोति यस्तु मध्यस्थः । कुशलश्च धार्मिकीः कथाः सर्वज्ञभणिताः ॥

नवपुव्वभवनिबद्ध संवेगकरं च भव्वसत्ताणं । चरियं समराइच्चस्स ऽवन्तिरन्नो सुणह वोच्छं ॥
एत्थं बहुया उ भवा दोण्ह वि उवओगिणो न ते सव्वे । नवसु परोप्परजोगो जत्तो संखा इमा भणिया ॥
जह तेणेव भगवया गिरिसेणुवसग्गसहणपज्जन्ते । संजायकेवलेणं सिट्ठं वेलंधरसुरस्स ॥
मुणिचन्दस्स य रन्नो देवीण य नम्मयापहाणाणं । संखेवेण फुडत्थं अहमवि तं संपवक्खामि ॥ भणियं च पुव्वायरिएहिं–
"गुणसेण-अग्गिसम्मा सीहा-ऽऽणन्दा य तह पिया-उत्ता । सिहि-जालिणि माइ-सुया धण-धणसिरिमो य पइ-भज्जा ॥
जय-विजया य सहोयर धरणो लच्छी य तह पई-भज्जा । सेण-विसेणा पित्तिय-उत्ता जम्मम्मि सत्तमए ॥
गुणचन्द-वाणमंतर समराइच्च गिरिसेणपाणो उ । एक्कस्स तओ मोक्खो बीयस्स अणन्तसंसारो ॥

तस्मात् प्रथमं धर्मगुणं प्रतीत्याहं चरितं प्रवक्ष्यामि । आराधके-तराणां गुण-दोषविभावनं परमम् ॥
नवपूर्वभवनिबद्ध संवेगकरं च भव्यसत्त्वानाम् । चरितं समरादित्यस्य अवन्तीराजस्य शृणुत वक्ष्ये ॥
अत्र बहुकास्तु भवाः द्वयोरपि उपयोगिनो न ते सर्वे । नवसु परस्परयोगो यतः संख्या इयं भणिता ॥
यथा तेनैव भगवता गिरिसेनोपसर्गसहनपर्यन्ते । संजातकेवलेन शिष्टं वेलंधरसुरस्य ॥
मुनिचन्द्रस्य च राज्ञः देवीनां च नर्मदाप्रधानानाम् । संक्षेपेण स्फुटार्थम्, अहमपि तं संप्रवक्ष्यामि ॥ भणितं च पूर्वाचार्यैः—
"गुणसेन-अग्निशर्माणौ सिंहा-ऽऽनन्दौ च तथा पितृ-पुत्रौ । शिखि-जालिन्यौ मातृ-सुते धन-धनश्रियौ च पति-भार्ये ॥
जय-विजयौ च सहोदरौ धरणो लक्ष्मीश्च तथा पति-भार्ये । सेन-विसेनौ पितृव्य-पुत्रौ जन्मनि सप्तमके ॥
गुणचन्द्र-वानव्यन्तरौ समरादित्यः गिरिसेनप्राणस्तु । एकस्य ततो मोक्षः द्वितीयस्य अनन्तसंसारः ॥

नगराइ-खिइपइट्ठं जयउर-कोसंबि-सुसम्मनयरं च। कायन्दी मायन्दी चम्पा ओज्झा य उज्जेणी ॥
गुणसेणस्सुववाओ सोहम्म-सणंकुमार-बम्भेसु। सुक्का-ऽऽणया-ऽऽरणेसुं गेवेज्जा-ऽणुत्तरेसुं च ॥
इयरस्स उ उववाओ विज्जुकुमारेसु होइ नायव्वो। सेसो अणन्तरो उण रयणाईसुं अहक्कमसो ॥
सागरमेगं पञ्च य नव-पण्णरसेव तह य अट्ठारा। वीसं तीसं तेत्तीसमेव पढमस्स देवेसु ॥
देवेसु सड्ढपलियं सागरतिय सत्त दस य सत्तरस। बावीसं तेत्तीसं बीयस्स ठिई उ नरएसु" ॥
एवमेयाओ चरियसंगहणिगाहाओ। संपयं एयासिं चेव गुरूवएसाणुसारेणं वित्थरेणं भावत्थो कहिज्जइ—

नगरादि-क्षितिप्रतिष्ठम्, जयपुर-कौशाम्बी-सुशर्मनगरं च। काकन्दी माकन्दी चम्पा अयोध्या च उज्जयिनी ॥
गुणसेनस्योपपात, सौधर्म-सनत्कुमार-ब्रह्मेषु। शुक्रा-ऽऽरणेषु ग्रैवेयका-ऽनुत्तरेषु च ॥
इतरस्य च उपपातः विद्युत्कुमारेषु भवति ज्ञातव्यः। शेषोऽनन्तरः पुना रत्नादिषु यथाक्रमशः ॥
सागरमेकं पञ्च च नव पञ्चदशैव तथा चाष्टादश। विंशतिः, त्रिंशत्, त्रयस्त्रिंशद् एव प्रथमस्य देवेषु ॥
देवेषु सार्धपल्यम्, सागरत्रिकं सप्त दश च सप्तदश। द्वाविंशतिः, त्रयस्त्रिंशद् द्वितीयस्य स्थितिस्तु नरकेषु" ॥
एवमेताः चरितसंग्रहणीगाथाः। सांप्रतमेतासां चैव गुरूपदेशानुसारेण विस्तरेण भावार्थः कथ्यते—

---

१ अड्ढपल्लिं क

पढमो भवो ।

अत्थि इहेव जम्बुद्दीवे दीवे, अवरविदेहे वासे, उत्तुङ्गधवलपागारमण्डियं, नलिणिवणसंछन्नपरिहासणाहं, सुविभत्ततिय-चउक्क-चच्चरं भवणेहिं जियसुरिन्दभवणसोहं खिइपइट्ठियं नाम नयरं ।

जत्थ विलयाउ कमलाइं कोइलं कुवलयाइं कलहंसे । वयणेहि जंपिएण य नयणेहि गईहिं य जिणन्ति ॥
जत्थ य नराण वसणं विज्जासु, जसम्मि निम्मले लोहो । पावेसु सया भीरुत्तणं, च धम्मम्मि धणवुद्धी ॥
तत्थ य राया संपुण्णमण्डलो मयकलङ्कपरिहीणो । जणमणनयणाणन्दो नामेणं पुण्णचन्दो त्ति ॥
अन्तेउरप्पहाणा देवी नामेण कुमुइणी तस्स । सइ वड्ढियविसयसुहा इट्ठा य रइ व्व मयणस्स ॥

अस्ति इहैव जम्बूद्वीपे द्वीपे, अपरविदेहे वर्षे, उत्तुङ्गधवलप्राकारमण्डितम्, नलिनीवनसंछन्नपरिखासनाथम्, सुविभक्तत्रिक-चतुष्क-चत्वरम्, भवनैर्जितसुरेन्द्रभवनशोभं क्षितिप्रतिष्ठितं नाम नगरम् ।

यत्र वनिताः कमलानि कोकिलां कुवलयानि कलहंसान् । वदनैः जल्पितेन च नयनैः गतिभिश्च जयन्ति ॥
यत्र च नराणां व्यसनं विद्यासु, यशसि निर्मले लोभः । पापेषु सदा भीरुत्वं च धर्मे धनबुद्धिः ॥
तत्र च राजा संपूर्णमण्डलो मृग(मद)कलङ्कपरिहीणः । जनमनो-नयनानन्दो नाम्ना पूर्णचन्द्र इति ॥
अन्तःपुरप्रधाना देवी नाम्ना कुमुदिनी तस्य । सदा वर्धितविषयसुखा इष्टा च रतिरिव मदनस्य ॥

ताण य सुओ कुमारो गुणसेणो नाम गुणगणाइण्णो । बालत्तणओ वंतरसुरो व्व केलिप्पिओ, णवरं–॥

तम्मि य नयरे अतीव सयलजणबहुमओ, धम्मसत्थसंघायपाढओ, लोगववहार–नीइकुसलो, अप्पारम्भ–परिग्गहो, जन्नदत्तो नाम पुरोहिओ त्ति । तस्स य सोमदेवागब्भसंभूओ, महल्लतिकोणुत्तिमङ्गो, आपिङ्गलवट्टलोयणो, ठाणमेत्तोवलक्खियचिविडनासो, बिलमेत्तकण्णसन्नो, विजियदन्तच्छयमहल्लदसणो, वंकसुदीहरसिरोहरो, विसमपरिहस्सबाहुजुयलो, अइमडहवच्छत्थलो, वंकविसमलम्बोयरो, एक्कपासुन्नयमहल्लवियडकडियडो, विसमपइट्ठिऊरुजुयलो, परिथूलकढिणहस्सजङ्घो, विसमविरिथिण्णचलणो, हुयवहसिहाजालपिङ्गकेसो, अग्गिसम्मो नाम पुत्तो त्ति । तं च कोउहल्लेण कुमारगुणसेणो पहयपडुपडह–मुइङ्ग–वंस–कंसा–लयप्पहाणेण महया तूरेण नयरजणमज्झे सहत्थतालं हसन्तो नच्चावेइ, रासहम्मि आरोवियं, पहट्ठबहुडिम्भविन्दपरिवारियं, छित्तरमयधरियपोण्डरीयं, मणहरुत्तालवज्जन्तडिण्डिमं, आरोवियमहारायसद्दं, बहुसो रायमग्गे सुतुरियतुरियं हिण्डावेइ । एवं च पइदिणं कयन्तेणेव तेण कयत्थि-

---

तयोश्च सुतः कुमारो गुणसेनो नाम गुणगणाकीर्णः । बालत्वतः व्यन्तरसुर इव केलिप्रियः, नवरम्—॥

तस्मिंश्च नगरे अतीव सकलजनबहुमतः, धर्मशास्त्रसंघातपाठकः, लोकव्यवहार नीतिकुशलः, अल्पारम्भ–परिग्रहो यज्ञदत्तो नाम पुरोहित इति । तस्य च सोमदेवागर्भसंभूतः, महात्रिकोणोत्तमाङ्गः, आपिङ्गलवृत्तलोचनः, स्थानमात्रोपलक्षितचिपिटनासः, बिलमात्रकर्णसंज्ञः, विजितदन्तच्छदमहादशनः, वक्रसुदीर्घशिरोधरः, विषमपरिह्रस्वबाहुयुगलः, अतिलघुवक्षःस्थलः, वक्रविषमलम्बोदरः, एकपार्श्वोन्नतमहाविकटकटीतटः, विषमप्रतिष्ठितोरुयुगलः, परिस्थूलकठिनह्रस्वजङ्घः, विषमविस्तीर्णचरणः, हुतवहशिखाजालपिङ्गकेशः, अग्निशर्मा नाम पुत्र इति । तं च कुतूहलेन कुमारगुणसेनः प्रहतपटुपटह–मृदङ्ग–वंश–कांस्यक–लयप्रधानेन महता तूर्येण नगरजनमध्ये सहस्ततालं हसन् नर्तयति, रासभे आरोपितम्, प्रहृष्टबहुडिम्भवृन्दपरिवारितम्, जीर्णशूर्पमयधृतपुण्डरीकम्, मनोहरोत्तालवाद्यमानडिण्डिमम्,

ज्ञन्तस्स तस्स वेरग्गभावणा जाया। चिन्तियं च णेण ॥

बहुजणधिक्कारहया उवहसणिज्जा य सव्वलोयस्स। पुव्विं अकयसुपुण्णा सहन्ति परपरिभवं पुरिसा ॥

जइ ता न कओ धम्मो सप्पुरिसनिसेविओ अहन्नेणं। जम्मन्तरम्मि घणियं सुहावहो मूढहियएणं ॥

इण्हिं पि फलविवागं उग्गं दट्ठूणमकयपुण्णाणं। परलोयबन्धुभूयं करेमि मुणिसेवियं धम्मं ॥

जम्मन्तरे वि जेणं पावेमि न एरिसं महाभीमं। सयलजणोहसणिज्जं विडम्बणं दुज्जणजणाओ ॥

एवं च चिन्तिय पयड्ढवेरग्गमग्गो निग्गओ नयराओ, पत्तो य माससमेत्तेण कालेण तव्विसयसन्धिसंठियं, बउल-चम्पगा-ऽसोग-पुन्नाग-नागाउलं, पसन्तमय-मयाहिवपमुहचिरुद्धसावयगणं, सुरहिहविगन्धगब्भिणुद्दामधूमपडलं, विमलसलिलगिरिणईप-

---

आरोपितमहाराजशब्दम्, बहुशो राजमार्गे सुत्वरितत्वरितं हिण्डयति। एवं च प्रतिदिनं कृतान्तेनेव तेन कदर्थ्यमानस्य तस्य वैराग्यभावना जाता। चिन्तितं चानेन—

बहुजनधिक्कारहता उपहसनीयाश्च सर्वलोकस्य। पूर्वमकृतसुपुण्याः सहन्ते परपरिभवं पुरुषाः ॥
यदि तावद् न कृतो धर्मः सुपुरुषनिषेवितोऽधन्येन। जन्मान्तरे गाढं सुखावहो मूढहृदयेन ॥
इदानीमपि फलविपाकमुग्रं दृष्ट्वाऽकृतपुण्यानाम्। परलोकबन्धुभूतं करोमि मुनिसेवितं धर्मम् ॥
जन्मान्तरेऽपि येन प्राप्नोमि नैतादृशीं महाभीमाम्। सकलजनोपहसनीयां विडम्बनां दुर्जनजनात् ॥

एवं च चिन्तयित्वा प्रपन्नवैराग्यमार्गो निर्गतो नगरात्, प्राप्तश्च मासमात्रेण कालेन तद्विषयसन्धिसंस्थितम्, बकुल-चम्पका-ऽशोक-पुन्नाग-नागाकुलम्, प्रशान्तमृग-मृगाधिपप्रमुखविरुद्धश्वापदगणम्, सुरभिहविर्गन्धगर्भितोद्दामधूमपटलम्, विमलसलिलगिरिनदीप्रसाधि

गाहियपरियडपेरन्तं, तावसजणजणियहिययपरिओसं सुपरिओसं नाम तवोवणं ति।

संपाविऊण य तओ दीहद्धाणपरिखेइयसरीरो। वीसमिऊण मुहुत्तं तवोवणं अह पविट्ठो सो ॥

दिट्ठो य तेण वक्कल-वियडजडा-ऽजिण-तिदण्डधारी य। भूइरयकयतिपुण्डो आसन्नकमण्डलू सोमो ॥

भिसियाए सुहनिसण्णो कयलीहरयन्तरम्मि झाणगओ। परियत्तेन्तो दाहिणकरेण रुद्दक्खमालं ति ॥

मन्तक्खरजवणेण य ईसिं वियलन्तकण्ठउट्ठउडो। नासाए निमियदिट्ठी विणिवारियसेसवावारो ॥

अयसिमयजोगपट्टयपमाणसंगयकयासणविसेसो। तावसकुलप्पहाणो अज्जवकोडिण्णनामो त्ति ॥

पिच्छिऊण य हरिसवसुल्लसियरोमञ्चेणं, धरणिनिमियजाणुकरयलेणं, उत्तिमङ्गेणं पुणो पुणो पहयखिइतलेणं 'अहो! धन्नो, अहो! धन्नो' त्ति भणमाणेणं पणमिओ तेणं। तेण वि य तं तहा पेच्छिऊण अतिहिबहुमाणकरणलालसेण झाणजोगं पमोत्तूणं सागय-

---

तनिकटपर्यन्तम्, तापसजनजनितहृदयपरितोषं सुपरितोषं नाम तपोवनमिति।

संप्राप्य च ततो दीर्घाध्वपरिखेदितशरीरः। विश्रम्य मुहूर्तं तपोवनमथ प्रविष्टः सः ॥

दृष्टश्च तेन वल्कल-विकटजटा-ऽजिन-त्रिदण्डधारी च। भूतिरजस्कृतत्रिपुण्ड्रः आसन्नकमण्डलुः सोमः ॥

वृषिकायां (कुशासने) सुखनिषण्णः कदलीगृहान्तरे ध्यानगतः। परिवर्तयन् दक्षिणकरेण रुद्राक्षमालामिति ॥

मन्त्राक्षरजपनेन च ईषद् विचलत्कण्ठौष्ठपुटः। नासायां स्थापितदृष्टिः विनिवारितशेषव्यापारः ॥

अतसीमययोगपट्टकप्रमाणसंगतकृतासनविशेषः। तापसकुलप्रधानः आर्जवकौण्डिन्यनामेति ॥

प्रेक्ष्य च हर्षवशोल्लसितरोमाञ्चेन, धरणीस्थापितजानुकरतलेन, उत्तमाङ्गेन पुनः पुनः प्रहतक्षितितलेन 'अहो! धन्यः, अहो! धन्यः'

वयणपुरस्सरं 'अहो ! आसणं आसणं' ति भणमाणेणं बहुमन्निओ । तओ उडयङ्गणनिसेवितावसकुमारोवणीए इसिणा य 'उवविससु एत्थ' त्ति भणिओ सविणयं उवविट्ठो विट्ठरे त्ति। पुच्छिओ य इसिणा-'कुओ भवं आगओ ?' त्ति । तओ तेण सवित्थरो निवेइओ से अत्तणो वुत्तन्तो । भणिओ य इसिणा-वच्छ ! पुव्वकयकम्मपरिणइवसेणं एवं परिकिलेसभाइणो जीवा हवन्ति । ता नरिन्दावमाणपीडियाणं, दारिद्दुक्खपरिभूयाणं, दोहग्ग-कलङ्कदूमियाणं, इट्ठजणविओगदहणतत्ताण य एयं परं इह-परलोयसुहावहं परमनिव्वुइट्ठाणं ति । एत्थ—

पेच्छन्ति न मङ्गकयं दुक्खं अवमाणणं च लोगाओ । दोग्गइपडणं च तहा वणवासी सव्वहा धन्ना ॥

एवमणुसासिएण भणियं अग्गिसम्मेणं-भगवं ! एवमेयं, न संदेहो त्ति । तो जइ भयवओ ममोवरि अणुकम्पा, उचिओ वा अहं एयस्स वयविसेसस्स, ता करेह मे एयवयप्पयाणेणाणुग्गहं ति । इसिणा भणियं-वच्छ ! वेरग्गमग्गाणुगओ तुमं ति करेमि अणुग्गहं,

---

इति भणता प्रणतस्तेन । तेनाऽपि च तं तथा प्रेक्ष्य अतिथिबहुमानकरणलालसेन ध्यानयोग प्रमुच्य स्वागतवचनपुरस्सरम् 'अहो ! आसनम् आसनम्' इति भणता बहुमानितः । तत उटजाङ्गणनिषेवितापसकुमारोपनीते ऋषिणा च 'उपविश अत्र' इति भणितः सविनयम् उपविष्टो विष्टरे इति । पृष्ट ऋषिणा-'कुतो भवान् आगतः' ? इति । ततस्तेन सविस्तरो निवेदितस्तस्य आत्मनो वृत्तान्तः । भणितश्च ऋषिणा-वत्स ! पूर्वकृतकर्मपरिणतिवशेनैवं परिक्लेशभाजिनो जीवा भवन्ति । तस्माद् नरेन्द्रापमानपीडितानाम्, दारिद्र्य-दुःखपरिभूतानाम्, दौभाग्य-कलङ्कदूनानाम्, इष्टजनवियोगदहनतप्तानां चैतत् परं इह-परलोकसुखावहं परमनिर्वृतिस्थानमिति । अत्र-

प्रेक्षन्ते न संगकृतं दुःखम्, अवमाननं च लोकात् । दुर्गतिपतनं च तथा वनवासिनः सर्वथा धन्याः ॥

एवमनुशासितेन भणितमग्निशर्मणा-भगवन् ! एवमेतत्, न संदेह इति। तस्माद् यदि भगवतो ममोपरि अनुकम्पा, उचितो वा अहं

को अन्नो एयस्स उचिओ त्ति। तओ अइक्कन्तेसु कइवयदिणेसु संसिऊण य सवित्थरं निययमायारं, पसत्थे तिहि-करण-मुहुत्त-जोग-लग्गे दिन्ना से तावसदिक्खा। महापरिभवजणियवेरग्गाइसयभाविएण याणेण तम्मि चेव दिक्खादिवसे सयलतावसलोयपरियरियगुरुसमक्खं कया महापइन्ना। जहा-जावज्जीवं मए मासाओ मासाओ चेव भोत्तव्वं, पारणगदिवसे य पढमपविट्ठेणं पढमगेहाओ चेव लाभे वा अलाभे वा नियत्तियव्वं, न गेहन्तरमभिगन्तव्वं ति। एवं च कयपइन्नस्स तस्स, जहाकयं पइन्नमणुपालिन्तस्स अइक्कन्ता बहवे पुव्वलक्खा। तवोवणासन्नवसन्तउरनिवासिणो य लोयस्स गुणराइणो जाओ तं पइ अईव भत्तिबहुमाणो। अहो! अयं महातवस्सी इहलोयनिप्पिवासो, सरीरे वि दढमप्पडिबद्धो, एयस्स सफलं जीवियं ति। भणियं च-

जणपक्खवायबहुमाणिणा वि जत्तो गुणेसु कायव्वो। आवज्जन्ति गुणा खलु अबुहं पि जगं अमच्छरियं॥

एतस्य व्रतविशेषस्य, तस्मात् कुरु मम एतद्व्रतप्रदानेन अनुग्रहमिति। ऋषिणा भणितम्-वत्स! वैराग्यमार्गानुगतस्त्वमिति करोमि अनुग्रहम्, कोऽन्य एतस्य उचित इति। ततोऽतिक्रान्तेषु कतिपयदिनेषु शंसित्वा च सविस्तरं निजकमाचारम्, प्रशस्ते तिथि-करण-मुहूर्त-योग-लग्ने दत्ता तस्य तापसदीक्षा। महापरिभवजनितवैराग्यातिशयभावितेन चानेन तस्मिन्नेव दीक्षादिवसे सकलतापसलोकप-रिकरितगुरुसमक्षं कृता महाप्रतिज्ञा। यथा— यावज्जीवं मया मासाद् मासाद् एव भोक्तव्यम्, पारणकदिवसे च प्रथमप्रविष्टेन प्रथम गेहाद् एव लाभे वाऽलाभे वा निवर्तितव्यम्, न गेहान्तरमभिगन्तव्यमिति। एवं च कृतप्रतिज्ञस्य तस्य यथाकृतां प्रतिज्ञामनुपालयतोऽतिक्रान्तानि बहूनि पूर्वलक्षाणि। तपोवनासन्नवसन्तपुरनिवासिनश्च लोकस्य गुणरागिणो जातस्तं प्रति अतीव भक्ति-बहुमानः। अहो! अयं महातपस्वी इहलोकनिष्पिपासः, शरीरेऽपि दृढमप्रतिबद्धः, एतस्य सफलं जीवितमिति। भणितं च—

जनपक्षपातबहुमानिनाऽपि यत्नो गुणेषु कर्तव्यः। आवर्जयन्ति गुणाः खलु अबुधमपि जनममात्सर्यम्॥

इओ य पुण्णचन्दो राया कुमारगुणसेणं कयदारपरिग्गहं रज्जे अभिसिञ्चिऊण सह कुमुइणीए देवीए तवोवणवासी जाओ। सो य कुमारगुणसेणो अणेयसामन्तपणिवइयचलणजुयलो, निज्जियनियमण्डलाहियाणेगमण्डलो, दसदिसि विमट्ठनिम्मलविस्सुयजसो, धम्म-त्थ-कामलक्खणतिवग्गसंपायणरओ महाराया संवुत्तो त्ति। अन्नया य कालक्कमेणेव जहासुहं सयलजणसलाहणिज्जं सह वसंतसेणाए महादेवीए रज्जसोक्खं अणुहवन्तो आगओ वसन्तउरं, पविट्ठो य महामङ्गलोवयारेणं, पूजिओ य पउरेहिं, गओ समं तेहिं पाउसलीलावलम्बिसोहियं विमाणच्छन्दयं नाम पासायं। जत्थ मेहदुद्दिणच्छायाणुयारिणीओ बहलकालागरुधूमसंतईओ, सोयामणीओ विव विहायन्ति रयणावलीओ, जलधाराओ विव दीसंति मुत्तावलीओ, बलायापन्तियाओ विव विहायन्ति चमरपन्तियाओ, इन्दाउहच्छायावहारिणीओ पलम्बियाओ पट्टंसुयमालाओ, गन्धोयगावसेयसुरभिगन्धा भूमिभागा, रुण्टन्तमहुयरकुलाउलावइण्णा पुप्फोवयारा। किं बहुणा जंपिएणं ?

इतश्च पूर्णचन्द्रो राजा कुमारगुणसेनं कृतदारपरिग्रहं राज्येऽभिषिच्य सह कुमुदिन्या देव्या तपोवनवासी जातः। स च कुमारगुणसेनोऽनेकसामन्तप्रणिपतितचरणयुगलः निर्जितनिजमण्डलाधिकानेकमण्डलः दशदिशि विशसितनिर्मलविश्रुतयशाः, धर्मा ऽर्थ-कामलक्षण त्रिवर्गसंपादनरतो महाराजः संवृत्त इति। अन्यदा च कालक्रमेणैव यथासुखं सकलजनश्लाघनीयं सह वसन्तसेनया महादेव्या राज्यसौख्यमनुभवन् आगतो वसन्तपुरम्, प्रविष्टश्च महामङ्गलोपचारेण, पूजितश्च पौरैः, गतः समं तैः प्रावृड्लीलावलम्बिशोभितं विमानच्छन्दकं नाम प्रासादम्। यत्र मेघदुर्दिनच्छायानुकारिण्यो बहलकालागुरुधूमसंततयः, सौदामिन्य इव विभान्ति रत्नावल्यः, जलधारा इव दृश्यन्ते मुक्तावल्यः, बलाकापङ्क्तय इव विभान्ति चामरपङ्क्तिकाः, इन्द्रायुधच्छायापहारिण्यः प्रलम्बिताः पट्टांशुकमालाः, गन्धोदकावसेकसुरभिगन्धा भूमिभागाः, रटन्मधुकरकुलाकुलावतीर्णाः पुष्पोपचाराः। किं बहुना जल्पितेन ?

पुरिसाण मोहनिद्दासुत्ताण त्ति मिमिणयं पिव कहेइ । पुव्विं कयाण वियडं फलं च जो भागधेयाणं ॥

तत्थ य जहाणुरूवं पउरजणं सम्माणेऊण विसज्जिएसु तेसु, विविहणाडय-च्छन्द-नट्टियाइणा मणहरेण विणोएण विगमिऊण तं अहोरत्तं, निइयदिवसम्मि य संपाइयसयलगोसकिच्चो उचियवेलाए चेव निग्गओ वाहियालिं । परिवाहिया य तेणं बहवे वल्हीय-तुरुक्क-वज्जराइया आसा । तज्जणियखेयावणयणनिमित्तं च उवविट्ठो वाहियालीतडनिविट्ठे सहस्सम्बवणुज्जाणे । एत्थन्तरम्मि गहियनारङ्गकढिणया आगया दुवे तावसकुमारया । दिट्ठो य णेहि राया, अभिनन्दिओ य ससमयपसिद्धाए आसीसाए । अब्भुट्ठाणासणपयाणाइणा उवयारेण बहुमन्निया य राइणा । भणियं च णेहिं-महाराय! सुगिहीयनामधेएण अम्हे कुलवइणा भयओ चउरासमगुरुस्स, सुकयधम्माधम्मववत्थस्स सरीरपउत्तिपरियाणणनिमित्तं पेसिया । एवं सोऊण संपयं तुमं पमाणं ति । राइणा भणियं—कहिं सो भयवं कुलाइ[1] त्ति। तेहिं भणियं—इओ नाइदूरे सुपरिओसनामे तवोवणे त्ति । तओ य सो राया भत्ति-कोउगेहिं गओ तं तवोवणं ति ।

पुरुषाणां मोहनिद्रासुप्तानामपि स्वप्नमिव कथयति । पूर्वं कृतानां विकटं फलं च यो भागधेयानाम् ॥

तत्र च यथानुरूपं पौरजनं संमान्य, विसर्जितेषु तेषु विविधनाटक-च्छन्द-नर्तितादिना मनोहरेण विनोदेन विगमय्य तद् अहोरात्रम्, द्वितीयदिवसे च संपादितसकलगोस (प्रभात) कृत्यः उचितवेलायां चैव निर्गतो वाह्यालिम् । परिवाहिताश्च तेन बहवो बाल्हीक-तुरुष्क-बर्बरादिका अश्वाः । तज्जनितखेदापनयननिमित्तं च उपविष्टो वाह्यालीतटनिविष्टे सहस्राम्रवनोद्याने । अत्रान्तरे गृहीतनारङ्गकठिनकौ आगतौ द्वौ तापसकुमारकौ । दृष्टश्च आभ्यां राजा, अभिनन्दितश्च स्वसमयप्रसिद्धया आशिषा । अभ्युत्थानासनप्रदानादिनोपचारेण बहुमानितौ च राज्ञा । भणितं चाभ्याम्-महाराज ! सुगृहीतनामधेयेन आवां कुलपतिना भवतः चतुराश्रमगुरोः सुकृतधर्माऽधर्मव्यवस्थस्य

[1] अभ्यरीदकस्थानम् ।

दिट्ठा य तेणं तत्थ बहवे तावसा कुलवई य। तओ संजायसंवेगेणं जहारिहमभिवन्दिया। उवविट्ठो कुलवइसमीवे, ठिओ य तेण सह धम्मकहावावारेण कंचि कालं। तओ भणिओ य णेण सविणयं पणमिऊण भयवं कुलवई। जहा करेहि मे पसायं सयलपरिवारपरिगओ मम गेहे आहारगहणेणं। कुलवइणा भणियं–वच्छ! एवं। किं तु एगो अग्गिसम्मो नाम महातावसो, सो य न पइदियहं भुञ्जइ, किं तु मासाओ मासाओ, तत्थ वि य पारणगदिवसे पढमपविट्ठो पढमगेहाओ चेव लाभे वा अलाभे वा नियत्तइ, न गेहन्तरमुवगच्छइ। ता त महातवस्सिं मोत्तूण पडिवन्ना ते पत्थणा। राइणा भणियं–भगवं! अणुग्गिहीओ म्हि। अह कहिं पुण सो महातावसो? पेच्छामि णं ताव, करेमि तस्स दरिसणेण अप्पाणं विगयपावं। कुलवइणा भणियं–वच्छ! एयाए सहयारवीहियाए हेट्ठा झाणवरगओ चिट्ठइ। तओ सो राया ससंभन्तो गओ सहयारवीहियं। दिट्ठो य तेण पउमासणोवविट्ठो, थिरधरियनयणजुयलो, पसन्तविचित्तचित्तवावारो,

---

शरीरप्रवृत्तिपरिज्ञाननिमित्तं प्रेषितौ। एवं श्रुत्वा सांप्रतं त्वं प्रमाणमिति। राज्ञा भणितम्–कुत्र स भगवान् कुलपतिः? इति। ताभ्यां भणितम्–इतो नातिदूरे सुपरितोषनाम्नि तपोवने इति। ततश्च स राजा भक्ति-कौतुकाभ्यां गतस्तत् तपोवनमिति। दृष्टाश्च तेन तत्र बहवस्तापसाः, कुलपतिश्च। ततः संजातसंवेगेन यथार्हमभिवन्दिताः। उपविष्टः कुलपतिसमीपे, स्थितश्चतेन सह धर्मकथाव्यापारेण कंचित् कालम्। ततो भणितश्चानेन सविनयं प्रणम्य भगवान् कुलपतिः। यथा कुरु मम प्रसाद सकलपरिवारपरिगतो मम गेहे आहारग्रहणेन। कुलपतिना भणितम्–वत्स! एवम्। किन्तु एकोऽग्निशर्मा नाम महातापसः, स च न प्रतिदिवसं भुङ्क्ते, किन्तु मासाद् मासात्, तत्राऽपि च पारणकदिवसे प्रथमप्रविष्टप्रथमगेहाद् एव लाभे वाऽलाभे वा निवर्तते, न गेहान्तरमुपगच्छति। तस्मात् तं महातपस्विनं मुक्त्वा प्रतिपन्ना तव प्रार्थना। राज्ञा भणितम्–भगवन्! अनुगृहीतोऽस्मि। अथ कुत्र पुनः स महातापसः? प्रेक्षे तं तावत्, करोमि तस्य दर्शनेन आत्मानं विगतपापम्। कुलपतिना भणितम्–वत्स! एतस्यां सहकारवीथिकायां अधस्ताद् ध्यानवरगतस्तिष्ठति। ततः

किंपि तहाविहं झाणं झायन्तो अग्गिसम्मतावसो त्ति। तओ राइणा हरिसवसपयट्टन्तपुलएण पणमिओ। तेण वि य आसीसाए सबहुमाणमेवाहिणन्दिओ, 'सागयं ते' भणिऊण 'उवविसाहि' त्ति संलत्तो। उवविसिऊण सुहासणत्थेण भणियं राइणा–भयवं! किं ते इमस्स महादुक्करस्स तवचरणववसायस्स कारणं?। अग्गिसम्मतावसेण भणियं–भो महासत्त! दारिद्ददुक्खं, परपरिहवो, विरूवया, तहा महारायपुत्तो य गुणसेणो नाम कल्लाणमित्तो त्ति। तओ संजायनियनामासंकेण भणियं राइणा–भयवं! चिट्ठउ ताव दारिद्ददुक्खाइयं ववसायकारणं, अह कहं पुण महारायपुत्तो गुणसेणो नाम कल्लाणमित्तो त्ति। अग्गिसम्मतावसेण भणियं-महासत्त! एवं कल्लाणमित्तो। सुण–

जे होन्ति उत्तमनरा धम्मं सयमेव ते पवज्जन्ति। मज्झिमपयई संचोइया उ न कयाइ वि जहन्ना॥

स राजा ससंभ्रान्तो गतः सहकारवीथिकाम्, दृष्टश्च तेन पद्मासनोपविष्टः, स्थिरधृतनयनयुगलः, प्रशान्तविचित्रचित्तव्यापारः, किमपि तथाविधं ध्यानं ध्यायन् अग्निशर्मतापस इति। ततो राज्ञा हर्षवशप्रवर्तमानपुलकेन प्रणतः। तेनाऽपि च आशिषा सबहुमानमेव अभिनन्दितः, 'स्वागतं तव' भणित्वा 'उपविश' इति संलपितः। उपविश्य सुखासनस्थेन भणितं राज्ञा–भगवन्! किं तव अस्य महादुष्करस्य तपश्चरणव्यवसायस्य कारणम्?। अग्निशर्मतापसेन भणितम्–भो महासत्त्व! दारिद्र्यदुःखम्, परपरिभवः, विरूपता, तथा महाराजपुत्रश्च गुणसेनो नाम कल्याणमित्रम्–इति। ततः संजातनिजनामाऽऽशङ्केन भणितं राज्ञा–भगवन्! तिष्ठतु तावद् दारिद्र्यदुःखादिकं व्यवसायकारणम्, अथ कथं पुनर्महाराजपुत्रो गुणसेनो नाम कल्याणमित्रम्–इति। अग्निशर्मतापसेन भणितम्–महासत्त्व! एवं कल्याणमित्रम्। शृणु–

ये भवन्ति उत्तमनरा धर्मं स्वयमेव ते प्रपद्यन्ते। मध्यमप्रकृतयः संचोदितास्तु न कदाचिदपि जघन्याः॥

---

१ पायइ पु॰ क्र

चोएइ य जो धम्मे जीवं विविहेण केणइ नएण । संसारचारयगयं सो नणु कल्लाणमित्तो त्ति ॥

तओ राइणा कुमारवुत्तन्तं सुमरिऊण भणियं लज्जावणयवयणेण–भयवं ! कहं पुण तुमं तेण तेलोक्कबन्धुभूए धम्मे चोइओ ? । अग्गिसम्मतावसेण भणियं–भो महासत्त ! नानाविहाओ चोयणाओ, ता कहंचि निमित्तमेत्तणं चेय चोइओ म्हि । तओ राइणा चिन्तियं । अहो ! से महाणुभावया, परिभवो वि याणेणोवयारचोयण त्ति गहिओ । परपरिवायं च परिहरन्तो सुद्धसहावत्तणओ न तं पि मन्नेइ । अहो ! दारुणं अकज्जं मए पावकम्मेणाणुचिट्ठियं । ता कहेमि से अकज्जायरणकलङ्कदूसियं अप्पाणं । एवं चिन्तिऊण जंपियमणेण–भयवं ! अहं सो महापावकम्मयारी तुह हिययसंतावयारी अगुणसेणो त्ति । अग्गिसम्मतावसेण भणियं–भो महाराय ! सागयं ते । कह तुमं अगुणसेणो ? जेण तए परपिण्डजीवियमेत्तविहवो अहं ईइसिं तवविभूइं पाविओ त्ति । राइणा भणियं–अहो !

चोदयति च यो धर्मे जीवं विविधेन केनचिद् नयेन । संसारचारकगतं स ननु कल्याणमित्रम्–इति ॥

ततो राज्ञा कुमारवृत्तान्तं स्मृत्वा भणितं लज्जावनतवदनेन–भगवन् ! कथं पुनस्त्वं तेन त्रैलोक्यबन्धुभूते धर्मे चोदितः ? । अग्निशर्मतापसेन भणितम्–भो महासत्त्व ! नानाविधास्तच्चोदनाः, तस्मात् कथंचिद् निमित्तमात्रेण एव चोदितोऽस्मि । ततो राज्ञा चिन्तितम् । अहो ! अस्य महानुभावता, परिभवोऽपि चानेन उपकारचोदनेति गृहीतः । परपरिवादं च परिहरन् शुद्धस्वभावत्वाद् न तमपि मन्यते । अहो ! दारुणमकार्यं मया पापकर्मणाऽनुष्ठितम् । तस्मात् कथयामि तस्य अकार्याचरणकलङ्कदूषितमात्मानम् । एवं चिन्तयित्वा जल्पितमनेन–भगवन् ! अहं स महापापकर्मकारी तव हृदयसंतापकारी अगुणसेन इति । अग्निशर्मतापसेन भणितम्–भो महाराज ! स्वागतं तव । कथं त्वमगुणसेनः, येन त्वया परपिण्डजीवितमात्रविभवः अहं ईदृशीं तपोविभूतिं प्रापित इति । राज्ञा भणितम्–अहो !

---

१ परिहरे वि क । २ गहिया क । ३ णुट्ठियं क । ४ संपाविओ क

ते महाणुभावया। किं वा तवस्सिजणो पियं वज्जिय अन्नं भणिउं जाणइ ? । न य मियङ्कबिम्बाओ अङ्गारवुट्ठीओ पडन्ति । ता अलं एइणा । भयवं ! कया ते पारणगं भविस्सइ? । अग्गिसम्मेण भणियं—महाराय ! पञ्चहिं दिणेहिं। राइणा भणियं—भयवं ! जइ ते नाईव उवरोहो, ता कायव्वो मम गेहे पारणएणं पसाओ । विन्नाओ य मए कुलवइणो सयासाओ तुज्झ पइन्नाविसेसो, अओ अणागयं पत्थेमि त्ति । अग्गिसम्मेण भणियं—महाराय ! आगच्छउ ताव सो दियहो, को जाणइ अन्तरे किंपि भविस्सइ । अवि य —

एयं करेमि एण्हिं एयं काऊण पुण इमं कल्लं । काहिमि को णु मन्नइ, सुविणयतुल्लम्मि जियलोए ? ॥

अन्नं च महाराय !

धी जियलोयसहावो जहियं नेहाणुरायकलिया वि। जे पुव्वण्हे दिट्ठा, ते अवरण्हे न दीसन्ति ॥

ता महाराय ! आगच्छउ ताव सो दियहो त्ति । राइणा भणियं—भयवं ! विग्घं मोत्तूण संपज्जइ । अग्गिसम्मतावसेण भणियं—

तव महानुभावता, किं वा तपस्विजनः प्रियं वर्जयित्वा अन्यद् भणितुं जानाति? । न च मृगाङ्कबिम्बाद् अङ्गारवृष्टयः पतन्ति । तस्मात् अलमेतेन । भगवन् ! कदा तव पारणकं भविष्यति ? अग्निशर्मणा भणितम्—महाराज ! पञ्चभिर्दिनैः । राज्ञा भणितम्—भगवन् ! यदि तव नातीव उपरोधः[1], तस्मात् कर्तव्यो मम गेहे पारणकेन प्रसादः । विज्ञातश्च मया कुलपतेः सकाशात् तव प्रतिज्ञाविशेषः, अतोऽनागतं प्रार्थयामीति । अग्निशर्मणा भणितम्—महाराज ! आगच्छतु तावत् स दिवसः, को जानाति अन्तरे किमपि भविष्यति । अपि च—

एतत् करोमि इदानीं एतत् कृत्वा पुनरिदं कल्यम् । करिष्यामि, को नु मन्यते स्वप्नतुल्ये जीवलोके ? ॥

अन्यच्च महाराज !

धिग् जीवलोकस्वभावम् , यत्र स्नेहानुरागकलिता अपि । ये पूर्वाह्णे दृष्टाः तेऽपराह्णे न दृश्यन्ते ॥

---

1 न हि क

जइ एवं ते निब्बन्धो, ता एवं पडिवन्ना ते परथणा। तओ राया पणमिऊण हरिसवसपुलइयङ्गो कंचि वेलं गमेऊण पविट्ठो नयरं। कया कुलवइणो सपरिवारस्स भत्तिविभवाणुरूवा पूया। अइक्कन्तेसु य पञ्चसु दिणेसु पारणगदिवसे पढमं चेव पविट्ठो अग्गिसम्मतावसो पारणगनिमित्तं रायगेहं ति। तम्मि य दियहे कहंचि राइणो गुणसेणस्स अतीव सीसवेयणा समुप्पन्ना। तओ आउलीहूयं सव्वं चेव रायउलं, पविट्ठा य तत्थ वेज्जसत्थविसारया वेज्जा, उग्गाहेन्ति नाणाविहाओ चिगिच्छासंहियाओ, पीसिज्जन्ति बहुविहाइं ओसहाइं, दिज्जन्ति सिरखेयावहारिणो विचित्तरयणलेवा। किंकायव्वमूढा उवहसियसुक्कविहस्सइबुद्धिविहवा वि मन्तिणो। पत्थुयं पुरोहिएहिं मन्तगब्भिणाहुइप्पयाणसारं सन्तिकम्मं। तहा मिलाणसुरहिमल्लदामसोहं, सुवण्णगड्डुवियलियङ्गरायं, बाहजलधोयकवोलपत्तलेहं, करयलपणामियपव्वायवयणपङ्कयं, उव्विग्गमन्तेउरं। तहा विरत्तकन्दुयकीलं, परिचत्तचित्तयम्मवावारं, विरयगीयनच्चणारम्भं, अवहरियभूसणकलावं,

तस्मात् महाराज! आगच्छतु तावत् स दिवस इति। राज्ञा भणितम्! विघ्नं मुक्त्वा संगच्छन्ताम्। अग्निशर्मतापसेन भणितम्–यदि एवं तव निर्बन्धः, तस्माद् एवं प्रतिपन्ना तव प्रार्थना। ततो राजा प्रणम्य हर्षवशपुलकिताङ्गः कांचिद् वेलां गमयित्वा प्रविष्टो नगरम्। कृता कुलपतेः सपरिवारस्य भक्तिविभवानुरूपा पूजा। अतिक्रान्तेषु च पञ्चसु दिनेषु पारणकदिवसे प्रथममेव प्रविष्टोऽग्निशर्मतापसः पारणकनिमित्तं राजगेहमिति। तस्मिंश्च दिवसे कथंचिद् राज्ञो गुणसेनस्य अतीव शीर्षवेदना समुत्पन्ना। तत आकुलीभूतं सर्वमेव राजकुलम्। प्रविष्टा च तत्र वैद्यशास्त्रविशारदा वैद्याः, उद्ग्राहयन्ति नानाविधाः चिकित्सासंहिताः, पिष्यन्ते बहुविधानि औषधानि, दीयन्ते शिरःखेदापहारिणो विचित्ररत्नलेपाः। किंकर्तव्यमूढा उपहसितशुक्र-बृहस्पतिबुद्धिविभवा अपि मन्त्रिणः। प्रस्तुतं पुरोहितैः मन्त्रगर्भिताऽऽहुतिप्रदानसारं शान्तिकर्म। तथा म्लानसुरभिमाल्यदामशोभम्, सुवर्णकाढयविचलिताऽङ्गरागम्, बाष्पजलधौत-

१ सिरो क. २ ॰गब्भयुद्ध॰ क।

दुम्मणनिमणं कन्नयन्तेउरं। वेत्तजट्ठिनिमियविच्छायमुहसोहा य पडिहारा, रन्नो वेयणाइमयखुयगा दुम्मणा मडहकञ्चुइया, परिचत्तनियगवावारा विचित्ता सूयगारप्पमुहा निओगकारिणो त्ति। तओ सो अग्गिसम्मतावसो एवंविहे रायकुले कंचि वेलं गमेऊण वयणमेत्तेणावि केणावि अकयपडिवत्ती निग्गओ रायगेहाओ त्ति। निग्गन्तूण गओ तवोवणं, दिट्ठो य तावसेहिं, भणिओ य तेहिं-भयवं! अकयपारणगो विव परिमिलाणदेहो लक्खिज्जसि, ता किं न कयं पारणयं? न पविट्ठो इयाणिं तत्थ रन्नो गुणसेणस्स गेहं? त्ति। अग्गिसम्मतावसेण भणियं-पविट्ठो अहं नरिन्दगेहं, किंतु सो नूणं अपडुसरीरो राया, जओ उव्विग्गपरियणं सव्वं चेव तं मए गेहमवलोइयं, तओ अहं तं तहाविहं दट्ठुमसंहतो लहुं चेव निग्गओ त्ति। तावसेहिं भणियं-को संदेहो, दढमपडुसरीरो राया, अन्नहा कहं

कपोलन्यस्तहस्तम्, करतलप्रणामितम्लानवदनपङ्कजम्, उद्विग्नम्-अन्तःपुरम्। तथा विरक्तकन्दुकक्रीडम्, परित्यक्तचित्रकर्मव्यापारम्, विगतगीत-नर्तनाऽऽरम्भम्, अपहस्तितभूषणकलापम्, दुर्मनोनिमनः कन्यकान्तःपुरम्। वेत्रयष्टिस्थापित-विच्छायमुखशोभाश्च प्रतीहाराः, राज्ञो वेदनातिशयमूचकाः, दुर्मनसो लघुकञ्चुकिनः, परित्यक्तनिजकव्यापाराः, विचित्राः सूपकारप्रमुखा नियोगकारिण इति। ततः सोऽग्निशर्मतापसः एवंविधे राजकुले काञ्चिद् वेलां गमयित्वा वचनमात्रेणाऽपि केनापि अकृतप्रतिपत्तिर्निर्गतो राजगेहादिति। निर्गत्य गतस्तपोवनम्, दृष्टश्च तापसैः, भणितश्च तैः-भगवन्! अकृतपारणक इव परिम्लानदेहो लक्ष्यसे, तस्मात् किं न कृतं पारणकम्? न प्रविष्ट इदानीं तत्र राज्ञो गुणसेनस्य गेहम्? इति। अग्निशर्मतापसेन भणितम्-प्रविष्टोऽहं नरेन्द्रगेहम्, किन्तु स नूनम्-अपटुशरीरो राजा, यत उद्विग्नपरिजनं सर्वमेव तद् मया गेहमवलोकितम्, ततोऽहं तत् तथाविधं द्रष्टुमसहमानः लघ्वेव निर्गत इति। तापसैर्भणितम्-कः संदेहः, दृढम्-अपटुशरीरो राजा, अन्यथा कथं तादृश्यां तपस्विजनभक्त्यां भगवतः पारणक दात्वा स्वयमेव दत्तावधानो न

1 °दि° क

तारिसीए तवस्सिजणभत्तीए भयवओ पारणगं मुणेऊण सयं चेव दत्तावहाणो न होइ ?। अन्नं च–अईव भगवओ उवरि भत्तिबहुमाणो तस्स नरवइस्स, जेण कुलवइसमक्खं बहुयं सब्भूयगुणकित्तणं तेण कयं आसि। अग्गिसम्मतावसेण भणियं–आरोग्गं से हवउ गुरुयणपूयगस्स, किं मम आहारेणं ति। पडिवन्नो मासोववासवयं॥ इओ य राइणा गुणसेणेणं उवसन्तसीसवेयणेणं पुच्छिओ परियणो। अज्ज तस्स महातवस्सिस्स पारणगदियहो, तो सो आगओ, पूइओ वा केणइ न व त्ति ?। तेहिं संलत्तं–महाराय! आगओ आसि, किंतु तुह सीसवेयणाजणिअहिययसंतावपरिचत्तनिययकज्जवावारे परियणे न केणइ संपूइओ पुच्छिओ वा। अमुणियवुत्तन्तो य विचित्ते परियणमवलोइऊण कंचि कालं गमेऊण उव्विग्गो विय निग्गओ रायगेहाओ त्ति। राइणा भणियं–अहो! मे अहन्नया; चुक्को मि महालाभस्स[1], संपत्तो य तवस्सिजणदेहपीडाकरणेण महन्तं अणत्थं ति। एवं विलविऊणं बिइयदियहे पहायसमए चेव गओ तवो-

भवति ?। अन्यच्च–अतीव भगवत उपरि भक्तिबहुमानः तस्य नरपतेः, येन कुलपतिसमक्षं बहुकं सद्भूतगुणकीर्तनं तेन कृतमासीत्। अग्निशर्मतापसेन भणितम्–आरोग्यं तस्य भवतु गुरुजनपूजकस्य, किं मम आहारेण इति प्रतिपन्नो मासोपवासव्रतम्। इतश्च राज्ञा गुणसेनेन उपशान्तशीर्षवेदनेन पृष्टः परिजनः। अद्य तस्य महातपस्विनः पारणकदिवसः, ततः स आगतः, पूजितो वा केनचिद् न वा? इति। तैः संलपितम्–महाराज! आगत आसीत्, किन्तु तव शीर्षवेदनाजनितहृदयसंतापपरित्यक्तनिजकार्यव्यापारे परिजने न संपूजितः, पृष्टो वा। अज्ञातवृत्तान्तश्च विचित्रं तव परिजनमवलोक्य कंचित् कालं गमयित्वा उद्विग्न इव निर्गतो राजगेहादिति। राज्ञा भणितम्–अहो! मम अधन्यता, भ्रष्टोऽस्मि महालाभात्, संप्राप्तश्च तपस्विजनदेहपीडाकरणेन महान्तमनर्थमिति। एवं विलप्य द्वितीयदिवसे प्रभातसमये एव गतस्तपोवनम्। दृष्टाश्च तेन कुलपतिप्रमुखा बहवः तापसाः, लज्जा-विनयावनतोत्तमाङ्गेन प्रणताश्चानेन

[1] महालाहस्स क

यणं। दिट्ठा य तेण कुलवइप्पमुहा वहवे तावसा, लज्जा-विणओणयउत्तिमङ्गेण पणमिया य पेयं विहिणा। अहिणन्दिओ य आसीसाए कुलवइप्पमुहेहिं सव्वतावसेहिं। 'उवविससु महाराय! सागयं ते' भणिओ य कुलवइणा। तओ राया अवणयउत्तिमङ्गो, सविसेस-लज्जामन्थरो, विमुक्कदीहनीसासं उवविट्ठो कुलवइस्स पुरओ। तं च तहा विचित्तं रायाणं दट्ठूणं भणियमणेणं-वच्छ! उव्विग्गो विय लक्खीयसि, ता कहेहि मे उव्वेयकारणं, जइ अकहणीयं न होइ। राइणा भणियं-अत्थि भगवओ वि नाम अकहणीयं। अन्नं च-अकहणीयवत्थुविसउव्विग्गस्स न जुत्तं तवोवणागमणं। कुलवइणा भणियं-साहु वच्छ! साहु, उचिओ ते विवेगो, ता किं-उव्वेयकारणं ति?। राइणा भणियं-भगवओ आण त्ति करिय कहीयइ; अन्नहा कहं ईइसं निसंसचरियं कहिउं पारियइ?। कुलवइणा भणियं वच्छ! सव्वस्स जणणीभूओ खु होइ तवस्सिजणो। तओ का तं पइ लज्ज त्ति। ता कहेउ भवं, जेण मुणियवुत्तन्तो भविय केणइ उवाएणऽवणेमि तं उव्वेयं ति। राइणा भणियं-भयवं! जइ एवं, ता सुणसु। एस अग्गिसम्मतावसो पढमं चेय मम मन्दपु-

---

विधिना। अभिनन्दितश्च आशिषा कुलपतिप्रमुखैः सर्वतापसैः। 'उपविश महाराज! स्वागतं तव' भणितश्च कुलपतिना। ततो राजा अवनतोत्तमाङ्गः, सविशेषलज्जामन्थरः, विमुक्तदीर्घनिःश्वासम्-उपविष्टः कुलपतेः पुरतः। तं च तथा विचित्रं राजानं दृष्ट्वा भणितमनेन-वत्स! उद्विग्न इव लक्ष्यसे, ततः कथय मम उद्वेगकारणम्, यदि अकथनीयं न भवति। राज्ञा भणितम्-अस्ति भगवतोऽपि नाम अकथनीयम्?। अन्यच्च-अकथनीयवस्तुविषयोद्विग्नस्य न युक्तं तपोवनागमनम्। कुलपतिना भणितम्-साधु वत्स! साधु, उचितस्ते विवेकः, ततः किम्-उद्वेगकारणम्? इति। राज्ञा भणितम्-भगवत आज्ञा इति कृत्वा कथ्यते, अन्यथा कथम्-ईदृशं नृशंसचरितं कथयितुं पार्यते?। कुलपतिना भणितम्-वत्स! सर्वस्य जननीभूतः खलु भवति तपस्विजनः। ततः का त्वां प्रति लज्जा इति। तस्मात् कथयतु भवान्, येन ज्ञातवृत्तान्तो भूत्वा केनचिद् उपायेन अपनयामि तम्-उद्वेगमिति। राज्ञा भणितम्-भगवन्! यद्येवम्,

णस्स, असमिक्खियकारिणो, असरिसजणसरिसायरणनिरयस्स संबन्धिणा निव्वेएण तावसो संवुत्तो। एयस्स पवन्नुत्तमवयस्स वि तं मए असरिसजणायरणं न परिचत्तं ति दढमुव्विग्गो म्हि। कुलवइणा भणियं–वच्छ! जइ एवं, ता अलं संतप्पिएणं, किं कारणं। जइ तुह संबन्धिणा कारणेण तावसो संवुत्तो, ता तुमं चेव इमस्स धम्मपवत्तगो कल्लाणमित्तो सि; किमुव्विग्गो सि?। न यावि एण्हिं तुह परलोयभीरुणो, अहिगयधम्मसत्थस्स किंपि असज्जणायरणं संभावेमि। किं वा से कयमियाणिं निवेएहि मे। राइणा भणियं–भयवं! इयाणिं ताव एयं उवणिमन्तिऊण मासपारणयपविट्ठस्स सीसवेयणाभिभूएण पमायओ अणिउत्तपरियणेणं आहारन्तरायकरणेणं कयं से धम्मन्तरायं ति। कुलवइणा भणियं–वच्छ! जं किंचि एयं, न तुमं एत्थ अवरज्झसि। न तिव्ववेयणाभिभूया पुरिसा कज्जमकज्जं वा वियाणन्ति। न य तस्स आहारन्तरायकरणेणं धम्मन्तरायं हवइ, अवि य तवसंपया। ता अलमुव्वेगेणं ति। राइणा भणियं–भयवं! जाव तेण महाणुभावेण मम गेहे आहारगहणं न कयं, ताव कहमुव्वेवो अवेइ?। कुलवइणा भणियं–वच्छ! इयाणिं से अवि·

ततः शृणु। एषोऽग्निशर्मतापसः प्रथममेव मम मन्दपुण्यस्य, असमीक्षितकारिणः असदृशजनसदृशाचरणनिरतस्य संबन्धिना निर्वेदेन तापसः संवृत्तः। एतस्य प्रपन्नोत्तमव्रतस्याऽपि तद् मया असदृशजनाचरणं न परित्यक्तमिति दृढम्–उद्विग्नोऽस्मि। कुलपतिना भणितम्–वत्स! यद्येवम्, ततोऽलं संतप्तेन, किं कारणं। यदि तव संबन्धिना कारणेन तापसः संवृत्तः, ततस्त्वमेव अस्य धर्मप्रवर्तकः कल्याणमित्रम्–इति, किम्–उद्विग्नोऽसि? न चाऽपि इदानीं तव परलोकभीरोः, अधिगतधर्मशास्त्रस्य किमपि असज्जनाचरणं संभावयामि। किं वा तत् कृतमिदानीं निवेदय मे। राज्ञा भणितम्–भगवन्! इदानीं तावद् एतम्–उपनिमन्त्र्य मासपारणकप्रविष्टस्य शीर्षवेदनाऽभिभूतेन प्रमादतोऽनियुक्तपरिजनेन आहारान्तरायकरणेन कृतस्तस्य धर्मान्तराय इति। कुलपतिना भणितम्–वत्स! यत् किंचिद् एतत्, न त्वम्–अत्र अपराध्यसि। न तीव्रवेदनाभिभूताः पुरुषाः कार्यमकार्यं वा विजानन्ति। न च तस्य आहारान्तरायकरणेन धर्मान्तरायो

ग्घेण जं पारणगं भविस्सइ, तर्हि ते गेहे आहारगहणं करिस्सइ त्ति। तओ कुलवइणा सद्दाविओ अग्गिसम्मतावसो। सबहुमाणं हत्थे गिण्हिऊण भणिओ य णेण–वच्छ! जं तुमं अकयपारणगो निग्गओ नरिन्दगेहाओ, एएणं दढं संतप्पइ राया। कल्लं च एयस्स अईव सीसवेयणा आसि, अओ वेयणापरव्वसेण न तुमं पडियग्घिओ त्ति; न एस अवरज्झइ। भणियं च णेण 'जाव मम गेहे अग्गिसम्मतावसेण आहारगहणं न कयं, न ताव मे उव्वेवो अवेइ'। अओ इण्हिं संपत्तपारणगकालेण भवया अविग्घेण मम वयणाओ नरिन्दबहुमाणओ य एयस्स गेहे पारणगं करियव्वं ति। अग्गिसम्मतावसेण भणियं–भयवं! जं तुब्भे आणवेह। अकारणे संतप्पइ राया, जओ न किंचि मे परलोयविरुद्धमणुचिट्ठियमणेणं। तओ राया 'अहो! से महाणुभावय' त्ति कलिऊण पणमिऊण तवस्सिजणं च कंचि वेलं पज्जुवासिय पविट्ठो नयरं।

भवति, अपि च तप संपदा। ततोऽलम्–उद्वेगेनेति। राज्ञा भणितम्–भगवन्! यावत् तेन महानुभावेन मम गेहे आहारग्रहणं न कृतम्, तावत् कथमुद्वेगोऽपैति?। कुलपतिना भणितम्–वत्स! इदानीं तस्य अविघ्नेन यत् पारणकं भविष्यति, तदा तव गेहे आहारग्रहणं करिष्यतीति। ततः कुलपतिना शब्दायितः अग्निशर्मतापसः। सबहुमानं हस्ते गृहीत्वा भणितश्चानेन–वत्स! यत् त्वम्–अकृतपारणको निर्गतो नरेन्द्रगेहात्, एतेन दृढं संतप्यते राजा। कल्यं चैतस्य अतीव शीर्षवेदना आसीत्, अतो वेदनापरवशेन न त्वं प्रत्यर्थित इति, नैषोऽपराध्यति। भणितं चानेन 'यावद् मम गेहे अग्निशर्मतापसेन आहारग्रहणं न कृतं, न तावद् मम उद्वेगोऽपैति'। अत इदानीं संप्राप्तपारणककालेन भवताऽविघ्नेन मम वचनाद् नरेन्द्रबहुमानतश्च एतस्य गेहे पारणकं कर्तव्यमिति। अग्निशर्मतापसेन भणितम्–भगवन्! यद् यूयम्–आज्ञापयत। अकारणे संतप्यते राजा, यतो न किंचिद् मम परलोकविरुद्धमनुष्ठितमनेन।

१ पडियग्गिओ क

पुणो य कालक्कमेण रन्नो विसयसुहमणुहवन्तस्स, अग्गिसम्मस्स य दुक्करं तवचरणविहिं करेन्तस्स समइक्कन्तो मासो त्ति। एत्थन्तरम्मि य संपत्ते पारणगदिवसे निवेइयं से रन्नो विक्खेवागएहि निययपुरिसेहिं। जहा-महाराय! अइविसमपरक्कमगव्वियं, विसमदोणीमुहप्पविट्ठं, अकयपरिरक्खणोवायं अप्पमत्तेण माणभङ्गनरवइणा, इहरहा विसयविणासमवलोइऊण, वीरचरियमवलम्बिय, वीसत्थसुत्तेसु नरिन्दपाइक्केसु, जाए अड्ढरत्तसमए, अत्थमिए रयणिवहूपिययमे तेलोक्कमङ्गलपईवे मियङ्के सयलबलसहिएणमवक्खन्दं दाऊण अइपमत्तं ते विणिज्जियं सेन्नं। संपइ देवो पमाणं त्ति। तओ राइणा एयं सुदूसहं वयणमायण्णिऊण कोवाणलजलियरत्तलोयणेणं, विसमफुरियाहरेणं, निद्दयकराभिहयधरणिवट्ठेणं अमरिसवसपरिक्खलन्तवयणेणं समाणत्तो परियणो। जहा-देह तुरियं पयाणयपडहं, सज्जेह दुज्जयं करिबलं, पल्लाणेह दप्पुद्धुरं आससाहणं, संजत्तेह धय-मालोवसोहियं सन्द-

ततो राजा 'अहो!! तस्य महानुभावता' इति कलयित्वा, प्रणम्य तपस्विजनं च कांचिद् वेलां पर्युपास्य प्रविष्टो नगरम्। पुनश्च कालक्रमेण राज्ञो विषयसुखमनुभवतः, अग्निशर्मणश्च दुष्करं तपश्चरणविधिं कुर्वतः समतिक्रान्तो मास इति। अत्रान्तरे च संप्राप्तेपारणकदिवसे निवेदितं तस्य राज्ञो विक्षेपागतैर्निजकपुरुषैः। यथा-महाराज! अतिविषमपराक्रमगर्वितम्, विषमद्रोणीमुखप्रविष्टम्, अकृतपरिरक्षणोपायम्-अप्रमत्तेन मानभङ्गनरपतिना, इतरथा विषयविनाशमवलोक्य, वीरचरितमवलम्ब्य, विश्वस्तसुप्तेषु नरेन्द्रपदातिषु याते अर्धरात्रसमये अस्तमिते रजनीवधूप्रियतमे त्रैलोक्यमङ्गलप्रदीपे मृगाङ्के सकलबलसहितेन अवस्कन्दं दत्त्वा अतिप्रमत्तं तव विनिर्जितं सैन्यम्। संप्रति देवः प्रमाणमिति। ततो राज्ञा एतत सुदुःसहं वचनमाकर्ण्य कोपानलज्वलितरक्तलोचनेन, विषमस्फुरिताधरेण निर्दयकराभिहतधरणीपृष्ठेन, अमर्षवशपरिस्खलद्वचनेन समाज्ञप्तः परिजनः। यथा-दत्त त्वरितं प्रयाणकपटहम्, सज्जयत दुर्जयं करिबलम्, पर्याणयत दर्पोद्धुर अश्वसाधनम्, संयात्रयत ध्वज-मालोपशोभितं स्यन्दननिवहम्, प्रवर्तयत नानाप्रहरणशालि पदातिसैन्यमिति।

पमिरइं, पयट्टावेइ नाणापहरणमालिणं पाइक्कसेन्नं ति। तओ नरवइसमाएसाणन्तरमेवायण्णिय पयाणयपडहसद्दं, करिवरविरायन्तमेहजालं, उब्भियधय-चमर-छत्तसंघायबलायपरियरियं, निसियकरवाल-कोन्तसोयामणिसणाहं, सङ्ख-काहलातूरनिग्घोसगज्जियरवपूरियदिसं, अयालदुद्दिणं पिव समन्तओ वियम्भियं नरिन्दसाहणं ति। एत्थन्तरम्मि य रहवरारूढे नरिन्दगुणसेणे, ठाविए पुरओ सलिलपुण्णे कणयकलसे, पहए जयसिरिसमुप्फालए मङ्गलतूरे, पढन्तेसु विविहमङ्गलाइं बन्दिवन्द्रेसु, अग्गिसम्मतावसो पारणगनिमित्तं पविट्ठो नरिन्दगेहं ति। तओ तम्मि महाजणसमुदए आउलीहूए नरिन्दनिग्गमणनिमित्तं पहाणपरियणे न केणइ समुवलक्खिओ त्ति। तओ कंचि वेलं गमेऊण दरियकरि-तुरयसंघायचमढणभीओ निग्गओ नरवइगेहाओ। एत्थन्तरम्मि य गहियसङ्कुच्छाएहिं, मुणियजोइससत्थपरमत्थेहिं भणियं जोइसिएहिं-देव! पसत्थं मुहुत्तं, निग्गच्छसु त्ति। राइणा भणियं-अज्ज तस्स अग्गिसम्मतावसस्स पारणगदिवसो, पडिवन्नं च तेण कुलवइवयणाओ मम गेहे आहारगहणं कायव्वं ति। ता आगच्छउ ताव सो महाणुभावो। तओ

ततो नरपतिसमादेशानन्तरमेव आकर्ण्य प्रयाणकपटहशब्दम्, करिवरविराजद्मेघजालम्, उच्छ्रितध्वज-चामर-छत्रसंघातबलाकापरिगतम्, निशितकरवाल-कुन्तसौदामिनीसनाथम्, शङ्ख-काहलातूरनिर्घोषगर्जितरवपूरितदिशम्, अकालदुर्दिनमिव समन्ततो विजृम्भितं नरेन्द्रसाधनमिति। अत्रान्तरे च रथवरारूढे नरेन्द्रगुणसेने, स्थापिते पुरतः सलिलपूर्णे कनककलशे, प्रहते जयश्रीसमुत्फालके मङ्गलतूर्ये, पठत्सु विविधमङ्गलानि बन्दिवृन्देषु, अग्निशर्मतापसः पारणकनिमित्तं प्रविष्टो नरेन्द्रगेहमिति। ततस्तस्मिन् महाजनसमुदये आकुलीभूते नरेन्द्रनिर्गमननिमित्तं प्रधानपरिजने न केनचित् समुपलक्षित इति। ततः कांचिद् वेलां गमयित्वा दृप्तकरि-तुरगसंघातामर्दनभीतो निर्गतो नरपतिगेहात्। अत्रान्तरे च गृहीतशङ्कुच्छायैः, ज्ञातज्योतिश्शास्त्रपरमार्थैः भणितं ज्योतिषिकैः-देव! प्रशस्तं

१ दरिय क.

तं कयभोयणविहाण पणमिऊण गमिस्सामो । तओ आसन्नवत्तिणा भणियं कुलपुत्तएण—देव ! सो खु महाणुभावो संपय चेव पविसिऊण दरियकरि-तुरयसंघायचमढणभीओ निग्गओ रायगेहाओ । अज्ज वि य न नयराओ निग्गच्छइ त्ति तक्केमि । तओ एयमायण्णिऊणससंभन्तो राया पयट्टो तस्स मग्गे, दिट्ठो य णेण नयराओ निग्गच्छन्तो अग्गिसम्मतावसो । तओ ओयरिऊण रहवराओ, भत्तिनिब्भरं निवडिऊण चलणेसु विन्नत्तो सबहुमाणं । भयवं ! करेह पसायं, विणियत्तसु त्ति । अहमभिप्पेए वि गमणे तुह चेवागमणमणुवालेन्तो एत्तियं वेलं ठिओ म्हि, जाव तुमं पविसिऊण मम गेहं अलक्खिओ चेव मे पहाणपरियणेण निग्गओ सि, ता नियत्तसु त्ति । अग्गिसम्मतावसेण भणियं—महाराय ! विइयवुत्तन्तो चेव मे तुमं पइन्नाविसेसस्स; ता अलं ते इमिणा ववसाएणं । सच्चपइन्ना खु तवस्सिणो हवन्ति, निव्विसेसा य लाभालाभेसु । राइणा भणियं—भयवं ! लज्जिओ म्हि इमिणा पमायचरि-

मुहूर्तम्, निर्गच्छेति । राज्ञा भणितम्—अद्य तस्य अग्निशर्मतापसस्य पारणकदिवसः, प्रतिपन्नं च तेन कुलपतिवचनाद् मम गेहे आहारग्रहणं कर्तव्यमिति । तत आगच्छतु तावत् स महानुभावः । ततस्तं कृतभोजनविधानं प्रणम्य गमिष्यामः । तत आसन्नवर्तिना भणितं कुलपुत्रकेण—देव ! स खलु महानुभावः सांप्रतं चैव प्रविश्य दृप्तकरि-तुरगसंघातावमर्दनभीतो निर्गतो राजगेहात् । अद्यापि च न नगराद् निर्गच्छति इति तर्कयामि । तत एतद् आकर्ण्य ससंभ्रान्तो राजा प्रवृत्तस्तस्य मार्गे, दृष्टश्चानेन नगराद् निर्गच्छन् अग्निशर्मतापसः । तत अवतीर्य रथवराद् भक्तिनिर्भरं निपत्य चरणयोर्विज्ञप्तः सबहुमानम् । भगवन् ! कुरुत प्रसादम्, विनिवर्तस्व इति । अहमभिप्रेतेऽपि गमने तवैव आगमनम्—अनुपालयन् एतावतीं वेलां स्थितोऽस्मि, यावत् त्वं प्रविश्य मम गेहम्—अलक्षित एव मम प्रधानपरिजनेन निर्गतोऽसि, ततो निवर्तस्व इति । अग्निशर्मतापसेन भणितम्—महाराज ! विदितवृत्तान्त एव मम त्वं प्रतिज्ञाविशेष-

१ गागतो क

एणं, तुह तिव्वंतवजणियसरीरपीडाओ वि मे अहिया सरीरपीडा, दढं दहइ मं संतावाणलो, पणस्सइ विय मे हिययं, अक्खिप्पइ य मे वाणी, महापावकम्मकारिणं च मन्नेमि अप्पाणं; ता सयलदुहियसत्तबन्धुभूओ, अकारणवच्छलो य भवयं तुमं चेव मे इमस्स दुक्खस्स उवसमोवायं चिन्तेहि। अग्गिसम्मतावसेण चिन्तियं। अहो! से महारायस्स महाणुभावया। अकयपारणगेण मए एत्तियं खिज्जइ त्ति। अहो! से गुरुयणसुस्सूसाणुराओ। ता न जाव मए एयस्स गेहे पारणयं कयं, न ताव एस सत्थो होइ त्ति चिन्तिऊण भणियं च तेण-महाराय! अनिमित्तं ते दुक्खं। तहावि एयस्स इमो उवसमोवाओ। अविग्घेण संपत्ते पारणगदिवसे पुणो वि तुह चेव गेहे अहारगहणं करिस्सामि त्ति पडिवन्नं मए, ता मा संतप्पसु त्ति। तओ धरणिनिहियजाणु-करयलेणं भणियं राइणा-भयवं! सुट्ठु मुणिओ इमस्स दुक्खस्स उवसमोवाओ। अहवा विमलनाणनयणो चेव तवस्सिजणो होइ, किं वा न याणइ त्ति?। ता

स्य, ततोऽलं तवानेन व्यवसायेन। सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति, निर्विशेषाश्च लाभा-ऽलाभेषु। राज्ञा भणितम्-भगवन्! लज्जितोऽस्मि अनेन प्रमादचरितेन, तव तीव्रतपोजनितशरीरपीडातोऽपि मम अधिका शरीरपीडा, दृढं दहति मां संतापाऽनलः, प्रणश्यति इव मम हृदयम्, आक्षिप्यते च मम वाणी, महापापकर्मकारिणं च मन्ये आत्मानम्; ततः सकलदुःखितसत्त्वबन्धुभूतः, अकारणवत्सलश्च भगवान् त्वमेव मम अस्य दुःखस्य उपशमोपायं चिन्तय। अग्निशर्मतापसेन चिन्तितम्। अहो! अस्य महाराजस्य महानुभावता। अकृतपारणकेन मया एतावत् खिद्यते इति। अहो! अस्य गुरुजनशुश्रूषानुरागः। ततो न यावद् मया एतस्य गेहे पारणकं कृतम्, न तावद् एष स्वस्थो भवतीति चिन्तयित्वा भणितं च तेन-महाराज! अनिमित्तं एव दुःखम्। तथापि एतस्य अयम्-उपशमोपायः। अविघ्नेन संप्राप्ते पारणकदिवसे पुनरपि तवैव गेहे आहारग्रहणं करिष्यामि इति प्रतिपन्नं मया। ततः मा संतप्यस्वेति। ततो धरणीनिहितजानुकरतलेन भणितं राज्ञा-भगवन्! सुष्ठु ज्ञातः अस्य दुःखस्य उपशमोपायः। अथवा विमलज्ञाननयन एव तपस्विजनो भवति,

अणुगिहीओ म्हि । सरिसं इमं तुह अकारणवच्छलयाए । ता गच्छ तुमं तवोवणं । अहं पुण न सक्कुणोमि पच्चगपमायकलङ्कदूसिओ भगवन्तं कुलवइमवलोइउं ति । एवं भणिय पणमिऊण य अग्गिसम्मतावसं नियत्तो राया । 'न मए इयाणिं गन्तव्वं' ति कलिऊण विसज्जिओ य तेणं माणभङ्गस्स उवरि विक्खेवो। अग्गिसम्मो विय गन्तूण तवोवणं, निवेइऊण कुलवइणो जहावित्तं वुत्तंतं,'वच्छ ! साहु कयं' ति अहिणन्दिओ य कुलवइणा पवन्नो वयविसेसं ति । अणुदियहं च पवड्ढमाणसंवेगेण राइणा सेविज्जन्तस्स तस्स समइच्छिओ मासो, पत्तो य रन्नो मणोरहसएहिं पारणयदियहो । तम्मि य पारणयदियहे राइणो गुणसेणस्स देवी वसन्तसेणा दारयं पसूय त्ति । निवेइयं च राइणो हरिसवसेण पफुल्लवयणपङ्कयाए सपरितोसं पडिहारीए-महाराय ! देवी वसन्तसेणा तुम्हाणं अब्भुदयनिमित्तं पयाणं भागधेएहिं सुहंसुहेणं दारयं पसूय त्ति । तओ राइणा पुत्तजम्मब्भुदयसंजायरोमञ्चेणं दाऊण पडिहारीए कडय-केऊर-कण्णालङ्कारा- इयं अङ्गाभरणं, दिन्ना समाणत्ती । वसुंधरे ! ममाइसतु णं मम वयणाओ जहासन्निहिये पडिहारे । जहा-मोयावेह कालघण्टापओएण

ऽपि वा न जानाति ? इति । ततोऽनुगृहीतोऽस्मि । सदृशं इदं तव अकारणवत्सलतायाः । ततो गच्छ त्वं तपोवनम् । अहं पुनः न शक्नोमि प्रत्यग्रप्रमादकलङ्कदूषितो भगवन्तं कुलपतिमवलोकितुम्-इति । एवं भणित्वा प्रणम्य च अग्निशर्मतापसं निवृत्तो राजा । 'न मया इदानीं गन्तव्यम्' इति कलयित्वा विसर्जितश्च तेन मानभङ्गस्य उपरि विक्षेपः । अग्निशर्माऽपि च गत्वा तपोवनम्, निवेद्य कुलपतये यथावृत्तं वृत्तान्तम्, 'वत्स ! साधु कृतम्, इति अभिनन्दितश्च कुलपतिना प्रपन्नो व्रतविशेषमिति । अनुदिवसं च प्रवर्धमानसंवेगेन राज्ञा सेव्यमानस्य तस्य समतिक्रान्तः मासः, प्राप्तश्च राज्ञो मनोरथशतैः पारणकदिवसः । तस्मिंश्च पारणकदिवसे राज्ञो गुणसेनस्य देवी वसन्तसेना दारकं प्रसूतेति । निवेदितं च राज्ञो हर्षवशेन प्रफुल्लवदनपङ्कजया सपरितोषं प्रतिहार्या-महाराज ! देवी वसन्तसेना युष्माकम्-अभ्युदयनिमित्तम्, प्रजानां भागधेयैः सुखसुखेन दारकं प्रसूतेति । ततो राज्ञा पुत्रजन्माभ्युदयसंजातरोमा-

एवं, तुह तिव्वतवजणियसरीरपीडाओ वि मे अहिया सरीरपीडा, दढं दहइ मं संतावाणलो, पणस्सइ विय मे हियय, अक्खिप्पइ य मे वाणी, महापावकम्मकारिणं च मन्नेमि अप्पाणं; ता सयलदुहियसत्तबन्धुभूओ, अकारणवच्छलो य भवयं तुमं चेव मे इमस्स दुक्खस्स उवसमोवायं चिन्तेहि। अग्गिसम्मतावसेण चिन्तियं। अहो! से महारायस्स महाणुभावया। अकयपारणगेण मए एत्तियं खिज्जइ त्ति। अहो! से गुरुयणसुस्सूसाणुराओ। ता न जाव मए एयस्स गेहे पारणयं कयं, न ताव एस सत्थो होइ त्ति चिन्तिऊण भणियं च तेण-महाराय! अनिमित्तं ते दुक्खं। तहावि एयस्स इमो उवसमोवाओ। अविग्घेण संपत्ते पारणगदिवसे पुणो वि तुह चेव गेहे आहारगहणं करिस्सामि त्ति पडिवन्नं मए, ता मा संतप्पसु त्ति। तओ धरणिनिहियजाणु-करयलेणं भणियं राइणा-भयवं! सुट्ठु मुणिओ इमस्स दुक्खस्स उवसमोवाओ। अहवा विमलनाणनयणो चेव तवस्सिजणो होइ, किं वा न याणइ त्ति?। ता

स्य। ततोऽलं ममानेन व्यवसायेन। सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति, निर्विशेषाश्च लाभा-ऽलाभेषु। राज्ञा भणितम्-भगवन्! लज्जितोऽस्मि अनेन प्रमादचरितेन, तव तीव्रतपोजनितशरीरपीडातोऽपि मम अधिका शरीरपीडा, दृढं दहति मां संतापाऽनलः, प्रणश्यति इव मम हृदयम्, आक्षिप्यते च मम वाणी, महापापकर्मकारिणं च मन्ये आत्मानम्; ततः सकलदुःखितसत्त्वबन्धुभूतः, अकारणवत्सलश्च भगवान् त्वमेव मम अस्य दुःखस्य उपशमोपायं चिन्तय। अग्निशर्मतापसेन चिन्तितम्। अहो! अस्य महाराजस्य महानुभावता। अकृतपारणकेन मया एतावत् खिद्यते इति। अहो! अस्य गुरुजनशुश्रूषानुरागः। ततो न यावद् मया एतस्य गेहे पारणकं कृतम्, न तावद् एष स्वस्थो भवतीति चिन्तयित्वा भणितं च तेन-महाराज! अनिमित्तं एव दुःखम्। तथापि एतस्य अयम्-उपशमोपायः। अविघ्नेन संप्राप्ते पारणकदिवसे पुनरपि तवैव गेहे आहारग्रहणं करिष्यामि इति प्रतिपन्नं मया। ततः मा संतप्यस्वेति। ततो धरणीनिहितजानुकरतलेन भणितं राज्ञा-भगवन्! सुष्ठु ज्ञातः अस्य दुःखस्य उपशमोपायः। अथवा विमलज्ञाननयन एव तपस्विजनो भवति,

एत्थन्तरम्मि निवेइयं से विजयवइनामाए पडिहारीए–महाराय ! एसो खु दुम्मई देवं सयमेव पत्थियं वियाणिय चण्डं च देवसासणमवगच्छिय सिरोहराबद्धपरसू देवसासणाइक्कमणजायपच्छायावो कइवयपुरिसपरिवारिओ इहेवागओ देवदंसणसुहाभिलासी

सोऽपि खलु नात्र स्ववशो यस्मादजगरकृतान्तवशग इति। एवंविधेऽपि लोके विषयप्रसक्तो महामोहः ॥

ततोऽलं मेऽनेकदुःखतरुबीजभूतेन आहोपुरुषिकाविकारप्रायेण राज्येनेति। राज्यं नाम हि पातालमिव दुष्पूरम्, जीर्णभवनमिव सुलभविवरम्, खलसंगतमिव विरसावसानम्, वेश्यास्त्रीहृदयमिव अर्थवल्लभम्, वल्मिकमिव बहुभुजङ्गम्, जीवलोकमिवानिष्ठितकार्यम्, सर्पकरण्डकमिव यत्नपरिपालनीयम्, अनभिज्ञं विश्रम्भसुखानाम्, वेश्यायौवनमिव बहुजनाभिलषणीयम्, अकारणं च शुद्धपरलोकमार्गस्येति। तत एतत्परित्यज्य प्रपद्यामहे (प्रव्रजामः) धीरपुरुषसेवितमुभयलोकसुखावहं श्रमणत्वमिति। अथ कथं पुनः प्रस्तुतवस्तुविषये लाघवं न भविष्यति ?। अथवा स्तोकमेतदेकजन्मप्रतिबद्धमिति। एवं चिन्तयतोऽतिक्रान्ता रजनी, कृतं प्रातःकृत्यम्, प्रविष्टं मन्त्रिमण्डलम्।

अत्रान्तरे निवेदितं तस्य विजयवतीनामया प्रतिहार्या–महाराज ! एष खलु दुर्मतिर्देवं स्वयमेव प्रस्थितं विज्ञाय चण्डं च देवशासन-

पडिहारभूमीए चिट्ठइ । एयं सोऊण देवो पमाणं ति । तओ पुलोइओ राइणा मइसायरो । भणियं च तेण इङ्गियागारकुसलेण–पविसउ, को एत्थ दोसो ? । सरणागयवच्छला चेव राइणो हवन्ति। तओ राइणा अणुन्नाओ पविट्ठो दुम्मई 'देव एसा सिरोहरा एसो य कुहाडो' त्ति भणिऊण पडिओ चलणेसु । तओ अभयं दाऊण बहु माणिओ राइणा, कओ से अहिययरसक्कारो । नियत्तिऊण य राया गओ जयउरं । निवेइओ राइणा निययाभिप्पाओ मन्तिमण्डलस्स । तेण वि य 'किच्चमेवेयमिह वंससंभवाणं रायाणं सेसयाणं पि, किं पुण तुम्हाणं जिणवयणभावियमईणं ति, उभयलोयसाहारणं च सफलं जीवियं देवस्स, वणदवसन्निहा य कामभोगा इन्धणाओ चेव जलन्ति किंपागफलसमाणा य विवागे, अयण्डमणोरहभङ्गकारी य पहवइ विणिज्जियसुरासुरो मच्चु' त्ति कलिऊण बहु मन्निओ । तओ सद्दाविया संवच्छरिया, भणिया य तेण–निरूवेह आणन्दकुमारस्स रज्जाभिसेयदिवसं । तेहिं भणियं–जं देवो आणवेइ । निरूविऊण

मवगत्य शिरोधरान्यस्तपरशुर्देवशासनातिक्रमणजातपश्चात्तापः कतिपयपुरुषपरिवारित इहैवागतो देवदर्शनसुखाभिलाषी प्रतिहारभूम्यां तिष्ठति। एतच्छ्रुत्वा देवः प्रमाणमिति। ततः प्रलोकितो राज्ञा मतिसागरः। भणितं च तेनेङ्गिताकारकुशलेन। प्रविशतु, कोऽत्र दोषः ?। शरणागतवत्सला एव राजानो भवन्ति। ततो राज्ञाऽनुज्ञातः प्रविष्टो दुर्मतिः 'देव! एषा शिरोधरा, एष कुठारः' इति भणित्वा पतितस्तच्चरणयोः। ततोऽभयं दत्त्वा बहु मानितो राज्ञा, कृतस्तस्याधिकतरसत्कारः। निवर्त्य च राजा गतो जयपुरम्। निवेदितो राज्ञा निजाभिप्रायो मन्त्रिमण्डलस्य। तेनापि च 'कृत्यमेवैतद् इह वंशसंभवानां राज्ञां शेषाणामपि, किं पुनर्युष्माकं जिनवचनभावितमतीनाम्, उभयलोकसाधारणं च सफलं जीवितं देवस्य, वनदवसंनिभाश्च कामभोगा इन्धनात् एव ज्वलन्ति किंपाकफलसमानाश्च विपाके, अकाण्डमनोरथभङ्गकारी च प्रभवति विनिर्जितसुरासुरो मृत्युरिति कलयित्वा बहु मतः। ततः शब्दायिताः सांवत्सरिकाः, भणिताश्च तेन–

---

१ ०णुन्नाओ र ।

माहिओ णेहिं पञ्चमो दिवसो । तओ उवणीयाइं अहिसेयमङ्गलाइं । तं जहा—मच्छजुयलं पुण्णकलसो धवलकुसुमाइं महापउमा सिद्धत्थया पुहविपिण्डो वसहो महन्तयं दहियपुण्णं च भण्डयं महारयणाइं गोरोयणा सीहचम्मं धवलायवत्तं भद्दासणं चामराओ दुरुव्वा अच्छसुरा महाधओ गयमओ धन्नाइं दुगुल्लाणि अन्नाणि य एवमाइयाइं पसत्थदव्वाइं ति । एत्थन्तरम्मि परिचिन्तियं राइणा—काऊणमाणन्दकुमारस्स रज्जाहिसेयं तओ गमिस्सामि धम्मघोसगुरुसमीवं ति । एवं च चिन्तयन्तो अहिसेयदिणं पडिच्छमाणो चिट्ठइ ॥

इओ य पुव्वकयकम्मदोसओ अमुणियनरिन्दाहिप्पाओ घडिओ दुम्मइणा सह आणन्दकुमारो । मन्तियं च तेहिं 'कहंचि वञ्चणापओएण वावाएमो महारायं' ति । सुओ अहिसेयवुत्तन्तो । मिच्छाहिनिवेसेण सचित्तदुट्ठयाए य विपरीओ परिणओ आणन्दस्स । चिन्तियं च तेणं—नूणमहमणेण इमिणा चवएसेण मारिउं ववसिओ । ता कहमहमेवं छलिज्जामि । अहवा सव्वए वि एयम्मि वुत्तन्ते अलं मे रज्जेण, जं मे एएण दिन्नं संपज्जइ । तं पुण रायाहणिज्जं, जमेयं वावाइऊण बला घेप्पइ त्ति । एत्थन्तरम्मि सद्दाविओ राइणा

निरूपय आनन्दकुमारस्य राज्याभिषेकदिवसम् । तैर्भणितम्—यद् देव आज्ञापयति । निरूप्य च कथितस्तैः पञ्चमो दिवसः । तत उपनीतानि अभिषेकमङ्गलानि । तद् यथा—मत्स्ययुगलं पूर्णकलशो धवलकुसुमानि महापद्माः सिद्धार्थाः पृथ्वीपिण्डो वृषभो महद् दधिपूर्णं च भाण्डं महारत्नानि गोरोचना सिंहचर्म धवलातपत्रं भद्रासनं चामरा दूर्वा अच्छसुरा महाध्वजो गजमदो धान्यानि दुकूलानि अन्यानि चैवमादिकानि प्रशस्तद्रव्याणि इति । अत्रान्तरे च परिचिन्तितं राज्ञा—कृत्वाऽऽनन्दकुमारस्य राज्याभिषेकं ततो गमिष्यामि धर्मघोषगुरुसमीपमिति । एवं चिन्तयन् अभिषेकदिनं प्रतीक्षमाणस्तिष्ठति ॥

इतश्च पूर्वकृतकर्मदोषतोऽज्ञातनरेन्द्राभिप्रायो घटितो दुर्मतिना सहानन्दकुमारः । मन्त्रितं च ताभ्यां 'कथंचिद् वञ्चनाप्रयोगेण व्यापादयामो महाराजम्' इति । श्रुतोऽभिषेकवृत्तान्तः । मिथ्याभिनिवेशेन स्वचित्तदुष्टतया च विपरीतः परिणत आनन्दस्य । चिन्तितं च तेन—

आणन्दो । जाव नेच्छइ आगन्तुं, तओ पडिहारदुइओ गओ कुमारभवणं राया । तेण वि य 'न इओ सुन्दरतरो पत्थावो' त्ति कलिऊण पुव्वाणुसयदोसेण सहसा 'हण हण'त्ति भणिऊण उक्खायासिणा अकयपरिरक्खणोवाओ सुविसत्थचित्तो पडिहारं वावाइऊण गाढप्पहारीकओ राया । एत्थन्तरम्मि समुट्ठाइओ कलयलो, संजाओ नयरसेन्नसंखोहो, परिवेढिओ समन्तओ रायसाहणेण आणन्दो, पारद्धो संगामो । तओ राइणा नियसरीरदोहसवहेण सावियं सेन्नं । भणियं च णेण । किं भे इयाणिं जुज्झिएणं ? अहं ताव वावाइओ चेव दट्ठव्वो, मा एयं पि वावाएह, ता करेह रायाभिसेयं एयस्स, एस भे राय त्ति । एत्थन्तरम्मि समाणत्तो दुम्मई 'बन्धेहि णं निविडबन्धेहिं' । तओ 'जं कुमारो आणवेइ' त्ति भणिऊण आसन्नीभूओ य से दुम्मई । पाडिया कुलपुत्तया, निब्भच्छिओ नायरजणो । तओ बन्धाविऊण पच्चइयपुरिसेहिं सुकयपरिरक्खणोवाओ कओ राया । अहिट्ठियं रज्जं, ठावियाओ ववत्थाओ, वसीकयं सामन्तमण्डलं ।

नूनमहमनेन एतेन व्यपदेशेन मारितुं व्यवसितः । ततः कथमहमेवं वञ्च्ये । अथवा सत्येऽपि एतस्मिन् वृत्तान्ते अलं मे राज्येन, यन्मे एतेन दत्तं संपद्यते । तत्पुनः श्लाघनीयम् , यदेनं व्यापाद्य बलाद् गृह्यते इति । अत्रान्तरे शब्दायितो राज्ञा आनन्दः । यावद् नेच्छति आगन्तुम् , ततः प्रतीहारद्वितीयो गतः कुमारभवनं राजा । तेनापि च 'न इतः सुन्दरतरः प्रस्तावः' इति कलयित्वा पूर्वानुशयदोषेण सहसा 'हत हत' इति भणित्वा उत्खातासिनाऽकृतपरिरक्षणोपायः सुविश्वस्तचित्तः प्रतीहारं व्यापाद्य गाढप्रहारीकृतो राजा । अत्रान्तरे समुत्थितः कलकलः, संजातो नगरसैन्यसंक्षोभः, परिवेष्टितः समन्ततो राजसाधनेनानन्दः, प्रारब्धः संग्रामः । ततो राज्ञा निजशरीरद्रोहशपथेन शापितं सैन्यम् । भणितं च तेन–किं युष्माकमिदानीं युद्धेन, अहं तावद् व्यापादित एव द्रष्टव्यः, मा एतमपि व्यापादयत, ततः कुरुत राज्याभिषेकमेतस्य, एष युष्माकं राजेति । अत्रान्तरे समाज्ञप्तो दुर्मतिः 'बधान तं निबीडबन्धैः, ततो 'यत्कुमार आज्ञापयति' इति भणित्वाऽऽसन्नीभूतश्च तस्य दुर्मतिः । पातिताः कुलपुत्रकाः, निर्भर्त्सितो नागरजनः । ततो बन्धयित्वा प्रत्ययितपुरुषैः सुकृतपरिर-

तओ अणुसयवसेण नेयाविओ नयरचारयं नरवई। तं च अच्चन्तनिम्महमाणपुरीसकलमलगन्धं फुडियभित्तिपसुत्तसिरीसिवं भिणिभिणायमाणमसयमक्खियाजालं दरिविवरमुहविणिग्गयमूसउक्केरं उवरिविलम्बमाणोरयनिम्मोयं लूयातन्तुविरइयवियाणयं, वासहरं पिव दुस्समाए, लीलाभूमिं पिव अधम्मस्स, सहोयरं पिव सीमन्तयस्स, संढा विव सव्वदुक्खसमुदयाणं, कुलहरं पिव सव्वजायणाणं, विस्सासभूमिं पिव मच्चुणो, सिद्धिखेत्तं पिव कयन्तस्स त्ति। तओ 'महाचारयं नीओ देवो' त्ति सोऊण सहसा विमुक्ककक्कन्दभेरवं अणवरयनिवडमाणेहिं महग्घमुत्ताहलसरिसेहिं अक्कज्जलवाहविन्दूहिं संपाइयहारसोहं देवसोएणं चेव परिमिलाणदेहं निरुज्झमाणं पि निउत्तपुरिसेहिं मङ्गलमणिवलयझणझणारवुद्दामं सभूयाहिं बलाओ पेल्लिऊण ते उरपोट्टकुट्टणुज्जयं तओ य अणुइयधरणिपरिसक्कणेणं सासससमाऊरियाणणं परिचत्तकुडिलभावत्तणेण वि य 'अदंसणीया देवावत्थ' त्ति सूयगेहिं पिव लम्बालएहिं निरुद्धनयणपसरं चारयमेव

क्षणोपायः, कृतो राजा। अधिष्ठितं राज्यम्, स्थापिता व्यवस्थाः, वशीकृतं सामन्तमण्डलम्। ततोऽनुशयवशेन नायितो नगरचारकं नरपतिः। तच्चात्यन्तनिर्मथ्यमानपुरीषकलमलगन्धं स्फुटितभित्तिप्रसुप्तसरीसृपं भणभणायमानमशकमक्षिकाजालं दरीविवरमुखविनिर्गतमूषकोत्करं उपरिविलम्बमानोरगनिर्मोकं लूतातन्तुविरचितवितानकं, वासगृहमिव दुःषमायाः, लीलाभूमिरिवाधर्मस्य, सहोदरमिव सिमन्तकस्य, सभा इव सर्वदुःखसमुदयानाम्, कुलगृहमिव सर्वयातनानाम्, विश्वासभूमिरिव मृत्योः, सिद्धिक्षेत्रमिव कृतान्तस्येति। ततो 'महाचारकं नीतो देवः' इति श्रुत्वा सहसा विमुक्ताक्रन्दभैरवं अनवरतनिपतद्भिर्महार्घमुक्ताफलसदृशैरकज्जलबाष्पबिन्दुभिः संपादितहारशोभं देवशोकेनैव परिम्लानदेहं निरुध्यमानमपि नियुक्तपुरुषैः मङ्गलमणिवलयझणझणारवोद्दामं स्वभुजाभिर्बलात् पीडयित्वा तान् उरःपेट्टकुट्टनोद्यतं ततश्चाऽनुचितधरणीपरिष्वष्कनेन श्वाससमापूरिताननं परित्यक्तकुटिलभावत्वेनापि च 'अदर्शनीया देवावस्था' इति सूचकै·

१ सदं पिर क-ग २ रण ०य

पत्तं कुसुमावलीपमुहमन्तेउरं ति। दिट्ठो य तेण काललोहमयनियलसमाऊरिओ नरवई। तओ असोयपल्लवागारेहिं हत्थेहिं 'अणुचियासेवणबहुलो संसारो' त्ति दंसयन्तं पिव हारलयावहणजणियखेयं पिव वच्छत्थलं ताडयन्तं अहिययरमक्कन्दिउं पवत्तं ति। तओ राइणा आरक्खिगेहिं च कहकहवि निवारियं। भणियं च राइणा—किमणेणायासमेत्तफलेण अहम्माणुबन्धिणा य सोएणं। अइबहुविचित्तरूवो खु एस संसारो, खेलणयभूया इमस्स सव्वे सरीरिणो, दुन्निवारो य पसरो पुव्वकयकम्मस्स, जलहरन्तरविणिग्गयसोयामणीवलयचञ्चला लच्छी, सुविणयसमो संगमो। एवमवसाणाणि एत्थ रागविलसियाणि। ता किमेइणा अविवेयजणाणुसारिसेण पलविएण?। पत्तमेव तुब्भेहि जीवलोयसारभूयं जिणवयणं। ता तं चेव अणुचिट्ठह। न तं मोत्तूण अन्नो दुक्खक्खओवाओ त्ति। तओ तमेयमायण्णिय एवमेवेयं न अन्नह' त्ति कलिऊण य अणुजाणाविऊण नरवइं जीवियनिरवेक्खयाए बला चेयाणन्दस्स गन्धव्वदत्ताए

मिव लम्बालकैर्निरुद्धनयनप्रसरं चारकमेव प्राप्तं कुसुमावलीप्रमुखमन्तःपुरम्—इति। दृष्टस्तेन काललोहमयनिगडसमापूरितो नरपतिः। ततोऽशोकपल्लवाकारैर्हस्तैः 'अनुचितासेवनबहुलः संसारः' इति दर्शयन्तमिव हारलतावहनजनितखेदमिव वक्षःस्थलं ताडयन्तमधिकतरमाक्रन्दितुं प्रवृत्तमिति। ततो राज्ञा आरक्षकैश्च कथंकथमपि निवारितम्। भणितं राज्ञा—किमनेनायासमात्रफलेन अधर्मानुबन्धिना च शोकेन?। अतिबहुविचित्ररूपः खलु एष संसारः, खेलनकभूता अस्य सर्वे शरीरिणः, दुर्निवारश्च प्रसरः पूर्वकृतकर्मणः, जलधरान्तरविनिर्गतसौदामिनीवलयचञ्चला लक्ष्मीः, स्वप्नसमः संगमः, एवमवसानानि अत्र रागविलसितानि। ततः किमेतेनाविवेकजनानुसदृशेण प्रलपितेन। प्राप्तमेव युष्माभिर्जीवलोकसारभूतं जिनवचनम्। ततस्तदेवानुतिष्ठत, न तन्मुक्त्वाऽन्यो दुःखक्षयोपाय इति। ततस्तदेतदाकर्ण्य 'एवमेतद् नान्यथा' इति कलयित्वा चानुज्ञाप्य नरपतिं जीवितनिरपेक्षतया बलाच्चेयानन्दस्य* गन्धर्वदत्ताया विद्याधरश्रमण्याः

* आज्ञां गृहीत्वेति शेषः.

विज्जाहरसमणियाए सयासे पवन्नं पव्वज्जं ति ॥

इओ य पइदिणं कयत्थणाए वि कोहवसमगच्छमाणेण 'एद्दहमेत्तं मे जीवियं कालोइयं संपयमणसणं'ति पडिवन्नं राइणा। आरक्खिगेहिं निवेइयं अणन्दस्स, कुविओ एसो, पेसिओ तेण देवसम्मो नाम नियमहल्लओ 'गच्छ भुञ्जावेहि'त्ति। वत्तव्वो य एसो 'अभुञ्जमाणं नियमा वायाएमि'त्ति। गओ देवसम्मो, दिट्ठो तेण राया, भणिओ य-देव! देव्ववसयाणं पाणिणं विसमा कज्जगइ त्ति। एसो य देव्वो नाम अणाराहणीओ विणएण, अगुणगाही गुणीणं, अकालन्नू समीहियस्स, केवलमणत्थो जणाणं, मत्तहत्थि व्व सच्छन्दयारी, गङ्गापवाहो व्व उज्जुकुडिलो महाहवो व्व निवायदक्खो, विसगण्ठि व्व नाणुकूलो रसाणं, पडिकूलो य समीहियाणं, अणुकूलो असमीहियस्स। ता जइ वि एस एवंभूओ, तहावि पुरिसेण खणमवि न पुरिसयारो मोत्तव्वो त्ति। जेण महाराय! पुव्वोवज्जियाणं कम्माणं चेव एयं नामं देव्वो, तं च पुरिसयारजेयमेव वट्टइ ति। ता अवलम्बेउ देवो पुरिसयारं, करेउ आहारगहणं। जीयमाणो हि पुरिसो

स्कारो प्रपथ्या प्रव्रज्येति ॥

इतश्च प्रतिदिनं कदर्थनयाऽपि क्रोधवशमगच्छता 'एतावन्मात्रं मे जीवितं, कालोचितं साम्प्रतमनशनम्' इति प्रतिपन्नं राज्ञा। आरक्षकैर्निवेदितमानन्दस्य, कुपित एषः, प्रेषितस्तेन देवशर्मा नाम निजमहत्तरः 'गच्छ भोजय' इति। वक्तव्यश्चैष 'अभुञ्जानं नियमाद् व्यापादयामि' इति। गतो देवशर्मा, दृष्टस्तेन राजा, भणितश्च-देव! दैववशगानां प्राणिनां विषमा कार्यगतिरिति। एष च दैवो नाम अनाराधनीयो विनयेन, अगुणग्राही गुणिनाम्, अकालज्ञः समीहितस्य, केवलमनर्थो जनानाम्, मत्तहस्तीव स्वच्छन्दचारी, गङ्गाप्रवाह इव ऋजुकुटिलः, महाहव इव निपातदक्षः, विषग्रन्थिरिव नानुकूलो रसानाम्, प्रतिकूलश्च समीहितानाम्, अनुकूलोऽसमीहितस्य। ततो यद्यपि एष

---

१ अधयारो व्व प

लद्धिऊणावयं अवस्सं देव ! संपयं पावेइ त्ति। राइणा भणियं—भो देवसम्म ! न मुक्को मए चेव अहाकालाणुरूवो पुरिसयारो। पडिवन्ना य भावओ पव्वज्जा। अओ न संपयाभिलासपरं मे चित्तं। उचियकालं च नाऊण पडिवन्नं अणसणं। अओ न आहारगहणं करेमि त्ति। तेण भणियं—अकीरमाणम्मि आहारगहणे सुओ ते कुप्पिस्सइ। राइणा भणियं—अकारणो से कोवो, सच्चपइन्ना खु तवस्सिणो हवन्ति। तेण भणियं—देव ! विइयवुत्तन्तो चेव तुमं कुमारचरियस्स; ता मा ते पमायं करिस्सइ। एत्थन्तरम्मि 'चिरायइ देवसम्मो'त्ति संजायामरिसवेगो घेत्तूण खग्गं आगओ आणन्दो। भणियं च तेण—जइ न आहारगहणं करेसि,ता इमिणा कयन्तजीहाणुगारिणा करवालेण सीसं ते छिन्दामि। राइणा भणियं—

जाणन्तो मरणन्तं देहावासं असासयमसारं। को उव्विएज्ज नरवर ! मरणस्स अवस्स गन्तव्वे ॥

एवंभूतः, तथाऽपि पुरुषेण क्षणमपि न पुरुषकारो मोक्तव्य इति। येन महाराज ! पूर्वोपार्जितानां कर्मणामेवैतन्नाम दैवम्, तच्च पुरुषकाराजेयमेव वर्तते इति। ततोऽवलम्बतां देवो पुरुषकारम्, करोतु आहारग्रहणम्। जीवन् हि पुरुषो लब्ध्वाऽऽपदं अवश्यमेव संपदं प्राप्नोतीति। राज्ञा भणितम्—भो देवशर्मन् ! न मुक्त एव मया यथाकालानुरूपः पुरुषकारः, प्रतिपन्ना च भावतः प्रव्रज्या। अतो न संपदभिलाषपरं मे चित्तम्। उचितकालं च ज्ञात्वा प्रतिपन्नमनशनम्। अतो न आहारग्रहणं करोमि इति। तेन भणितम्—अक्रियमाणे आहारग्रहणे सुतस्तुभ्यं कुपिष्यति। राज्ञा भणितम्—अकारणस्तस्य कोपः, सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति। तेन भणितम्—देव ! विदितवृत्तान्त एव त्वं कुमारचरितस्य, ततो मा ते प्रमादं कार्षीत्। अत्रान्तरे 'चिरायते देवशर्मा' इति संजातामर्षवेगो गृहीत्वा खड्गमागत आनन्दः। भणितं च तेन—यदि नाहारग्रहणं करोषि, ततोऽनेन कृतान्तजिह्वानुकारिणा करवालेन शीर्षं ते छिनद्मि। राज्ञा भणितम्—

जानन् मरणान्तं देहावासमशाश्वतमसारम्। क उद्विज्यात् नरवर ! मरणादवश्यगन्तव्ये ॥

गब्भपभिइमावीई सलिलच्छेए सरं व सूसन्तं । अणुसमयं मरमाणं जियइ त्ति जणो कहं भणइ ? ॥
संपत्थियाण परलोगमेगसत्थेण सत्थियाणं व । जइ तत्थ कोइ पुरओ वच्चइ भयकारणं किमिह ? ॥
जीयमणिच्चमवस्सं मरणं ति मणम्मि निच्छयं जस्स । सूणायारपसुस्स व का आसा जीविए तस्स ? ॥

हंदि ! जराधणुहत्थो वाहिसयविइण्णसायगो एइ । माणुसमयजूहवहं विहाणवाहो करेमाणो ॥
न गणेइ पच्चवायं न य पडियारं चिराणुवत्तिं वा । सच्छन्दसुहं विहरइ हरि व्व मच्चू मयकुलेसु ॥
एक्के च्चिय निव्विण्णा पुणो पुणो जाइउं च मरिउं च । जे भवमच्चुव्विग्गा भवरोगहरं अणुचरन्ति ॥
जरमरणरोगसमणं जिणवयणरसायनं अमयसारं । पाउं परिणामसुहं नाहं मरणस्स बीहेमि ॥

गर्भप्रभृति आवीच्या सलिलच्छेदे सर इव शुष्यत । अनुसमयं म्रियमाणं जीवतीति जनः कथं भणति ? ॥
संप्रस्थितानां परलोकमेकसार्थेण सार्थिकानामिव । यदि तत्र कोऽपि पुरतो व्रजति भयकारणं किमिह ? ॥
जीवितमनित्यमवश्यं मरणमिति मनसि निश्चयं यस्य । सूनागारपशोरिव काऽऽशा जीविते तस्य ? ॥

हन्त ! जराधनुर्हस्तो व्याधिशतवितीर्णसायक एति । मानुषमृगयूथवधं प्रभातव्याधः कुर्वन् ॥
न गणयति प्रत्यवायं न च प्रतिकारं चिरानुवृत्तिं वा । स्वच्छन्दसुखं विहरति हरिरिव मृत्युर्मृगकुलेषु ॥
एके एव निर्विण्णाः पुनः पुनर्जनितुं च मर्तुं च । ये भवमृत्यूद्विग्ना भवरोगहरमनुचरन्ति ॥
जरामरणरोगशमनं जिनवचनरसायनममृतसारम् । प्राप्य परिणामसुखं नाहं मरणाद् बिभेमि ॥

झोसियपावमलाणं परिसाडियबन्धलोहनियलाणं । किं कुणइ कालमरणं कयपडियारं मणुस्साणं ॥
अज्जियतवोधणाणं कलेवरहरे वि निप्पिवासाणं । संलिहियसरीराणं मरणं पि वरं सुविहियाणं ॥
सुगहियतवपत्थयणा निव्विसिऊण नियमेण अप्पाणं । मरणं मग्गन्ति मणोरहेहि धीरा धिइसहाया ॥
जस्स मयस्सेगयरो सग्गो मोक्खो व होइ नियमेण । मरणं पि तस्स नरवर ! ऊसवभूयं मणूसस्स ॥
अणवरयरोगभासुरवसणविसाणुगयदीहदाढस्स । कत्थ गओ वा मुच्चइ कयन्तकण्हाहिपोयस्स ॥
न वि जुद्धं न पलायं कयन्तहत्थिम्मि अग्घइ भयं वा । न य से दीसइ हत्थो गेण्हइ य दढं अमोक्खो य ॥
जह वा लुणाइ सासाइ कासओ परिणयाइ कालेण । इय भूयाइं कयन्तो लुणाइ जायाइं जायाइं ॥

त्यक्तपापमलानां परिशाटितबन्धलोभनिगडानाम् । किं करोति कालमरणं कृतप्रतिकारं मनुष्याणाम् ? ॥
अर्जिततपोधनानां कलेवरगृहेऽपि निष्पिपासानाम् । संलिखितशरीराणां मरणमपि वरं सुविहितानाम् ॥
सुगृहीततपःपथ्यदना निर्विश्य नियमेनात्मानम् । मरणं मार्गयन्ति मनोरथैर्धीरा धृतिसहायाः ॥
यस्य मृतस्यैकतरः स्वर्गो मोक्षो वा भवति नियमेन । मरणमपि तस्य नरवर ! उत्सवभूतं मनुष्यस्य ॥
अनवरतरोगभासुरव्यसनविषानुगतदीर्घदा(ढात्)ढस्य । कुत्र गतो वा मुच्यते कृतान्तकृष्णाहिपो(तात्)तस्य ॥
नापि युद्धं न पलायं कृतान्तहस्तिनि अर्घति भयं वा । न च तस्य दृश्यते हस्तो गृह्णाति च दृढममोक्षश्च ॥
यथा वा लुनाति सस्यानि कर्षकः परिणतानि कालेन । इति भूतानि कृतान्तो लुनाति जातानि जातानि ॥

---

१ वन्धु० क

जइ ताव मच्चुपासा सच्छन्दसुहं सुरेसु वियरन्ति । अच्चन्तमणोयारो जत्थ जरारोगवाहीणं ॥
किं पुण वाहिजरारोगसोगनिच्चुद्दुयम्मि माणुस्से । मच्चुस्स सो पमाओ जं जियइ नरो निमेसं पि ॥
ता मा अधीरजणसेवियस्स अयसस्स देहि उ(अ)वयासं । न हु मच्चुदाढलीढं इन्दो वि पहू नियत्तेउं ॥
इय मयमारणमेत्तेण वच्छ ! मा नियकुलं कलङ्केहि । गेण्हामि कहं चत्तं हन्त ! सत्तायाए आहारं ? ॥
सोऊण इयं वयणं कोवाणलजलियरत्तनयणेण । 'जंपइ अज्जाऽवि कहं' पहओ सीसम्मि खग्गेणं ॥
परिचिन्तियं च तेणं 'नमो जिणाणं' ति मुणियतत्तेणं । 'पुव्वकयकम्मदोसो एसो' त्ति विसुद्धभावेणं ॥
सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं । अवराहेसु गुणेसु य निमित्तमेत्तं परो होइ ॥
एवं च चिन्तयन्तो पुणो वि हन्तूण पावकम्मेणं । विणिवाइओ महप्पा अकलुसचित्तो सकलुसेणं ॥

यदि तावन्मृत्युपाशाः स्वच्छन्दसुखं सुरेषु विचरन्ति । अत्यन्तमनवतारो यत्र जरारोगव्याधीनाम् ॥
किं पुनर्व्याधिजरारोगशोकनित्योद्भुते मानुषे । मृत्योः स प्रमादो यज्जीवति नरो निमेषमपि ॥
ततो माऽधीरजनसेवितस्यायशसो देहि अवकाशम् । न खलु मृत्युदाढालीढं इन्द्रोऽपि प्रभुर्निवर्तयितुम् ॥
इति मृतमारणमात्रेण वत्स ! मा निजकुलं कलङ्कय । गृह्णामि कथं त्यक्तं हन्त ! स्वधात्वा आहारम् ॥
श्रुत्वेदं वचनं कोपानलज्वलितरक्तनयनेन । जल्पति अद्यापि कथं प्रहतः शीर्षे खड्गेन ॥
परिचिन्तितं च तेन 'नमो जिनेभ्यः' इति ज्ञाततत्त्वेन । 'पूर्वकृतकर्मदोष एष' इति विशुद्धभावेन ॥
सर्वः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम् । अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥

मरिऊण य उववन्नो सणंकुमारम्मि सुरवरो जुइमं । अह पञ्चसागराऊ लीलारामे विमाणम्मि ॥
इयरो वि य काऊणं रज्जं मरिऊण रयणपुढवीए । उववन्नो नेरइओ उक्कोसाऊ महाघोरो ॥

याकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय–भगवत्–श्रीहरिभद्रसूरिविरचितायां
'समराइच्चकहाए' बीओ भवो समत्तो ।

एवं च चिन्तयन् पुनरपि कृत्वा पापकर्मणा । विनिपातितो महात्माऽकलुषचित्तः सकलुषेण ॥
मृत्वा चोपपन्नः सनत्कुमारे सुरवरो द्युतिमान् । अथ पञ्चसागरायुर्लीलारामे विमाने ॥
इतरोऽपि च कृत्वा राज्यं मृत्वा रत्नपृथिव्याम् । उपपन्नो नैरयिक उत्कृष्टायुर्महाघोरः ॥

तइओ भवो ।

वक्खायं जं भणियं सीहा-णंदा य तह पियापुत्ता । सिहि-जालिणिमाइसुआ एत्तो एअं पवक्खामि ॥

अत्थि इहेव जम्बुद्दीवे, अवरविदेहे खेत्ते अपरिमियजणनिवासं, अणणुहूयवाहिवेयणं, अदिट्ठपरचक्कविब्भमं, सुंदरपुरनायगभूयं[1] कोसंबनाम नयरं । जत्थ सरलसहावो, थिरसिणेहाणुबन्धो, अणङ्गरायहाणी, धम्मफलकप्पो इत्थियाजणो । जत्थ पियंवओ, सच्चवयणो, पढमाभिभासी, धम्मनिरओ य मणुस्सवग्गो । तत्थ य अणेयसमरसंघट्टविणिज्जियदरियनरिन्दावणयपल्हत्थवियडमउडकोडिरयणप्पहारञ्जियचरणजुयलो राया नामेण अजियसेणो त्ति । तस्स य सयलरज्जचिन्तओ, अत्ताणनिव्विसेसो इन्दसम्मो नाम माहणसचिवो । सुहंकरा से भारिया ॥ इओ य सो आणन्दनारओ सागरोवमन्तम्मि नरए खविऊण, अन्ने वि किंचूणे चत्तारि सागरोवमे संसारे

व्याख्यातं यद् भणितम् सिंहा-ऽऽनन्दौ च तथा पितृपुत्रौ । शिखि-जालिनिमातृसुते इत एतत् प्रवक्ष्यामि ॥

अस्ति इहैव जम्बुद्वीपे, अपरविदेहे क्षेत्रे अपरिमितजननिवासम्, अननुभूतव्याधिवेदनम्, अदृष्टपरचक्रविभ्रमम्, सुन्दरपुरनायकभूतं कौशाम्बं नाम नगरम् । यत्र सरलस्वभावः, स्थिरस्नेहानुबन्ध, अनङ्गराजधानी, धर्मफलकल्पः स्त्रीजनः । यत्र प्रियंवदः, सत्यवचनः, प्रथमाऽभिभाषी धर्मनिरतो मनुष्यवर्गः । तत्र च अनेकसमरसंघट्टविनिर्जितदृप्तनरेन्द्रावनतपर्यस्तविकटमुकुटकोटिरत्नप्रभारञ्जितचरणयुगलो राजा नाम्ना अजितसेन इति । तस्य च सकलराज्यचिन्तकः, आत्मनिर्विशेष इन्द्रशर्मा नाम ब्राह्मणसचिवः । शुभंकरा तस्य भार्या ॥

---

1 सुरपुरनायभूय च

समाहिण्डिय इन्दसम्मस्स माहणस्स सुहंकराए भारियाए कुच्छिमि इत्थियत्ताए उववन्नो त्ति। जाया उचियसमएणं। कयं से नामं जालिणि त्ति कहाणयविसेसेण। पत्ता जोव्वणं। दिन्ना तस्स चेव राइणो बुद्धिसागराभिहाणसचिवपुत्तस्स बम्भदत्तस्स। कयं पाणिग्गहणं। भुञ्जमाणाण भोए गओ कोइ कालो॥

इओ य सो सीहदेवो तओ देवलोगाओ चविऊण अचिन्तमाहप्पयाए कम्मस्स, तीसे चेव जालिणीए कुच्छिसि पुत्तत्ताए उववन्नो त्ति। दिट्ठो य तीए तीए चेव रयणीए सुमिणओ–जहा किर सुवण्णमयपुण्णकलसो मे उयरं पविट्ठो, सो य असंजायपरिओसाए विणिग्गओ समाणो कहकह वि भग्गो त्ति। तं च दट्ठूण ससज्झसा वि य विउद्धा एसा। जाओ से संकिण्णो सुहरसो। न साहिओ य तीए सुमिणओ दइयस्स। तओ से वड्ढिउं पयत्तो गब्भो। जाया से देहमणपीडा। चिन्तियं च तीए–'वावाएमि ताव एयं पाव-

---

इतश्च स आनन्दनारकः सागरोपममन्ते नरके क्षपयित्वा, अन्यानि अपि किञ्चिदूनानि चत्वारि सागरोपमाणि संसारे समाहिण्ड्य इन्द्रशर्मणो ब्राह्मणस्य शुभंकराया भार्यायाः कुक्षौ स्त्रिकतया उपपन्न इति। जाता उचितसमयेन। कृतं तस्या नाम जालिनी इति कथानकविशेषेण। प्राप्ता यौवनम्। दत्ता तस्य एव राज्ञो बुद्धिसागराभिधानसचिवपुत्रस्य ब्रह्मदत्तस्य। कृतं पाणिग्रहणम्। भुञ्जानयोर्भोगान् गतः कश्चित् कालः॥

इतश्च स सिंहदेवः ततो देवलोकात् च्युत्वा अचिन्त्यमाहात्म्यतया कर्मणः, तस्या एव जालिन्याः कुक्षौ पुत्रतया उपपन्न इति। दृष्टश्च तया तस्यामेव रजन्यां स्वप्नकः–यथा किल सुवर्णमयपूर्णकलशो मम उदरं प्रविष्टः, स च असंजातपरितोषाया विनिर्गतः सन् कथंकथमपि भग्न इति। तं च दृष्ट्वा ससाध्वसा इव विबुद्धा एषा। जातस्तस्याः संकीर्णः सुखरसः। न कथितश्च तया स्वप्नको दयितस्य। ततः स वर्धितुं प्रवृत्तो गर्भः। जाता तस्य देह-मनःपीडा। चिन्तितं च तया–'व्यापादयामि तावद् एतं पापगर्भम्'

गब्भं' ति । पउत्ताइं गब्भसाडणाइं । कम्मविवागओ न विवन्नो गब्भो । मुणिओ य वुत्तन्तो बम्भदत्तेण । निउत्तो तेण परियणो पसूइसमए, जहा गब्भविवत्ती न हवइ तहा तुब्भेहिं जइयव्वं; अवि य भट्टिणीपरिओसनिमित्तं कहंचि चित्तं से वञ्चिऊण मम निवेइयव्वो त्ति । तओ जाओ से दोहलओ–करेमि सव्वसत्ताणमाणन्दं, संपाडेमि देवयाययणाणं महापूयाओ, पूएमि भयवन्ते धम्मनिरए महातवस्सी, सुणिमो किंचि परलोयमग्गं ति । संपाडिओ से भत्तारेण डोहलो । गब्भपभावेण जाया मणोरमा लोयस्स । पत्तो य पसूइसमओ । पसूया एसा । चिन्तियं च तीए–कहं पुण एस एद्दहमेत्तपरियणसमक्खं वावाइयव्वो त्ति ? । एत्थन्तरम्मि मुणियतयभिप्पायाए बम्भदत्तवयणं सरिऊण भणियं बन्धुजीवाभिहाणाए बालसहीए । भट्टिणि ! पावो खु एस गब्भो । ता अलमिमिणा किलेसाऽऽयासकारएण, वरं विहञ्चिओ एसो त्ति । तओ कसायपरवसाए वावायणम्मि सहियणलज्जालुयाए भणियं जालिणीए–'तुब्भे जाणह'

इति । प्रयुक्तानि गर्भशातनानि । कर्मविपाकतो न विपन्नो गर्भः । ज्ञातश्च वृत्तान्तो ब्रह्मदत्तेन । नियुक्तस्तेन परिजनः प्रसूतिसमये, यथा गर्भविपत्तिर्न भवति तथा युष्माभिः यतितव्यम्, अपि च भर्त्रीपरितोषनिमित्तं कथंचित चित्तं तस्य वञ्चित्वा मम निवेदयितव्य इति । ततो जातस्तस्या दोहदः–करोमि सर्वसत्त्वानामानन्दम्, संपादयामि देवतायतनानां महापूजाः, पूजयामि भगवतो धर्मनिरतान् महातपस्विनः, शृणुमः कंचित् परलोकमार्गम्–इति । संपादितस्तस्या भर्त्रा दोहदः । गर्भप्रभावेण जाता मनोरमा लोकस्य । प्राप्तश्च सूतिसमयः। प्रसूता एषा । चिन्तितं च तया–कथं पुनरेष एतावन्मात्रपरिजनसमक्षं व्यापादयितव्य ? इति । अत्रान्तरे ज्ञाततदभिप्रायया ब्रह्मदत्तवचनं स्मृत्वा भणितं बन्धुजीवाभिधानया बालसख्या । भर्त्रि ! पापः खलु एष गर्भः । ततोऽलमनेन क्लेशाऽऽयासकारकेन, वरं विभक्त (विनाशितः) एष इति । ततः कषायपरवशया व्यापादने सखीजनलज्जालुतया भणितं जालिन्या–'यूयं जानीत' इति । ततोऽपनीतो दारकः,

१ बहिणि ग

त्ति । तओ आणीओ दारओ, निवेइओ बम्भदत्तस्स । कयं से तेण सयलं सुण्णं । नीणिओ लोगवाओ 'वावन्नगब्भा पडिणि' त्ति । एयं च अइक्कन्तो कोइ कालो । पइट्ठावियं नामं बालयस्स 'सिहि' त्ति । वड्ढिओ सो कलाकलावेण देहोवचएण य । संपाइयं से निरवसेसं कालोचियं बम्भदत्तेणं । गहिओ पच्छा 'उदरपुत्तओ' त्ति । विन्नाओ य वुत्तन्तो इमिणा सुमिणदंसण-गब्भपाडणाइओ य जणणीए । वेरग्गिओ एसो ॥

एयन्तरम्मि मुणियवुत्तन्ता पुत्तस्स कसाइया से जणणी । चिन्तियं च तेण—किह ?

एयंविहा कसाया पावा भवाडइविमूलजलओघा । मोक्खत्थमुज्जएहिं वज्जेयव्वा पयत्तेण ॥

एत्तो कम्मविसुद्धी, तओ भवो, तत्थ दुक्खसंघाओ । तत्तो उव्वियमाणो पयट्टइ तए महापावे ॥

भणियं च—

निवेदितो ब्रह्मदत्तस्य । कृतं तस्य तेन सकलं शुल्कम् । नीतो लोकवादः 'व्यापन्नगर्भा मृता' इति । एवं च अतिक्रान्तः कश्चित् कालः । प्रतिष्ठापितं नाम बालकस्य 'शिखी' इति । वर्धितः स कलाकलापेन देहोपचयेन च । संपादितं तस्य निरवशेषं कालोचितं ब्रह्मदत्तेन । गृहीतः पश्चात् 'उदरपुत्रः' इति । विज्ञातो वृत्तान्तोऽनेन स्वप्नदर्शन-गर्भशातनादिकश्च जनन्याः । वैराग्यित एषः ॥

अत्रान्तरे ज्ञातवृत्तान्ता पुत्रस्य कषायिता तस्य जननी । चिन्तितं च तेन—कस्मात् ?

एवंविधाः कषायाः पापा भवाटविमूलजलौघाः । मोक्षार्थमुद्यतैः वर्जयितव्याः प्रयत्नेन ॥

इतः कर्मविशुद्धिः, ततो भवः, तत्र दुःखसंघातः । तत उद्विजमानः प्रजहात् तकान् महापापान् ॥

१ दो ग

सयणस्स वि मज्झगओ रोगाभिहओ किलिस्सइ इहेगो। सयणो वि य से रोगं न [1]विरिञ्चइ नेय नासेइ ॥
मज्झम्मि बन्धवाणं एक्को मरइ कलुणं रुयन्ताणं। न य णं धारेइ तओ बन्धुजणो नेव दाराइं ॥
एक्को करेइ कम्मं फलमवि तस्सेक्कओ समणुहोइ। एक्को जायइ मरइ य परलोयं एक्कओ जाइ ॥
पत्तेयं पत्तेयं नियगं कम्मफलमणुहवन्ताणं। को कस्स जए सयणो को कस्स व होइ अन्नजणो ? ॥
मरिऊण वेरिओ वि हु जायइ जणगो, सुओ वि हुं रिउ त्ति। ता अणवट्ठियभावे सयणे सङ्गो त्ति मोहफलं ॥
अन्नं च। सुण, अम्हाणमेव जं वत्तं—

अत्थि इहेव विजए लच्छिनिलयं नाम नयरं। तत्थ सागरदत्तो नाम सत्थवाहो, सिरिमई से भारिया, ताणं अहं सुओ त्ति।

न्यन्तसमागमचञ्चले स्वजने इति ?। अपि च—

स्वजनस्याऽपि मध्यगतो रोगाभिहतः क्लिश्यति इहैकः। स्वजनोऽपि च तस्य रोगं न विभजति नैव नाशयति ॥
मध्ये बान्धवानामेको म्रियते करुणं रुदताम्। न च तं धारयति ततो बन्धुजनो नैव दाराः ॥
एकः करोति कर्म फलमपि तस्य एकः समनुभवति। एको जायते म्रियते च परलोकमेकको याति ॥
प्रत्येकं प्रत्येकं निजकं कर्मफलमनुभवताम्। कः कस्य जगति स्वजनः कः कस्य वा भवति अन्यजनः ? ॥
मृत्वा वैरिकोऽपि खलु जायते जनकः, सुतोऽपि खलु रिपुरिति। ततोऽनवस्थितभावे स्वजने संग इति मोहफलम् ॥
अन्यच्च। शृणु, अस्माकमेव यद् वृत्तम्—

---

१ विगिंचइ म २ जणगो म ३ य म ४ रिउ म ५ लच्छितिलयं म

कुमारभावे वट्टमाणो गओ तन्नयरासन्नमेव लच्छिपव्वयं। दिट्ठो य तत्थ एगम्मि विभागे सिणिद्धपत्तसंचओ, धरापविट्ठदीहपायगो, नालिएरिपायवो त्ति। तं च दट्ठूण समुप्पन्नं मे कोउयं। चिन्तियं च मए–अहो! अच्छरियं। एद्दहमेत्तस्सवि पायवस्स एद्दहमेत्ताओ विभागाओ ओयरिऊण पायओ धरणिं पविट्ठो त्ति। ता नूणमेत्थ कारणेण होयव्वं॥

एत्थन्तरम्मि य अयण्डम्मि चेव संजाओ मे पमोओ, वियम्भिओ सुरहिमारुओ, विमुक्को सहजो वि वेराणुबन्धो पसुगणेहिं, भुवणसिरीए विय समद्धासिओ लच्छिपव्वओ, सव्वोउयकुसुमेहि वि पुप्फियाइं काणणुज्जाणाइं, पमुइया विहंगसंघाया, मणहरुत्तालरम्मं च गुञ्जियं छप्पयावलीहिं, विसुद्धपयासमतावं च तमुद्देसमुज्जोइउं पयत्तो रवी। तओ मए चिन्तियं 'अह पुण किं इमं भुवणच्छेरयं' ति॥

एत्थन्तरम्मि तरुणरविमण्डलनिहं, सुविसुद्धजच्चकञ्चणं, अणेयरयणमण्डियं, जयजयरवापूरियनहङ्गणं, गिज्जन्ततियसमङ्गलं,

---

अस्ति इहैव विजये लक्ष्मीनिलयं नाम नगरम्। तत्र सागरदत्तो नाम सार्थवाहः, श्रीमती तस्य भार्या। तयोरहं सुत इति। कुमारभावे वर्तमानो गतो तन्नगरासन्नमेव लक्ष्मीपर्वतम्। दृष्टश्च तत्र एकस्मिन् विभागे स्निग्धपत्रसंचयः, धराप्रविष्टदीर्घपादकः, नालिकेरीपादप इति। तं च दृष्ट्वा समुत्पन्नं मम कौतुकम्। चिन्तितं च मया–अहो! आश्चर्यम्। एतावन्मात्रस्यापि पादपस्य एतावन्मात्राद् विभागाद् अवतीर्य पादको धरणीं प्रविष्ट इति। ततो नूनमत्र कारणेन भवितव्यम्॥

अत्रान्तरे च अकाण्ड एव संजातो मम प्रमोदः, विजृम्भितः सुरभिमारुतः, विमुक्तः सहजोऽपि वैरानुबन्धः पशुगणैः, भुवनश्रिया इव समध्यासितो लक्ष्मीपर्वतः, सर्वर्तुकुसुमैरपि पुष्पितानि काननोद्यानानि, प्रमुदिता विहंगसंघाताः, मनोहरोत्तालरम्यं च गुञ्जितं षट्पदावलीभिः, विशुद्धप्रकाशमतापं च तमुद्देशमुद्योतयितुं प्रवृत्तो रविः। ततो मया चिन्तितम्–'अथ पुनः किमिदं भुवनाश्चर्यकम्'–इति॥

अत्रान्तरे तरुणरविमण्डलनिभम्, सुविशुद्धजात्यकाञ्चनम्, अनेकरत्नमण्डितम्, जयजयरवापूरितनभोऽङ्गणम्, गीयमानत्रिदशमङ्गलम्

निवडन्तकुसुमवुट्ठिं, अणेयतियसपरियरियं, विजियसंसारचक्कपिसुणयं, अवरदिसाओ समोवयन्तं भयवओ अजियदेवतित्थयरस्स दिट्ठं मए धम्मचक्कं ति। तयणन्तरं च महग्घगुणरयणभूसिया सियम्बरधारिणो अणेगे साहवो, तओ सुरधरियकुन्दधवलायवत्तो दुन्दुहिनिणायवहिरियनहङ्गणो, विरायन्तदिव्वभामण्डलो, सुरवइसमुक्खित्तचारुचामरो, सुरासुरमणुयवन्दसंथुओ, कालायरुपवरतुरुक्कधूवमहमहेन्तगन्धो, गन्धवट्टिभूओ अच्चन्तसोमो कञ्चणमयदिव्वकमलावलीए परिसक्कमाणो भयवं, तिलोयनाहो, निित्थिण्णभवसमुद्दो अजियदेवतित्थयरो त्ति। तं च दट्ठूण समुप्पण्णो मे पमोओ, पणट्ठं मिच्छत्ततिमिरेणं, वियम्भियं धम्मववसाएणं। चिन्तियं च मए—धन्नो अहं, जेण मए तिलोयचिन्तामणी भयवं उवलद्धो त्ति ॥

एत्थन्तरम्मि य कयं तियसेहिं भयवओ मणिकणयकलहोयमयनिम्मियपायारतियं, सुविहत्तदिव्वतोरणं, रयणमयविचित्तकविसीसयं, ऊसियमहाकेउनिवहं, गुञ्जन्तमहुयरामोयसोहियं, ऊसियसियायवत्तमणहरं, वेरुलियदिव्वसीहासणं, महल्लमीहद्धयचक्कम-

---

निपतत्कुसुमवृष्टि, अनेकत्रिदशपरिकरितम्, विजितसंसारचक्रपिशुनकम्, अपरदिशः समवपतद् भगवतोऽजितदेवतीर्थकरस्य दृष्टं मया धर्मचक्रम्-इति। तदनन्तरं च महार्घगुणरत्नभूषिताः सिताम्बरधारिणोऽनेके साधवः, ततः सुरधृतकुन्दधवलातपत्रः, दुन्दुभिनिनादबधिरितनभोऽङ्गणः, विराजमानदिव्यभामण्डलः, सुरपतिसमुत्क्षिप्तचारुचामरः, सुराऽसुरमनुजवन्द्रसंस्तुतः, कालागुरुप्रवरतुरुष्कधूपप्रसरद्गन्धः, गन्धवर्तिभूतः, अत्यन्तसौम्यः, काञ्चनमयदिव्यकमलावल्या परिसरन् भगवान्, त्रिलोकनाथः, निस्तीर्णभवसमुद्रः, अजितदेवतीर्थकर इति। तं च दृष्ट्वा समुत्पन्नो मे प्रमोदः, प्रनष्टं मिथ्यात्वतिमिरेण, विजृम्भितं धर्मव्यवसायेन, चिन्तितं च मया-धन्योऽहम्, येन मया त्रिलोकचिन्तामणिर्भगवान् उपलब्ध इति

अत्रान्तरे च कृतं त्रिदशैर्भगवतो मणिकनककलधौतमयनिर्मितप्राकारत्रिकम्, सुविभक्तदिव्यतोरणम्, रत्नमयविचित्रकपिशीर्षकम्,

ण्टियं समोमरणं ति । पविट्ठो भयवं । पत्थुया धम्मकहा । कहिओ भगवया अमासओ जीवलोगो । अवगओ अम्हाणं । तओ तं पुव्व-कोउयं ममणुस्सरन्तेण पुच्छिओ भयवं मए तिलोयनाहो । भयवं ! किं पुण तस्स नालिएरिपायवस्स पायओ ओइण्णो, किं अत्थि तत्थ दविणजायं किं वा नहि (निही), किंपरिमाणं वा, केण वा तं ठवियं, कीइसो वा तस्स विवागो त्ति ? । भगवया भणियं—सुण, लोहदोसेण पायओ ओइण्णो । अत्थि तत्थ दविणजायं । तं च दीणारसत्तलक्खपरिमाणं । तुमए तेणं च नालिएरिजीवेण ठावियं । धम्मसाहओ य विवागो एयस्स । मए भणियं—भयवं ! कहं पुण मए इमिणा य ठवियं, कहं च मम ईदिसो विवागो इमस्स वि ईदिसो त्ति । भगवया भणियं—सुण,

अत्थि इहेव विजए अमरउरं नाम नयरं । तत्थ अमरदेवो नाम गाहावई होत्था । सुन्दरी से भारिया । ताणं च तुब्भे दुवे वि

उच्छ्रितमहाकेतुनिवहम्, गुञ्जन्मधुकराऽऽमोदशोभितम्, उच्छ्रितसितातपत्रमनोहरम्, वैडूर्यदिव्यसिंहासनम्, महासिंहध्वजचक्रमण्डितं, समवसरणम्-इति । प्रविष्टो भगवान् । प्रस्तुता धर्मकथा । कथितो भगवता यथाऽवस्थितो जीवलोकः । अवगतोऽस्माभिः । ततस्तं पूर्वकौतुकं समनुस्मरता पृष्टो भगवान् मया त्रिलोकनाथः । भगवन् ! किं पुनस्तस्य नालिकेरीपादपस्य पादकोऽवतीर्णः, किम् अस्ति तत्र द्रविणजातं किं वा निधिः, किंपरिमाणं वा, केन वा तत् स्थापितम्, कीदृशो वा तस्य विपाक इति ? । भगवता भणितम्—शृणु, लोभदोषेण पादकोऽवतीर्णः । अस्ति तत्र द्रविणजातम् । तच्च दीनारसप्तलक्षपरिमाणम् । त्वया तेन च नालिकेरीजीवेन स्थापितम् । धर्मसाधकश्च विपाक एतस्य । मया भणितम्—भगवन् ! कथं पुनर्मया अनेन च स्थापितम्, कथं मम ईदृशो विपाकः, एतस्याऽपि ईदृश इति । भगवता भणितम्, शृणु—

अस्ति इहैव विजये अमरपुरं नाम नगरम् । तत्र अमरदेवो नाम गृहपतिरभवत् । सुन्दरी तस्य भार्या । तयोश्च युवां द्वावपि उपर्युपरि-

उप्परोप्परजायगा गुणचन्दबालचन्दाभिहाणा य पुत्तय त्ति । संपत्तजोव्वणा य महन्तं चेलाइभण्डं घेत्तूण वाणिज्जवडियाए आगया इमं देसं । विणिओइयं भण्डं, समासाइओ इट्ठलाहो । एत्थन्तरम्मि विजयवम्मनरवइणा आदत्तो लच्छिनिलयसामी सूरतेओ नाम नरवई । सो य नयरे गज्झं छोड्डूण गहियसारनयरलोओ आरूढो इमं पव्वयं । तुब्भे वि तेणेव नरवइणा सह घेत्तूण दविणजायं परबलभएण आरूढा लच्छिपव्वयं । ठिया य एयम्मि पएसे निहाणीकयमालोचिऊण इमं दविणजायं। अइक्कन्तो कोइ कालो । तओ लोहदोसेण 'भागिओ' त्ति करिय विसपओगकरणेणं वावाइओ तुमं गुणचन्देण । सुद्धसहावत्तणेणं च उववन्नो वंतरसुरेसु । गुणचन्दो वि य अपरिभुञ्जिऊण तं दव्वं एत्थ चेव पव्वए महाभुयङ्गडक्को मरिऊण उप्पन्नो रयणप्पहाए नरयपुढवीए नारओ । तओ तुमं देसूणपलिओवममहाउयं पालिऊण तओ चुओ एत्थेव विजए टङ्कणाउरे[1] नयरे हरिणन्दिस्स सत्थवाहस्स वसुमईए भारियाए कुच्छिंसि पुत्त-

जातकौ गुणचन्द्र-बालचन्द्राऽभिधानौ च पुत्रकौ इति । संप्राप्तयौवनौ च महत् चेलादिभाण्डं गृहीत्वा वाणिज्यप्रतिकया आगतौ इमं देशम् । विनियोजितं भाण्डम्, समासादित इष्टलाभः । अत्रान्तरे विजयवर्मनरपतिना आक्रान्तो लक्ष्मीनिलयस्वामी सूरतेजा नाम नरपतिः । स च नगरे प्राज्यं(असारं)क्षिप्त्वा गृहीतसारनगरलोक आरूढ इमं पर्वतम् । युवामपि तेनैव नरपतिना सह गृहीत्वा द्रविणजातं परबलभयेन आरूढौ लक्ष्मीपर्वतम् । स्थितौ चैतस्मिन् प्रदेशे निधानीकृतमालोच्य इदं द्रविणजातम् । अतिक्रान्तः कीयानपि कालः । ततो लोभदोषेण 'भागिकः' इति कृत्वा विषप्रयोगकरणेन व्यापादितस्त्वं गुणचन्द्रेण । शुद्धस्वभावत्वेन च उत्पन्नो व्यन्तरसुरेषु । गुणचन्द्रोऽपि च अपरिभुज्य तद् द्रव्यम् अत्र चैव पर्वते महाभुजङ्गदष्टो मृत्वा उत्पन्नो रत्नप्रभायां नरकपृथिव्यां नारकः । ततस्त्वं देशोनपल्योपमम् आयुः पालयित्वा ततश्च्युतः अत्रैव विजये टङ्कणापुरे नगरे हरिनन्दिनः सार्थवाहस्य वसुमत्या भार्यायाः कुक्षौ पुत्रतया उपपन्नो-

1 टङ्कणाउरे ग

त्ताए उववन्नो सि। जाओ कालक्कमेणं। पइट्ठावियं च ते नामं देवदत्तो त्ति। पत्तो कुमारभावं। एत्थन्तरम्मि तओ वि गुणचन्दो नरगाओ उव्वट्टिऊण लोहदोसेणमेत्थेव लच्छिपव्वए एयस्स चेव निहाणस्स पचासन्नपएसे उप्पन्नो भुयङ्गमो त्ति। परिग्गहियं च णेण तं दव्वं। एत्थन्तरम्मि लच्छिनिवासिणीदेवयामहम्मि समागओ तुमं लच्छिपव्वयं। कया देवयाए पूया। दिन्नं दीणाणाहाण दविणजायं। संपाइओ भोयणोवयारो। तओ तुमं पुव्वभवसिणेहेणं रम्मयाए पव्वयस्स परिब्भमन्तो आगओ इमं उद्देसं। दिट्ठो भुयङ्गमेणं। तओ लोहदोसेण 'एस एयं दविणजायं गेण्हिस्सइ, त्ति डक्को चरणदेसम्मि। अच्चुग्गयाए विसस्स तक्खणा चेव निवडिओ धरणिवट्ठे। पासवत्तिणा य ते परियणेण वावाविओ भुयङ्गमो। उप्पन्नो एत्थेव पव्वए सीहत्ताए त्ति। तुमं पि मरिऊण एत्थेव विजए कयङ्गलाए नयरीए सिवदेवस्स कुलउत्तयस्स जसोहराए भारियाए कुच्छिंसि पुत्तत्ताए उववन्नो सि। जाओ कालक्कमेण। पइट्ठावियं च ते नामं इन्ददेवो त्ति। पत्तो जोव्वणं। इओ य तेण सीहजीवेण पुव्वभवब्भत्थभावणाओ ओहसन्नाए परिग्गहियं तं दव्वं। एवं च गओ कोइ

ऽसि। जातः कालक्रमेण। प्रतिष्ठापितं च तव नाम देवदत्त इति। प्राप्तः कुमारभावम्। अत्रान्तरे ततोऽपि गुणचन्द्रो नरकाद् उद्वृत्य लोभदोषेण अत्रैव लक्ष्मीपर्वते एतस्य चैव निधानस्य प्रत्याऽऽसन्नप्रदेशे उत्पन्नो भुजङ्गम इति। परिगृहीतं च तेन तद् द्रव्यम्। अत्रान्तरे लक्ष्मीनिवासिनीदेवतामहसि समागतस्त्वं लक्ष्मीपर्वतम्। कृता देवतायाः पूजा। दत्तं दीनाऽनाथानां द्रविणजातम्। संपादितो भोजनोपचारः। ततस्त्वं पूर्वभवस्नेहेन रम्यतया पर्वतस्य परिभ्रमन् आगतः इममुद्देशम्। दृष्टो भुजङ्गमेन। ततो लोभदोषेण 'एष एतद् द्रविणजातं ग्रहीष्यति' इति दष्टश्चरणदेशे। अत्युग्रतया विषस्य तत्क्षणं चैव निपतितो धरणिपृष्ठे। पार्श्ववर्तिना च ते परिजनेन व्यापादितो भुजङ्गमः। उत्पन्नोऽत्रैव पर्वते सिंहतया इति। त्वमपि मृत्वाऽत्रैव विजये कृतङ्गलायां नगर्यां शिवदेवस्य कुलपुत्रस्य यशोधराया भार्यायाः कुक्षौ पुत्रतया उपपन्नोऽसि। जातः कालक्रमेण। प्रतिष्ठापितं च ते नाम इन्द्रदेव इति। प्राप्तो यौवनम्। इतश्च तेन सिंहजीवेन

कालो। अन्नया य वीरदेवनरवइणा नियसामिएण पेसिओ तुमं लच्छिनिलयसामिणो माणहङ्गस्स समीवं। आगच्छमाणो य कइवय-पुरिसपरियारिओ कालक्कमेण पत्तो इमं उद्देसं। उवविट्ठो नीवपायवस्स हेट्ठे। एत्थन्तरम्मि गिरिगुहामुहगएणं दिट्ठो सि सीहेणं। तओ लोहसन्नाविपज्जासियचित्तेणं वावाविओ सि इमिणा, इमो वि य तुमए त्ति। उववन्ना य तुब्भे एत्थेव विजयम्मि सिरित्थलगे पट्टणे जक्खदासमभिहाणस्स चण्डालस्स माइजक्खाए भारियाए जमलभाउगत्ताए त्ति। जाया कालक्कमेणं। पइट्ठावियाइं नामाइं तुज्झं कालसेणो, इयरस्स चण्डसेणो त्ति। पत्ता य जोव्वणं। अन्नया आहेडयनिमित्तं गया लच्छिपव्वयं, वावाइओ कोलो। सो य एयम्मि चेव निहाणयपएसे निसामिओ। पज्जालिओ जलणो। जलणपक्कं तं खाइउं पयत्ता। एत्थन्तरम्मि कट्ठारयं निसाणिऊण कहंचि अण-त्थदण्डओ चेव धरणिं खणमाणेण उवलद्धो निहाणयकलसस्स एगदेसो चण्डसेणेणं। पवत्तो गोविउं, लक्खिओ य तुमए। तओ

पूर्वभवाभ्यस्तभावनात ओघसंज्ञया परिगृहीतं तद् द्रव्यम्। एवं च गतः कीयान् कालः। अन्यदा च वीरदेवनरपतिना निजस्वामिकेन प्रेषितस्त्वं लक्ष्मीनिलयस्वामिनो मानभङ्गस्य समीपम्। आगच्छंश्च कतिपयपुरुषपरिवृतः कालक्रमेण प्राप्त इममुद्देशम्। उपविष्टो नीप-पादपस्याधः। अत्रान्तरे गिरिगुहामुखगतेन दृष्टोऽसि सिंहेन। ततो लोभसंज्ञाविपर्यासितचित्तेन व्यापादितोऽसि अनेन, अयमपि च त्वया इति। उत्पन्नौ च युवामत्रैव विजये श्रीस्थलके पट्टने यक्षदाससंज्ञितस्य चाण्डालस्य मातृयक्षायां भार्यायां यमलभ्रातृकतया इति। जातौ कालक्रमेण। प्रतिष्ठापिते नाम्नी तव कालसेन., इतरस्य चण्डसेन इति। प्राप्तौ च यौवनम्। अन्यदा आखेटकनिमित्तं गतौ लक्ष्मी-पर्वतम्। व्यापादितः कोलः। स च एतस्मिन् चैव निधानकप्रदेशे विश्रामितः। प्रज्वालितो ज्वलनः। ज्वलनपक्वं तं खादितुं प्रवृत्तौ। अत्रान्तरे कट्टारकं निशाण्य कथञ्चिद् अनर्थदण्डक एव धरणीं खनता उपलब्धो निधानककलशस्य एकदेशश्चण्डसेनेन। प्रवृत्तो गोप-

१ तत्र —

दव्वलोहेणं [1]वीसत्थो तुमं वावाइओ तेण। उववन्नो वालुयप्पहाए नरगपुढवीए पञ्चसागरोवमाऊ नारगो। इमो वि तद्दव्वलोभेण तं चेव देसं अमुञ्चमाणो अइक्कन्तेसु कइवयवरिसेसु अभुञ्जिऊण तं दव्वं अन्नवेरियचण्डालविनिवाइओ समाणो उप्पन्नो तमाभिहाणाए नरयपुढवीए अट्ठारससागरोवमाऊ नारगो त्ति। तओ तुमं पडिपुण्णे अहाउए नरगाओ उव्वट्टिऊण एत्थेव विजए सिरिमईए सन्निवेसम्मि सालिभद्दस्स गाहावइस्स नन्दिणीए भारियाए कुच्छिंसि पुत्तत्ताए उववन्नो त्ति। जाओ य कालक्कमेण। पइट्ठावियं ते नामं बालसुन्दरो त्ति। पत्तो जोव्वणं। एत्थन्तरम्मि सीलदेवाणगारसमीवे पत्तो तए अपत्तपुव्वो जिणवरपणीओ धम्मो। परिपालियं सावयत्तणं। कओ य [2]जहाविहिं देहच्चाओ। उववन्नो लन्तयाभिहाणे देवलोए किंचूणतेरससागरोवमाऊ वेमाणिओ त्ति। तत्थ परिभुञ्जिऊण दिव्वभोए अहाउयपरिक्खएण चुओ समाणो एत्थेव विजए हत्थिणाउरे नयरे सुहत्थिस्स नगरसेट्ठिस्स कन्तिमईए भारियाए कुच्छिंसि पुत्तत्ताए

पितुम्, लक्षितश्च त्वया। ततो द्रव्यलोभेन विश्वस्तस्त्वं व्यापादितस्तेन। उपपन्नो वालुकाप्रभायां नरकपृथिव्यां पञ्चसागरोपमायुर्नारकः। अयमपि तद्द्रव्यलोभेन तं चैव देशममुञ्चन् अतिक्रान्तेषु कतिपयवर्षेषु अभुक्त्वा तद् द्रव्यम् अन्यवैरिकचाण्डालविनिपातितः सन् उत्पन्नस्तमाऽभिधानायां नरकपृथिव्यामष्टादशसागरोपमायुर्नारक इति। ततस्त्वं प्रतिपूर्णे यथाऽऽयुष्के नारकात् उद्वृत्य अत्रैव विजये श्रीमतौ सन्निवेशे शालिभद्रस्य गृहपतेर्नन्दिन्यां भार्यायां कुक्षौ पुत्रतया उपपन्न इति। जातश्च कालक्रमेण। प्रतिष्ठापितं तव नाम बालसुन्दर इति। प्राप्तो यौवनम्। अत्रान्तरे शीलदेवाऽनगारसमीपे प्राप्तस्त्वया अप्राप्तपूर्वो जिनवरप्रणीतो धर्मः। परिपालितं श्रावकत्वम्। कृतश्च यथाविधि देहत्यागः। उपपन्नो लान्तकाऽभिधाने देवलोके किञ्चिदूनत्रयोदशसागरोपमायुर्वैमानिक इति। तत्र परिभुज्य दिव्यभोगान् यथाऽऽयुष्कपरिक्षयेण च्युतः सन् अत्रैव विजये हस्तिनापुरे नगरे सुहस्तिनो नगरश्रेष्ठिनः कान्तिमत्या भार्यायाः

1 पुरीसत्थो क। 2 जहाविहिणा ख

उववन्नो सि, इयरो वि तओ नरगाओ उव्वट्टिऊण तत्थेव नयरे तुज्झ चेव पिउणो सोमिलाभिहाणाए घरदासीए कुच्छिसि पुत्तत्ताए त्ति। जाया कालक्कमेण। पइट्ठावियाइं नामाइं–तुज्झ समुद्ददत्तो, इयरस्स मङ्गलगो त्ति। पत्ता य तुब्भे अहाकमेणेव कुमारभावं। एत्थन्तरम्मि पवन्नो तए अणङ्गदेवगणिसमीवे जिणदेसिओ धम्मो। कया देसविरई। परिणीया य लच्छिनिलयवासिणो सावयस्स अचलसत्थवाहस्स धूया जिणमई। अन्नया य मङ्गलदुइओ जिणमईनिमित्तमेव पयट्टो लच्छिनिलयं। आगओ य कइवयपयाणगेहिं। पत्तो तमुद्देसं, जत्थ निहाणं ति। तओ बहुलपत्तलयाए पएसस्स वीसमिओ मुहुत्तयं। दिट्ठो य तए पामाडज्झाडयस्स इमम्मि पएसे विणिग्गओ पायओ। भणियं कोउगेण–भो मङ्गलग ! एत्थ पएसे केणइ दविणजाएण होयव्वं। तेण भणियं–'निहालेमो' त्ति। तए भणियं–अलं इमिणा। कोउगमेत्तमेव मे कहणनिमित्तं, न उण दविणलोहो। तेण भणियं–अहियपरं मे कोउयं; ता निहालेमो, को

कुक्षौ पुत्रतया उपपन्नोऽसि, इतरोऽपि ततो नरकाद् उद्वृत्य तत्रैव नगरे तव चैव पितुः सोमिलाऽभिधानाया गृहदास्याः कुक्षौ पुत्रतया इति। जातौ कालक्रमेण। प्रतिष्ठापिते नाम्नी–तव समुद्रदत्तः, इतरस्य मङ्गलक इति। प्राप्तौ च युवां यथाक्रमेण कुमारभावम्। अत्रान्तरे प्रपन्नस्त्वया अनङ्गदेवगणिसमीपे जिनदेशितो धर्मः। कृता देशविरतिः। परिणीता च लक्ष्मीनिलयवासिनः श्रावकस्य अचलसार्थवाहस्य दुहिता जिनमतिः। अन्यदा च मङ्गलद्वितीयो जिनमतिनिमित्तमेव प्रवृत्तो लक्ष्मीनिलयम्। आगतश्च कतिपयप्रयाणकैः। प्राप्तस्तमुद्देशम्, यत्र निधानमिति। ततो बहुलपत्रतया प्रदेशस्य विश्रान्तो मुहूर्तकम्। दृष्टश्च त्वया पामाडवृक्षस्य अस्मिन् प्रदेशे विनिर्गतः पादकः। भणितं कौतुकेन–भो मङ्गलक ! अत्र प्रदेशे केनचिद् द्रविणजातेन भवितव्यम्। तेन भणितम् 'निभालयामः' इति। त्वया भणितम्–अलमनेन। कौतुकमात्रमेव मम कथननिमित्तम्, न पुनर्द्रविणलोभः। तेन भणितम्–अधिकतरं मम कौतु-

१ पोमाड० ख। २ दव्व० ख

एत्थ परमत्थो त्ति ?। तओ अणभिप्पेयं पि भवओ पयट्टो तं तहाविहेण तिक्खसारकट्ठेण खणिउं ति। दिट्ठो य तेण थेवभूमिभाए कलसकण्ठओ। तओ पुव्वकयकम्मलोहदोसेण चिन्तियं मङ्गलगेण। अहो! महत्थो एस निही। जइ कहंचि भट्टिदारयं वञ्चिउ गिण्हिउं पारियइ त्ति। एत्थन्तरम्मि दिट्ठो तुमए वि कलसकण्ठगो। भणिओ य एसो–भद्द मङ्गलग! अलं इमिणा; एहि, नयरं गच्छामो त्ति। तओ पूरिऊण तमुद्देसं हिट्ठो विय पयट्टो मङ्गलगो। भणिओ य तुमए–भद्द! न तए कस्सइ पुरओ एस वइयरो अहिगरणहेउभूओ जंपियव्वो त्ति। तेण भणियं–भट्टिदारय! न जंपामो। चिन्तियं णेण–मए वि विणा एस एयं गेण्हिस्सइ त्ति। अओ से एस पयासो। ता कहं अहं इमिणा वञ्चिज्जामि। ता जाव चेव न गेण्हइ एस एयं, ताव चेव अहं केणइ उवाएण वावाइस्सं ति। एत्थन्तरम्मि पत्ता नयरं। आराममीवट्ठिएणं भणिओ तुमए मङ्गलगो। भद्द मङ्गलग! गच्छ, ससुरकुलपउत्तिं मे कुओ वि उवलहिय संवाएहि, जेण पविसामो नयरं ति। पयट्टो मङ्गलगो। चिन्तियं च णेणं–पविट्ठो खु एसो लहुं चेव एयं गेण्हिस्सइ। ता तहाणुचिट्ठामि, जहा

तत्रस्थ एव। ततो निभालयामः, कोऽत्र परमार्थ इति ?। ततोऽनभिप्रेतमपि भवतः प्रवृत्तस्तं तथाविधेन तीक्ष्णसारकाष्ठेन खनितुमिति। दृष्टश्च तेन स्तोकभूमिभागे कलशकण्ठकः। ततः पूर्वकृतकर्मलोभदोषेण चिन्तितं मङ्गलकेन–अहो! महार्थ एष निधिः। यदि कथंचिद् भर्तृदारकं वञ्चित्वा ग्रहीतुं पार्यत इति। अत्रान्तरे दृष्टस्त्वयाऽपि कलशकण्ठकः। भणितश्चैषः–भद्र मङ्गलक! अलमनेन; एहि, नगरं गच्छाम इति। ततः पूरयित्वा तमुद्देशं हृष्ट इव प्रवृत्तो मङ्गलकः। भणितश्च त्वया–भद्र! न त्वया कस्यचित् पुरत एष व्यतिकरोऽधिकरणहेतुभूतः कथयितव्य इति। तेन भणितम्–भर्तृदारक! न कथयामः। चिन्तितं तेन–मयाऽपि विना एष एतं ग्रहीष्यति इति। अत एतस्य एष प्रयासः। ततः कथमहमनेन वञ्च्ये? ततो यावच्चैव न गृह्णाति एष एनम्, तावच्चैव अहं केनचिदुपायेन व्यापादयिष्य इति। अत्रान्तरे प्राप्तौ नगरम्। आरामसमीपस्थितेन भणितस्त्वया मंगलकः–भद्र मंगलक! गच्छ, श्वसुरकुलप्रवृत्तिं मम कुतोऽपि उपलभ्य

उववन्नो सि, इयरो वि तओ नरगाओ उव्वट्टिऊण तत्थेव नयरे तुज्झ चेव पिउणो सोमिलाभिहाणाए घरदासीए कुच्छिंसि पुत्तत्ताए त्ति। जाया कालक्कमेण। पइट्ठावियाइं नामाइं—तुज्झ समुद्ददत्तो, इयरस्स मङ्गलगो त्ति। पत्ता य तुब्भे अहाक्कमेणेव कुमारभावं। एत्थन्तरम्मि पवन्नो तए अणङ्गदेवगणिसमीवे जिणदेसिओ धम्मो। कया देसविरई। परिणीया य लच्छिनिलयवासिणो सावयस्स अचलसत्थवाहस्स धूया जिणमई। अन्नया य मङ्गलदुइओ जिणमईनिमित्तमेव पयट्टो लच्छिनिलयं। आगओ य कइवयपयाणगेहिं। पत्तो तमुद्देसं, जत्थ निहाणं ति। तओ बहुलपत्तलयाए पएसस्स वीसमिओ मुहुत्तयं। दिट्ठो य तए पीमाडज्झाडयस्स इमम्मि पएसे विणिग्गओ पायओ। भणियं कोउगेण—भो मङ्गलग! एत्थ पएसे केणइ दविणजाएण होयव्वं। तेण भणियं—'निहालेमो' त्ति। तए भणियं—अलं इमिणा। कोउगमेत्तमेव मे कहणनिमित्तं, न उण दविणलोहो। तेण भणियं—अहियपरं मे कोउयं; ता निहालेमो, को

कुक्षौ पुत्रतया उत्पन्नोऽसि, इतरोऽपि ततो नरकाद् उद्वृत्य तत्रैव नगरे तव चैव पितुः सोमिलाऽभिधानाया गृहदास्याः कुक्षौ पुत्रतया इति। जातौ कालक्रमेण। प्रतिष्ठापिते नाम्नी—तव समुद्रदत्तः, इतरस्य मङ्गलक इति। प्राप्तौ च युवां यथाक्रमेण कुमारभावम्। अत्रान्तरे प्रपन्नस्त्वया अनङ्गदेवगणिसमीपे जिनदेशितो धर्मः। कृता देशविरतिः। परिणीता च लक्ष्मीनिलयवासिनः श्रावकस्य अचलसार्थवाहस्य दुहिता जिनमतिः। अन्यदा च मङ्गलद्वितीयो जिनमतिनिमित्तमेव प्रवृत्तो लक्ष्मीनिलयम्। आगतश्च कतिपयप्रयाणकैः। प्राप्तस्तमुद्देशम्, यत्र निधानमिति। ततो बहुलपत्रतया प्रदेशस्य विश्रान्तो मुहूर्तकम्। दृष्टश्च त्वया पामाडवृक्षस्य अस्मिन् प्रदेशे विनिर्गतः पादकः। भणितं कौतुकेन—भो मङ्गलक! अत्र प्रदेशे केनचिद् द्रविणजातेन भवितव्यम्। तेन भणितम् 'निभालयामः' इति। त्वया भणितम्—अलमनेन। कौतुकमात्रमेव मम कथननिमित्तम्, न पुनर्द्रविणलोभः। तेन भणितम्—अधिकतरं मम कौतु-

१ पीमाड० रा। २ दव्व० रा

एत्थ परमत्थो त्ति ? । तओ अणभिप्पेयं पि भयओ पयट्टो तं तहाविहेण तिक्खसारकट्ठेण खणिउं ति । दिट्ठो य तेण थेवभूमिभाए कलसकण्ठओ । तओ पुव्वकयकम्मलोहदोसेण चिन्तियं मङ्गलगेण । अहो ! महत्थो एस निही । जइ कहंचि भट्टिदारयं वञ्चिउ गिण्हिउं पारियइ त्ति । एत्थन्तरम्मि दिट्ठो तुमए वि कलसकण्ठगो । भणिओ य एसो—भद्द मङ्गलग ! अलं इमिणा; एहि, नयरं गच्छामो त्ति । तओ पूरिऊण तमुद्देसं हिट्ठो विय पयट्टो मङ्गलगो । भणिओ य तुमए—भद्द ! न तए कस्सइ पुरओ एस वइयरो अहिगरणहेउभूओ जंपियव्वो त्ति । तेण भणियं—भट्टिदारय ! न जंपामो । चिन्तियं णेण—मए वि विणा एस एयं गेण्हिस्सइ त्ति । अओ से एस पयासो । ता कहं अहं इमिणा वञ्चिज्जामि । ता जाव चेव न गेण्हइ एस एयं, ताव चेव अहं केणइ उवाएण वावाइस्सं ति । एत्थन्तरम्मि पत्ता नयरं । आराममीवट्ठिएणं भणिओ तुमए मङ्गलगो । भद्द मङ्गलग ! गच्छ, ससुरकुलपउत्तिं मे कुओ वि उवलहिय संवाएहि, जेण पविसामो नयरं ति । पयट्टो मङ्गलगो । चिन्तियं च णेणं—पविट्ठो खु एसो लहुं चेव एयं गेण्हिस्सइ । ता तहाणुचिट्ठामि, जहा

तमिति । दृष्टश्च तेन स्तोकभूमिभागे कलशकण्ठकः । ततः पूर्वकृतकर्मलोभदोषेण चिन्तितं मङ्गलकेन—अहो ! महार्थ एष निधिः । यदि कथंचिद् भर्तृदारकं वञ्चित्वा ग्रहीतुं पार्यत इति । अत्रान्तरे दृष्टस्त्वयाऽपि कलशकण्ठकः । भणितश्चैषः—भद्र मङ्गलक ! अलमनेन; एहि, नगरं गच्छाम इति । ततः पूरयित्वा तमुद्देशं हृष्ट इव प्रवृत्तो मङ्गलकः । भणितश्च त्वया—भद्र ! न त्वया कस्यचित् पुरत एष व्यतिकरोऽधिकरणहेतुभूतः कथयितव्य इति । तेन भणितम्—भर्तृदारक ! न कथयामः । चिन्तितं तेन—मयाऽपि विना एष एतं ग्रहीष्यति इति । अत एतस्य एष प्रयासः । ततः कथमहमनेन वञ्च्ये ? ततो यावच्चैव न गृह्णाति एष एनम्, तावच्चैव अहं केनचिदुपायेन व्यापादयिष्य इति । अत्रान्तरे प्राप्तो नगरम् । आरामसमीपस्थितेन भणितस्त्वया मंगलकः—भद्र मंगलक ! गच्छ, श्वसुरकुलप्रवृत्तिं मम कुतोऽपि उपलभ्य

न एस एत्थ पविसइ। गच्छन्तो य मे सुहवावायणिज्जो भविस्सइ। ता एयं से निवेएमि। जहा, इत्थिमहारओ कुलविरुद्धमाचरिऊण पविसिया ते घरिणी। अओ अच्चन्तमुव्विग्गं ते ससुरकुलं। सुयं च अम्हाणमागमणमेएहिं, अओ अहिययरं लज्जियाणि। ता न जुत्तमेत्थ पविसिउं ति संपहारिय तओ नयरं पविसिऊण कयकालक्खेवो मायाचरिएण विवण्णमुहच्छाओ आगओ ते समीवं। निवेइयं जहा चिन्तियं। तओ विसण्णो तुमं। चिन्तियं च तुमए-धिरत्थु इत्थिभावस्स, जमेवंविहा वि सावयकुलुप्पन्ना वि सुविन्नायजिणवयणसारा वि उभयलोयविरुद्धमायरइ। अहवा नत्थि दुक्करं मोहभावस्स। ता अलं मे इयाणिं पि गिहवासेण। पवज्जामो तित्थयरभासियं साहुधम्मं। एवमवसाणो खु एस सिणेहबन्धो। ता अलं मे सगिहगमणेणं पि। इओ चेव गच्छामि, जत्थ भगवं अणङ्गदेवो। एसो वि मङ्गलगो इओ चेव वच्चउ घरं, किमिमिणा किलिमिएणं ति संपहारिऊण भणिओ जहाचिन्तियमेव मङ्गलगो।

संपादय, येन प्रविशामो नगरमिति। प्रवृत्तो मंगलकः। चिन्तितं च तेन-प्रविष्टः खल्वेष लघ्वेव यत् प्रज्ञापयति। ततस्तथाऽनुतिष्ठामि, यथा नैवोऽत्र प्रविशति। गच्छंश्च मम सुखव्यापादनीयो भविष्यति। तत एतत् तस्य निवेदयामि। यथा, स्त्रीस्वभावतः कुलविरुद्धमाचर्य प्रविष्टा (अन्यगृहे) तव गृहिणी। अतोऽत्यन्तमुद्विग्नं तव श्वसुरकुलम्। श्रुतं च अस्माकमागमनमेतैः, अतोऽधिकतरं लज्जितानि। ततो न युक्तमत्र प्रवेष्टुमिति संप्रधार्य ततो नगरं प्रविश्य कृतकालक्षेपः मायाचरितेन विवर्णमुखच्छाय आगतस्तव समीपम्। निवेदितं यथा चिन्तितम्। ततो विषण्णस्त्वम्। चिन्तितं च त्वया-धिगस्तु स्त्रीस्वभावम्, यदेवंविधाऽपि श्रावककुलोत्पन्नाऽपि, सुविज्ञातजिनवचनसाराऽपि उभयलोकविरुद्धमाचरति। अथवा नास्ति दुष्करं मोहभावस्य। ततोऽलं मम इदानीमपि गृहवासेन। प्रपद्यामहे तीर्थंकरभाषितं साधुधर्मम्। एवमवसानः खलु एष स्नेहबन्धः। ततोऽलं मम स्वगृहगमनेनाऽपि। इत एव गच्छामि, यत्र भगवान् अनङ्गदेवः। एषोऽपि मंगलक इत एव व्रजतु गृहम्, किमनेन क्लेशितेनेति संप्रधार्य भणितो यथाचिन्तितमेव मङ्गलकः।

चिन्तियं च णेणं–अहो ! ! एस मायाचरिएणं मं वञ्चिउं उज्जओ। ता कहमहमिमिणा वञ्चिज्जामि त्ति। ता भणामि ताव एयं। जाव तुमं न चिन्तियदेसं पत्तो सि, ताव कहमहं भवन्तं परिच्चयामि। एवं कइवयदियाणि इमिणा सह गच्छिऊण वावाइस्सं इमं ति। चिन्तिऊण भणिओ तुमं इमिणा। पडिभणियं च तुमए। भद्द मङ्गलग ! जइ ते निब्बन्धो, ता एवं हवउ त्ति। तओ पुच्छिस्सामो कंचि साहुं, कहिं भयवं अणङ्गदेवो त्ति?। मन्तिऊण पत्थिया तुब्भे पडिपहेण। अइक्कन्ता कइवि वासरा। अन्नया अइविसमरण्णमज्झवत्तिनहयलसरन्तरमभिगए दिणयरम्मि 'महासाहसं' ति कलिऊण अचन्तखुद्दहियएणं लोहदोसओ तहा वि अणियत्तमाणेणं सुवीसत्थहियओ चेव पहओ तुमं पिट्ठिदेसम्मि छुरिगाए मङ्गलगेणं ति। एत्थन्तरम्मि अद्धाणपडिवन्नो अणेयसमणपरियरिओ तत्थेव पएसे सहसा समागओ अणङ्गदेवो। दिट्ठो तुमं अग्गगामिएहिं साहूहिं। एत्थन्तरम्मि मज्झसेण छुरियमवहाय नट्ठो मङ्गलगो। चिन्तियं च तुमए–हा ! किमेयं ति। किं तक्करा समागया भवे। जीवियं पिट्ठओ, जाव दिट्ठो ससंभमाउलं पलायमाणो मङ्गलगो। चिन्तियं च

चिन्तितं च तेन–अहो ! एष मायाचरितेन मां वञ्चितुं उद्यतः। ततः कथमहमनेन वञ्च्ये इति। ततो भणामि तावद् एतम्। यावत् त्वं न चिन्तितदेशं प्राप्तोऽसि, तावत् कथमहं भवन्तं परित्यजामि। एवं कतिपयदिनानि अनेन सह गत्वा व्यापादयिष्ये इममिति चिन्तयित्वा भणितस्त्वमनेन। प्रतिभणितं च त्वया। भद्र ! मङ्गलक ! यदि तव निर्बन्धः, तत एवं भवतु इति। ततः प्रक्ष्यामः कश्चित् साधुम्, कुत्र भगवान् अनङ्गदेव इति मन्त्रयित्वा प्रस्थितौ युवां प्रतिपथेन। अतिक्रान्ताः कतिचिद् वासराः। अन्यदा अतिविषमारण्यमध्यवर्तिनभस्तलसरोन्तरमभिगते दिनकरे 'महासाहसम्' इति कलयित्वा अत्यन्तक्षुद्रहृदयेन लोभदोषतस्तथाऽपि अनिवर्तमानेन सुविश्वस्तहृदय एव प्रहतस्त्वं पृष्ठदेशे छुरिकया मङ्गलकेन इति ॥ अत्रान्तरे अध्वप्रतिपन्नोऽनेकश्रमणपरिवृतः तत्रैव प्रदेशे सहसा समागतोऽन-

१ जोइयं क

तुमए–न एत्थ अन्ने चोरा दीसन्ति, पलायइ य एसो । ता किमेयं ति ? । एत्थन्तरम्मि दिट्ठा सोणियाणुरञ्जिया छुरिया । गहिया य सा तए पच्चभिन्नाया य । तओ संजाओ ते वियप्पो । किमेयं मङ्गलगेण ववसियं भवे ? । अहवा न एयस्स किंपि एवं ववसायकारणं उप्पेक्खामि । ता सद्देमि ताव एयं ति । एसेव मे एत्थ परमत्थं साहिस्सइ । सद्दिओ मङ्गलगो, जाव अहिययरं पलाइउमारद्धो । तओ अवगओ ते वियप्पो । हन्त ! एएण चेव ववसियं ति । ता किं पुण से इमस्स ववसायस्स कारणं । आभोइओ निहाणयवुत्तन्तो । चिन्तियं च तुमए–नत्थि अकरणिज्जं नाम लोहवसगाणं ति । अओ चेव निमित्तओ जिणमईवुत्तन्तो वि इमिणा विगप्पिओ भवे । अन्नहा कहं तारिसी महाकुलपसूया सुविन्नायजिणवयणसारा य तारिसं उभयलोगविरुद्धं करिस्सइ । एत्थन्तरम्मि पत्ता ते साहवो तमुद्देसं । पच्चभिन्नाओ य तेहिं । वन्दिया य तुमए । धम्मलाहिओ साहूहिं । पुच्छिओ य तेहिं । सावय ! किमेयं ति ? । साहिओ

द्धेयः । दृष्टस्त्वमग्रगामिभिः साधुभिः । अत्रान्तरे साध्वसेन क्षुरिकामपहाय नष्टो मङ्गलकः । चिन्तितं च त्वया–हा ! किमेतदिति । किं तस्कराः समागता भवेयुः ? । दृष्टं पृष्ठत', यावद् दृष्टः ससंभ्रमाकुलं पलायमानः मङ्गलकः । चिन्तितं च त्वया–न अत्र अन्ये चौरा दृश्यन्ते, पलायते च एष' । ततः किमेतदिति । अत्रान्तरे दृष्टा शोणितानुरक्ता छुरिका । गृहीता च सा त्वया प्रत्यभिज्ञाता च । ततः सञ्जातस्तव विकल्पः । किमेतद् मंगलकेन व्यवसितं भवेत् ? अथवा न एतस्य किमपि एवं व्यवसायकारणमुत्प्रेक्षे । ततः शब्दयामि तावद् एतमिति । एष एव ममात्र परमार्थं कथयिष्यति । शब्दितो मङ्गलक, यावद् अधिकतरं पलायितुमारब्धः । ततोऽपगतस्तव विकल्पः । हन्त ! एतेन एव एतद् व्यवसितमिति । ततः किं पुनः तस्याऽस्य व्यवसायस्य कारणम् ? । आभोगितो निधानकवृत्तान्तः । चिन्तितं च त्वया–नास्ति अकरणीयं नाम लोभवशगानामिति । अत एव निमित्ततो जिनमतीवृत्तान्तोऽपि अनेन विकल्पितो भवेत् । अन्यथा कथं तादृशी महाकुलप्रसूता सुविज्ञातजिनवचनसारा च तादृशं उभयलोकविरुद्धं करिष्यति । अत्रान्तरे प्राप्तास्ते साधवस्तमु-

तओ य महया परिकिलेसेण तमहाउयं पालिऊण उव्वट्टो समाणो एत्थेव विजए रट्ठवद्धणए गामे वेल्लियगस्स चण्डालस्स गेहे छेलगत्ताए उववन्नो त्ति। पत्तो य जोव्वणं। अन्नया य बहुछेलगमज्झगओ तओ रट्ठवद्धणाओ जयत्थले निज्जमाणो पत्तो इमं निहाणुद्देसं। समुप्पन्नं च से तमुद्देसमवलोइऊण पुव्वभवब्भासओ जाइस्सरणं। तओ लोहदोसेण नियट्टो वेल्लियगस्स नेच्छइ तओ उद्देसाओ अन्नत्थमभिगन्तुं, चोइज्जन्तो वि पुणो पुणो नियत्तइ त्ति। कोहाभिभूएणं वावाइओ वेल्लियगेण। उप्पन्नो तत्थेव निहाणुद्देसे मूसओ। परिग्गहियं च णेण ओहसन्नाए तं दव्वं। अणुवालियं कंचि कालं। अन्नया सोमचण्डो नाम जूयारिओ कहचि परिब्भमन्तो आगओ तमुद्देसं। उवविट्ठो सालपायवसमीवे। तओ अन्नाणलोहदोसेण तस्स पुरओ सामरिसमिव परिभमिउमाढत्तो। घाबाइओ य तेणं। समुप्पन्नो य तस्सेव पणट्ठसवणनासिगाए दुंगिलिगा[1]भिहाणाए भारियाए कुच्छिसि पुत्तत्ताए त्ति। जाओ काल

तमाभिधानायां नरकपृथिव्यां द्वाविंशतिसागरोपमायुर्नारक इति। ततश्च महता परिक्लेशेन तदायुष्कं पालयित्वा मृतः सन् उपपन्नः अत्रैव विजये राष्ट्रवर्धनके ग्रामे वेल्लितकस्य चाण्डालस्य गेहे छागकतया उपपन्न इति। प्राप्तश्च यौवनम्। अन्यदा च बहुछागमध्यगतः ततो राष्ट्रवर्धनाद् जयस्थले नीयमानः प्राप्त इमं निधानकोद्देशम्। समुत्पन्नं च तस्य तमुद्देशमवलोक्य पूर्वभवाभ्यासतः जातिस्मरणम्। ततो लोभदोषेण निवृत्तो वेल्लितकस्य नेच्छति तत उद्देशाद् अन्यत्राऽभिगन्तुम्, चोद्यमानोऽपि पुनः पुनः निवर्तते इति। क्रोधाभिभूतेन व्यापादितो वेल्लितकेन। उत्पन्नस्तत्रैव निधानकोद्देशे मूषकः। परिगृहीतं चानेन ओघसंज्ञया तद् द्रव्यम्। अनुपालितं कंचित् कालम्। अन्यदा सोमचण्डो नाम द्यूतकारः कथञ्चित् परिभ्रमन् आगतस्तमुद्देशम्। उपविष्टः शालपादपसमीपे। ततोऽज्ञानलोभदोषेण तस्य पुरतः सामर्षमिव परिभ्रमितुमारब्धः। व्यापादितश्च तेन। समुत्पन्नश्च तस्यैव

---

[1] दुग्गुलिया ग

तुमए-न एत्थ अन्ने चोरा दीसन्ति, पलायइ य एसो। ता किमेयं ति ?। एत्थन्तरम्मि दिट्ठा सोणियाणुरञ्जिया छुरिया। गहिया य सा तए पच्चभिन्नाया य। तओ संजाओ ते वियप्पो। किमेयं मङ्गलगेण ववसियं भवे ?। अहवा न एयस्स किंपि एवं ववसायकारणं उप्पेक्खामि। ता सद्देमि ताव एयं ति। एसेव मे एत्थ परमत्थं साहिस्सइ। सद्दिओ मङ्गलगो, जाव अहिययरं पलाइउमारद्धो। तओ अवगओ ते वियप्पो। हन्त ! एएण चेव ववसियं ति। ता किं पुण से इमस्स ववसायस्स कारणं। आभोइओ निहाणयवुत्तन्तो। चिन्तियं च तुमए-नत्थि अकरणिज्जं नाम लोहवसगाणं ति। अओ चेव निमित्तओ जिणमईवुत्तन्तो वि इमिणा विगप्पिओ भवे। अन्नहा कहं तारिसी महाकुलपसूया सुविन्नायजिणवयणसारा य तारिसं उभयलोगविरुद्धं करिस्सइ। एत्थन्तरम्मि पत्ता ते साहवो तमुद्देसं। पच्चभिन्नाओ य तेहिं। वन्दिया य तुमए। धम्मलाहिओ साहूहिं। पुच्छिओ य तेहिं। सावय ! किमेयं ति ?। साहिओ

द्देशः। दृष्टस्त्वमग्रगामिभिः साधुभिः। अत्रान्तरे साध्वसेन क्षुरिकामपहाय नष्टो मङ्गलकः। चिन्तितं च त्वया-हा! किमेतदिति। किं तस्कराः समागता भवेयुः ?। दृष्टं पृष्ठत, यावद् दृष्टःससंभ्रमाकुलं पलायमानः मङ्गलकः। चिन्तितं च त्वया-न अत्र अन्ये चौरा दृश्यन्ते, पलायते च एषः। ततः किमेतदिति। अत्रान्तरे दृष्टा शोणिताऽनुरक्ता क्षुरिका। गृहीता च सा त्वया प्रत्यभिज्ञाता च। ततः सञ्जातस्तव विकल्पः। किमेतद् मंगलकेन व्यवसितं भवेत्? अथवा न एतस्य किमपि एवं व्यवसायकारणमुत्प्रेक्षे। ततः शब्दयामि तावद् एतमिति। एष एव ममात्र परमार्थं कथयिष्यति। शब्दितो मङ्गलकः, यावद् अधिकतरं पलायितुमारब्धः। ततोऽपगतस्तव विकल्पः। हन्त ! एतेन एव एतद् व्यवसितमिति। ततः किं पुनः तस्याऽस्य व्यवसायस्य कारणम् ?। आभोगितो निधानकवृत्तान्तः। चिन्तितं च त्वया-नास्ति अकरणीयं नाम लोभवशगानामिति। अत एव निमित्ततो जिनमतीवृत्तान्तोऽपि अनेन विकल्पितो भवेत्। अन्यथा कथं तादृशी महाकुलप्रसूता सुविज्ञातजिनवचनसारा च तादृशं उभयलोकविरुद्धं करिष्यति। अत्रान्तरे प्राप्तास्ते साधवस्तमु-

तओ य महया परिकिलेसेण तमद्धाउयं पालिऊण उव्वट्टो समाणो एत्थेव विजए रट्ठवद्धणए गामे वेल्लियगस्स चण्डालस्स गेहे छेलगत्ताए उववन्नो त्ति। पत्तो य जोव्वणं। अन्नया य बहुछेलगमज्झगओ तओ रट्ठवद्धणाओ जयत्थले निज्जमाणो पत्तो इमं निहाणउद्देसं। समुप्पन्नं च से तमुद्देसमवलोइऊण पुव्वभवब्भासओ जाइस्सरणं। तओ लोहदोसेण विरुद्धो वेल्लियगस्स नेच्छइ तओ उद्देसाओ अन्नत्थमभिगन्तुं, चोइज्जन्तो वि पुणो पुणो नियत्तइ त्ति। कोहाभिभूएणं वावाइओ वेल्लियगेण। उप्पन्नो तत्थेव निहाणुद्देसे मूसओ। परिग्गहियं च णेण ओहसन्नाए तं दव्वं। अणुवालियं कंचि कालं। अन्नया सोमचण्डो नाम जूयारिओ कहचि परिब्भमन्तो आगओ तमुद्देसं। उवविट्ठो मालपायवसमीवे। तओ अन्नाणलोहदोसेण तस्स पुरओ सामरिसमिव परिभमिउमाढत्तो। वावाइओ य तेणं। समुप्पन्नो य तस्सेव पणट्ठमरणनासिगाए दुंग्गिलिगाभिहाणाए भारियाए कुच्छिसि पुत्तत्ताए त्ति। जाओ काल

युष्कं पालयित्वा मृतः सन् उत्पन्नः तमाभिधानायां नरकपृथिव्यां द्वाविंशतिसागरोपमायुर्नारक इति। ततश्च महता परिक्लेशेन तदायुष्कं पालयित्वा उद्वृत्तः सन् अत्रैव विजये राष्ट्रवर्धनके ग्रामे वेल्लितकस्य चाण्डालस्य गेहे छागकतया उपपन्न इति। प्राप्तश्च यौवनम्। अन्यदा च बहुछागमध्यगतः ततो राष्ट्रवर्धनाद् जयस्थले नीयमानः प्राप्त इमं निधानकोद्देशम्। समुत्पन्नं च तस्य तमुद्देशमवलोक्य पूर्वभवाभ्यासतः जातिस्मरणम्। ततो लोभदोषेण विरुद्धो वेल्लितकस्य नेच्छति तत उद्देशाद् अन्यत्राऽभिगन्तुम्, चोद्यमानोऽपि पुनः पुनः निवर्तते इति। क्रोधाभिभूतेन व्यापादितो वेल्लितकेन। उत्पन्नस्तत्रैव निधानकोद्देशे मूषकः। परिगृहीतं चानेन ओघसंज्ञया तद् द्रव्यम्। अनुपालितं कंचित् कालम्। अन्यदा सोमचण्डो नाम द्यूताचार्यः कथञ्चित् परिभ्रमन् आगतस्तमुद्देशम्। उपविष्टः शाल्मलीपादपसमीपे। ततोऽज्ञानलोभदोषेण तस्य पुरतः सामर्षमिव परिभ्रमितुमारब्धः। व्यापादितश्च तेन। समुत्पन्नश्च तस्यैव

1 दुग्गुल्लिया ग

लक्कमेणं । पइट्ठावियं च से नामं रुद्दचण्डो त्ति । पत्तो अणेगजणसंतावगारयं विसपायवो व्व जोव्वणं । असमञ्जसं च ववहरिउमारद्धो । अन्नया गहिओ खत्तमुहे । उवणीओ राइणो समरभासुरस्स । समाणत्तो वज्झो । भिन्नो सूलियाए आरक्खियनरेहिं । मओ य समाणो समुप्पन्नो सक्कराभिहाणाए नरयपुढवीए किंचूणतिसागरोवमाऊ नारगो त्ति । तओ अहाउयमणुवालिऊण उव्वट्टो समाणो समुप्पन्नो एत्थेव विजए एत्थेव लच्छिनिलए असोगदत्तस्स सेट्ठिस्स सुहङ्कराए भारियाए कुच्छिसि इत्थियत्ताए त्ति । जाया उचियसमएणं । पइट्ठावियं च से नामं सिरियादेवि त्ति । पत्ता जोव्वणं । दिन्ना सागरदत्तसत्थवाहपुत्तस्स समुद्ददत्तस्स । वत्तो विवाहो भुञ्जन्ति भोए त्ति । एत्थन्तरंमि तुमं गेवेज्जगेहिंतो चविऊण इमाए चेव कुच्छिसि समुप्पन्नो पुत्तत्ताए त्ति । जाओ कालक्कमेण । पइट्ठावियं च से नामं सागरदत्तो त्ति । पत्तो जोव्वणं । पडिबुद्धो य देवसम्मायरियसमीवे । परिणीया ईसरखन्दसावगस्स धूया नन्दिणि

मनपथयणनासिकाया दुर्गिलिकाऽभिधानाया भार्यायाः कुक्षौ पुत्रतया इति । जातः कालक्रमेण । प्रतिष्ठापितं च तस्य नाम रुद्रचण्ड इति । प्राप्तोऽनेकजनसंतापकारकं विषपादप इव यौवनम् । असमञ्जसं च व्यवहर्तुमारब्धः । अन्यदा गृहीतः खात्रमुखे । उपनीतो राज्ञः समरभासुरस्य । समाज्ञप्तो वध्यः । भिन्नः शूलिकया आरक्षितनरैः । मृतः सन् समुत्पन्नः शर्कराभिधानायां नरकपृथिव्यां किंचिदूनत्रिसागरोपमायुर्नारक इति, ततः यथायुष्कमनुपाल्य उद्वृत्तः सन् समुत्पन्नः अत्रैव विजये, अत्रैव लक्ष्मीनिलये अशोकदत्तस्य श्रेष्ठिनः शुभंकराया भार्यायाः कुक्षौ स्त्रीकतया इति । जाता उचितसमयेन । प्रतिष्ठापितं च तस्या नाम 'श्रीदेवी' इति । प्राप्ता यौवनम् । दत्ता सागरदत्तसार्थवाहपुत्रस्य समुद्रदत्तस्य । वृत्तो विवाहः । भुञ्जाते भोगान् इति । अत्रान्तरे त्वं ग्रैवयकेभ्यश्च्युत्वा अस्याश्चैव कुक्षौ समुत्पन्नः पुत्रतया । जातः कालक्रमेण । प्रतिष्ठापितं च तव नाम सागरदत्त इति । प्राप्तो यौवनम् । प्रतिबुद्धश्च देवशर्माचार्यसमीपे । परि-

---

१ खत्तमुहे ख । २ नन्दणि ख ।

तुमए तेसिं जहावत्तो वुत्तन्तो। समासासिओ साहूहिं। एत्थन्तरम्मि दिट्ठो अणङ्गदेवेणं। वन्दिओ सो तए। अभिणन्दिओ तुमं इमिणा धम्मलाहेण। पुच्छिओ पउत्तिं। साहिया तुमए। समासासिओ गुरुणा। नियत्तो तुमं समं साहुगच्छेण। पत्तो थाणेसरं नाम सन्निवेसं। ठिओ तत्थ गुरू मासकप्पं। पउणो ते पहारो। उवलद्धा जहट्ठिया जिणमईपउत्ती। चिन्तियं च तुमए-अहो! मङ्गलस्स वञ्चणापगारो, अहो! विचित्तया मोहस्स, अहो! अणुवाएयया संसारस्स। ता जइ वि अखण्डियसीला जिणमई, तहावि अलं गिहासमेण। संपाडेमि उभयलोगसुहावहं समीहियं। सुविन्नायजिणवयणसारा य सा तुल्लचित्ता य मे पाएण। ता सोऊण इमं वइयरं सा वि य पव्वइस्सइ त्ति। एवं च कए सा वि हु तवस्सिणी इमाओ दुक्खबहुलाओ भवसमुद्दाओ समुत्तारिया हवइ। अलं च अपव्वइयस्स तीए दंसणेणं। बहुविग्घा चरणपडिवत्ती, सुहावहा य एसा चेव त्ति चिन्तिऊण पव्वइओ अणङ्गदेवगुरुसमीवे॥

दृष्टेदाम्। प्रत्यभिज्ञातश्च तैः। वन्दिताश्च त्वया। धर्मलाभितः साधुभिः। पृष्टश्च तैः। श्रावक! किमेतदिति। कथितस्त्वया तेषां यथावृत्तो वृत्तान्तः। समाश्वासितस्साधुभिः। अत्रान्तरे दृष्टोऽनङ्गदेवेन। वन्दितः स त्वया। अभिनन्दितस्त्वमनेन धर्मलाभेन। पृष्टः प्रवृत्तिम्। कथिता त्वया। समाश्वासितो गुरुणा। निवृत्तस्त्वं समं साधुगच्छेन। प्राप्तः स्थानेश्वरं नाम सन्निवेशम्। स्थितः तत्र गुरुर्मासकल्पम्। प्रगुणस्तव प्रहारः। उपलब्धा यथास्थिता जिनमतीप्रवृत्तिः। चिन्तितं च त्वया-अहो! मङ्गलकस्य वञ्चनाप्रकारः, अहो! विचित्रता मोहस्य, अहो! अनुपादेयता संसारस्य। ततो यद्यपि अखण्डितशीला जिनमती, तथाऽपि अलं गृहाश्रमेण। संपादयामि उभयलोकसुखावहं समीहितम्। सुविज्ञातजिनवचनसारा च सा तुल्यचित्ता च मम प्रायेण। ततः श्रुत्वा इमं व्यतिकरं साऽपि च प्रव्रजिष्यतीति। एवं च कृते साऽपि खलु तपस्विनी अस्माद् दुःखबहुलाद् भवसमुद्रात् समुत्तारिता भवति। अलं च अप्रव्रजितस्य तस्या दर्शनेन। बहुविघ्ना चरणप्रतिपत्तिः, सुखावहा च एषा एव इति चिन्तयित्वा प्रव्रजितोऽनङ्गदेवगुरुसमीपे॥

अइक्कन्तो कोइ कालो । सुओ एस वइयरो कुओवि जिणमईए । संविग्गा एसा । चिन्तियं च तीए । सोहणमणुचिट्ठियं अज्जउत्तेण । किलेसायासबहुलो एस संसारो, विओगावसाणो य संगमो, दारुणो य विवागो विसयपरिभोगस्स, दुल्लहं च मणुयभावंमि जिणमयं, उभयलोयसुहावहं च एयं चेव त्ति । तओ सा एवं विचिन्तिऊण अणुन्नविय जणणिजणए अणुन्नाया तेहिं आगया तं अन्नेसमाणी, जत्थ तुमं । दिट्ठो य अणाए । पेच्छिऊण निव्वुइपुरपट्ठियं तुमं भणियं च अणाए । अज्जउत्त, सोहणमणुचिट्ठियं तुमए । छिन्ना मोहवल्ली । अवलम्बियं सप्पुरिसचरियं । समुत्तारिया अहं अप्पा य इमाओ भवसमुद्दाओ त्ति । अहिणन्दिऊण पवन्ना पव्वज्जं अणङ्गदेवगुरुसमीवे । अइक्कन्तो कोइ कालो । निरइयारं सामण्णमणुपालिऊण तुमं कालक्कमेण मओ समाणो उववन्नो पणुवीससागरोवमाऊ गेवेज्जगसुरो त्ति । इयरो वि मङ्गलगो तमत्थं परिग्गहिय महासिलासंचओच्छाइयं च काऊण तम्ममत्तेण तत्थेव देसे कुणिमाहारेण किलेससंपाइयवित्ती अहाउयं पालिऊण मओ समाणो उववन्नो तमाभिहाणाए नरयपुढवीए बावीससागरोवमाऊ नारगो त्ति ।

अतिक्रान्तः कश्चित् कालः । श्रुत एष व्यतिकरः कुतोऽपि जिनमत्या । संविग्ना एषा । चिन्तितं च तया-शोभनमनुष्ठितमार्यपुत्रेण । क्लेशायासबहुल एष संसारः, वियोगावसानश्च संगमः, दारुणश्च विपाको विषयपरिभोगस्य, दुर्लभं च मनुजभावे जिनमतम्, उभयलोकसुखावहं च एतदेव इति । ततः सा एवं विचिन्त्य अनुज्ञाप्य जननी-जनकौ अनुज्ञाता ताभ्याम्, आगता त्वामन्वेषमाणा यत्र त्वम् । दृष्टश्च अनया । प्रेक्ष्य निर्वृतिपुरप्रस्थितं त्वां भणितं चानया । आर्यपुत्र ! शोभनमनुष्ठितं त्वया । छिन्ना मोहवल्ली । अवलम्बितं सत्पुरुषचरितम् । समुत्तारिताऽहम् आत्मा च अस्माद् भवसमुद्राद् इति । अभिनन्द्य प्रपन्ना प्रव्रज्याम् अनङ्गदेवगुरुसमीपे । अतिक्रान्तः कश्चित् कालः । निरतिचारं श्रामण्यमनुपाल्य त्वं कालक्रमेण मृतः सन् उपपन्नः पञ्चविंशतिसागरोपमायुर्ग्रैवेयकसुर इति । इतरोऽपि मङ्गलकस्तमर्थं परिगृह्य महाशिलासंचयावच्छादितं च कृत्वा तन्ममत्वेन तत्रैव देशे कुणिमाहारेण क्लेशसंपादितवृत्तिर्यथा-

त्ति। भोगसुहमणुहवन्ताणं कालक्कमेणं जाओ ते पुत्तो। अन्नया य पुत्तजम्मब्भुदयनिमित्तेणं चेव सपरिवारो आगओ उज्जाणियाए इमं चेव निहाणगुद्देसं। दिट्ठो य तुमए पुत्तज्झयनिवेसणनिमित्तं खड्डं खणमाणेणं निहाणगकलसकण्ठेगदेसो त्ति। तओ तमन्नत्थ निवेसिऊण तं च पएसं पुणरवि तहेव करिऊण भुत्तुत्तरकाले पविट्ठो नयरं। चिन्तियं तुमए। किमेत्थ जुत्तं ति अम्बं ताव पुच्छामि। साहिओ इमीए एस वइयरो। पुच्छिया एसा 'किमेत्थ जुत्तं' ति। तीए भणियं। मम ताव तं पएसं [1]दंसेहि; तओ जं जुत्तं, तं भणिस्सामि त्ति। दाविओ से पएसो। अन्नाणलोहदोसेण चिन्तियं च तीए। वावाएमि एयं तओ एगाइणी गेण्हिस्सामि। एयं चिन्तिऊण भणिओ तुमं। पुत्तय, पभूयमेयं दव्वं। एयंमि घेप्पमाणे कयाइ नरवई अवगच्छे। तओ य सो सेसदव्वावहारं पि मा करिस्सइ ता अलं ताव एइणा, अवसरेण गेण्हिस्सामो त्ति। तए भणियं। अम्ब, जं तुमं आणवेसि। पविट्ठाइं नयरं। अइक्कन्ता कइवि दियहा

पौत्री ईश्वरस्कन्दश्रावकस्य दुहिता नन्दिनी इति। भोगसुखमनुभवतोः कालक्रमेण जातस्तव पुत्रः। अन्यदा च पुत्रजन्माभ्युदयनिमित्तेन चैव सपरिवार आगत उद्यानिकायाम्-इमं चैव निधानकोद्देशम्। दृष्टश्च त्वया पुत्रध्वजनिवेशननिमित्तं गर्तां खनमानेन निधानकलशकण्ठैकदेश इति। ततः तमन्यत्र निवेश्य तं च प्रदेशं पुनरपि तथैव कृत्वा भुक्तोत्तरकाले प्रविष्टो नगरम्। चिन्तितं त्वया-किमत्र युक्तमिति अम्बां तावत् पृच्छामि। कथितोऽस्या एष व्यतिकरः। पृष्टा एषा 'किमत्र युक्तम्' इति। तया भणितम्-मम तावत् तं प्रदेशं दर्शय, ततो यद् युक्तम्, तद् भणिष्यामि इति। दर्शितस्तस्याः प्रदेशः। अज्ञानलोभदोषेण चिन्तितं च तया-व्यापादयामि एतम्, तत एकाकिनी ग्रहीष्यामि। एवं चिन्तयित्वा भणितस्त्वम्। पुत्रक! प्रभूतमेतद् द्रव्यम्। एतस्मिन् गृह्यमाणे कदाचिद् नरपतिरवगच्छेत् ततश्च स शेषद्रव्यापहारमपि मा करिष्यति, ततोऽलं तावद् एतेन, अवसरेण ग्रहीष्याम इति। त्वया भणितम्-अम्ब! यत् त्वमाज्ञाप-

[1] पसाएहि ख

तुज्झं सुहेणं, इमीए पुण पुव्वभवब्भत्थलोहदोसेण तुह मरणचिन्तोवायपज्जाउलाए दुक्खेणं ति। परिचिन्तिओ उवाओ। देमि से पोसहोववासपारणयभोयणे विसं ति। तओ उववासलहुसरीरो विसप्पओएण लहुं चेव न भविस्सइ त्ति चिन्तिऊण पउत्तं विसं। लद्धो तुमं तेणं। एत्थन्तरंमि दिट्ठो नन्दिणीए। कओ अणाए कोलाहलो। तओ अहिययरं ते कूजिउं पयत्ता जणणी। संमिलिओ लोयनिवहो। तओ एक्केण सिद्धपुत्तेण विसावहारमन्तसामत्थओ 'साहम्मिओ' त्ति कलिऊण जीवाविओ। समुप्पन्ना य ते चिन्ता। एवमणेगोवद्दवभायणं मणुयाण जीवियं। ता अलं गिहवासेणं। मा पुणो वि मे पमत्तस्स एवमेव पाणावगमो भविस्सइ। अओ पवज्जामि पव्वज्जं ति चिन्तिऊण जहोचिएण विहिणा पवन्नो देवसम्मगुरुसमीवे पव्वज्जं ति। परिवालिऊण निरइयारं काऊण य कालमासे कालं उववन्नो तीससागरोवमाऊ गेवेज्जगसुरो त्ति। एसा य ते जणणी तद्दव्वलोभेण तत्थ चेव सहत्थनिप्पनिम्मियं महापेढं काऊण पुत्तवहपरिणामजणियनरयाउया अक्खिऊण तं दव्वं मया समाणी धूमप्पभाए नरयपुढवीए उववन्ना पन्नरससागरोवमट्ठिई नारगो त्ति।

यति। प्रविष्टौ नगरम्। अतिक्रान्ताः कतिचिद् दिवसाः तव सुखेन, अस्याः पुनः पूर्वभवाभ्यस्तलोभदोषेण तव मरणचिन्तोपायपर्याकुलाया दुःखेनेति। परिचिन्तित उपायः। ददामि तस्य पौषधोपवासपारणकभोजने विषमिति। तत उपवासलघुशरीरो विषप्रयोगेण लघ्वेव न भविष्यति इति चिन्तयित्वा प्रयुक्तं विषम्। लब्धस्त्वं तेन। अत्रान्तरे दृष्टो नन्दिन्या। कृतोऽनया कोलाहलः। ततोऽधिकतरं त्वां कूजितुं प्रवृत्ता जननी। संमिलितो लोकनिवहः। तत एकेन सिद्धपुत्रेण विषापहारमन्त्रसामर्थ्यतः 'साधर्मिकः' इति कलयित्वा जीवितः। समुत्पन्ना च तव चिन्ता। एवमनेकोपद्रवभाजनं मनुजानां जीवितम्। ततोऽलं गृहवासेन। मा पुनरपि मम प्रमत्तस्य एवमेव प्राणापगमो भविष्यति। अतः प्रपद्ये प्रव्रज्यामिति चिन्तयित्वा यथोचितेन विधिना प्रपन्नो देवशर्मगुरुसमीपे प्रव्रज्यामिति। परिपाल्य निरतिचाराम्, कृत्वा च कालमासे कालमुपपन्नः त्रिंशत्सागरोपमायुर्ग्रैवेयकसुर इति। एषा च तव जननी तद्द्रव्यलोभेन तत्रैव

तुमं पि य
तओ उव्वट्टा समाणी नाणातिरिएसु आहिण्डिय पुव्वभवब्भत्थलोभदोसओ एत्थ नालिएरिपायवत्ताए उववन्न त्ति। एस एत्थ
तओ चविऊण सागरदत्तसेट्ठिगेहे सिरिमईए कुच्छिंमि पुत्तत्ताए उववन्नो मि। दोण्हं पि तुम्हाणं संपयं इमा अवत्था।
वइयरो त्ति ॥

तओ ममेयं सोऊण समुप्पन्नो संवेगो, विरत्तो भवचारगाओ मणो। अणुन्नविओ भयवन्तसन्निहाणे तद्दव्ववइयरं नरवई। अणुन्नाओ
य तेण तओ तं गेण्हाविय सयलदुहियसत्ताणं दाऊण पवन्ना मए विजयधम्मगणहरस्स समीवे पव्वज्ज त्ति ॥

सिहिकुमारेण भणियं-भयवं! एवमेयं, ईइसो चेव एस संसारो। धन्नो तुमं, जो एवमभिपव्वइओ त्ति। अह कइविहो पुण
दाणाइभेयं पडुच्च पणीओ भयवया धम्मो। भयवया भणियं-सुण।

महत्तशिल्पनिर्मितं महापीठं दृष्ट्वा पुत्रवधपरिणामजनितनरकायुष्का अभुक्त्वा तद् द्रव्यं मृता सती धूमप्रभायां नरकपृथिव्यामुपपन्ना
सप्तदशसागरोपमस्थितिर्नारक इति। तत उद्वृत्ता सती नानातिर्यक्षु आहिण्ड्य पूर्वभवाभ्यस्तलोभदोषतोऽत्र नालिकेरीपादपतया उपपन्ना
इति। त्वमपि च ततश्च्युत्वा सागरदत्तश्रेष्ठिगेहे श्रीमत्याः कुक्षौ पुत्रतया उपपन्नोऽसि। द्वयोरपि युवयोः साम्प्रत[illegible]मवस्था। एषोऽत्र
व्यतिकर इति ॥

ततो मम एतत् श्रुत्वा समुत्पन्नः संवेगः, विरक्तं भवचारकाद् मनः। अनुज्ञापितो भगवत्सन्निधाने तद्द्रव्यव्यतिकरं नरपतिः।
अनुज्ञातश्च तेन, ततस्तद् ग्राहयित्वा सकलदुःखितसत्त्वेभ्यो दत्त्वा प्रपन्ना मया विजयधर्मगणधरस्य समीपे प्रव्रज्या इति ॥

शिखिकुमारेण भणितम्-भगवन्! एवमेतत्, ईदृश एव एष संसारः, धन्यस्त्वम्, यः एवमभिप्रव्रजित इति। अत्र कतिविधः
पुनर्दानादिभेदं प्रतीत्य प्रणीतो भगवता धर्मः। भगवता भणितम्-शृणु।

धम्मो चउव्विहो दाण-सील-तव-विविहभावणामइओ । सावय ! जिणेहि भणिओ तियसिन्द-नरिन्दनमिएहिं ॥
दाणं च होइ तिविहं नाणाऽभय-धम्मुवग्गहकरं च । जं तत्थ नाणदाणं तमहं वोच्छं समासेणं ॥
दिन्नेण जेण जीवो विन्नाया होइ बन्ध-मोक्खाणं । तं होइ नाणदाणं सिवसुहसंपत्तिबीयं तु ॥
दिन्नेण तेण जीवो पुण्णं पावं च बहुविहमसेसं । सम्मं वियाणमाणो कुणइ पवित्तिं निवित्तिं च ॥
पुण्णम्मि पवत्तन्तो पावइ य लहुं नरामरसुहाइं । नारयतिरियदुहाण य मुच्चइ पावाउ सुणियत्तो ॥
तिरियाण य मणुयाण य असुरसुराणं च होइ जं सुक्खं । तं सव्वपयत्तेणं पावइ नाणप्पयाणेणं ॥
पावेइ य सुविसालं मोक्खसुहं सुहपरंपरेणेव । तस्सेव पहावेणं सुन्दर ! विमलस्स नाणस्स ॥
एवं इहलोयम्मि वि परलोयम्मि य सुहाइ नाणेणं । पावेइ जेण जीवो तम्हा तं दाणपवरं तु ॥

धर्मश्चतुर्विधो दान-शील-तपो-विविधभावनामयः । श्रावक ! जिनैर्भणितः त्रिदशेन्द्र-नरेन्द्रनतैः ॥
दानं च भवति त्रिविधं ज्ञाना-ऽभय-धर्मोपग्रहकरं च । यत् तत्र ज्ञानदानं तदहं वक्ष्ये समासेन ॥
दत्तेन येन जीवो विज्ञाता भवति बन्ध-मोक्षयोः । तद् भवति ज्ञानदानं शिवसुखसम्पत्तिबीजं तु ॥
दत्तेन तेन जीवः पुण्यं पापं च बहुविधमशेषम् । सम्यग् विजानन् करोति प्रवृत्तिं निवृत्तिं च ॥
पुण्ये प्रवर्तमानः प्राप्नोति च लघु नराऽमरसुखानि । नारकतिर्यग्दुःखेभ्यश्च मुच्यते पापात् सुनिवृत्तः ॥
तिरश्चां वा मनुजानां वा असुरसुराणां च भवति यत् सौख्यम् । तत् सर्वप्रयत्नेन प्राप्नोति ज्ञानप्रदानेन ॥
प्राप्नोति च सुविशालं मोक्षसुखं सुखपरंपरेणैव । तस्यैव प्रभावेण सुन्दर ! विमलस्य ज्ञानस्य ॥

इहलोयपारलोइयसुहाइं सव्वाइं तेण दिन्नाइं । जीवाण फुडं सव्वन्नुभासियं देइ जो नाणं ॥
गयरागदोसमोहो सव्वन्नू होइ नाणदाणेणं । मणुयासुरसुरमहिओ कमेण सिद्धिं च पावेइ ॥
एयं खु नाणदाणं सुन्दर ! संखेवओ समक्खायं । देन्तस्स गाहगस्स य हियमेगन्तेण विन्नेयं ॥
पुढवि-दग-अगणि-मारुय-वणस्सईकाइयाण जीवाणं । बेइन्दिय-तेइन्दिय-चउरो-पश्चिन्दियाणं च ॥
जा एयाणमहिंसा सम्मं मण-वयण-कायजोएहिं । तं होइ अभयदाणं सुसाहुजणसेवियं पवरं ॥
इच्छन्ति सव्वजीवा निब्भरदुहिया वि जीविउं जम्हा । तम्हा तं चेव पियं तेसिं कुसलेण विन्नेयं ॥
जम्हा य नरवरिन्दो मरणम्मि उवट्ठियम्मि रज्जं पि । देइ सजीवियहेउं तम्हा तं चेव इट्ठयरं ॥

एवमिहलोकेऽपि परलोके च सुखानि ध्यानेन । प्राप्नोति येन जीवस्तस्मात् तद् ध्यानप्रवरं तु ॥
इहलोकपारलौकिकसुखानि सर्वाणि तेन दत्तानि । जीवानां स्फुटं सर्वज्ञभाषितं ददाति यो ज्ञानम् ॥
गतरागद्वेषमोहः सर्वज्ञो भवति ज्ञानदानेन । मनुजा-ऽसुरमहितः क्रमेण सिद्धिं च प्राप्नोति ॥
एतत् खलु ज्ञानदानं सुन्दर ! संक्षेपतः समाख्यातम् । ददानस्य ग्राहकस्य च हितमेकान्तेन विज्ञेयम् ॥
पृथिवी-दक-अग्नि-मारुत-वनस्पतिकायिकानां जीवानाम् । द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियाणां च ॥
या एतेषामहिंसा सम्यग् मनो-वचन-काययोगैः । तद् भवति अभयदानं सुसाधुजनसेवितं प्रवरम् ॥
इच्छन्ति सर्वजीवा निर्भरदुःखिता अपि जीवितुं यस्मात् । तस्मात् तदेव प्रियं तेषां कुशलेन विज्ञेयम् ॥
यस्माच्च नरवरेन्द्रो मरणे उपस्थिते राज्यमपि । ददाति स्वजीवितहेतुं तस्मात् तदेव इष्टतरम् ॥

दायव्वं च मइमया जं इट्ठं होइ गाहगाणं तु । तं दाणं परलोए सुहमिच्छन्तेण सुविमालं ॥
दीहाऊ उ सुरूवो नीरोगो होइ अभयदाणेणं । जम्मन्तरे वि जीवो सयलजणसलाहणिज्जो य ॥
एयं तु अभयदाणं तियसिन्दनरिन्दनमियचलणेहिं । सावय ! जिणेहि भणियं दुज्जयकम्मट्ठदलणेहिं ॥
धम्मोवग्गहदाणं भण्णइ सयमेव दव्वमविरुद्धं । नवकोडीपरिसुद्धं दिज्जइ जं धम्मियजणस्स ॥
तं पुण असणं पाणं वत्थं पत्तं च भेसयं जोग्गं । दायव्वं तु मइमया तहेव सयणासणं पवरं ॥
दायव्वं पुण सज्झायझाणनिरयस्स निरुवगारिस्स । जो संजमतवभारं वहइ सया तेणुवग्गहिओ ॥
कम्मलहुयत्तणेण य सो अप्पाणं परं च तारेइ । कम्मगुरू अतरन्तो सयंपि कह तारए अन्नं ? ॥
दायव्वं पुण तं कारणेहि एएहि चेउहि परिसुद्धं । जिणभणिएहिं दायग–गाहग–तहकाल–भावेहिं ॥

दातव्यं च मतिमता यदिष्टं भवति ग्राहकाणां तु । तद् दानं परलोके सुखमिच्छता सुविशालम् ॥
दीर्घायुस्तु सुरूपो नीरोगो भवति अभयदानेन । जन्मान्तरेऽपि जीवः सकलजनश्लाघनीयश्च ॥
एतत् तु अभयदानं त्रिदशेन्द्रनरेन्द्रनतचरणैः । श्रावक ! जिनैर्भणितं दुर्जयकर्माष्टदलनैः ॥
धर्मोपग्रहदानं भण्यते स्वयमेव द्रव्यमविरुद्धम् । नवकोटिपरिशुद्धं दीयते यद् धार्मिकजनाय ॥
तत् पुनरशनं पानं वस्त्रं पात्रं च भेषजं योग्यम् ॥ दातव्यं तु मतिमता तथैव शयनाऽऽसनं प्रवरम् ॥
दातव्यं पुनः स्वाध्यायध्याननिरतस्य निरुपकारिणः । यः संयमतपोभारं वहति सदा तेनोपगृहीतः ॥

१ चेव ख

दायगसुद्धं भण्णइ जो दाया देइ नाणसंपन्नो । अट्ठमयट्ठाणरहिओ सद्धारोमञ्चियसरीरो ॥
नाओवगयं दव्वं फासुगमविरुद्धगं च लोगम्मि । इहपरलोयासंसं मोत्तूणं निज्जरट्ठी उ ॥
सुक्खेत्तम्मि व बीयं विक्खित्तं तस्स बहुफलं होइ । तं दाणं मणुयामरसिवसुहसंपत्तिजणयं तु ॥
जो पुण सद्धारहिओ दाणं देइ जसकित्तिरेमम्मि[1] । अहिमाणेण व एसो देइ अहं किं न देमि त्ति ॥
तं सद्धाजलरहियं बीयं व न होइ बहुफलं तस्स । दाणं बहुं पि पवरं दूसियचित्तस्स मोहेण ॥
काऊण य पाणिवहं जो दाणं देइ धम्मसद्धाए । दहिऊण चन्दणं सो करेइ अङ्गारवाणिज्जं ॥

कर्मलघुत्वेन च स आत्मानं परं च तारयति । कर्मगुरुस्तरन् स्वयमपि कथं तारयेदन्यम् ? ॥
दातव्यं पुनस्तत् कारणैरेतैश्चतुर्भिः परिशुद्धम् । जिनभणितैर्दायक-ग्राहक-तथाकाल-भावैः ॥
दायकशुद्धं भण्यते यो दाता ददाति ज्ञानसंपन्नः । अष्टमदस्थानरहितः श्रद्धारोमाञ्चितशरीरः ॥
न्यायोपगतं द्रव्यं प्रासुकमविरुद्धकं च लोके । इहपरलोकाशंसां मुक्त्वा निर्जरार्थी तु ॥
सुक्षेत्रे इव बीजं विक्षिप्तं तस्य बहुफलं भवति । तद् दानं मनुजाऽमरशिवसुखसंपत्तिजनकं तु ॥
यः पुनः श्रद्धारहितो दानं ददाति यशःकीर्तिनिमित्तं । अभिमानेन वा एष ददाति अहं किं न ददामीति ? ॥
तद् श्रद्धाजलरहितं बीजमिव न भवति बहुफलं तस्य । दानं बहु अपि प्रवरं दूषितचित्तस्य मोहेन ॥
✓कृत्वा च प्राणिवधं यो दानं ददाति धर्मश्रद्धया । दग्ध्वा चन्दनं स करोति अङ्गारवाणिज्यम् ॥

---

१ रेसम्मि (अव्य०) निमितार्थे ।

मूढो लोयविरुद्धं धम्मविरुद्धं च देइ जो दाणं । सो अप्पाणं तह गाहगं च पाडेइ संसारे ॥
जाणह गाहगसुद्धं पञ्चमहव्वयधरो उ जो नियमा । गुरुसुस्सूसानिरओ जोगम्मि समाहियप्पा य ॥
तह खन्ति-मद्दव-ऽज्जवजुत्तो धणियं च विगयलोहो उ । मण-वयण-कायगुत्तो पञ्चिन्दियनिग्गहपरो य ॥
सज्झायझाणनिरओ सुद्धप्पा सुद्धसाहुचरिओ य । इह परलोए य तहा सव्वत्थ दढं अपडिबद्धो ॥
मेरु व्व जो न तीरइ उवसग्गसमीरणेहि चालेउं । एयारिसम्मि दाणं गाहगसुद्धं तु विन्नेयं ॥
सीलव्वयरहियाणं दिज्जइ जं पुण धणं कुपत्ताणं । तं खलु धोवइ वत्थं रुहिरकयं सोणिएणेव ॥
दिन्नं सुहं पि दाणं होइ कुपत्तम्मि असुहफलमेव । सप्पस्स जह व दिन्नं खीरं पि विसत्तणमुवेइ ॥
तुच्छं पि सुपत्तम्मि उ दाणं नियमेण सुहफलं होइ । जह गावीए दिण्णं तणं पि खीरत्तणमुवेइ ॥

मूढो लोकविरुद्धं धर्मविरुद्धं च ददाति यो दानम् । स आत्मानं तथा ग्राहकं च पातयति संसारे ॥
जानीत ग्राहकशुद्धं पञ्चमहाव्रतधरस्तु यो नियमात् । गुरुशुश्रूषानिरतो योगे समाहितात्मा च ॥
तथा क्षान्ति-मार्दवा-ऽऽर्जवयुक्तो गाढं च विगतलोभस्तु । मनो-वचन-कायगुप्तः पञ्चेन्द्रियनिग्रहपरश्च ॥
स्वाध्यायध्याननिरतः शुद्धात्मा शुद्धसाधुचरितश्च । इह परलोके च तथा सर्वत्र दृढमप्रतिबद्धः ॥
मेरुरिव यो न शक्यते उपसर्गसमीरणैश्चालयितुम् । एतादृशे दानं ग्राहकशुद्धं तु विज्ञेयम् ॥
शीलव्रतरहितानां दीयते यत् पुनर्धनं कुपात्राणाम् । तत् खलु धावयति वस्त्रं रुधिरकृतं शोणितेनेव ॥
दत्तं शुभमपि दानं भवति कुपात्रे अशुभफलमेव । सर्पस्य यथा वा दत्तं क्षीरमपि विषत्वमुपैति ॥

होइ सुहासुहफलयं पत्तविसेसेण दाणमेगं पि । गावी-भुयङ्गपीयं जह उदगं होइ खीर-विसं ॥
भण्णइ य कालसुद्धं दाणं कालोवबन्नयं जं तु । दिज्जइ तवस्सिदेहोवयारकालम्मि सुविसुद्धं ॥
कालम्मि कीरमाणं किसिकम्मं बहुफलं जहा होइ । इय कालम्मि वि दिन्नं दाणं पि हु बहुफलं नेयं ॥
होइ अयालम्मि जहा अवयारपरं पइण्णयं बीयं । देन्तस्स गाहगस्स य एवं दाणं पि विन्नेयं ॥
जाणह य भावसुद्धं सद्धा-संवेगपयडपुलओ य । कयकिच्चं मन्नेन्तो अप्पाणं देइ जो दाणं ॥
नवकोडीपरिसुद्धं दसदोसविवज्जियं च देयं पि । एयं पि भावसुद्धं पवुत्तं वीयरागेहिं ॥
अट्टवसट्टोवगओ अवि सुद्धं देइ कलुसियमणो उ । सनिदाणं च न एयं भावविसुद्धं हवइ दाणं ॥

तुच्छमपि सुपात्रे तु दानं नियमेन शुभफलं भवति । यथा गवि वितीर्णं तृणमपि क्षीरत्वमुपैति ॥
भवति शुभाशुभफलदं पात्रविशेषेण दानमेकमपि । गो-भुजंगपीतं यथा उदकं भवति क्षीर-विषम् ॥
भण्यते च कालशुद्धं दानं कालोपपन्नकं यत् तु । दीयते तपस्विदेहोपचारकाले सुविशुद्धम् ॥
काले क्रियमाणं कृषिकर्म बहुफलं यथा भवति । इति कालेऽपि दत्तं दानमपि खलु बहुफलं ज्ञेयम् ॥
भवति चाऽकाले यथा अपकारपरं प्रकीर्णकं बीजम् । ददतो ग्राहकस्य च एवं दानमपि विज्ञेयम् ॥
जानीत च भावशुद्धं श्रद्धा-संवेगप्रकटपुलकश्च । कृतकृत्यं मन्यमान आत्मानं ददाति यो दानम् ॥
नवकोटिपरिशुद्धं दशदोषविवर्जितं च देयमपि । एतद् अपि भावशुद्धं प्रज्ञप्तं वीतरागैः ॥
आर्तवशार्तोपगतोऽपि शुद्धं ददाति कलुषितमनास्तु । सनिदानं च न एतद् भावविशुद्धं भवति दानम् ॥

मोक्खत्थं जं दाणं तं पइ एसो विही मुणेयव्वो । अणुकम्पादाणं पुण जिणेहि न कहिंचि पडिसिद्धं ॥
एसो उ दाणमइओ धम्मो संखेवओ समक्खाओ । एत्तो य सीलमइयं तु भण्णमाणं निसामेह ॥
जाणह य सीलमइयं पाणवहा-ऽलिय-अदिन्नदाणाणं । मेहुण-परिग्गहाण य विरई जा सव्वहा सम्मं ॥
तह कोह-माण-माया-लोहस्स य निग्गहो दढं जो उ । खन्तीय मद्दव-ऽज्जव-संतोसविचित्तसत्थेहिं ॥
खणलवपडिबुज्झणया सद्धा-संवेगफासणा तह य । चित्तेण निरीहेणं मेत्ती वि य सव्वजीवेसु ॥
एयं च सेविऊणं धम्मं जिणदेसियं सुसीलमयं । सुगइं पावन्ति नरा ठयन्ति सइ दुग्गइदुवारं ॥
एसो उ सीलमइओ भणिओ धम्मो जिणेहि सव्वेहिं । सावय ! परमगुरूहिं दुज्जयजियरागदोसेहिं ॥
भण्णइ तवोमइओ स बाहिर-ऽब्भन्तरस्स य तवस्स । जमणुट्ठाणं कीरइ असेसकम्मक्खयनिमित्तं ॥

मोक्षार्थं यद् दानं तत् प्रति एष विधिर्ज्ञातव्यः । अनुकम्पादानं पुनर्जिनैर्न कुत्रचित् प्रतिषिद्धम् ॥
एष तु दानमयो धर्मः संक्षेपतः समाख्यातः । इतश्च शीलमयं तु भण्यमानं निशामयत ॥
जानीत च शीलमयं प्राणवधा-ऽलीका-ऽदत्ताऽऽदानानाम् । मैथुन-परिग्रहाणां च विरतिर्या सर्वथा सम्यक् ॥
तथा क्रोध-मान-माया-लोभस्य च निग्रहो दृढं यस्तु । क्षान्त्या मार्दवा-ऽऽर्जव-संतोषविचित्रशस्त्रैः ॥
क्षणलवप्रतिबोधनता श्रद्धा-संवेगस्पर्शना तथा च । चित्तेन निरीहेण मैत्री अपि च सर्वजीवेषु ॥
एवं च सेवित्वा धर्मं जिनदेशितं सुशीलमयम् । सुगतिं प्राप्नुवन्ति नराः, स्थगयन्ति सदा दुर्गतिद्वारम् ॥
एष तु शीलमयो भणितो धर्मो जिनैः सर्वैः । श्रावक ! परमगुरुभिर्दुर्जयजितराग-द्वेषैः ॥

अणसणमूणोयरिया वित्तीसंखेवणं रसचाओ । कायकिलेसो संलीणया य बज्झो तवो होइ ॥
पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ । झाणं उस्सग्गो वि य अब्भिन्तरओ तवो होइ ॥
एवं चरिऊणं तवं जीवा इह-पारलोइयसुहाइं । पावेन्ति विसालाइं करेन्ति दुक्खक्खयं तह य ॥
एसो उ तवोमइओ धम्मो संखेवओ समक्खाओ । निसुणह एत्तो सुन्दर! धम्मं पुण भावणामइयं ॥
सम्मं सम्मद्दंसण-नाण-चरित्ताण भावणा जाओ । वेरग्गभावणा वि य परमा तित्थयरभत्ती य ॥
संसारजुगुच्छणया कामविरागो सुसाहु-जिणसेवा । तित्थयरभासियस्स य धम्मस्स पभावणा तह य ॥
मोक्खसुहम्मि य राओ अणाययणवज्जणा य सुपसत्था । सइ अप्पणो य निन्दा गरहा य कहिंचि खलियस्स ॥

भण्यते तपोमयः सबाह्या-ऽभ्यन्तरस्य च तपसः । यद् अनुष्ठानं क्रियते अशेषकर्मक्षयनिमित्तम् ॥
अनशनमूनोदरिका वृत्तिसंक्षेपणं रसत्यागः । कायक्लेशः संलीनता च बाह्यं तपो भवति ॥
प्रायश्चित्तं विनयो वैयावृत्त्यं तथैव स्वाध्यायः । ध्यानमुत्सर्गोऽपि च आभ्यन्तरं तपो भवति ॥
एवं चरित्वा तपो जीवा इह-पारलौकिकसुखानि । प्राप्नुवन्ति विशालानि कुर्वन्ति दुःखक्षयं तथा च ॥
एष [illegible] तपोमयो धर्मः संक्षेपतः समाख्यातः । निशृणुत इतः सुन्दर ! धर्मं पुनर्भावनामयम् ॥
सम्यक् सम्यग्दर्शन-ज्ञान-चारित्राणां भावना याः । वैराग्यभावनाऽपि च परमा तीर्थंकरभक्तिश्च ॥
संसारजुगुप्सनता कामविरागः सुसाधु-जिनसेवा । तीर्थंकरभाषितस्य च धर्मस्य प्रभावना तथा च ॥
मोक्षसुखे च रागोऽनायतनवर्जना च सुप्रशस्ता । सदा आत्मनश्च निन्दा गर्हा च कुत्रचित् स्खलितस्य ॥

एसो जिणेहि भणिओ अणन्तनाणीहि भावणामइओ। धम्मो उ भीमभववणसुजलियदावाणलब्भूओ ॥

एयं चउव्विहं फासिऊण धम्मं जिणेहि पन्नत्तं। सुन्दर! अणन्तजीवा पत्ता मोक्खं सदामोक्खं ॥

तओ एयमायण्णिऊण आविब्भूओ सिहिकुमारस्स जिणधम्मबोहो। भणिओ य णेण भयवं विजयसिंघो-भयवं! एवमेयं, ईदिसो चेव एस धम्मो, न एत्थ संदेहो त्ति। किं तु दाणमइयं मोत्तूण न सेसभेया इमस्स सम्मं अवियला तीरन्ति गिहत्थेण काउं। ता आचिक्खउ भयवं! केरिसो पुण इमस्स महापुरिससेवियस्स, सयलदुक्खाणलजलस्स, सिद्धिवहुसंगमेक्कहेउणो समणत्तणस्स जोगो त्ति। भगवया भणियं-सुण, समणत्तणारिहो आरियदेसुप्पन्नो, विसिट्ठजाइकुलसमन्निओ, खीणप्पायकम्ममलो, तओ चेव विमलबुद्धी 'दुल्लहं माणुसत्तणं, जम्मो मरणनिमित्तं, चलाओ संपयाओ, दुक्खहेयवो विसया, संजोगे विओगो, अणुसमयमेव मरणं, दारुणो विवागो' त्ति अहिगयसंसारसरूवो, तओ चेव तव्विरत्तो, पयणुकसाओ, थेवहासो, अकोउगो, कयन्नू, विणीओ, पुव्विं पि राया-ऽमच्च-

---

एष जिनैर्भणितोऽनन्तज्ञानिभिर्भावनामयः। धर्मस्तु भीमभववनसुज्वलितदावानलभूतः ॥

एवं चतुर्विधं स्पृष्ट्वा धर्मं जिनैः प्रज्ञप्तम्। सुन्दर! अनन्तजीवाः प्राप्ता मोक्षं सदासौख्यम् ॥

तत एतद् आकर्ण्य आविर्भूतः शिखिकुमारस्य जिनधर्मबोधः। भणितश्च तेन भगवान् विजयसिंहः-भगवन्! एवमेव, ईदृश एव एष धर्मः, न अत्र संदेह इति। किं [illegible] दानमयं मुक्त्वा न शेषभेदा अस्य सम्यग् अविकलास्तीर्यन्ते (शक्यन्ते) गृहस्थेन कर्तुम्। तत आचक्ष्व भगवन्! कीदृशः पुनरस्य महापुरुषसेवितस्य, सकलदुःखाऽनलजलस्य, सिद्धिवधूसंगमैकहेतोः श्रमणत्वस्य योग्य इति। भगवता भणितम्-शृणु, श्रमणत्वार्हः आर्यदेशोत्पन्नः, विशिष्टजातिकुलसमन्वितः, क्षीणप्रायकर्ममलः, ततश्चैव विमलबुद्धिः, 'दुर्लभं मनुष्यत्वम्, जन्म मरणनिमित्तम्, चलाः संपदः, दुःखहेतवो विषयाः, संयोगे वियोगः, अनुसमयमेव मरणम्, दारुणो विपाकः' इति

पउरजणवहुमओ, अद्दोमगारी, कल्लाणङ्गो, सद्धावन्तो, थिरसद्धो समुवसंपन्नो य। सिहिकुमारेण भणियं–भयवं ! सोहणो समणत्तणारिहो भयवया पवेइओ। अहं पुण समुवसंपन्नो। ता एवं निवेइए भयवं पमाणं ति। तओ परिचिन्तियं भयवया–जहा खु एसो महाभागवन्तो सुहुमपसिणेसु वियक्खणो, अच्चन्तपसन्तरूवो, अइणिउणभणिइकुसलो वि य लक्खिज्जइ, तहा भवियव्वमणेणं महाकुलपसूएणं भवविरत्तचित्तेण य। ता इमं ताव एत्थ पत्तकालं, जं एसो उवसंगहिज्जइ त्ति चिन्तिऊण भणियं च णेणं–महासावय ! न सेसगुणविप्पहूणो इहं उवसंपज्जइ। जुत्तं च पयइनिग्गुणे संसारवासे जमिणं समणत्तणं, किं तु दुक्करमिदं। एत्थ खलु सव्वकालमेव समसत्तुमित्तभावेण पाणाइवायविरई, अप्पमत्तयाए अणलियभासणं, दन्तसोहणमेत्तस्स वि अदिन्नस्स वज्जणा, मण–वयण–काएहिं अब्बम्भचेरनिरोहो, वत्थ–पत्तो–वगरणेहिं पि निम्ममत्तया, चउव्विहराइभत्तविरई, उग्गमु–प्पाय–णेसणाविसुद्धपिण्डगहणं, संजोयणाइ-

अधिगतसंसारस्वरूपः, ततश्चैव तद्विरक्तः, प्रतनुकषायः, स्तोकहास्यः, अकौतुकः, कृतज्ञः, विनीतः, पूर्वमपि राजा-ऽमात्य-पौरजनबहुमतः, अद्रोहकारी, कल्याणाङ्गः, श्रद्धावान्, स्थिरश्रद्धः समुपसंपन्नश्च। शिखिकुमारेण भणितम्–भगवन् ! शोभनः श्रमणत्वार्हो भगवता प्रवेदितः, अहं पुनः समुपसंपन्नः। तत एवं निवेदिते भगवान् प्रमाणमिति। ततः परिचिन्तितं भगवता–यथा खलु एष महाभागवान् सूक्ष्मप्रश्नेषु विचक्षणः, अत्यन्तप्रशान्तरूपः, अतिनिपुणभणितिकुशलोऽपि च लक्ष्यते, तथा भवितव्यमनेन महाकुलप्रसूतेन भवविरक्तचित्तेन च। तत इदं तावद् अत्र प्राप्तकालम्, यद् एष उपसंगृह्यते इति चिन्तयित्वा भणितं च तेन–महाश्रावक ! न शेषगुणविप्रहीन इह उपसंपद्यते। युक्तं च प्रकृतिनिर्गुणे संसारवासे यद् इदं श्रमणत्वम्, किं तु दुष्करमिदम्। अत्र खलु, सर्वकालमेव समशत्रुमित्रभावेन प्राणातिपातविरतिः, अप्रमत्ततया अनलीकभाषणम्, दन्तशोधनमात्रस्यापि अदत्तस्य वर्जना, मनो–वचन–कायैरब्रह्मचर्यनिरोधः, वस्त्र–पात्रो–पकरणेष्वपि निर्ममत्वता, चतुर्विधरात्रिभक्तविरतिः, उद्गमो–त्पादनै–षणाविशुद्धपिण्डग्रहणं संयोजनादि-

पञ्चदोसरहियमियकालभोयणं, पञ्चसमियत्तणं, तिगुत्तया, इरियासमियाइभावणाओ, अणसण-पायच्छित्त-विणयाइसबाहिरब्भिन्तरत-वोविहाणं, मासाइया य अणेगाओ पडिमाओ, विचित्ता य दव्वादओ अभिग्गहा, अण्हाणं, भूमिसयणिज्जं, केसलोओ, निप्पडिकम्मस-रीरया, सव्वकालमेव गुरूणं निद्देसकरणं, खुहा-पिवासाइपरीसहाहियासणं, दिव्वाइउवसग्गविजओ, लद्धावलद्धवित्तिया-किं बहुणा ? अच्चन्तदुव्वहमहापुरिसवूढअट्ठारससीलङ्गसहस्सभरवहणमविस्सामं ति । ता तरियव्वो खलु अयं बाहाहिं महासमुद्दो, भक्खियव्वो निरासाय(ए) एव वालुगाकवलो, परिसक्कियव्वं निसियकरवालधाराए, पायव्वा सुहुयहुयवहजालावली, भरियव्वो सुहुमपवणकोत्थलो, गन्तव्वं गङ्गापवाहपडिसोएणं, तोलियव्वो तुलाए मन्दरगिरी, जेयव्वमेगागिणा चाउरङ्गबलं, विंधेयव्वा विवरीयभमन्तद्धचक्कोवरि-थिउल्लिया, गहियव्वा अगहियपुव्वा तिहुयणजयपडागा । एओवमं दुक्करं समणत्तणं ति ॥

तओ एयमायण्णिऊण पहट्ठवयणकमलेण भणियं सिहिकुमारेण-भयवं ! एवमेयं, जहा तुब्भे आणवेह । किं तु विइयसंसारसरूवस्स

पञ्चदोषरहितमितकालभोजनम् , पञ्चसमितत्वम् , त्रिगुप्तता, ईर्यासमित्यादिभावनाः, अनशन-प्रायश्चित्त-विनयादिसबाह्याऽभ्यन्तरतपोविधानम् , मासादिकाश्च अनेकाः प्रतिमाः, विचित्राश्च द्रव्यादयोऽभिग्रहाः, अस्नानम् , भूमिशयनीयम् , केशलोचः, निष्प्रतिकर्मशरीरता, सर्वकालमेव गुरूणां निर्देशकरणम् , क्षुत-पिपासादिपरिषहाधिसहनम् , दिव्याद्युपसर्गविजयः, लब्धाऽपलब्धवृत्तिता-किं बहुना ? अत्यन्तदुर्वहमहापुरुषव्यूढाष्टादशशीलाङ्गसहस्रभरवहनमविश्रामम्-इति । ततस्तरीतव्यः खलु अयं बाहुभ्यां महासमुद्रः, भक्षयितव्यो निरास्वाद एव वालुकाकवलः, परिसर्तव्यं निशितकरवालधारायाम् , पातव्या सुहुतहुतवहज्वालावली, भर्तव्यः सूक्ष्मपवनकोत्थलः, गन्तव्यं गङ्गाप्रवाहप्रतिस्रोतसा, तोलयितव्यः तुलायां मन्दरगिरिः, जेतव्यमेकाकिना चातुरङ्गबलम् , वेधितव्या विपरीतभ्रमदर्धचक्रोपरि स्त्रीपुत्तलिका, ग्रहीतव्या अगृहीतपूर्वा त्रिभुवनजयपताका । एतदुपमं दुष्करं श्रमणत्वमिति ॥

पाणिणो तव्विओगुज्जयस्स तस्सुच्छेयकारणं न किंचि दुक्करं ति। भयवया भणियं–एवमेयं, किं तु तं चेव संसारसरूवं पच्चक्खोवल-ब्भमाणासुन्दरं पि अणेयभवभावणाओ मोहेइ पाणिणं, मूढो य सो न चिन्तेइ तस्सरूवं, न गणेइ आयइं, न मन्नए उवएसं, नाभि-णन्दइ गुरुं, न पेच्छइ कुलं, न सेवइ धम्मं, न बीहेइ अयसस्स, न रक्खइ वयणिज्जं। सव्वहा तं तमायरइ, जेण जेण सो इहलोए परलोए य किलेसभायणं होइ। ता निहणियव्वो खलु एस मोहो त्ति। सिहिकुमारेण भणियं–भयवं! तस्स वि य निहणणे एसेव उवाओ, न य अणाढत्तकज्जो पुरिसो फलं साहेइ, आढत्ते य संसओ, अहवा उवायपवत्तो असंसयं चेव साहेइ। उवाओ य एस, जं भयवओ समीवे समणत्तणपवज्जणं। नित्थरन्ति खलु कायरा वि पोयनिज्जामयगुणेण महण्णवं। न य अप्पपुण्णाणं कुसलबुद्धी हवइ। न य समुप्पन्नाए वि इमीए एवंविहसयलगुणसंपओववेयगुरुलाहो। ता करेहि मे भयवं! अणुग्गहं ति। भयवया भणियं–वच्छ!

तत एतद् आकर्ण्य प्रहृष्टवदनकमलेन भणितं शिखिकुमारेण–भगवन्! एवमेतद्, यथा यूयम् आज्ञापयत। किं तु विदितसंसार-स्वरूपस्य प्राणिनः तद्वियोगोद्यतस्य तस्योच्छेदकारणं न किञ्चिद् दुष्करमिति। भगवता भणितम्–एवमेतत्, किं तु तदेव संसारस्वरूपं प्रत्यक्षोपलभ्यमानाऽसुन्दरमपि अनेकभवभावनातो मोहयति प्राणिनः, मूढश्च स न चिन्तयति तत्स्वरूपम्, न गणयति आयतिम्, न मन्यते उपदेशम्, नाऽभिनन्दति गुरुम्, न प्रेक्षते कुलम्, न सेवते धर्मम्, न बिभेति अयशसः, न रक्षति वचनीयम्। सर्वथा तत् तद् आचरति, येन येन स इहलोके परलोके च क्लेशभाजनं भवति। ततो निहन्तव्यः खलु एष मोह इति। शिखिकुमारेण भणितम्–भगवन्! तस्यापि च निहनने एष एव उपायः, न च अनारब्धकार्यः पुरुषः फलं साधयति, आरब्धे च संशयः, अथवा उपाय-प्रवृत्तोऽसंशयमेव साधयति। उपायश्च एषः, यद् भगवतः समीपे श्रमणत्वप्रपदनम्। निस्तरन्ति खलु कातरा अपि पोत-निर्यामक-गुणेन महार्णवम्। न च अल्पपुण्यानां कुशलबुद्धिर्भवति। न च समुत्पन्नया अपि अनया एवंविधसकलगुणसंपदुपेतगुरुलाभः। ततः

कओ चेव तुह मए अणुग्गहो। किं तु एसा समयट्ठिई अम्हाणं, जं संसिऊण थेवमागमत्थं, सिक्खाविऊणाऽऽवस्सयं अइक्कन्तेसु कइवयदियहेसु तओ दिक्खिज्जइ त्ति। सिहिकुमारेण भणियं-भयवं! अणुग्गिहीओ म्हि। अन्नं च-निक्खन्तेण वि मए समयट्ठिई चेव पालियव्वा। ता एवं हवउ त्ति॥

एवं च जाव मन्तयन्ता चिट्ठन्ति, ताव आगओ कहिंचि तप्पउत्तिं सोऊण अणेयलोयपरिगओ करेणुयारूढो इमस्स चेव जणओ बम्भयत्तो त्ति। पणमिओ तेण भयवं विजयसिंहायरिओ। अहिणन्दिओ भयवया धम्मलाहेण। उवविट्ठो गुरुपायमूले। पणमिऊण भणिओ सिहिकुमारेण-ताय! संपाएहि अभग्गपणइपत्थणो मे एगं पत्थणं ति। बम्भयत्तेण भणियं-वच्छ! भणसु। तुहायत्तमेव मे जीवियं। सिहिकुमारेण भणियं-ताय! विइयवुत्तन्तो चेव तुमं संसारसहावस्स। दुल्लहं खलु माणुसत्तणं, अणिच्चा पियजणसमागमा, चञ्चलाओ रिद्धीओ कुसुमसारं जोव्वणं, परलोयपच्चत्थिओ अणङ्गो, दारुणो विसयविवागो, पहवइ सया अणिवारियपसरो मच्चू। ता

कुरु मम भगवन्! अनुग्रहम्-इति। भगवता भणितम्-वत्स! कृत एव तुभ्यं मयाऽनुग्रहः। किं तु एषा समयस्थितिरस्माकम्, यत् शंसित्वा स्तोकमागमार्थम्, शिक्षयित्वाऽऽवश्यकम्, अतिक्रान्तेषु कतिपयदिनेषु ततो दीक्ष्यते इति। शिखिकुमारेण भणितम्-भगवन्! अनुगृहीतोऽस्मि। अन्यच्च-निष्क्रान्तेनापि मया समयस्थितिरेव पालयितव्या। तत एवं भवतु इति॥

एवं च यावद् मन्त्रयन्तौ तिष्ठतः, तावद् आगतः कुतश्चित् तत्प्रवृत्तिं श्रुत्वा अनेकलोकपरिगतः करेणुकाऽऽरूढोऽस्यैव जनको ब्रह्मदत्त इति। प्रणतश्च तेन भगवान् विजयसिंहाचार्यः। अभिनन्दितो भगवता धर्मलाभेन। उपविष्टो गुरुपादमूले। प्रणम्य भणितः शिखिकुमारेण-तात! संपादय अभग्नप्रणयिप्रार्थनो मम एकां प्रार्थनामिति। ब्रह्मदत्तेन भणितम्-वत्स! भण। तवायत्तमेव मम जीवितम्। शिखिकुमारेण भणितम्-तात! विदितवृत्तान्त एव त्वं संसारस्वभावस्य। दुर्लभं खलु मनुष्यत्वम्, अनित्याः प्रियजनसमागमाः,

करेहि मे पसायं । एवमवगमाणे इह जीवलोए अणुन्नाओ तुमए वीयरायप्पणीयजइधम्मासेवणेण करेमि सफलं मणुयत्तणं । तओ सुय-सिणेहेण बाहजलभरियलोयणेणं सगग्गयं भणियं बम्भयत्तेण–पुत्त ! अयालो एस जइधम्मस्स । सिहिकुमारेण भणियं–ताय ! मच्चुणो विय नत्थि अयालो जइधम्मस्स त्ति ॥

एत्थन्तरम्मि बम्भयत्तपरिचारगेण नाहियवादिणा भणियं पिङ्गकेण–भो कुमार ! केण तुमं विप्पयारिओ ? । न खलु एत्थ पञ्चभूयवइरित्तो परलोगगामी जीवो समत्थीयइ । अवि य एयाणि चेव भूयाणि सहावओ चेव एयप्पगारपरिणामपरिणयाणि 'जीवो' त्ति भण्णन्ति । जया य एयाणि चइऊण समुदयं पञ्चत्तमुवगच्छन्ति, तया 'मओ पुरिसो' त्ति अहिहाणं पवत्तए । न उण एत्थ कोइ

चञ्चला सम्पदः, कुसुमसारं यौवनम्, परलोकप्रत्यर्थिकोऽनङ्गः, दारुणो विषयविपाकः, प्रभवति सदा अनिवारितप्रसरो मृत्युः । ततः कुरु मम प्रसादम् । एवमवसाने इह जीवलोके अनुज्ञातस्त्वया वीतरागप्रणीतयतिधर्माऽऽसेवनेन करोमि सफलं मनुजत्वम् । ततः सुतस्नेहेन बाष्पजलभृतलोचनेन सगद्गदं भणितं ब्रह्मदत्तेन–पुत्र ! अकाल एष यतिधर्मस्य । शिखिकुमारेण भणितम्–तात ! मृत्योरिव नास्ति अकालो यतिधर्मस्य इति ॥

अत्रान्तरे ब्रह्मदत्तपरिचारकेण नास्तिकवादिना भणितं पिङ्गकेन–भोः कुमार ! केन त्वं विप्रतारितः ? । न खलु अत्र पञ्चभूतव्यतिरिक्तः परलोकगामी जीवः समर्थ्यते, अपि चैतानि एव भूतानि स्वभावत एव एतत्प्रकारपरिणामपरिणतानि 'जीवः' इति भण्यन्ते । यदा च एतानि त्यक्त्वा समुदयं पञ्चत्वमुपगच्छन्ति तदा 'मृतः पुरुषः' इति अभिधानं प्रवर्तते । न पुनरत्र कश्चिद् देहं त्यक्त्वा

---

१ पिङ्गकेण ग

कओ चेव तुह मए अणुग्गहो । किं तु एसा समयट्ठिई अम्हाणं, जं संसिऊण थेवमागमत्थं, सिक्खाविऊणाऽऽवस्सयं अइक्कन्तेसु कइवयदिणेसु तओ दिक्खिज्जइ त्ति । सिहिकुमारेण भणियं–भयवं ! अणुगिहीओ म्हि । अन्नं च–निक्खन्तेण वि मए समयट्ठिई चेव पालियव्वा । ता एवं हवउ त्ति ॥

एवं च जाव मन्तयन्ता चिट्ठन्ति, ताव आगओ कहिंचि तप्पउत्तिं सोऊण अणेयलोयपरिगओ करेणुयारूढो इमस्स चेव जणओ बम्भयत्तो त्ति । पणमिओ तेण भयवं विजयसिंहायरिओ । अहिणन्दिओ भयवया धम्मलाहेण । उवविट्ठो गुरुपायमूले । पणमिऊण भणिओ सिहिकुमारेण–ताय ! संपाएहि अभग्गपणइपत्थणो मे एगं पत्थणं ति । बम्भयत्तेण भणियं–वच्छ ! भणसु । तुहायत्तमेव मे जीवियं । सिहिकुमारेण भणियं–ताय ! विइयवुत्तन्तो चेव तुमं संसारसहावस्स । दुल्लहं खलु माणुसत्तणं, अणिच्चा पियजणसमागमा, चञ्चलाओ रिद्धीओ कुसुमसारं जोव्वणं, परलोयपच्चत्थिओ अणङ्गो, दारुणो विसयविवागो, पहवइ सया अणिवारियपसरो मच्चू । ता

कृत एव तुभ्यं मयाऽनुग्रहः । किं तु एषा समयस्थितिरस्माकम्, यत् शंसित्वा स्तोकमागमार्थम्, शिक्षयित्वाऽऽवश्यकम्, अतिक्रान्तेषु कतिपयदिनेषु ततो दीक्ष्यते इति । शिखिकुमारेण भणितम्–भगवन् ! अनुगृहीतोऽस्मि । अन्यच्च–निष्क्रान्तेनापि मया समयस्थितिरेव पालयितव्या । तत एवं भवतु इति ॥

एवं च यावद् मन्त्रयन्तौ तिष्ठतः, तावद् आगतः कुतश्चित् तत्प्रवृत्तिं श्रुत्वा अनेकलोकपरिगतः करेणुकाऽऽरूढोऽस्यैव जनको ब्रह्मदत्त इति । प्रणतश्च तेन भगवान् विजयसिंहाचार्यः । अभिनन्दितो भगवता धर्मलाभेन । उपविष्टो गुरुपादमूले । प्रणम्य भणितः शिखिकुमारेण–तात ! संपादय अभग्नप्रणयिप्रार्थनो मम एकां प्रार्थनामिति । ब्रह्मदत्तेन भणितम्–वत्स ! भण । त्वदायत्तमेव मम जीवितम् । शिखिकुमारेण भणितम्–तात ! विदितवृत्तान्त एव त्वं संसारस्वभावस्य । दुर्लभं खलु मनुष्यत्वम्, अनित्याः प्रियजनसमागमाः,

करेहि मे पसायं। एवमवगमाणे इह जीवलोए अणुन्नाओ तुमए वीयरायप्पणीयजइधम्मासेवणेण करेमि सफलं मणुयत्तणं। तओ सुयसिणेहेण वाहजलभरियलोयणेणं सगग्गयं भणियं बम्भयत्तेण–पुत्त! अयालो एस जइधम्मस्स। सिहिकुमारेण भणियं–ताय! मच्चुणो विय नत्थि अयालो जइधम्मस्स त्ति॥

एत्थन्तरम्मि बम्भयत्तपरिचारगेण नाहियवादिणा भणियं पिङ्गकेण–भो कुमार! केण तुमं विप्पयारिओ?। न खलु एत्थ पञ्चभूयवइरित्तो परलोगगामी जीवो समत्थीयइ। अवि य एयाणि चेव भूयाणि सहावओ चेव एयप्पगारपरिणामपरिणयाणि 'जीवो' त्ति भण्णन्ति। जया य एयाणि चइऊण समुदयं पञ्चत्तमुवगच्छन्ति, तया 'मओ पुरिसो' त्ति अहिहाणं पवत्तए। न उण एत्थ कोइ

चञ्चला श्रियः, कुसुमसारं यौवनम्, परलोकप्रार्थिकोऽनङ्गः, दारुणो विषयविपाकः, प्रभवति सदा अनिवारितप्रसरो मृत्युः। ततः कुरु मम प्रसादम्। एवमवगते इह जीवलोके अनुज्ञातस्त्वया वीतरागप्रणीतयतिधर्माऽऽसेवनेन करोमि सफलं मनुजत्वम्। ततः सुतस्नेहेन बाष्पजलभृतलोचनेन सगद्गदं भणितं ब्रह्मदत्तेन–पुत्र! अकाल एष यतिधर्मस्य। शिखिकुमारेण भणितम्–तात! मृत्योरिव नास्ति अकालो यतिधर्मस्य इति॥

अत्रान्तरे ब्रह्मदत्तपरिचारकेण नास्तिकवादिना भणितं पिङ्गकेन–भोः कुमार! केन त्वं विप्रतारितः?। न खलु अत्र पञ्चभूतव्यतिरिक्तः परलोकगामी जीवः समर्थ्यते, अपि चैतानि एव भूतानि स्वभावत एव एतत्प्रकारपरिणामपरिणतानि 'जीवः' इति भण्यन्ते। यदा च एतानि त्यक्त्वा समुदयं पञ्चत्वमुपगच्छन्ति तदा 'मृतः पुरुषः' इति अभिधानं प्रवर्तते। न पुनरत्र कश्चिद् देहं त्यक्त्वा

१ पिङ्गकेण ग

देहं चइऊण घडचिडओ विव परभवं गच्छइ । ता मा तुमं असन्ते वि परलोगे मिच्छाहिणिवेसभावियमई सहावसुन्दरं विसयसुहं परिच्चयसु, दंसेहि वा देहवइरित्तं देहिणं । अओ जं तए भणियं–जहा दुल्लहं मणुयत्तणं, तमसंबद्धमेव । जओ न तं सुकय–दुक्कयाणुभावेण लब्भइ, अवि य भूयपरिणईओ, अओ किमियमाउलत्तणं । तहा जं च भणियं 'अणिच्चा पियजणसमागमा', एयं पि अकारणं । जओ न ते निक्खन्ताणं पि अन्नहा होन्ति । तहा जं च भणियं 'चञ्चलाओ रिद्धीओ', एयस्स वि न निक्खमणमेव पडिवक्खो, अवि य उवाएण परिरक्खणं ति । तहा जं च भणियं 'कुसुमसारं जोव्वणं', एत्थ वि य रसायणं जुत्तं, न उण निक्खमणं ति । तहा जं च भणियं 'परलोयपच्चत्थिओ अणङ्गो' त्ति, एयं पि न सोहणं, जओ परलोओ चेव नत्थि, न य कोइ तओ आगन्तूणमप्पाणयं दंसेइ । एवमवि य परिगप्पणे अइप्पसङ्गो त्ति । तहा जं च भणियं 'दारुणो विसयविवागो' त्ति, एयं पि न जुत्तिसंगयं; जओ आहारस्स वि विवागो दारुणो चेव, एवं च भोयणमवि परिच्चइअव्वं । न य 'हरिणा विज्जन्ति त्ति जवा चेव न वुप्पन्ति ।' [जयट्ठिई य एस त्ति] न

घटचटक इव परभवं गच्छति । ततो मा त्वमसत्यपि परलोके मिथ्याभिनिवेशभावितमतिः स्वभावसुन्दरं विषयसुखं परित्यज, दर्शय वा देहव्यतिरिक्तं देहिनम् । अतो यत् त्वया भणितम्–यथा दुर्लभं मनुजत्वम्, तद् असंबद्धमेव । यतो न तत् सुकृत–दुष्कृतानुभावेन लभ्यते, अपि च भूतपरिणतितः । अतः किमिदमाकुलत्वम् । तथा यच्च भणितम् 'अनित्याः प्रियजनसमागमाः' एतदपि अकारणम् । यतो न ते निष्क्रान्तानामपि अन्यथा भवन्ति । तथा यच्च भणितम् 'चञ्चला ऋद्धयः,' एतस्यापि न निष्क्रमणमेव प्रतिपक्षः, अपि च उपायेन परिरक्षणमिति । तथा यच्च भणितम् 'कुसुमसारं यौवनम्,' अत्रापि च रसायनं युक्तम्, न पुनः निष्क्रमणमिति । तथा यच्च भणितम्–'परलोकप्रत्यर्थिकोऽनङ्गः' इति, एतदपि न शोभनम्, यतः परलोक एव नास्ति, न च कोऽपि तत आगत्य आत्मानं दर्शयति । एवमपि च परिकल्पने अतिप्रसंग इति । तथा यच्च भणितम् 'दारुणो विषयविपाकः' इति,

य उवायन्नुणो पुरिसस्स दारुणत्तं पि संभवइ। तहा जं च भणियं 'पहवइ य सया अणिवारियपसरो मच्चु'त्ति, एयं पि बालवयण-मेत्तं; जेण निक्खन्तस्स वि एस अणिवारियप्पसरो चेव, तेण वि य समयेण पज्जन्ते मरियव्वं ति। न य 'पज्जन्ते मरियव्वं' ति मसाणे चेवावत्थाणमुववन्नं। न य सन्ते वि परलोए दुक्खसेवणाओ सुहं, अवि य सुहसेवणाओ चेव। जओ जं चेव अब्भसिज्जइ, तस्सेव पगरिसो लोए दिट्ठो, न उण विवज्जओ त्ति। ता विरम एयाओ ववसाओ त्ति। सिहिकुमारेण भणियं–सव्वमिणमसंगयं। सुण। अहवा न जुत्तं भयवओ समक्खं मम जंपिउं। ता भयवं चेव एत्थ भणिस्सइ त्ति। तओ भयवया भणियं–भो महामाहण! सुण। जं तए भणियं, जहा 'केण तुमं पयारिओ' त्ति, एस जम्मन्तरब्भत्थकुसलभावणाभावियमई अप्पावरणसंजुओ वीयरागवयणा-विब्भूयखओवसमभावेण समुप्पन्नतत्तनाणो जहट्ठियं भवसहावमवबुज्झिऊण तओ विरत्तो, न उण केणइ विप्पयारिओ[1] त्ति। तहा जं

एतदपि न युक्तिसंगतम्, यत आहारस्यापि विपाको दारुण एव, एवं च भोजनमपि परित्यक्तव्यम्। न च 'हरिणा विद्यन्ते इति यवा न नोप्यन्ते'। (जगन्स्थितिश्च एषा इति) न च उपायज्ञस्य पुरुषस्य दारुणत्वमपि संभवति। तथा यच्च भणितम् 'प्रभवति च सदा अनिवारितप्रसरो मृत्युः' इति, एतदपि बालवचनमात्रम्; येन निष्क्रान्तस्यापि एष अनिवारितप्रसर एव, तेनाऽपि च श्रमणेन पर्यन्ते मर्तव्यमिति। न च 'पर्यन्ते मर्तव्यम्' इति श्मशाने एव अवस्थानमुपपन्नम्। न च सत्यपि परलोके दुःखसेवनातः सुखम्, अपि च सुखसेवनादेव। यतो यदेव अभ्यस्यते, तस्यैव प्रकर्षो लोके दृष्टः, न पुनर्विपर्यय इति। ततो विरम एतस्माद् व्यवसायादिति। शिखिकुमारेण भणितम्–सर्वमिदमसंगतम्। शृणु। अथवा न युक्तं भगवतः समक्षं मम जल्पितुम्। ततो भगवान् एव अत्र भणिष्यति इति। ततो भगवता भणितम्–भो महाब्राह्मण! शृणु। यत् त्वया भणितम्, यथा 'केन त्वं प्रतारितः' इति, एष जन्मान्त-

[1] पयारिओ क

च भणियं–'न खलु एत्थ पञ्चभूयवइरित्तो परलोगगामी जीवो समत्थीयइ, अवि य एयाणि चेव भूयाणि सहावओ चेव एयप्पगारपरिणामपरिणयाणि जीवो त्ति भण्णन्ति', एयं पि न जुत्तिसंगयं। जओ सव्वहा अचेयणाणि भूयाणि। ता कहं इमाणं एयप्पगारपरिणामपरिणयाण वि एसा पच्चक्खपमाणाणुभूयमाणा गमणाइचेट्ठानिबन्धणा चेयणा जुज्जइ त्ति। न हि जं जेसु पत्तेयं न विज्जए, तं तेसिं समुदए वि हवइ, जहा वालुयाथाणए तेल्लं। अह 'पत्तेयं पि इमाणि चेयणाणि' त्ति, तओ सिद्धमणेगचेयन्नसमुदओ पुरिसो, एगिन्दिया य जीवा, घडादीणं च चेयणत्तणं ति। न य घडादीणं चेयण त्ति। अओ अत्थि खलु पञ्चभूयवइरित्तो चेयणारूवो परलोगगामी जीवो त्ति। तओ य जं भणियं–'जया एयाणि चइऊण समुदयं पञ्चत्तमुवगच्छन्ति, तया "मओ पुरिसो" त्ति अभिहाणं पवत्तइ', एयं पि वयणमेत्तं चेव। चेयन्नस्स तदइरेगभावचित्तीओ। न याणुभूयमाणसरूवा चेव चेयणा निसेहिउं पारीयइ। तहा जं

राभ्यस्तकुशलभावनाभावितमतिरव्यावरणसंयुतो वीतरागवचनाऽऽविर्भूतक्षयोपशमभावेन समुत्पन्नतत्त्वज्ञानो यथास्थितं भवस्वभावमवबुध्य ततो विरक्तः, न पुनः केनचिद् विप्रतारित इति। तथा यच्च भणितम्–'न खलु अत्र पञ्चभूतव्यतिरिक्तः परलोकगामी जीवः समर्थ्यते, अपि च एतानि एव भूतानि स्वभावत एव एतत्प्रकारपरिणामपरिणतानि जीव इति भण्यन्ते,' एतदपि न युक्तिसंगतम्। यतः सर्वथा अचेतनानि भूतानि। ततः कथमेषामेतत्प्रकारपरिणामपरिणतानामपि एषा प्रत्यक्षप्रमाणानुभूयमाना गमनादिचेष्टानिबन्धना चेतना युज्यत इति। नहि यद् येषु प्रत्येकं न विद्यते, तत् तेषां समुदयेऽपि भवति, यथा वालुकास्थानके तैलम्। अथ 'प्रत्येकमपि इमानि चेतनानि' इति, ततः सिद्धमनेकचैतन्यसमुदयः पुरुषः, एकेन्द्रियाश्च जीवाः, घटादीनां च चेतनत्वमिति। न च घटादीनां चेतनेति। अतोऽस्ति खलु पञ्च भूतव्यतिरिक्तश्चेतनारूपः परलोकगामी जीव इति। ततश्च यद् भणितम्–'यदा एतानि त्यक्त्वा समुदयं पञ्चत्वमुपगच्छन्ति, तदा "मृतः पुरुषः" इत्यभिधानं प्रवर्तते,' एतदपि वचनमात्रमेव। चैतन्यस्य तदतिरेकभाववृत्तितः। न चानुभूय-

च भणियं–'न उण एत्थ कोइ देहं चइऊण घडचिडओ व्व परभवं गच्छइ' त्ति, एयं पि अओ चेव पडिसिद्धं वेइयव्वं, चेयणस्स अचेयणभेयाओ त्ति । तहा जं च भणियं–ता मा तुमं असन्ते वि परलोए मिच्छाभिणिवेसभावियमई सहावसुन्दरं विसयसुहं परिच्चयसु, दंसेहि वा मे देहवइरित्तं देहिणं', एत्थ वि य सुण–चेयन्नभेयसिद्धीए कहं नत्थि परलोगो ? विज्जमाणे य तम्मि कहं एयस्स मिच्छाभिणिवेसो ? । कहं च पसुगणसाहारणा विडम्बणामेत्तरूवा चिन्तायासबहुला मणनिव्वाणवेरिणो अविन्नायवीसम्भसुहसरूवा सहावसुन्दरा विसय त्ति, किं च तेहिंतो सुहं ? । जं पुण 'सो देहभिन्नो न दीसइ', एत्थ कारणं सुण–सुहुमो अणिन्दिओ य सो वट्टए, अओ न दीसइ त्ति । पेच्छन्ति पुण सव्वन्नू। भणियं च वीयरागेहिं–

अणिन्दियगुणं जीवं अदिस्सं मंसचक्खुणो । सिद्धा पस्सन्ति सव्वन्नू नाणसिद्धा य साहुणो ॥

मानस्वरूपा एव चेतना निषेद्धुं शक्यते । तथा यच्च भणितम्–'न पुनरत्र कोऽपि देहं त्यक्त्वा घटचटक इव परभवं गच्छति' इति, एतदपि अत एव प्रतिषिद्धं वेदितव्यम्, चेतनस्य अचेतनभेदाद् इति । तथा यच्च भणितम्–'ततो मा त्वं असत्यपि परलोके मिथ्याभिनिवेशभावितमतिः स्वभावसुन्दरं विषयसुखं परित्यज, दर्शय वा मम देहव्यतिरिक्तं देहिनम्,' अत्राऽपि च शृणु–चैतन्यभेदसिद्धया कथं नाऽस्ति परलोकः ? विद्यमाने च तस्मिन् कथमेतस्य मिथ्याभिनिवेशः ? कथं च पशुगणसाधारणा विडम्बनामात्ररूपाश्चिन्ताऽऽयासबहुला मनोनिर्वाणवैरिणोऽविज्ञातविस्रम्भसुखस्वरूपाः स्वभावसुन्दरा विषया इति ? किं च तेभ्यः सुखम् ? । यत् पुनः 'स देहभिन्नो न दृश्यते,' अत्र कारणं शृणु–सूक्ष्मोऽनिन्द्रियश्च स वर्तते, अतो न दृश्यत इति । प्रेक्षन्ते पुनः सर्वज्ञाः । भणितं च वीतरागैः—

अनिन्द्रियगुणं जीवमदृश्यं मांसचक्षुषः । सिद्धाः पश्यन्ति सर्वज्ञा ज्ञानसिद्धाश्च साधवः ॥

---

१ चेयण० क-ख ।

एवं च पयंपिरंपि विजयसिंहायरिए ईसि विहसिऊण भणियं पिङ्गकेण–भयवं! सव्वमसंबद्धमेव भणियं भयवया। कहं? सुण–जं ताव भणियं–'सव्वहा अचेयणाणि भूयाणि, ता कहं इमाणं एयप्पगारपरिणामपरिणयाण वि एसा पच्चक्खप्पमाणाणुभूयमाणा गमणाइचेट्ठानिबन्धणा चेयणा जुज्जइ त्ति; न हि जं जेसु पत्तेयं न विज्जए तं तेसिं समुदए वि हवइ, जहा वालुगाथाणगे तेल्लं', एयं कहं जुज्जइ त्ति?। न हि कारणाणुरूवमेव कज्जं भवइ। किण्ण होइ सिङ्गाओ सरो? किं वा अदेस्सपरमाणुनिप्पन्नं घडाइ देस्सं ति?। एवं चेयणा वि तक्कज्जा य भविस्सइ, भूयविलक्खणा य त्ति को विरोहो?। जं च भणियं–'अह पत्तेयं पि इमाणि चेयणाणि त्ति, तओ सिद्धमणेयचेयन्नसमुदओ पुरिसो, एगिन्दिया य जीवा घडादीणं च चेयण त्ति' इच्चेवमादि, तं पि न सोहणं। तेसिं चेव तहाविहपरिणामभावओ, तदभावओ चेव न घडादीणं च चेयण त्ति ॥

एवं च प्रजल्पति विजयसिंहाचार्ये ईषद् विहस्य भणितं पिङ्गकेन–भगवन्! सर्वमसंबद्धमेव भणितं भगवता। कथम्? शृणु–यत् तावद् भणितम्–'सर्वथा अचेतनानि भूतानि, तत कथमेषामेतत्प्रकारपरिणामपरिणतानामपि एषा प्रत्यक्षप्रमाणानुभूयमाना गमनादिचेष्टानिबन्धना चेतना युज्यते इति? न हि यद् येषु प्रत्येकं न विद्यते, तत् तेषां समुदयेऽपि भवति, यथा वालुकास्थानके तैलम्,' एतत कथं युज्यते इति?। न हि कारणानुरूपमेव कार्यं भवति। किं न भवति शृंगात् शरः? किं वा अदृश्यपरमाणुनिष्पन्नं घटादि दृश्यमिति?। एवं चेतनाऽपि तत्कार्या च भविष्यति, भूतविलक्षणा च इति को विरोधः?। यच्च भणितम्–'अथ प्रत्येकमपीमानि चेतनानि इति, ततः सिद्धमनेकचैतन्यसमुदयः पुरुषः, एकेन्द्रियाश्च जीवाः घटादीनां च चेतना इति' इत्येवमादि, तदपि न शोभनम्। तेषामेव तथाविधपरिणामभावतः, तदभावतश्चैव न घटादीनां चेतनेति ॥

भयवया भणियं-सुण, जं भणियं-'किण्ण होइ सिङ्गाओ सरो' त्ति ?, सो होइ, न उण कारणाणुरूवो, इयरसरविलक्खण[1]-मसिण-घण-लण्हाइतद्धम्मसंकमाओ त्ति । अह मन्नसे, न सो विसेसो वहारिज्जइ त्ति । अत्थि ताव भो इयरसरहेउसिङ्गाणमभेयप्पसंगओ, विसेसावहारणे उज्जमो कायव्वो त्ति । न हि अयं थाणुस्स अवराहो, जमन्धो न पस्सइ त्ति । जं च भणियं-अदेस्सपरमाणुनिप्पन्नं घडाइ देस्सं' ति, एयं पि न जुत्तिक्खमं । जओ न एगन्तेण अदेसा परमाणवो, जोगिदंसणाओ कज्जदंसणाओ य । न य एवं भूयधम्मसंकमो चेयणाए त्ति, एयं पि अओ चेव पडिसिद्धं वेइयव्वं, चेयणस्स अचेयणभेयाओ त्ति । अह मन्नसे, सत्तालक्खणधम्मसंकमाओ न दोसो त्ति । एयं पि न सोहणं ति । तस्स सयलभावसाहारणत्तेणमणियामगत्ताओ त्ति । तओ संगयं चेव मए भणियं ति । तहा जं च भणियं-'तहाविहपरिणामाभावाओ चेव न घडादीणं चेयण' त्ति । एत्थ नत्थि पमाणं; भूयसमुदयवइरित्तपरिणामब्भु-

---

भगवता भणितम्-श्रृणु, यच्च भणितम्-'किं न भवति शृंगात् शरः' इति ? स भवति, न पुनः कारणाननुरूपः, इतरशरविलक्षणमसृण-घन-श्लक्ष्णादितद्धर्मसंक्रमाद्-इति । अथ मन्यसे, न स विशेषोऽवधार्यते इति । अस्ति तावत् भो इतरशरहेतुशृंगाणामभेदप्रसंगतः, विशेषावधारणे उद्यमः कर्तव्य इति । न हि अयं स्थाणोरपराधः, यद् अन्धो न पश्यति इति । यच्च भणितम्-'अदृश्यपरमाणुनिष्पन्नं घटादि दृश्यम्' इति, एतदपि न युक्तिक्षमम् । यतो नैकान्तेन अदृश्याः परमाणवः, योगिदर्शनात् कार्यदर्शनाच्च । न च एवं भूतधर्मसंक्रमश्चेतनायामिति, एतदपि अत एव प्रतिषिद्धं वेदितव्यम्, चेतनस्य अचेतनभेदादिति । अथ मन्यसे, सत्तालक्षणधर्मसंक्रमाद् न दोष इति । एतदपि न शोभनमिति । तस्य सकलभावसाधारणत्वेन अनियामकत्वादिति । ततः संगतमेव मया भणितमिति । तथा यच्च भणितम्-'तथाविधपरिणामाभावादेव न घटादीनां चेतना' इति, अत्र नास्ति प्रमाणम्; भूतसमुदयव्यतिरिक्तपरिणामाभ्युपगमे

---

1 ०विलक्खणो क-ग

यगमे य अन्नाभिहाणो जीवब्भुवगमो त्ति ॥

तओ मविलियं भणियं पिङ्गकेण–भयवं ! जइ एवं अणिन्दियगुणो जीवो, ता सरीराओ वि भिन्नो। एवं च होन्तगे मम पियामहो महुपिङ्गो नाम, सो अणेयमत्तसंघायणरओ आसि त्ति । तुह दरिसणेण नियमेण नरए समुप्पन्नो । ममोवरि अइसिणेहसंगओ य आसि, इहलोयाकरणिज्जनिवारणसीलो य । ता कहं सो तओ नरयाओ आगच्छिऊण दिट्ठविवागो वि मं न निवारेइ। भयवया भणियं–सुण, जहा महावराहयारी, तिक्खनरवइसमाएसगहिओ, रोद्देहिं चारयपुरिसेहिं लोहसङ्कलानिबद्धदेहो, घोरन्धयारचारयनिवासी, परतन्तओ सुप्पियं पि सयणं दट्ठुं पि न लहए, किमङ्ग पुणाणुसासिउं ? एवमेव ते नारगा पमायावराहकारिणो तिव्वयरकम्मपरिणामगहिया चण्डेहिं निरयपालेहिं वज्जसङ्कलानिबद्धदेहा तिव्वन्धयारदुरुत्तरनरयनिवासिणो कम्मपरतन्ता कहं निक्खमिउं लहन्ति, जेण देवाणुप्पियं अणुसासेन्ति ?। भणियं च–

च भव्याभिधानो जीवाभ्युपगम इति ॥

ततः सव्यलीकं भणितं पिङ्गकेन–भगवन्! यदि एवमनिन्द्रियगुणो जीवः, ततः शरीरादपि भिन्नः। एवं च भवति (सति) मम पितामहो मधुपिङ्गो नाम, सोऽनेकसत्त्वसंघातनरत आसीदिति। तव दर्शनेन (मतेन) नियमेन नरके समुत्पन्नः, ममोपरि अतिस्नेहसंगतश्च आसीत्, इहलोकाऽकरणीयनिवारणशीलश्च। ततः कथं स ततो नरकाद् आगत्य दृष्टविपाकोऽपि मां न निवारयति। भगवता भणितम्–शृणु, यथा महापराधकारी, तीक्ष्णनरपतिसमादेशगृहीतः, रौद्रैश्चारकपुरुषैर्लोहशृङ्खलानिबद्धदेहः, घोरान्धकारचारकनिवासी, परतन्त्रकः सुप्रियमपि स्वजनं द्रष्टुमपि न लभते, किमङ्ग पुनरनुशासितुम्? एवमेव ते नारकाः प्रमादापराधकारिणस्तीव्रतरकर्मपरिणामगृहीताश्चण्डैर्निरयपालैर्वज्रशृङ्खलानिबद्धदेहास्तीव्रान्धकारदुरुत्तरनरकवासिनः कर्मपरतन्त्राः कथं निष्क्रमितुं लभन्ते, येन

निरयाउए अक्खीणे निक्खमिउं नो लहन्ति नरगाओ। कम्मेण पावयारी नेरइया ते निहम्मन्ति ॥

पिङ्गकेण भणियं-भयवं! जइ एवं, ता ममं चेव पिया सोमपिङ्गो नाम, सो अच्चन्तपरलोयभीरू, पाणवहाइविरओ, अकमा-यसीलो, अणेगजागयारी पच्छा य समणवयं घेत्तूण कञ्चि कालं परिवालिय मओ। सो य तुह दंसणेण नियमेण देवेसु उववन्नो। अच्चन्तवल्लहो य अहं तस्स आसि। धम्मं च मे देसियव्वं ति भणियमासी। ता कहं सो अपरतन्तो वि समाणो इहागच्छिऊण मं न पडिबोहेइ। भयवया भणियं-सुण, जहा नाम कोइ दरिद्दपुरिसो, हीणजाइकुलरूवो ववसायं काऊण गहियकलाकलावो देसन्तर-मुवगन्तूण तप्पसायओ कहिंचि पत्तरज्जो, कयविविहसुन्दरीपरिग्गहो, महानरिन्दपूइओ, संजायाणेगसुन्दरावच्चो, महासोक्खसागरावगाढो न सुमरए लज्जावणिज्जस्स कुकलत्त-पुत्तभण्डगस्स, एवं चेव ते देवा मणुयत्तणमसारं मन्नमाणा धम्मववसायं काऊण गहियपरलो-

देवगाणुत्रियमनुपालयन्ति। भणितं च—

निरयायुषि अक्षीणे निष्क्रमितुं नो लभन्ते नरकात्। कर्मणा पापकारिणो नैरयिकास्ते निहन्यन्ते ॥

पिङ्गकेन भणितम्-भगवन्! यदि एवम्, ततो-ममैव पिता सोमपिङ्गो नाम, सोऽत्यन्तपरलोकभीरुः, प्राणवधादिविरतः, अकषा-यशीलः, अनेकयागकारी, पश्चाच्च श्रमणव्रतं गृहीत्वा कञ्चित् कालं परिपाल्य मृतः। स च तव दर्शनेन नियमेन देवेषु उपपन्नः। अत्यन्तवल्लभश्चाहं तस्यासम्। धर्मश्च मम देश्य इति भणितमासीत्। ततः कथं सोऽपरतन्त्रोऽपि सन् इहागत्य मां न प्रतिबो-धयति। भगवता भणितम्-शृणु, यथा नाम कोऽपि दरिद्रपुरुषः, हीनजातिकुलरूपो व्यवसायं कृत्वा गृहीतकलाकलापो देशान्तरमुप-गत्य तत्प्रसादतः कुत्रचित् प्राप्तराज्यः, कृतविविधसुन्दरीपरिग्रहः, महानरेन्द्रपूजितः, संजातानेकसुन्दरापत्यः, महासौख्यसागरावगाढो

१ अक्खीणे क। २ गहियपरलोगपत्थावा क, गहियवयाऽऽलावा ख।

गकलाकलाया सुरालयं पाविऊण पुन्नसुकयपसायओ देविड्ढि पाविऊण तियससुन्दरीपरियरिया, महाणेगदेवगणपूइया, समुप्पन्नाणेयर-इनिबन्धणा, अचन्तरइसागरावगाढा न सुमरन्ति वि मणुयभावस्स, किमङ्ग पुण आगच्छन्ति? । ता कहं समणुसासइन्ति ?। भणियं च—

"संकन्तदिव्वपेमा विसयपसत्ताऽसमत्तकत्तव्वा । अणहीणमणुयकज्जा नरभवमसुहं न एन्ति सुरा" ॥

पिङ्गकेण भणियं–भयवं ! जइ एएण हेउणा नागच्छन्ति, देहभिन्नो य जीवो, ता इमं इह नयरवत्तं चेव मच्चलोयपच्चक्खं विरुज्झइ । भयवया भणियं–कहेहि, किं तं नयरवत्तं ति?। पिङ्गकेण भणियं–सुण, एत्थ नयरे एगेण तक्करेण नरवइभण्डायारं मुट्ठमासी । सो य कहंचि निग्गच्छमाणो गहिओ निउत्तपुरिसेहिं । गेण्हिऊण सलोत्तगो चेव उवणीओ नरवइस्स । राइणा भणियं–वावाएह एयं । तओ सो वहनिउत्तेण लोहकुम्भीए पक्खित्तो; पक्खिविऊण य ठइया लोहकुम्भी । सम्मं ठइयाइं छिड्डाइं तत्तसीसएणं।

न स्मरति लज्जापनेयस्य कुकलत्र-पुत्रभाण्डकस्य, एवं चैव ते देवा मनुजत्वमसारं मन्यमानाः, धर्मव्यवसायं कृत्वा गृहीतपरलोकक-लाकलापाः, सुरालयं प्राप्य पूर्वसुकृतप्रसादतो देवर्द्धिं प्राप्य त्रिदशसुन्दरीपरिकरिताः, महानेकदेवगणपूजिताः, समुत्पन्नानेकरतिनिबन्धनाः, अत्यन्तरतिसागरावगाढा न स्मरन्त्यपि मनुजभावस्य, किमङ्ग पुनरागच्छन्ति ? । ततः कथं समनुशासयन्ति ? । भणितं च—

संक्रान्तदिव्यप्रेमाणो विषयप्रसक्ता असमाप्तकर्तव्याः । अनधीनमनुजकार्या नरभवमशुभं नाऽऽयन्ति सुराः ॥

पिङ्गकेन भणितम्–भगवन् ! यदि एतेन हेतुना नागच्छन्ति, देहभिन्नश्च जीवः, तत इदमिह नगरवृत्तं चैव सर्वलोकप्रत्यक्षं विरुध्यते । भगवता भणितम्–कथय, किं तद् नगरवृत्तम्–इति ? । पिङ्गकेन भणितम्–शृणु, अत्र नगरे एकेन तस्करेण नरपतिभाण्डागारं मुषमासीत् । स च कथंचिद् निर्गच्छन् गृहीतो नियुक्तपुरुषैः । गृहीत्वा सलोप्त्रक एव उपनीतो नरपतेः । राज्ञा भणितम्–व्यापादयत एतम् । ततः सो वधनियुक्तेन लोहकुम्भ्यां प्रक्षिप्तः, प्रक्षिप्य च स्थगिता लोहकुम्भी । सम्यक् स्थगितानि छिद्राणि तप्तसीस-

तओ दिन्ना रक्खवालया। तहिं च सो उवगओ पश्चत्तं। न दिट्ठो सुहुमो वि से निग्गमणमग्गो त्ति। अओ अवगच्छामो, न अन्नो जीवो त्ति॥ भगवया भणियं-भद्द! जं किंचि एयं ति। सुण, इहेगम्मि नयरे एगो सङ्खिगो विन्नाणपगरिसं संपत्तो सीहदारे वि सङ्खं धमेन्तो सव्वनयरजणस्स कण्णे वि य धमेइ। सो य राइणा पुच्छिओ-कियद्दूरे धमेसि?। तेण भणियं-देव! सीहदारम्मि। राइणा भणियं-कहं मम ठइयदुवारे वि वासहरए पविसइ त्ति?। तेण भणियं-नत्थि से पडिघाओ त्ति। तओ राइणा असद्दहन्तेण सो पुरिसो ससङ्खगो चेव उंड्डियाए[1] पक्खित्तो, वुत्तो य 'वाएज्जमि सङ्खं'। ठइया उंड्डिया[2] जउमारीकया य। वाइओ[3] तेण सङ्खो। विनिग्गओ से सद्दो, उवलद्धो राइणा नायरेहिं। न य तस्स निग्गमणछिद्दमुवलद्धं ति। एवं इहावि भवे, को विरोहो त्ति?॥

पिङ्गकेण भणियं-भयवं! न एवमेयं ति। सुण। इहेवेगो तक्करजुवाणओ मित्तेण मे कालदण्डवासिएण मम वयणाओ तुलाए

केन। ततो दत्ता रक्षपालकाः। तत्र च स उपगतः पञ्चत्वम्। न दृष्टः सूक्ष्मोऽपि तस्य निर्गमनमार्ग इति। अतोऽवगच्छामः, न अन्यो जीव इति॥ भगवता भणितम्-भद्र! यत् किञ्चिद् एतद् इति। शृणु। इहैकस्मिन् नगरे एकः शाङ्खिको विज्ञानप्रकर्षं संप्राप्तः सिंहद्वारे (मुख्यद्वारे) अपि शङ्खं धमन् सर्वनगरजनस्य कर्णेऽपि च धमति। स च राज्ञा पृष्टः-कियद्दूरे धमसि?। तेन भणितम्-देव! सिंहद्वारे। राज्ञा भणितम्-कथं मम स्थगितद्वारेऽपि वासगृहके प्रविशति-इति?। तेन भणितम्-नास्ति तस्य प्रतिघात इति। ततो राज्ञाऽश्रद्दधता स पुरुषः सशङ्खक एव ऊर्ध्विकायां प्रक्षिप्तः, उक्तश्च 'वादय शङ्खम्'। स्थगिता ऊर्ध्विका जतुसारीकृता च। वादितस्तेन शङ्खः। विनिर्गतस्तस्य शब्दः, उपलब्धो राज्ञा नागरैः। न च तस्य निर्गमनच्छिद्रमुपलब्धमिति। एवमिहाऽपि भवेत्, को विरोध इति?॥

१ उंड्डियाए क। २ उड्डिगा। ३ पवाइओ क।

तोलिऊण गलकरमोडएण वावाइओ। सो य पुणो वि तोलिओ जाव जत्तिओ सजीवो, तत्तिओ अजीवो वि। अओ अवगच्छामो, न अन्नो जीवो; अन्नहा ऊणगरूवो होन्तो त्ति ॥ भगवया भणियं–भद्द ! जं किंचि एयं। सुण, इहेगेणं गोवालेण वायभरिओ वत्थि-पुडगो तुलाए तोलाविओ, रिक्को पुणो वि तोलाविओ, जाव जत्तिओ भरिओ, तत्तिओ रिक्को वि। अह य अन्नो तओ वाओ त्ति। अह मन्नसे, सो मणागं उणगो त्ति। एवं च होन्तगे इयरम्मि वि समो पसङ्गो ॥ पिङ्गकेण भणियं–भयवं ! न एवमेयं ति। सुण, इहेव नयरे मित्तेण मे कालदण्डवासिएण मम वयणाओ एगस्स तक्करस्स सरीरयं संवत्तुव्वत्तयं करेन्तेण वि मग्गिओ जीवो, न य दिट्ठो। तओ से सरीरयं खण्डखण्डाइं करेन्तेण पुणो वि मग्गिओ, न य दिट्ठो त्ति। अओ अवगच्छामो–न अन्नो जीवो। भयवया भणियं–भद्द ! जं किंचि एयं। सुण, इहेगेण मणुस्सेण अरणिं संवत्तुव्वत्तयं करेन्तेण वि मग्गिओ अग्गी, न य दिट्ठो। तओ तेण

पिङ्गकेन भणितम्–भगवन् ! नैवमेतद् इति। शृणु। इहैकैः तस्करयुवको मित्रेण मम कालदण्डपाशिकेन मम वचनात् तुलायां तोलयित्वा गलकरमोटकेन व्यापादितः। स च पुनरपि तोलितः। यावद् यावान् सजीवः, तावान् अजीवोऽपि। अतोऽवगच्छामः, न अन्यो जीवः, अन्यथा ऊनकरूपोऽभविष्यद् इति ॥ भगवता भणितम्–भद्र ! यत् किञ्चिद् एतत्। शृणु, इहैकेन गोपालेन वातभृतो वस्तिपुटकस्तुलायां तोलितः, रिक्तः पुनरपि तोलितः, यावद् यावान् भृतः, तावान् रिक्तोऽपि। अथ च अन्यस्ततो वात इति। अथ मन्यसे, स मनाग् ऊनक इति। एवं च भवति इतरस्मिन्नपि समः प्रसङ्गः ॥ पिङ्गकेन भणितम्–भगवन् ! न एवमेतद् इति। शृणु, इहैव नगरे मित्रेण मम कालदण्डपाशिकेन मम वचनाद् एकस्य तस्करस्य शरीरकं संवर्तोद्वर्तकं कुर्वताऽपि मार्गितो जीवः, न च दृष्टः। ततस्तस्य शरीरकं खण्डखण्डानि कुर्वता पुनरपि मार्गितः, न च दृष्ट इति। अतोऽवगच्छामः–न अन्यो जीवः। भगवता

१ मणाइं क

अरणिं खण्डखण्डाइं करेन्तेण पुणो वि मग्गिओ, न य दिट्ठो त्ति। ता किं सो न तम्मि अत्थि त्ति ?। अह मन्नसे नत्थि त्ति, एवं तओ अणुप्पायपसङ्गो ॥

एवं च भणिए उत्तरप्पयाणाभावेण विलियमिव पिङ्गकं पेच्छिऊण भणियं भयवया-ता एवं रुक्खसाहापयलणनिमित्तभूओ पवणो फासिन्दिएण घेप्पइ। हन्त ! ता अदिस्समाणो वि चक्खुणा सरीरचेट्ठानिमित्तभूओ जीवो अत्थि त्ति सद्धेयं। अह मन्नसे, पवणो फासिन्दिएण घेप्पइ। हन्त ! जीवो वि चित्तचेयणाइधम्माणुहवेण घेप्पइ त्ति। भणियं च-

चित्तं चेयण सन्ना विन्नाणं धारणा य बुद्धी य। ईहा मई वियक्का जीवस्स उ लक्खणा एए ॥

ता अत्थि जीवो त्ति। एवं च होन्तए जं तुमए भणियमासि, जहा-'दुल्लहं खलु एयं माणुसत्तणं ति, एयमसंबद्धं चेव; जओ

भणितम्-भद्र ! यत् किञ्चिद् एतत्। शृणु, इहैकेन मनुष्येण अरणिं संवर्तोद्वर्तकं कुर्वताऽपि मार्गितोऽग्निः, न च दृष्टः। ततस्तेन अरणिं खण्डखण्डानि कुर्वता पुनरपि मार्गितः, न च दृष्ट इति। ततः किं स न तस्मिन्नस्ति इति ?। अथ मन्यसे नास्तीति। एवं ततोऽनुत्पादप्रसङ्गः ॥

एवं च भणिते उत्तरप्रदानाभावेन व्यलीकं (लज्जितम्) इव पिङ्गकं प्रेक्ष्य भणितं भगवता-तत एवं वृक्षशाखाप्रचलननिमित्तभूतः पवनः स्पर्शेन्द्रियेण गृह्यते। हन्त ! तत एवं अदृश्यमानोऽपि चक्षुषा शरीरचेष्टानिमित्तभूतो जीवोऽस्ति इति श्रद्धेयम्। अथ मन्यसे, पवनः स्पर्शेन्द्रियेण गृह्यते। हन्त ! जीवोऽपि चित्तचेतनादिधर्मानुभवेन गृह्यत इति। भणितं च—

चित्तं चेतना संज्ञा विज्ञानं धारणा च बुद्धिश्च। ईहा मतिर्वितर्को जीवस्य तु लक्षणानि एतानि ॥

ततोऽस्ति जीव इति। एवं च भवति यत् त्वया भणितमासीत्, यथा-'दुर्लभं खलु एतद् मनुष्यत्वम्-इति, एतद् असंबद्धमेव;

न तं सुकयदुक्कयाणुभावेण लब्भइ, अवि य भूयपरिणईओ त्ति, अओ किमियमाउलत्तणं' त्ति, एयमजुत्तं। न हि परलोगगामुए जीवे विज्जमाणे चेव एयं समत्थधम्मारम्भसाहगं माणुसत्तणं भूयपरिणइमेत्तलब्भं ति। तहा जं भणियं–'अणिच्चा पियजणसमागम त्ति, एयं पि अकारणं, जओ न ते निक्खन्ताणं पि अन्नहा होन्ति,' एयं पि न सोहणं; जओ निक्खन्ताणमिह मुणीणं पिया-ऽपियवियप्पो चेव नत्थि त्ति। तहा जं च भणियं–'चञ्चलाओ रिद्धीओ त्ति, एयस्स वि न निक्खमणं चेव पडिवक्खो, अवि य उवाएण परिरक्खणं' ति, एयं पि बालवयणसरिसं चेव। जओ न धम्ममेव मोत्तूणं अन्नो परिरक्खणोवाओ, असाराओ य इमाओ दव्वरिद्धीओ अणेयसत्ता-वयारिणीओ य। तहा जं च भणियं–'कुसुमसारं जोव्वणं ति, एत्थ वि य रसायणं जुत्तं, न पुणो निक्खमणं' ति, एयं पि न संगयं। जओ न निक्खमणधम्मसाहणरसायणाओ परमत्थचिन्ताए अन्नं रसायणं ति। तहा जं च भणियं–'परलोयपच्चत्थिओ अगङ्गो त्ति, एयं पि न सोहणं; जओ परलोओ चेव नत्थि, न य कोइ तओ आगन्तूणमप्पाणयं दंसेइ, एवमवि य परिच्चयणे अइप्पसङ्गो' त्ति,

---

यतो न तत् सुकृतदुष्कृताऽनुभावेन लभ्यते, अपि च भूतपरिणतिर इति, अतः किमिदमाकुलत्वम्' इति, एतद् अयुक्तम्। न हि परलोकगामुके जीवे विद्यमाने एव एतत् समस्तधर्मारम्भसाधकं मनुष्यत्वं भूतपरिणतिमात्रलभ्यमिति। तथा यद् भणितम्—'अनित्याः प्रियजनसमागमा इति, एतदपि अकारणम्, यतो न ते निष्क्रान्तानामपि अन्यथा भवन्ति,' एतदपि न शोभनम्; यतो निष्क्रान्तानामिह मुनीनां प्रिया-ऽप्रियविकल्प एव नास्ति इति। तथा यच्च भणितम्–'चञ्चला ऋद्धय इति, एतस्याऽपि न निष्क्रमणमेव प्रतिपक्षः, अपि च उपायेन परिरक्षणम्' इति, एतदपि बालवचनसदृशमेव। यतो न धर्ममेव मुक्त्वा अन्यः परिरक्षणोपायः, असाराश्च इमा द्रव्यर्द्धयोऽनेकसत्त्वापकारिण्यश्च। तथा यच्च भणितम्–'कुसुमसारं यौवनमिति, अत्रापि च रसायनं युक्तम्, न पुनर्निष्क्रमणम्' इति, एतदपि न संगतम्। यतो न निष्क्रमणधर्मसाधनरसायनात् परमार्थचिन्तायामन्यद् रसायनमिति। तथा यच्च

एयं पि हु असारं । विचित्तकिरियाणुहव–जाइस्सरणोवेलम्भतक्कहियपच्चया विज्जमाणुप्पायाइसिद्धो कहं परलोओ चेव नत्थि ?। अप्पाणयादंसणे य भणियं कारणं । तह जं च भणियं–'दारुणो विसयविवागो त्ति, एयं पि न जुत्तिसंगयं; जओ आहारस्स विवागो दारुणो चेव, एवं च भोयणमवि परिचइयव्वं; न य 'हरिणा विज्जन्ति त्ति जवा चेव न वुप्पन्ति'त्ति, न य उवायन्नुणो पुरिसस्स दारुणत्तं पि संभवइ'त्ति एयं पि अणालोइयवयणं । जओ सव्वं चेव संसारियं वत्थुं विवागदारुणं ति । तं च कमेण वज्जिज्जए, अहिप्पेओ य पव्वज्जाफलं संसारक्खओ चेव त्ति । न य बंधुपरिवज्जणेण विसयपरिभोगो तीरइ त्ति । अओ चिय न तेसु दारुणत्तं पि संभवइ त्ति । तह जं च भणियं–'पहवइ सया अणिवारियपसरो मच्चु त्ति, एयं पि बालवयणमेत्तं ति; जेण निक्खन्तस्स वि एस अनिवारियपसरो चेव; न य पव्वज्जन्ते मरियव्वं ति मसाणे चेवावत्थाणमुववन्नं, न य सन्ते वि परलोए दुक्खसेवणाओ सुहं, अवि य सुहसेवणाओ चेव,

भणितम्–'परलोकप्रत्यर्थिकोऽनङ्ग इति, एतदपि न शोभनम्; यतः परलोक एव नास्ति, न च कश्चित् तत आगत्य आत्मानं दर्शयति, एतदपि खलु असारम् । विचित्रक्रियानुभव-जातिस्मरणोपलम्भतर्कहितप्रत्ययाद् विद्यमानोत्पादादिसिद्धः कथं परलोक एव नास्ति ?। आत्माऽदर्शने च भणितं कारणम् । तथा यच्च भणितम्–दारुणो विषयपाक इति, एतदपि न युक्तिसंगतम् । यत आहारस्य विपाको दारुण एव, एवं च भोजनमपि परित्यक्तव्यम्; न च 'हरिणा विद्यन्ते'इति यवा एव नोप्यन्ते इति, न च उपायज्ञस्य पुरुषस्य दारुणत्वमपि संभवति' इति, एतदपि अनालोचितवचनम् । यतः सर्वमेव सांसारिकं वस्तु विपाकदारुणमिति । तच्च क्रमेण वर्ज्यते, अभिप्रेतश्च प्रव्रज्याफलं संसारक्षय एवेति । न च बन्धुपरिवर्जनेन विषयपरिभोगः शक्यते इति । अत एव न तेषु दारुणत्वमपि संभवतीति । तथा यच्च भणितम्–'प्रभवति सदा अनिवारितप्रसरो मृत्युरिति, एतदपि बालवचनमात्रमिति;

१ ०परलोकनिरा० क–च । २ बान्धवपरि० ख । ३ विसयापरि० क–ग ।

जओ जं चेव अब्भसिज्जइ तस्सेव पगरिसो लोए दिट्ठो न उण विवज्जए त्ति, ता विरम एयाओ ववसायाओ' त्ति, एयं पि मुद्धजण-मोहणं। जओ न निक्खमणसाहियफलस्स एस अनिवारियपसरो त्ति। निक्खमणस्स हि फलं जम्हा जम्माभावजं निव्वाणं, निव्वाण-पत्तस्स य इमस्स जीवस्स न जम्मो, न जरा, न वाही, न मरणं, न इट्ठविओगो, न अणिट्ठसंपओगो, न बुभुक्खा, न पिवासा, न रागो, न दोसो, न कोहो, न माणो, न माया, न लोहो, न भयं, न य अन्नो वि कोइ उवद्दवो त्ति, किं तु सव्वन्नू सव्वदरिसी निरुवम-सुहसंपन्नो तिलोयचूडामणीभूओ मोक्खपए चिट्ठइ। अओ कहं तत्थ मच्चुणो पसरो?। न य अपयट्टकज्जारम्भो पुरिसो फलं साहेइ। कहं च पइसमयमेव मरणाभिभूयाणं कापुरिसाणं तस्स पडियारमचिन्तयन्ताणं अवत्थाणं पसंसिज्जइ?। अओ 'न य पज्जन्ते मरियव्वं ति मसाणे चेवावत्थाणमुववन्नं' ति पहसणप्पायं। न य सयलसङ्गचाईण वीयरागवयणेण कम्मक्खउज्जयाणं परिणयचरित्तभावणाणं

येन निष्क्रान्तस्यापि एष अनिवारितप्रसर एव; न च पर्यन्ते मर्तव्यमिति श्मशाने एव अवस्थानमुपपन्नम्। न च सत्यपि परलोके दुःखसेवनात् सुखम्, अपि च सुखसेवनादेव, यतो यच्चैव अभ्यस्यते तस्यैव प्रकर्षो लोके दृष्टो न पुनर्विपर्यये इति, ततो विरम एतस्माद् व्यवसायाद्' इति, एतदपि मुग्धजनशोभनम्। यतो न निष्क्रमणसाधितफलस्य एष अनिवारितप्रसर इति। निष्क्रमणस्य हि फलं यस्माद् जन्माभावजं निर्वाणम्, निर्वाणप्राप्तस्य चास्य जीवस्य न जन्म, न जरा, न व्याधिः, न मरणम्, न इष्टवियोगः, न अनिष्टसंप्रयोगः, न बुभुक्षा, न पिपासा, न रागः, न द्वेषः, न क्रोधः, न मानः, न माया, न लोभः, न भयम्, न च अन्योऽपि कोऽपि उपद्रव इति, किं तु सर्वज्ञो सर्वदर्शी निरुपमसुखसंपन्नस्त्रिलोकचूडामणीभूतो मोक्षपदे तिष्ठति। अतः कथं तत्र मृत्योः प्रसरः?। न चाप्रवृत्तकार्यारम्भः पुरुषः फलं साधयति। कथं च प्रतिसमयमेव मरणाभिभूतानां कापुरुषाणां तस्य प्रतीकारमचिन्तयतामवस्थानं प्रशस्यते?। अतो 'न च पर्यन्ते मर्तव्यमिति श्मशाने एवावस्थानमुपपन्नम्' इति प्रहसनप्रायम्। न च सकलसंगत्यागिनां

समणाणं जं सुहं, तं चक्कवट्टिणो वि न जुज्जइ त्ति । भणियं च भयवया–"इह खलु संसारे न सव्वहा सुहमत्थि, अणभिन्नायसुहसरूवा य एत्थ पाणिणो, कम्मसंजोए दुक्खं तन्निवित्ती सुहं, आजाई दुक्खं तन्निवित्ती सुहं, जरा दुक्खं तन्निवित्ती सुहं, इच्छा दुक्खं तन्निवित्ती सुहं, पियं दुक्खं तन्निवित्ती सुहं, संकिलेसे दुक्खं तन्निवित्ती सुहं, मरणं दुक्खं तन्निवित्ती सुहं, अणाइकम्मसंजोगओ य णं इमे पाणिणो अणभिन्ना य सुहसरूवस्स त्ति बेमि । एवं आजाइ–जरा–इच्छा–पिय–संकिलेस–मरणेसु वि विभासा । से जहा नाम केइ पुरिसा आजाइरोगखेत्तुप्पन्ना आजाइरोगगहिया अदिट्ठारोगपुरिसाइया आमरणं तब्भावा अणभिन्ना आरोग्गसुहसरूवस्स, एवं चेव समणाउसो ! अणाइअपज्जवसाणावट्टखेत्तवासी इमे पाणिणो त्ति । जेण दट्ठूण वि य णं जहा ते अरोगिपुरिसं तेसु तेसु रोगिपुरिसाणुकूलेसु समायारेसु अवट्टमाणं सव्वरोगनिग्घायणिं किरियमणुसासयन्तं अत्थेगे पउस्सन्ति, अत्थेगे उवहसन्ति, अत्थेगे

वीतरागवचनेन कर्मक्षयोद्यतानां परिणतचारित्रभावनानां श्रमणानां यत् सुखम्, तच्च चक्रवर्तिनोऽपि न युज्यते इति । भणितं च भगवता–"इह खलु संसारे न सर्वथा सुखमस्ति, अनभिज्ञातसुखस्वरूपाश्च अत्र प्राणिनः, कर्मसंयोगे दुःखं तन्निवृत्तिः सुखम्, जरा दुःखं तन्निवृत्तिः सुखम्, इच्छा दुःखं तन्निवृत्तिः सुखम्, प्रियं दुःखं तन्निवृत्तिः सुखम्, संक्लेशो दुःखं तन्निवृत्तिः सुखम्, मरणं दुःखं तन्निवृत्तिः सुखम्, अनादिकर्मसंयोगतश्च इमे प्राणिनोऽनभिज्ञाश्च सुखस्वरूपस्येति ब्रवीमि। एवम् आजाति–जरा–इच्छा–प्रिय–संक्लेश–मरणेषु अपि विभाषा । तद् यथा नाम–केचित् पुरुषा आजातिरोगक्षेत्रोत्पन्ना आजातिरोगगृहीता अदृष्टाऽरोगपुरुषादिका आमरणं तदभावाद् अनभिज्ञा आरोग्यसुखस्वरूपस्य, एवमेव श्रमणायुष्मन् ! अनाद्यपर्यवसानावर्तक्षेत्रवासिन इमे प्राणिनः इति । येन दृष्ट्वाऽपि च यथा ते अरोगिपुरुषं तेषु तेषु रोगिपुरुषानुकूलेषु समाचारेषु अवर्तमानं सर्वरोगनिर्घातिनीं क्रियामनुशासयन्तं सन्त्येके (पुरुषाः)

1 अभिन्नाय० स । 2 पुरिसे पउ० म ।

अवहीरन्ति, अत्थेगे सुणन्ति, अत्थेगे न परिणामेन्ति, अत्थेगे परिणामेन्ति, अत्थेगे नाणुचिट्ठन्ति, अत्थेगे अणुचिट्ठन्ति, अत्थेगे सज्झं निराहेन्ति; अत्थेगे किच्छसज्झं विराहेन्ति, अत्थेगे न विराहेन्ति; अविराहणाए य णं अत्थि केइ सव्वदुक्खविमोक्खं करेन्ति, करेत्ता तब्भावं विउट्टन्ति, तओ अइक्कन्ततब्भावे खलु अयं पुरिसेऽवियट्टं अभिन्नायारोग्गसुहसरूवे भवइ, समणपरिणामगामी वि अवियट्ट-मभिन्नायारोग्गसुहसरूवा भवन्ति, एवमेव समणाउसो ! आवट्टखेत्तवासी इमे पाणिणो दट्ठूण वि य णं भावारोग्गपुरिसं तेसु तेसु कम्मसंजोगाइदुक्खगहियपुरिसाणुकूलेसु समायारेसु अवट्टमाणं तद्दुक्खनिग्घायणिं च किरियमणुसासयन्तं अत्थेगे (जाव–) अवियट्ट-मभिन्नायारोग्गसुहसरूवा भवन्ति, न पुण अन्नहत्ति'' ॥

अओ न दुक्खसेवणं मोक्खकिरिया, अवि य सुहं चेव । भणियं च–

छिरन्ति, सन्त्येके उपहसन्ति, सन्त्येके अवधीरयन्ति, सन्त्येके शृण्वन्ति, सन्त्येके न परिणमयन्ति, सन्त्येके परिणमयन्ति, सन्त्येके नानुतिष्ठन्ति, सन्त्येकेऽनुतिष्ठन्ति, सन्त्येके साध्यं विराधयन्ति, सन्त्येके कृच्छ्रसाध्यं विराधयन्ति, सन्त्येके न विराधयन्ति, अविराध-नया च सन्ति केचित् सर्वदुःखविमोक्षं कुर्वन्ति, कृत्वा तद्भावं विकुट्टयन्ति, ततोऽतिक्रान्ततद्भावे खलु अयं पुरुषोऽविसंवादितम्-भिज्ञाताऽऽरोग्यसुखस्वरूप इति भवति, श्रमणपरिणामगामिनोऽपि अविसंवादितमभिज्ञाताऽऽरोग्यसुखस्वरूपा भवन्ति, एवमेव श्रमणा-युष्मन् ! आवर्तक्षेत्रवासिन इमे प्राणिनः दृष्ट्वाऽपि च तं भावाऽऽरोग्यपुरुषं तेषु तेषु कर्मसंयोगादिदुःखगृहीतपुरुषानुकूलेषु समाचारेषु अवर्तमानं तद्दुःखनिर्घातिनीं च क्रियामनुशासयन्तं सन्त्येके (यावत्–) अविसंवादितमभिज्ञाताऽऽरोग्यसुखस्वरूपा भवन्ति, न पुनरन्यथा'' इति ॥

---

१ ०गाती वि फ, ०गाढी वि ख ।

तिणसंथारनिवन्नो वि मुणिवरो भट्ठराग-मय-मोहो । जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टी वि ? ॥

अओ सुहसेवणाओ चेव सुहपयरिसो त्ति सव्वं चेवोववन्नं ति । एत्थन्तरम्मि आणन्दवाहजलभरियलोयणेणं निव्वाडियहिययस-ब्भावं पवड्ढमाणसम्मत्तपरिणामेण भणियं बम्भयत्तेण-भयवं ! एवमेयं, न अन्नह त्ति । भाविओ तेण जिणदेसिओ धम्मो, पवन्नं सम्मत्तं, चिन्तियं च विगयसम्मोहं-'अहो ! मे सुयस्स सोहणो ववसाओ' त्ति । पिङ्गकेण वि य पवन्नसुहपरिणामेणं चेव भणियं-भयवं ! एवमेयं ति । अह कहं पुण पुण्ण-पावाणं विसेसो लक्खिज्जइ ? भयवया भणियं-सुण, पच्चक्खं चेव-

अविरयडज्झन्तागुरुविसट्टलुच्छलियधूमपडिहत्थे । एक्के वसन्ति भवणे निबद्धमणिनिम्मलुल्लोए ॥

अन्ने वि रइयफुंफुमनिणिन्तधूमोलिपूरिउच्छङ्गे । जुण्णनिहेलणविवरन्तरालपरिसंठियभुयङ्गे ॥

अतो न दुःखसेवनं साधुक्रिया, अपि च सुखमेव । भणितं च-

तृणसंस्तारनिषण्णोऽपि मुनिवरो भ्रष्टराग-मद-मोहः । यत् प्राप्नोति मुक्तिसुखं कुतस्तत् चक्रवर्त्यपि ? ।

अतः सुखसेवनादेव सुखप्रकर्ष इति सर्वमेवोपपन्नमिति । अत्रान्तरे आनन्दवाष्पजलभृतलोचनेन निर्घाटितहृदयसद्भावं प्रवर्धमान-सम्यक्त्वपरिणामेन भणितं ब्रह्मदत्तेन-भगवन् ! एवमेतत् , न अन्यथेति । भावितस्तेन जिनदेशितो धर्मः, प्रपन्नं सम्यक्त्वम् , चिन्तितं च विगतसंमोहम्-'अहो ! मम सुतस्य शोभनो व्यवसाय' इति । पिङ्गकेनापि च प्रपन्नशुभपरिणामेन एव भणितम्-भगवन् ! एव-मेतद् इति । अथ कथं पुनः पुण्य-पापयोर्विशेषो लक्ष्यते ? । भगवता-भणितम्-शृणु, प्रत्यक्षमेव-

अविरतदह्यमानागुरुविशृङ्खलोच्छलितधूमप्रतिहस्ते (प्रतिपूर्णे) । एके वसन्ति भवने निबद्धमणिनिर्मलोल्लोचे ॥

---

१ गद क-ख । २ पडहत्थे ख ।

एक्के धवलहरोवरि मियङ्ककरदन्तुरे सह पियाहिं । लीलाए गमिन्ति निसिं पेसलरयचाडुयम्मेहिं ॥
अन्ने वि सिसिरमारुयसीयपवेविरसमुद्धुसियदेहा । कहकह वि पियारहिया वाएन्ता दन्तवीणाओ ॥
एगे कञ्चणपडिबद्धथोरमुत्ताहलुब्भडाहरणा । विलसन्ति बहलकुङ्कुमभसलियवच्छत्थलाभोया ॥
अन्ने वि सइं महियलनिसीयणुप्पन्नकिणियपोंगिल्ला । मलिणजरकप्पडोच्छइयविग्गहा कह वि हिण्डन्ति ॥
एक्के पूरेन्ति मणोरहाइ जं मग्गिराण पणतीणं । अन्ने पुण परघरहिण्डणेण कुच्छि वि न भरेन्ति ॥
इय पुण्णा-पुण्णफलं पच्चक्खं चेव दीसई लोए । तह वि जणो रागन्धो धम्मम्मि अणायरं कुणइ ॥

एसो य तव्विसेसो लक्खिज्जइ आगमबलेण । अन्नं च-

अन्येऽपि रचितकुङ्कुमाविनिर्येधूमावलिपूरितोत्सङ्गे । जीर्णनिलयनविवरान्तरालपरिसंस्थितभुजङ्गे ॥
एके धवलगृहोपरि मृगाङ्ककरदन्तुरे सह प्रियाभिः । लीलया गमयन्ति निशां पेशलरतचाटुकर्मभिः ॥
अन्येऽपि शिशिरमारुतशीतप्रवेपमानसमुद्धुषितदेहाः । कथंकथमपि प्रियारहिता वादयन्तो दन्तवीणाः ॥
एके काञ्चनप्रतिबद्धस्थूलमुक्ताफलोद्भटाभरणाः । विलसन्ति बहलकुङ्कुमभ्रमरितवक्षस्थलाभोगाः ॥
अन्येऽपि सदा महीतलनिषदनोत्पन्नकिणितपरिपक्वाः । मलिनजीर्णकर्पट(वस्त्र)उच्छादितविग्रहाः कथमपि हिण्डन्ते ॥
एके पूरयन्ति मनोरथान् यद् मार्गयमाणानां प्रणयिनाम् । अन्ये पुनः परगृहहिण्डनेन कुक्षिमपि न भरन्ति ॥
इति पुण्या-ऽपुण्यफलं प्रत्यक्षमेव दृश्यते लोके । तथाऽपि जनो रागान्धो धर्मे अनादरं करोति ॥

एतश्च तद्विशेषो लक्ष्यते आगमबलेन । अन्यच्च-

पुण्णेण महासोक्खा चक्की देवा य सिद्धिगामी य। पावेण कुमाणुस–तिरिय–नारया होन्ति जीवा उ ॥

पिङ्गकेण भणियं–भयवं ! एयमेयं; अह किं पुण पुण्णकारणं, पावकारणं वा अणुट्ठाणं ति ?। भयवया भणियं–सुण, पुण्णकारण ताव सयलपाणिवह–मुसावाया–ऽदत्तादाण–मेहुण–परिग्गहाण विरई, निसिभत्तवज्जणं, रागदोसादिनिग्गहो य। पावकारणं पुण इणमेव विवरीयं ति। तओ एयमायण्णिऊण पवन्नो सावयधम्मं समं बम्भदत्तेण पिङ्गको। भणियं च बम्भदत्तेण–भयवं ! एस मे सिहिकुमारो सुओ होइ; ववसिओ य एसो महापुरिसोचिए अणुट्ठाणे। अणुमयं च मे संपयमिमं एयस्स ववसियं, ता किं एयस्स अणुट्ठाणस्स उचिओ, अणुचिओ त्ति वा ?। भयवया भणियं–न रयणायरप्पसूयं रयणं पडिबन्धस्स अणुचियं। तओ हरिसवसुप्पुलइयङ्गेण 'करेउ एस इमं ममं पि मणोरहगोयरं' ति चिन्तिऊण भणियं बम्भयत्तेण–वच्छ ! अणुन्नाओ मए तुमं, करेहि तवसंजमुज्जोयं ति। तओ सहरिसं पणमिऊण भणियं सिहिकुमारेण–ताय ! अणुग्गहीओ म्हि। तओ वन्दिऊण गुरुं पविट्ठा नयरं। बम्भयत्तेण वि य

पुण्येन महासौख्याश्चक्रिणो देवाश्च सिद्धिगामिनश्च। पापेन कुमानुष्य–तिर्यग्–नारका भवन्ति जीवास्तु ॥

पिङ्गकेन भणितम्–भगवन् ! एवमेतत्, अथ किं पुनः पुण्यकारणम्, पापकारणं वा अनुष्ठानमिति। भगवता भणितम्–शृणु, पुण्यकारणं तावत् सकलप्राणिवध–मृषावादा–ऽदत्तादान–मैथुन–परिग्रहाणां विरतिः, निशाभक्त(भोजन)वर्जनम्, रागद्वेषादिनिग्रहश्च। पापकारणं पुनरिदमेव विपरीतमिति। तत एतद् आकर्ण्य प्रपन्नः श्रावकधर्मं समं ब्रह्मदत्तेन पिङ्गकः। भणितं च ब्रह्मदत्तेन–भगवन् ! एष मम शिखिकुमारः सुतो भवति, व्यवसितश्च एष महापुरुषोचिते अनुष्ठाने। अनुमतं च मया सांप्रतमिदमेतस्य व्यवसितम्। ततः किमेतस्य अनुष्ठानस्य उचितः, अनुचित इति वा ?। भगवता भणितम्–न रत्नाकरप्रसूतं रत्नं प्रतिबन्धस्यानुचितम्। ततो हर्षवशोत्पुलकिताङ्गेन 'करोतु एष इमं ममाऽपि मनोरथगोचरम्' इति चिन्तयित्वा भणितं ब्रह्मदत्तेन–वत्स ! अनुज्ञातो मया त्वम्, कुरु

दाविरमाणोगणापुव्वयं महादाणं, कराविया जिणाययणाईसु अट्ठाहिया महिमा। तओ पसत्थे तिहि-करण-मुहुत्त-जोगे महया पमोएण, दिव्वाए विभूईए, परियरिओ रायनायरएहिं, दिव्वं सिवियमारूढो, वज्जन्तेहिं मङ्गलतूरसंघाएहिं, पसंसिज्जमाणो विहुहलोएणं, गहुरगवमालोइज्जमाणो पुरसुन्दरीहिं, देन्तो जहासमीहियं अत्थिजणाण दाणं निग्गओ नयराओ सिहिकुमारो। गओ जत्थ भयवं विजयसिंहायरिओ त्ति। ओइण्णो सिवियाओ। वन्दिओ गुरू। गुरुणा वि कए आवस्सए तं वामपासे ठविऊण वन्दिया परमगुरवो। तओ सिहिसन्दणं दाऊण भणियं सिहिकुमारेण-इच्छाकारेण पव्वावेह। तओ गुरुणा 'इच्छामो' त्ति भणिऊण नमोक्कारपाढेण विहि-पुव्वयं अप्पियं से रयहरणं 'साहुलिङ्गं' ति। बहुमाणओ गहियं सिहिकुमारेणं। वन्दिऊण गुरुं पुणो भणियमणेण-इच्छाकारेण मुण्डावेह। तओ 'इच्छामो' त्ति भणिऊण नमोक्कारपुव्वयं अतुट्ठाओ गुरुणा गहियाओ तिण्णि अट्ठाओ। तओ वन्दिऊण गुरुं, भणियं

तवस्समोपोसणम्-इति। ततः सहर्षं प्रणम्य भणितं शिखिकुमारेण-तात! अनुगृहीतोऽस्मि। ततः वन्दित्वा गुरुं प्रविष्टो नगरम्। प्रवर्तितानि ■ शासनमार्गेणानुपूर्वेकं महादानम्, कारिता जिनायतनादिषु अष्टाह्निका महिमा। ततः प्रशस्ते तिथि-करण-मुहूर्त-योगे महता प्रमोदेन, दिव्यया विभूत्या, परिवृतो राजनागरकैः, दिव्यां शिविकामारूढः, वाद्यमानैः मङ्गलतूर्यसंघातैः प्रशस्यमानो विबुधलोकेन, सबहुमानमालोक्यमानः पुरसुन्दरीभिः, ददत् यथासमीहितमर्थिजनेभ्यो दानं निर्गतो नगरात् शिखिकुमारः। गतो यत्र भगवान् विजयसिंहाचार्य इति। अवतीर्णः शिविकातः। वन्दितो गुरुः। गुरुणा अपि कृते आवश्यके तं वामपार्श्वे स्थापयित्वा वन्दिताः परमगुरवः। ततो शिखिवन्दनं दत्वा भणितं शिखिकुमारेण-इच्छाकारेण प्रव्राजयत। ततो गुरुणा 'इच्छामः' इति भणित्वा नमस्कारपाठेन विधिपूर्वकम-र्पितं तस्य रजोहरणं 'साधुलिङ्गम्'-इति। बहुमानतो गृहीतं शिखिकुमारेण। वन्दित्वा गुरुं पुनर्भणितमनेन-इच्छाकारेण मुण्डयत। ततः 'इच्छामः' इति भणित्वा नमस्कारपूर्वकम् अत्रुटिता गुरुणा गृहीतास्त्रयोऽष्टाः। ततो वन्दित्वा गुरुं भणितं शिखिकुमारेण-इच्छा

सिहिकुमारेण-इच्छाकारेण सामाइयं मे आरोवेह । 'इच्छामो' त्ति भणिऊण तदारोवणनिमित्तं समं सिहिकुमारेण कओ णेण काउस्स-
ग्गो, चिन्तिओ थओ, पारिओ नमोक्कारेण । तओ नमोक्कारपुव्वयं तिण्णि वाराओ कड्ढियं सामाइयं, महासंवेगसारं अणुकड्ढियं
सिहिकुमारेण । तओ गहिया गुरुणा वासा, दिन्ना परमगुरुपाएसु, तहा सन्निहियाणं साहुमादीण य । एत्थन्तरम्मि वन्दिऊण गुरुं
भणियं सिहिकुमारेण-संदिसह, किं भणामि ? । गुरुणा भणियं-वन्दित्तु पवेएह । तओ वन्दिऊण जंपियमणेण-तुब्भेहिं मे सामाइ-
यमारोवियं, इच्छामि अणुस(सि)ट्ठि त्ति । वासप्पयाणपुव्वयं भणियं गुरुणा-नित्थारगपारगो गुरुगुणेहिं वड्ढाहि । तओ वन्दिऊण
भणियं सिहिकुमारेणं-तुब्भं पवेइयं, संदिसह, साहूणं पवेएमि । गुरुणा भणियं-पवेएह । तओ वन्दिऊण नमोक्कारपाढेण कयं पया-
हिणमणेण । नित्थारगपारगो गुरुगुणेहिं वड्ढाहि त्ति भणमाणेहिं दिन्ना गुरुमादीहिं वासा । ठिओ मणागमग्गओ । एवं तिण्णि वारे ।
तओ पडिओ परमगुरुपाएसु, आयरियस्स य निसण्णस्स, कयं निरुद्धं, अणुसासिओ गुरुणा । एवं पवन्नो इमस्स पायमूले विसुज्झ-

---

कारेण सामायिकं मम आरोपयत । 'इच्छामः' इति भणित्वा तदाऽऽरोपणनिमित्त समं शिखिकुमारेण कृतोऽनेन कायोत्सर्गः, चिन्तितः
स्तवः, पारितो नमस्कारेण । ततो नमस्कारपूर्वकं त्रीन् वारान् कर्षितं सामायिकम्, महासंवेगसारमनुकर्षितं शिखिकुमारेण । ततो
गृहीता गुरुणा वासाः, दत्ताः परमगुरुपादेषु, तथा संनिहितानां साध्वादीनां च । अत्राऽन्तरे वन्दित्वा गुरुं भणितं शिखिकुमारेण-
संदिशत, किं भणामि ? । गुरुणा भणितम्-वन्दित्वा प्रवेदयत । ततो वन्दित्वा जल्पितमनेन-युष्माभिर्मम सामायिकमारोपितम्,
इच्छामि अनुशिष्टिम् इति । वासप्रदानपूर्वकं भणितं गुरुणा-निस्तारकपारगो गुरुगुणैर्वर्धस्व । ततो वन्दित्वा भणितं शिखिकुमारेण-
तुभ्यं प्रवेदितं, संदिशत, साधूनां प्रवेदयामि । गुरुणा भणितम्-प्रवेदयत । ततो वन्दित्वा नमस्कारपाठेन कृतं प्रदक्षिणमनेन । निस्तारक-
पारगो गुरुगुणैर्वर्धस्वेति भणद्भिः दत्ता गुर्वादिभिर्वासाः । स्थितो मनाग् मार्गतः, एवं त्रीन् वारान् । ततः पतितः परमगुरुपादेषु,

माणेणं परिणामेणं जिणोवदिट्ठेणं विहिणा सयलदुक्खपरमोसहिं महापव्वज्जं ति ॥

अहिणन्दिओ आणन्दवाहजलभरियलोयणेणं राइणा बम्भयत्तेणं नयरजणवएण य। अओ कइवयदियहे तत्थाऽऽसिऊण समत्ते मासकप्पे गओ भगवया सह खेत्तन्तरम्मि। एवं च निरइयारं सामण्णमणुवालेन्तस्स अइक्कन्ता अणेगे वरिसलक्खा॥ इओ य समुप्पन्नो जालिणीए अणुयावो। हा! दुट्ठु मए ववसियं, जेण एसो अवावाइओ चेव निग्गओ त्ति। ता पेसेमि से पेसलवयणसारं संदेसयपुव्वयं किंचि उवायणं, जेण एसो पुणो वि कहंचि इहागच्छइ, तओ वावाइस्सं ति। अणुचिट्ठियं च तीए जहासमीहियं। पेसिओ बहुविहसंदेसगब्भिणं कम्बलरयणमादाय सोमदेवो। गओ य सो देसविक्खायायरियपउत्तिपुच्छणेणं तमालसन्निवेससंठियस्स सिहिकुमारस्स [समीवं]। दिट्ठो य तेण पच्चुच्चारएण साहूण सुत्तत्थमणुभासयन्तो सिहिकुमारो। वन्दिओ पहट्ठवयणपङ्कएणं। धम्मलाहिओ

थाचार्यस्य निषण्णस्य च, कृतं निरुद्यम्-अनुशासितो गुरुणा। एवं प्रपन्नोऽस्य पादमूले विशुद्ध्यमानेन परिणामेन जिनोपदिष्टेन विधिना सकलदुःखपरमौषधिं महाप्रव्रज्याम्-इति ॥

अभिनन्दित आनन्दवाष्पजलभृतलोचनेन राज्ञा ब्रह्मदत्तेन नगरजनपदेन च। ततः कतिपयदिवसान् तत्र आसित्वा समाप्ते मासकल्पे गतो भगवता सह क्षेत्रान्तरम्। एवं च निरतिचारं श्रामण्यमनुपालयतोऽतिक्रान्तानि अनेकानि वर्षलक्षाणि॥ इतश्च समुत्पन्नो जालिन्या अनुतापः। हा! दुष्ठु मया व्यवसितम्, येन एषोऽव्यापादित एव निर्गत इति। तावत् प्रेषयामि तस्य पेशलवचनसारं संदेशपूर्वकं किंचिद् उपायनम्, येन एष पुनरपि कथंचिद् [illegible] आगच्छति। ततो व्यापादयिष्य इति। अनुष्ठितं च तया यथासमीहितम्। प्रेषितो बहुविधसंदेशगर्भितं कम्बलरत्नमादाय सोमदेवः। गतश्च स देशविख्यानाचार्यप्रवृत्तिप्रच्छनेन तमालसंनिवेशसंस्थितस्य शिखिकुमारस्य (समीपम्)। दृष्टश्च तेन प्रत्युच्चारकेन साधूनां सूत्रार्थमनुभासयन् शिखिकुमारः। वन्दितः प्रहृष्टवदनपङ्कजेन। धर्म-

तेणं । पव्वभिन्नाओ य पच्छा । पुच्छिओ य 'कओ भवं' ति ? । तेण भणियं–देव ! [1]कोसंबनयराओ अच्चन्तमणुतावाणलडज्झमाणदेहाए जणणीए भवओ चेव पउत्तिनिमित्तं पेसिओ म्हि । सिहिकुमारेणं भणियं–को वि य अणुयावो अम्बाए ? । सोमदेवेण भणियं–जं तुमं पव्वइओ त्ति । तओ सिहिकुमारेण चिन्तियं–अहो णु खलु नेहकायराणि अपरमत्थपेच्छीणि जणणिहिययाइं होन्ति, दुप्पडियाराणि य मायापित्तीणि त्ति चिन्तिऊण भणियं–भो सोमदेव ! न खलु अहं अम्बानिव्वेएणं पव्वइओ, अवि य भवनिव्वेएणं ति । ता अकारणं अणुतप्पइ अम्बा । सोमदेवेण भणियं–देव ! भणियं ते जणणीए, जहा–'जाय ! थेवहियओ, अविवेगभायणं, अविमिस्सयारी, चञ्चलसहावो, पभवन्तमच्छरी, असग्गाहनिरओ, पच्छाणुयावी महिलायणो होइ । पुरिसो उण गम्भीरहियओ, विणयभायणं, सुविमिस्सयारी, अचञ्चलसहावो, कयन्नू, दढाणुराओ, बहुयावेक्खगो त्ति । ता किं तए मम हिययं अयाणिऊण एयं ववसियं ति ।

त्याभितश्च तेन। प्रत्यभिज्ञातश्च पश्चात्। पृष्टश्च–'कुतो भवान्–इति ?। तेन भणितम्–देव ! कोशाम्बनगराद् अत्यन्तमनुतापानलदह्यमानदेहया जनन्या भवत एव प्रवृत्तिनिमित्तं प्रेषितोऽस्मि। शिखिकुमारेण भणितम्–कोऽपि च अनुतापोऽम्बायाः ?। सोमदेवेन भणितम्–यत् त्वं प्रव्रजित इति। ततः शिखिकुमारेण चिन्तितम्–अहो ! नु खलु स्नेहकातराणि अपरमार्थप्रेक्षीणि जननीहृदयानि भवन्ति, दुष्प्रतीकाराश्च मातापितर इति चिन्तयित्वा भणितम्–भोः सोमदेव ! न खलु अहं अम्बानिर्वेदेन प्रव्रजितः, अपि च भवनिर्वेदेन इति। ततोऽकारणमनुतप्यतेऽम्बा। सोमदेवेन भणितम्–देव ! भणितं तव जनन्या, यथा–'जात ! स्तोकहृदयः, अविवेकभाजनम्, अविमृश्यकारी, चञ्चलस्वभावः, प्रभवन्मत्सरी, असद्ग्राहनिरतः, पश्चादनुतापी महिलाजनो भवति। पुरुषः पुनः गम्भीरहृदयः, विनयभाजनम्, सुविमृश्यकारी, अचञ्चलस्वभावः, कृतज्ञः, दृढानुरागः, बहुकावेक्षक इति। ततः किं त्वया मम हृदयमज्ञात्वा एतद् व्यवसितमिति।

---

[1] कोसान० क–ग

अन्नं च–परत्रपरलोयमग्गेण वि भयवया अवस्समहं पेक्खियव्व त्ति । उवणीयं च ते कम्बलरयणं । एयं च भयवया अवस्सं घेत्तव्वं त्ति । सिहिकुमारेण भणियं–भो सोमदेव ! भणियं मए–'अकारणे अणुतप्पइ अम्बा' । जं च भणियं, अवस्समहं पेच्छियव्व त्ति', एत्थ वि गुरू पमाणं । अणाहियारो मम अप्पणमयत्तणस्स । एयं पि कम्बलरयणं अणुचियं चेव साहूणं, तहा वि भयवओ निवेएहि त्ति । तओ दंसिओ से एगेण साहुणा गुरू । निवेइओ तेण एस वुत्तन्तो भयवओ । उवणीयं च कम्बलरयणं । कुमारबहुमाणओ गहियं गुरुणा, भणियं च–मोत्तूणमन्तरायं पेसिस्सं अहिगयसुयसमत्तीए कुमारं । सोमदेवेण भणियं–भगवं ! अणुग्गहीया से जणणी । एवं च कइवयदियहे चिट्ठिऊण गओ सोमदेवो । अइक्कन्तो कोइ कालो कुमारस्स तव–संजमं करेन्तस्स । अन्नया य कोसंबनयरासन्नविसयविहारेण कुओइ पुरिसाओ 'उवरओ बम्भयत्तो'त्ति समुवलद्धपउत्तिणा सयणालोयणनिमित्तं चेव साहिऊण एयस्स वुत्तन्तं कइवयसुसाहुपरिवारिओ पेसिओ सिहिकुमारो भयवया विजयसिंहायरिएण कोसंबनयरं ति । पत्तो य सो तयं । आवासिओ

अन्यत्र–परत्रपरलोकमार्गेणाऽपि भगवता अवश्यमहं प्रेक्षितव्या इति । उपनीतं च तव कम्बलरत्नम् । एतच्च भगवता अवश्यं ग्रहीतव्यमिति । शिखिकुमारेण भणितम्–भोः सोमदेव ! भणितं मया–'अकारणे अनुतप्यते, अम्बा' । यच्च भणितम् 'अवश्यमहं प्रेक्षितव्या इति,' अत्राऽपि गुरवः प्रमाणम् । अनधिकारो मम आत्मवशगत्वस्य । एतदपि कम्बलरत्नमनुचितमेव साधूनाम् । तथाऽपि भगवतो निवेदय इति । ततो दर्शितस्तस्य एकेन साधुना गुरुः । निवेदितस्तेन एष वृत्तान्तो भगवतः । उपनीतं च कम्बलरत्नम् । कुमारबहुमानतो गृहीतं गुरुणा, भणितं च–मुक्त्वा अन्तरायं प्रेषयिष्ये अधिकृतश्रुतसमाप्तौ कुमारम् । सोमदेवेन भणितम्–भगवन् ! अनुगृहीता तस्य जननी । एवं च कतिपयदिवसान् स्थित्वा गतः सोमदेवः । अतिक्रान्तः कश्चित् कालः कुमारस्य तपः–संयमं कुर्वतः । अन्यदा च कौशाम्बनगरासन्नविषयविहारेण कुतश्चित् पुरुषात् 'उपरतो ब्रह्मदत्तः' इति समुपलब्धप्रवृत्तिना स्वजनाऽऽलोकननिमित्तं चैव

मेहवणाभिहाणे उज्जाणे । जाओ य जणवाओ, अहो ! आगओ भयवं सिहिकुमारो । पूइओ राय-नायरेहिं । कया य तेणमक्खेवणी धम्मकहा । आवज्जिया य नायरया । बिइयदियहम्मि गओ जणणिसयासं । दिट्ठा य तेणं पावोदएण विय वम्मयत्तमरणेण अच्चन्त-झीणविहवा असंभाविज्जमाणावत्था सजणणी । न पच्चभिन्नाया य । पच्चभिन्नाओ य एसो तीए । तओ सहजमायासहावेण बाहजल-भरियलोयणं गग्गरक्खमिव भेरवसरं परुइया एसा । समासासिया सिहिकुमारेणं । कया य से धम्मदेसणा । अम्ब ! ईइसो चेव एस संसारवासो । ता किं एत्थ कीरउ त्ति । अवि य—

अत्थेण विक्कमेण य सयणेण बलेण चाउरङ्गेण । नो तीरइ धरिउं जे मच्चू देवा-ऽसुरेहिं पि ॥

वाहि-जराखरदाढो वसणसयनिवायतिक्खनहजालो । जीयमयघायणरओ मरणमइन्दो जगे भमइ

कथयित्वा पतस्य वृत्तान्तं पतिगयसुसाधुपरिवारितः प्रेषितः शिखिकुमारो भगवता विजयसिंहाचार्येण कोशाम्बनगरमिति । प्राप्तश्च स तत्र । आवासितो मेघवनाभिधाने उद्याने । जातश्च जनवादः, अहो ! आगतो भगवान् शिखिकुमारः । पूजितो राज-नागरैः । कृता च तेन आक्षेपणी धर्मकथा । आवर्जिताश्च नागरकाः । द्वितीयदिवसे गतो जननीसकाशम् । दृष्टा च तेन पापोदयेन इव ब्रह्मदत्तमरणेन अत्य-न्तक्षीणविभवा असंभाव्यमानाऽऽवस्था स्वजननी । न प्रत्यभिज्ञाता च । प्रत्यभिज्ञातश्च एष तया । ततः सहजमायास्वभावेन बाष्पजल-भृतलोचनं सगद्गदमिव भैरवस्वरं प्ररुदिता एषा । समाश्वासिता शिखिकुमारेण । कृता च तस्य धर्मदेशना । अम्ब ! ईदृश एव एष संसारवासः । ततः किमत्र क्रियतामिति । अपि च—

अर्थेन विक्रमेण च स्वजनेन बलेन चातुरङ्गेण । न तीर्यते धर्तुं यो मृत्युर्देवा-ऽसुरैरपि ॥

व्याधि-जराखरदंष्ट्रः व्यसनशतनिपाततीक्ष्णनखजालः । जीवमृगघातनरतो मरणमृगेन्द्रो जगति भ्रमति ॥

जेणं चिय उद्दामो हिण्डइ एसो जयम्मि अक्खलिओ। तेणं चिय सप्पुरिसा लग्गा परलोगमग्गम्मि ॥
कालेण रूढपेम्मे परोप्परं हिययनिव्वडियभावे। अकलुणहियओ एसो विच्छोवइ सत्तसंघाए ॥
न गणेइ कया-ऽकयं नावेक्खइ भावगब्भिणं पेम्मं। न य जोएइ अणज्जो आयइभावं पि मत्तो व्व ॥
ता नत्थि किंचि सरणं एतेण अभिद्दुयाण जीवाण। सयलम्मि वि तेलोक्के मोत्तूणं जिणमयं परमं ॥
एवं च अम्ब! जुत्तं तुज्झ वि चइऊण मोहविसयरसं। पाउं अच्चन्तसुहं इणमो धम्मामयं चेव ॥

एवं च भणिए समाणे समायं चेव भणियं जालिणीए-जाय! देहि मे अवत्थोचियाइं वयाइं। तओ आलोचिऊण संपुण्णचरणाखमं तीए परिणामं संसिऊण सवित्थरं गिहिधम्मं दिन्नाणि से अणुव्वयाणि, तव्वावायणवीसम्भसमुप्पायणनिमित्तं सब्भावेण चिय गहियाइं च तीए। तओ कंचि वेलं गमेऊण पयट्टो कुमारो। भणिओ य जालिणीए-जाय! अज्ज तए इहेव भोत्तव्वं ति। सिहिकु-

---

येनैव उद्दामो हिण्डते एष जगति अस्खलितः। तेनैव सत्पुरुषा लग्नाः परलोकमार्गे ॥
कालेन रूढप्रेम्णः परस्परं हृदयनिर्वर्तितभावान्। अकरुणहृदय एष विच्छोदयति सत्त्वसंघातान् ॥
न गणयति कृता-ऽकृतं नापेक्षते भावगर्भितं प्रेम। न च पश्यति अनार्य आयतिभावमपि मत्त इव ॥
ततो नास्ति किञ्चित् शरणमेतेन अभिद्रुतानां जीवानाम्। सकलेऽपि त्रैलोक्ये मुक्त्वा जिनमतं परमम् ॥
एवं च अम्ब! युक्तं तवाऽपि त्यक्त्वा मोहविषयरसम्। प्राप्तुमत्यन्तसुखमिदं धर्मामृतमेव ॥

एवं च भणिते सति समायमेव भणितं जालिन्या-जात! देहि मम अवस्थोचितानि व्रतानि। तत आलोच्य संपूर्णचरणाऽक्षमं तस्याः परिणामं शंसित्वा सविस्तरं गृहिधर्मं दत्तानि तस्यै अनुव्रतानि, तद्व्यापादनविस्रम्भसमुत्पादननिमित्तं सद्भावेनेव गृहीतानि च तया।

मारेण भणियं-अम्ब ! अणायारो खु एसो समणाणं, जं मोत्तूण महुयरवित्तिं एगपिण्डभोयणं ति। जालिणीए भणियं-जाय ! तुमं जाणसि त्ति। एवं च सो पइदिणं से करेइ धम्मदेसणं। चिन्तेइ य जालिणी एयस्स मारणोवाए, न यावडइ कोइ सुहुमो उवाओ त्ति। अन्नया आगया चउद्दसी। ठिया साहुणो उववासेणं भिक्खाणाहिण्डणेणं। मुणिया य तीए। तओ चिन्तिउं पयत्ता। जइ कहंचि कल्लं न एस वावाइज्जइ, तओ गमिस्सइ पक्खसन्धीए। न एत्थ अन्नो कोइ उवाओ; ता करेऊण कंसारं तालपुडसंजुयं चेवं विसमोयगं गोसे उवणेमि एयाणं, निब्बन्धओ य भुञ्जाविस्सामि एते। तओ सहत्थपरिवेसणेणं तम्मोयगप्पयाणेणं वावाइस्सं इमं ति। संपाइयं जहासमीहियमिमीए। गया गोसे चेव भोयणं घेत्तूण तमुज्जाणं जालिणी। दिट्ठा सिहिकुमारेण, भणिया य तेणं-अम्ब ! किमेगागिणी किंपि अणुचियं घेत्तूण आगया सि?। जालिणीए भणियं-जाय ! अत्तणो चेव पुण्णाहिलासिणी तुम्हाण भोयणं ति। सिहि-

ततः कांचिद् वेलां गमयित्वा प्रवृत्तः कुमारः। भणितश्च जालिन्या-जात ! अद्य त्वया इहैव भोक्तव्यमिति। शिखिकुमारेण भणितम्-अम्ब ! अनाचारः खलु एष श्रमणानाम्, यद् मुक्त्वा मधुकरवृत्तिमेकपिण्डभोजनमिति। जालिन्या भणितम्-जात ! त्वं जानासि इति। एवं च स प्रतिदिनं तस्यै करोति धर्मदेशनाम्। चिन्तयति च जालिनी एतस्य मारणोपायान्, न चाऽऽपतति कश्चित् सूक्ष्म उपाय इति। अन्यदा आगता चतुर्दशी। स्थिताः साधव उपवासेन भिक्षाऽहिण्डनेन। ज्ञातश्च तया। ततश्चिन्तयितुं प्रवृत्ता। यदि कथंचित् कल्यं न एष व्यापाद्यते, ततो गमिष्यति पक्षसंधौ। नाऽत्र अन्यः कोऽपि उपायः; ततः कृत्वा कंसारं (लपनश्रियम्) तालपुटसंयुतं चयं विषमोदकं प्रत्युषसि उपनयामि एतेषाम्, निर्बन्धतश्च भोजयिष्यामि एतान्। ततः स्वहस्तपरिवेषणेन तन्मोदकप्रदानेन व्यापादयिष्ये इममिति। संपादितं यथासमीहितमनया। गता प्रत्युषसि एव भोजनं गृहीत्वा तदुद्यानं जालिनी। दृष्टा शिखिकुमारेण, भणिता च तेन-अम्ब ! किमेकाकिनी किमपि अनुचितं गृहीत्वा आगताऽसि?। जालिन्या भणितम्-जात ! आत्मन एव पुण्याभिलाषिणी

लज्जिस्सइ य अणज्जो लोओ एत्थं असङ्कणिज्जं पि। अम्बाए पुव्ववुत्तन्तभाविओ मोहदोसेण ॥
धी इमिणा जम्मेणं अम्बाए संकिलेसजणएणं। अहवा एवंविह एव एस पावो त्ति संसारो ॥ भणियं च–
पावेन्ति अयसपंकं केवि हु अकए वि एत्थ दोसम्मि। परभवनियाणओ चिय केइ न पावेन्ति हु कए वि ॥
जं चित्ता कम्मगई ता एयं चिय इमीए पच्छित्तं। पुव्विं दुच्चिण्णाणं फलमसुहं चेव कम्माणं ॥
अहवा न सोयणिज्जा संपयमेसा वि जीवलोयम्मि। सिवसुहफलकप्पतरुं जिणधम्मं पाविया जेण ॥
ता सुमरामो परमं परमपयसाहगं जिणक्खायं। अह प नमोक्कारं संपइ किं सेसचिन्ताए ॥
तो सो सुहपरिणामो पञ्चनमोक्कारभावणाजुत्तो। मरिऊणं उववन्नो तियसवरो बम्भलोगम्मि ॥

यावद् न संपन्नमिदं समीहितमविफलमपुण्यस्य। तथा पातिता चैषा प्रमादतः अयशःपङ्के ॥
लज्जिष्यते चाऽनार्यो लोकोऽत्र अशङ्कनीयमपि। अम्बायाः पूर्ववृत्तान्तभावितो मोहदोषेण ॥
धिगनेन जन्मना अम्बायाः संक्लेशजनकेन। अथवा एवंविध एव एष पाप इति संसारः ॥ भणितं च–
प्राप्नुवन्ति अयशःपङ्कं केऽपि खलु अकृतेऽपि अत्र दोषे। परभवनिदानत एव केचिद् न प्राप्नुवन्ति खलु कृतेऽपि ॥
यत् चित्रा कर्मगतिः तत एतदेव अस्याः प्रायश्चित्तम्। पूर्वं दुश्चीर्णानां फलमशुभमेव कर्मणाम् ॥
अथवा न शोचनीया सांप्रतमेषाऽपि जीवलोके। शिवसुखफलकल्पतरुं जिनधर्मं प्रापिता येन ॥
ततः स्मरामः परमं परमपदसाधकं जिनाख्यातम्। अथ पञ्चनमस्कारं संप्रति किं शेषचिन्तया ॥
ततः स शुभपरिणामः पञ्चनमस्कारभावनायुक्तः। मृत्वा उपपन्नः त्रिदशवरो ब्रह्मलोके ॥

नवसागरोवमाऊ रइलच्छिसमागमे विमाणम्मि । सामाणिओ महप्पा बम्भसुरेसस्स दिव्वजुई ॥
इयरो वि कालसेसं गमिउं मरिऊण सक्करप्पहाए । उववन्नो नेरइओ तिसागराऊ महाघोरो ॥

याकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय–भगवत्–श्रीहरिभद्रसूरिवररचितायां
'समराइच्चकहाए' तइओ भवो समत्तो ।

नवसागरोपमायू रतिलक्ष्मीसमागमे विमाने । सामानिको महात्मा ब्रह्मसुरेशस्य दिव्यद्युतिः ॥
इतरोऽपि कालशेषं गमयित्वा मृत्वा शार्कराप्रभायाम् । उपपन्नो नैरयिकः त्रिसागरायुर्महाघोरः ॥

चउत्थो भवो

मिहिजालिणिमाइसुया जं भणियमिहासि तं गयमियाणिं । वोच्छामि समासेणं धणधणसिरिमो य पइभज्जा ॥

अत्थि इहेव जम्बुद्दीवे दीवे भारहे वासे सोहम्मसुरलोयपडिच्छन्दयभूयं निच्चुस्सवाणन्दपमुइयमहाजणं अविरयपवत्तपेच्छणयसोहियं सुरसरियासलिलनिद्धोयपेरन्तं सुसम्मनयरं नाम पुरवरं तुलियसुरसुन्दरीयणलडहत्तणरूववेसविब्भमाहिं पउरङ्गणाहिं कलियं मयरद्धयपडायाहिं ।

मोत्तूण सव्वमन्नं परत्थसंपायणेकतल्लिच्छो । जत्थ पुरिसाण वग्गो वहइ जहत्थं नियं नामं ॥

तत्थ पडिवक्खनरणाहदोघट्टकेसरी सुधणू नाम राया । तस्स बहुमओ सव्वनयरेक्कसेट्ठी दीणाणाहकिविणजणवच्छलो बन्धवकु-

---

शिखिजालिनीमातृसुतौ यद् भणितं तद्गतमिदानीम् । वक्ष्ये समासेन धनधनश्रियौ च पतिभार्ये ॥

अस्ति इहैव जम्बूद्वीपे द्वीपे भारते वर्षे सौधर्मसुरलोकप्रतिछन्दकभूतम्, नित्योत्सवानन्दप्रमुदितमहाजनम्, अविरतप्रवृत्तप्रेक्षणकशोभितम्, सुरसरित्सलिलनिर्धौतपर्यन्तं सुशर्मनगरं नाम पुरवरं तुलितसुरसुन्दरीजनलटभ(प्रशस्त)त्वरूपवेशविभ्रमाभिः पौराङ्गनाभिः कलितं मकरध्वजपताकाभिः ।

मुक्त्वा सर्वमन्यत् परार्थसम्पादनैकतत्परः । यत्र पुरुषाणां वर्गो वहति यथार्थं निजं नाम ॥

तत्र प्रतिपक्षनरनाथदोघट्ट(हस्ति)केसरी सुधन्वा नाम राजा । तस्य बहुमतः सर्वनगरैकश्रेष्ठी दीनानाथकृपणजनवत्सलो बान्धवकुमुदा-

सुयायरससी लहुइयवेसमणविहवो तिवग्गसंपायणरई वेसमणो नाम सत्थवाहो त्ति। तस्स समाणकुलरूवविहवसीला सिरिदेवी नाम भारिया। ताणं च परोप्परं सिणेहसारं विसयसुहमणुहवन्ताण अइक्कन्तो कोइ कालो॥

अन्नयावच्चचिन्ता समुप्पज्जइ। तओ नयरसन्निहियस्स धणदेवाभिहाणजक्खस्स महापूयं काऊण कयं उवाइयमणेहिं। भयवं, जइ नो तुह पभावओ सुउप्पत्ती भविस्सइ, तओ भगवओ सव्वनयरजणाहिट्ठियं महामहं करिस्सामो, सुयस्स य भयवओ चेव नामं उक्खिविस्सामो त्ति॥

तओ ताणं मज्झिमे वयसि वट्टमाणाणं सो बम्भलोयकप्पवासी देवो अहाउयमणुपालिऊण तओ चुओ सिरिदेवीए गब्भे उववन्नो त्ति। दिट्ठो य तीए सुमिणयंमि तीए चेव रयणीए पभायसमयंसि उत्तुङ्गधवलकाओ अच्चन्तलीलगामी अणवरयपयट्टदाणो गण्डय-

---

कस्वामी लघूकृतवैश्रमणविभवः त्रिवर्गसंपादनरतिर्वैश्रमणो नाम सार्थवाह इति। तस्य समानकुल-रूप-विभव-शीला श्रीदेवी नाम भार्या। तयोश्च परस्परं स्नेहसारं विषयसुखमनुभवतोरतिक्रान्तो कोऽपि कालः।

अन्यदाऽपत्यचिन्ता समुत्पद्यते। ततस्ताभ्यां नगरसंनिहितस्य धनदेवाभिधानयक्षस्य महापूजां कृत्वा कृतमुपयाचितमाभ्याम्। भगवन्! यदि आवयोस्तव प्रभावतः सुतोत्पत्तिर्भविष्यति ततो भगवतो सर्वनगरजनाधिष्ठितं महामहं करिष्याम इति। सुतस्य च भगवत एव नाम उत्क्षेप्स्याम इति।

ततस्तयोर्मध्यमे वयसि वर्तमानयोः स ब्रह्मलोककल्पवासी देवो यथाऽऽयुष्कमनुपाल्य ततश्च्युतः श्रीदेव्या गर्भे उत्पन्न इति। दृष्टश्च तया स्वप्ने तस्यामेव रजन्यां प्रभातसमये उत्तुङ्गधवलकायोऽत्यन्तलीलागामी अनवरतप्रवृत्तदानो गण्डतलापतितषट्पदावलि

---

१ ०सीलसिरिया सिरि० ग, ०सीला सिरियादेवी क। २ ०भिहाणस्स न० क।

लारडियछप्पयारली चउद्दसणभासुरो आरत्तताल्लु लुलन्तलीलाकरो कणयसङ्कलाबद्धघण्टाजुयलो रत्तचमरभूसियाणणो अङ्कुसोच्छइयकुम्भभाओ घुम्मन्तचारुलोयणसिरी सव्वङ्गसुन्दराहिरामो मत्तहत्थी वंयणेणमुयरं पविसमाणो त्ति। पासिऊण य सुहविबुद्धा एसा। सिट्ठो य तीए जहाविहिं दइयस्स। हरिसवसुब्भिन्नपुलएणं भणिया य तेणं। सुन्दरि! सयलसयणगणनायगो ते पुत्तो भविस्सइ। तओ मा एवं ति भत्तारवयणमहिणन्दिऊण पहट्ठमुहपङ्कया जाया। तओ विसेसओ तिवग्गसंपायणरयाए संपूरियसयलमणोरहाए अभज्जमाणपसरं पुण्णफलमणुहवन्तीए पत्तो पसूइसमओ। तओ पसत्थे तिहिकरणमुहुत्तजोए सुहंसुहेण पसूया एसा। जाओ से दारओ। निवेइओ परिओसयारिणीए गेहदासीए वेसमणस्स। परितुट्ठो सेट्ठी। दिन्नं तीए पारिओसियं। दवावियं च तेण महादाणं, कारावियं वद्धावणयं। तओ अइक्कन्ते मासे महाविभूईए सयलनयरजणपरिगओ घेत्तूण दारयं गओ धणदेवजक्खालयं सेट्ठी। संपाइया तस्स महिमा, पाडिओ चलणेसु दारओ। कयं से नामं धणं त्ति। तओ कालक्कमेण पत्तो कुमारभावं॥

चतुर्दशनभासुर आरक्ततालुर्लीलाचुलत्करः कनकशृङ्खलाबद्धघण्टायुगलो रक्तचामरभूषिताननः अङ्कुशावच्छादितकुम्भभागः घूर्णच्चारुलोचनश्रीः सर्वाङ्गसुन्दराभिरामो मत्तहस्ती वदनेनोदरं प्रविशन्निति। दृष्ट्वा च सुखविबुद्धा एषा। शिष्टश्च तया यथाविधि दयिताय। हर्षवशोद्भिन्नपुलकेन भणिता च तेन। सुन्दरि! सकलस्वजनगणनायकस्तव पुत्रो भविष्यति। ततः सा एवमिति भर्तृवचनमभिनन्द्य प्रहृष्टमुखपङ्कजा जाता। ततो विशेषतस्त्रिवर्गसम्पादनरतायाः संपूरितसकलमनोरथाया अभज्यमानप्रसरं पुण्यफलमनुभवन्त्याः प्राप्तः प्रसूतिसमयः। ततः प्रशस्ते तिथि-करण-मुहूर्त-योगे सुखेन प्रसूता एषा। जातस्तस्या दारकः। निवेदितः परितोषकारिण्या गेहदास्या वैश्रमणाय। परितुष्टः श्रेष्ठी। दत्तस्तस्यै पारितोषिकम्। दापितं तेन महादानम्, कारितं च वर्धापनकम्। ततोऽतिक्रान्ते मासे

१ °लारयद° क। २ जहाविहं ख। ३ अभग्गमाण° ग। ४ दिन्नं च ख। ५ धणदेवालयं क।

एत्थन्तरम्मि सो जालिणीजीवनारओ तओ नरयाओ उव्वट्टिऊण पुणो संसारमाहिण्डिय अणन्तरभवे तहाऽकामनिज्जराए मरिऊण तम्मि चेव नयरे पुण्णभद्दस्स सत्थवाहस्स गोमईए भारियाए कुच्छिसि धूयत्ताए उववन्नो। जाया उचियसमएणं। कय से नामं धणसिरि त्ति। पत्ता जोव्वणं। दिट्ठा य तेणं अट्ठमीचन्दमहूसवे मयणलीलाहरुज्जाणाओ रइरूवधारिणी सहियणसमेया सभवणमुवगच्छन्ती धणसिरि त्ति। तओ पुव्वभवब्भत्थमेत्तीगुणाओ साहिलासं पलोइया घणेणं। तीए वि य तहब्भत्थमच्छराओ सुइरमवलोइओ धणो त्ति। लक्खिओ से भावो पासवत्तिणा सोमदेवाभिहाणेणं पुरोहियसुएणं। सवणपरंपराए समागओ सवणगोयरं एस वुत्तन्तो वेसमणस्स। तओ वरिया तेणं धणनिमित्तं धणसिरी। दिन्ना सबहुमाणं पुण्णभद्देण। मुणिओ एस वुत्तन्तो परोप्परमिमेहि। परितुट्ठो

महाविभूत्या सकलनगरजनपरिवृतो गृहीत्वा दारकं गतो धनदेवालयं श्रेष्ठी। संपादितस्तस्य महिमा, पातितश्चरणयोर्दारकः। कृतं तस्य नाम 'धन' इति। ततः कालक्रमेण प्राप्तो कुमारभावम्।

अथान्तरे स जालिनीजीवनारकस्ततो नरकादुद्धृत्य पुनः संसारमाहिण्ड्य अनन्तरे भवे तथाऽकामनिर्जरया मृत्वा तस्मिन्नेव नगरे पूर्णभद्रस्य सार्थवाहस्य गोमत्या भार्यायाः कुक्षौ दुहितृत्वेनोत्पन्नः। जाता उचितसमयेन। कृतं तस्या नाम धनश्रीरिति। प्राप्ता यौवनम्। दृष्टा च तेन अष्टमीचन्द्रमहोत्सवे मदनलीलागृहोद्यानाद् रतिरूपधारिणी सखीजनसमेता स्वभवनमुपगच्छन्ती धनश्रीरिति। ततः पूर्वभवाभ्यस्तमैत्रीगुणात् साभिलाषं प्रलोकिता धनेन। तयाऽपि च तथाऽभ्यस्तमत्सरात् सुचिरमवलोकितो धन इति। लक्षितस्तस्य भावः पार्श्ववर्तिना सोमदेवाभिधानेन पुरोहितसुतेन। श्रवणपरम्परया समागतः श्रवणगोचरमेष वृत्तान्तो वैश्रमणस्य। ततो वृता तेन

१ पुलइया क

धणो नियहियएणं, दूमिया धणसिरी। कयाइं वेसमणपुण्णभद्देहिं महावद्धावणयाइं। वत्तो महाविभूईए सयलनयरच्छेरयभूओ विवाहो॥

तओ अइक्कन्तो कोइ कालो। घडिया एसा तस्स चेव घरपसूएणं नन्दयाभिहाणेणं चेडेणं। सो य किल अग्गिसम्मस्स तावस-परियाए वट्टमाणस्स अज्जवकोडिण्णपरियारओ संगमओ नाम परममित्तो आसि त्ति। तओ तीए सद्धिं विसेसओ विडम्बणापायं विसय-सुहमणुहवन्तस्स अइक्कन्तो कोइ कालो धणस्स। पत्तो य से कालक्कमेणं नवजलभरियसरोवरविरायन्तकमलायरो कमलायरपसत्तउम्मत्त-महुरगुञ्जन्तभमिरभमरउलो भमरउलुच्छाहियसुरयखिन्नसहरिसकलालाविहंसउलमुहलो मुहलगोयालजुवइपारद्धसरसगेयरवोच्छइयच्छेत्त-मग्गो सरयसमओ त्ति। अवि य-

निब्भरकुसुमभरोणयरसाउमुहलेहि असणवाणेहिं। कासकुडएहि य दढं जत्थ हसन्ति व्व रण्णाइं॥

धननिमित्तं धनश्रीः। दत्ता सबहुमानं पूर्णभद्रेण। ज्ञात एष वृत्तान्तः परस्परमाभ्याम्। परितुष्टः धनो निजहृदयेन, दूना धनश्रीः। कृतानि वैश्रमणपूर्णभद्राभ्यां महावर्धापनकानि। वृत्तो महाविभूत्या सकलनगराश्चर्यभूतो विवाहः।

ततोऽतिक्रान्तः कोऽपि कालः। घटितैषा तस्यैव गृहप्रसूतेन नन्दकाभिधानेन चेटेन। स च किल अग्निशर्मणः तापसपर्याये वर्तमानस्य आर्जवकौडिन्यपरिवारकः संगमको नाम परममित्रमासीदिति। ततस्तया सार्धं विशेषतो विडम्बनाप्रायं विषयसुखमनुभवतोऽतिक्रान्तः कोऽपि कालः धनस्य। प्राप्तश्च तस्य कालक्रमेण नवजलभृतसरोवरविराजत्कमलाकरः कमलाकरप्रसक्तोन्मत्तमधुरगुञ्जद्भ्रमितृभ्रमरकुलो भ्रमरकुलोत्साहितसुरतखिन्नसहर्षकलालापिहंसकुलमुखरो मुखरगोपालयुवतिप्रारब्धसरसगेयरवोच्छादितक्षेत्रमार्गः शरत्समय इति। अपि च—

निर्भरकुसुमभरावनतरसायु(भ्रमर)मुखरैरशनबाणैः। काशकुटजैश्च दृढं यत्र हसन्तीव अरण्यानि॥

निस्सेसं लवणोयहिसलिलं मोत्तूण जत्थ सोहन्ति। धवला घणा पुणो पीयमरसदुद्धोयहिजल व्व ॥

दीसन्ति जत्थ मत्तच्छयाण मयवारणेहि भग्गाइं। गन्धायड्ढियगण्डालिजालरुसिएहि व वणाइं ॥

चिरसंचियं च विउणं मुक्को घणबन्धणस्स व मियङ्को। सरउम्मत्तो व्व जहिं जणस्स जोण्हं पविक्खिवइ ॥

एवं गुणाहिरामे सरयसमए दिट्ठो धणेण तन्नयरवत्थव्वओ चेव समिद्धिदत्तो नाम सत्थवाहपुत्तो त्ति। देसन्तराओ बहुयं दविणजायं विढविऊण महाकित्तिगीए दीणाणाहाणमणिवारियं महादाणं देन्तो त्ति। तओ तं दट्ठूण चिन्तियं धणेण। धन्नो खु एसो, जो एवं नियभुयज्जिएणं दविणजाएणं परोवयारं करेइ। जाओ विमणो। भणिओ य पासपरिवत्तिणा नन्दएणं। सत्थवाहपुत्त, किमुव्विग्गो विय तुमं जाओ त्ति। साहिओ य तेणं निययाहिप्पाओ। नन्दएणं भणियं–सत्थवाहपुत्त, थेवमियं; अत्थि भवओ वि महापुण्णोवज्जियं दविणजायं। ता देउ इमाओ वि विसेसयरं भवं पि। धणेण भणियं–किमणेण पुव्वपुरिसज्जिएणं। भणियं च–

निःशेषं लवणोदधिसलिलं मुक्त्वा यत्र शोभन्ते। धवला घनाः पुनः पीतसरसदुग्धोदधिजला इव ॥

दृश्यन्ते यत्र सप्तच्छदानां मत्तवारणैर्भग्नानि। गन्धाकर्षितगण्डालिजालरुष्टैरिव वनानि ॥

चिरसंचितां च विगुणां मुक्तो घनबन्धनादिव मृगाङ्कः। शरदुन्मत्त इव यत्र जनस्य ज्योत्स्नां प्रविक्षिपति ॥

एवं गुणाभिरामे शरत्समये दृष्टो धनेन तन्नगरवास्तव्य एव समृद्धिदत्तो नाम सार्थवाहपुत्र इति। देशान्तराद् बहुकं द्रविणजातं अर्जयित्वा महाकीर्तिकया दीनानाथेभ्योऽनिवारितं महादानं ददद् इति। ततस्तं दृष्ट्वा चिन्तितं धनेन–धन्यः खल्वेषः, य एवं निजभुजार्जितेन द्रविणजातेन परोपकारं करोति। जातो विमनस्कः। भणितश्च पार्श्वपरिवर्तिना नन्दकेन। सार्थवाहपुत्र! किमुद्विग्न इव त्वं जात इति। कथितश्च तेन निजाभिप्रायः। नन्दकेन भणितम्–सार्थवाहपुत्र! स्तोकमिदम्, अस्ति भवतोऽपि महापुण्योपार्जितं द्रविणजातम्,

लोए सलाहणिज्जो सो उ नरो दीणपणइवग्गस्स । जो देइ नियभुयज्जियमपत्थिओ दव्वसंघायं ॥

न य मे किंचि नियभुयज्जियं अत्थि । ता विन्नवेहि तायं । करेमि अहं पुव्वपुरिससेवियं वाणिज्जं, गच्छामि दिसायत्ताए । कालोचियमकुव्वमाणो पुरिसो जीवियं विहलीकरेइ । कालो य मे तिवग्गसाहणमूलं अत्थमुवज्जिउं । ता करेहि मे पसायं समीहियसंपायणेणं ति । विन्नत्तो तेणं सेट्ठी । भणियं च णेण । नन्दय, एवं भणाहि मे जायं । जहा-वच्छ, अत्थि चेव तुह सयलनयरसेट्ठिहिंतो वि अब्भहियं तिवग्गसाहणमूलं अत्थजायं । ता करेहि इमिणा चेव जहासमीहियं ति । नन्दएण भणियं-ताय, अत्थि एयं; तहवि पुण न एयस्स अन्नहा धिई हवइ । सेट्ठिणा भणियं-जहा एयस्स धिई हवइ तहा करेउ त्ति । निवेइयमिणं नन्दएण धणस्स । परितुट्ठो खु एसो । कया संजत्ती । पयट्टियं नाणापयारं भण्डजायं । काराविंयमाघोसणं । जहा-धणो सत्थवाहपुत्तो इमाओ नयराओ

ततो ददातु अस्मादपि विशेषिततरं भवानपि । धनेन भणितम्-किमनेन पूर्वपुरुषोपार्जितेन ? भणितं च—

लोके श्लाघनीयः स तु नरो दीनप्रणयिवर्गाय । यो ददाति निजभुजार्जितमप्रार्थितो द्रव्यसंघातम् ॥

न च मम किञ्चिद् निजभुजार्जितमस्ति, ततो विज्ञपय तातम्, करोमि अहं पूर्वपुरुषसेवितं वाणिज्यम्, गच्छामि दिग्यात्रया । कालोचितमकुर्वन् पुरुषो जीवितं विफलीकरोति । कालश्च मे त्रिवर्गसाधनमूलमर्थमुपार्जितुम् । ततः कुरु मे प्रसादं समीहितसंपादनेनेति । विज्ञप्तस्तेन श्रेष्ठी । भणितं च तेन । नन्दक ! एवं भण मे जातम्, यथा वत्स ! अस्त्येव तव सकलनगरश्रेष्ठिभ्योऽपि अभ्यधिकं त्रिवर्गसाधनमूलमर्थजातम्, ततः कुरु अनेनैव यथासमीहितमिति । नन्दकेन भणितम्-तात ! अस्त्येतद्, तथाऽपि पुनर्नैतस्यान्यथा धृतिर्भवति । श्रेष्ठिना भणितम्-यथैतस्य धृतिर्भवति तथा करोतु इति । निवेदितमिदं नन्दकेन धनस्य । परितुष्टः खल्वेषः । कृता संयात्रा (यात्रायै समुद्योगः) । प्रवर्तितं च नानाप्रकारं भाण्डजातम् । कारितमाघोषणम् । यथा-धनः सार्थवाहपुत्रोऽस्मान्नगरात् ताम्रलिप्तीं

तामलित्तिं गच्छिस्सइ। ता तेण समं जो कोइ तन्नयरगामी, सो पयट्टउ। जस्स जं न संपज्जइ पाहेयमुवगरणं वा, तस्स तं एस संपाडेइ त्ति। पयट्टो जणो॥

एत्थन्तरंमि चिन्तियं धणसिरीए। सोहणं मे भविस्सइ एयस्स पवसणेणं। आयण्णियं च पच्चासन्ने गमणदियहे, जहा नन्दओ वि इमिणा सह गमिस्सइ त्ति। तओ मायासत्तिए भणिओ सत्थवाहपुत्तो। अज्जउत्त, पत्थिओ तुमं; मए उण किं कायव्वं ति। तेण भणियं—सुन्दरि, गुरूणं सुस्सूसा। तओ नियडिपहाणओ वाहजलभरियलोयणाए सदुक्खमिव भणियं धणसिरीए—अज्जउत्त, हिययसन्निहिया गुरू। जइ पुण तुमं मं उज्झिऊण गच्छहिसि, ता सिट्ठं तुह इमं, अवस्समहमप्पाणयं वावाइस्सं' ति अव्वत्तसद्दं रोविउं पवत्ता। एत्थन्तरंमि समागया धणस्स जणणी। अब्भुट्ठिया तेण। निग्गया य धणसिरी। लक्खिओ से भावो इमीए। अणुसासिओ य तीए बहुविहं सुओ। जहा—जाय, दीहाणि खु देसन्तराणि, सुलहो विओगो, दुल्लहो पुणो वि संगमो, किलेसायासपउरं च

गमिष्यति, ततस्तेन समं यः कोऽपि तन्नगरगामी स प्रवर्तताम्, यस्य यन्न संपद्यते पाथेयमुपकरणं वा तस्य तदेप संपादयतीति। प्रवृत्तो जनः।

अत्रान्तरे चिन्तितं धनश्रिया—शोभनं मे भविष्यति एतस्य प्रवसनेन, आकर्णितं च प्रत्यासन्ने गमनदिवसे, यथा नन्दकोऽपि अनेन सह गमिष्यतीति। ततो मायावृत्त्या भणितः सार्थवाहपुत्रः। आर्यपुत्र! प्रस्थितस्त्वम्, मया पुनः किं कर्तव्यमिति। तेन भणितम्—सुन्दरि! गुरूणां शुश्रूषा। ततो निकृतिप्रधानतो बाष्पजलभृतलोचनया सदुःखमिव भणितं धनश्रिया—आर्यपुत्र! हृदयसन्निहिता गुरवः, यदि पुनस्त्वं मामुज्झित्वा गमिष्यसि ततः शिष्टस्तवेदम्, अवश्यमहमात्मानं व्यापादयिष्यामीति अव्यक्तशब्दं रोदितुं प्रवृत्ता। अत्रान्तरे समागता धनस्य जननी। अभ्युत्थिता तेन। निर्गता च धनश्रीः। लक्षितस्तस्या भावोऽनया। अनुशासितस्तया बहुविधं सुतः। यथा—

अत्थोरज्जणं, अविसाओ य मूलं इमस्स। ता जइ वि तुमं सयलगुणसंजुओ, तहा वि विसेसओ खमाइगुणेसु जत्तो कायव्वो। अणवरयं च मे पउत्ती दायव्व त्ति। धणेण भणियं—अम्ब, जं तुमं आणवेसि। तओ गया से जणणी। विमज्जाविया य तीए वहू [[1]पेईहराओ, अणुजाणह तुब्भे धणेण सह धणसिरिं गच्छमाणिं ति। गता सहरिसं। अणुण्णाया तेहिं]

पयट्टो सत्थो, अणवरयपयाणएहिं च पत्तो दुमासमेत्तेण कालेण तामलित्तिं। दिट्ठो नरवई। बहुमन्निओ तेणं। निओइयं भण्डं। न समासाइओ जहिच्छियलाहो। तओ चिन्तियमणेणं। कहमहं असंपाडियमणोरहो गेहं गच्छामि? ता पच्चासन्न एव भयवं रयणायरो, एयमवगाहामि त्ति। न य संसयमणारूढो पुरिसो एगन्तावायभीरू सयलजणाणन्दयारिणिं संपयं पावेइ। किं वा तीए रहियस्स पुरिसस्सामेत्तफलगाहएणं जीविएणं। ता अणुचिट्ठामि समुद्दतरणं। संपहारिऊण नन्दएण धणसिरीए य सह ठाविओ सिद्धन्तो।

जात! दूराणि खलु देशान्तराणि, सुलभो वियोगः, दुर्लभः पुनरपि संगमः, क्लेशायासप्रचुरं चार्थोपार्जनम्, अविषादश्च मूलमस्य। ततो यद्यपि त्वं सकलगुणसंयुतस्तथाऽपि विशेषतो क्षमादिगुणेषु यत्नः कर्तव्यः, अनवरतं च मे प्रवृत्तिर्दातव्या इति। धनेन भणितम्—अम्ब! यत् त्वमाज्ञापयसि। ततो गता तस्य जननी। विसर्जिता च तया वधूः। [पितृगृहं, अनुजानीत यूयं धनेन सह गच्छन्तीं धनश्रियमिति। गता सहर्षम्, अनुज्ञाता तैः]

प्रवृत्तः सार्थः, अनवरतप्रयाणकैश्च प्राप्तो द्विमासमात्रेण कालेन तामलिप्तीम्। दृष्टो नरपतिः। बहुमतस्तेन। नियोजितं (विक्रीतं) भाण्डम्। न समासादितो यथेष्टलाभः। ततश्चिन्तितमनेन—'कथमहमसंपादितमनोरथो गेहं गच्छामि?। ततः प्रत्यासन्न एव भगवान् रत्नाकरः, एतमवगाहे इति। न च संशयमनारूढः पुरुष एकान्तापायभीरुः सकलजनानन्दकारिणीं संपदं प्राप्नोति। किं वा तया

[1] अयं कोष्ठान्तर्गतः पाठ ग्रन्थान्तरे वर्तते

एत्थन्तरंमि य उवट्ठियाए मज्जणवेलाए दुहत्थमेत्तजरचीरनिवसणो उद्दामनहरविलिहियङ्गो सेडियाघसणधवलपाणी तम्बोलरायरञ्जियाहरो परिमिलाणकुसुममुण्डमाली जूययरवन्द्रपेल्लिओ भयकायरं मग्गओ पलोएमाणो आगओ जूययरो त्ति। भणियं च णेण-अज्ज, सरणागओ म्हि, ता रक्खउ अज्जो एएसिं अणज्जजूययराणं। धणेणं भणियं-भद्द, वीसत्थो होहि; अह किंनिमित्तं पुण एए भद्दं अहिहवन्ति। तेण भणियं। अज्ज, भागधेयाणि मे पुच्छ, न सक्कुणोमि आचिक्खिउं। तओ धणेण 'अहो से भावगरुओ आलाओ' त्ति चिन्तिऊण भणियं-भद्द, अलं विसाएण; कस्स वि समदसाविभाओ न होइ; ता कहेउ भद्दो एत्थ कारणं। तओ पच्चागयसंवेगेण बाहरुद्धनयणेणं सगग्गयक्खरं साहियं तेणं। अज्ज, वाणिययकुलफंसणो उभयलोयविरुद्धसेवी विबुहजणनिन्दिओ विसपायवो व्व अवयारनिमित्तं चेव पाणिणं समुप्पन्नो म्हि कुसुमउरनिवासी महेसरदत्तो नाम अहयं ति। सपुण्णजणवज्जिएणं सयल-

---

रहितस्य पुरुषसंख्यामात्रफलसाधकेन जीवितेन ?। ततोऽनुतिष्ठामि समुद्रतरणम्। संप्रधार्य (आलोच्य) नन्दकेन धनश्रिया च सह स्थापितः सिद्धान्तः।

अत्रान्तरे च उपस्थितायां मज्जनवेलायां द्विहस्तमात्रजीर्णचीवरनिवसन उद्दामनखरविलिखिताङ्गः सेटिकाघर्षणधवलपाणिः ताम्बूलरागरक्ताधरः परिम्लानकुसुममुण्डमाली द्यूतकारवृन्दप्रेरितो भयकातरं मार्गतः (पृष्ठतः) प्रलोकमान आगतो द्यूतकार इति। भणितं च तेन-आर्य! शरणागतोऽस्मि, ततो रक्षतु आर्य एतेभ्योऽनार्यद्यूतकारेभ्यः। धनेन भणितम्-भद्र! विश्वस्तो भव, अथ किं निमित्तं पुनरेते भद्रमभिभवन्ति ?। तेन भणितम्-आर्य! भागधेयानि मे पृच्छ, न शक्नोमि आख्यातुम्। ततो धनेन 'अहो! तस्य भावगुरुक आलापः' इति चिन्तयित्वा भणितम्-भद्र! अलं विषादेन ? कस्यापि समदशाविभावो न भवति। ततः कथयतु भद्रोऽत्र कारणम्। ततः प्रत्यागतसंवेगेन बाष्परुद्धनयनेन सगद्गदाक्षरं कथितं तेन। आर्य! वाणिजककुलपांसन उभयलोकविरुद्धसेवी विबुधजननिन्दितो

दोसनिहाणभूएणं जूएणं ईइसं अवत्थं पत्तो म्हि । तओ धणेण चिन्तियं–अहो से विवेगो, एयावत्थागयं पि अप्पाणयं जाणइ अकज्जायरणं च परिवेएइ; ता गरुओ खु कोइ एसो त्ति चिन्तिऊण भणियं । भद्द, ता किं ते करीयउ ? । तओ तेण अणुचियविब्भमं मिलायन्तलोयणं सुसमन्तवयणं खलन्तक्खरं दरं जंपिउं न जंपियं चेव । तओ धणेण 'हारियं किंपि भविस्सइ, तं न चएइ पत्थिउं' ति अत्थओ ऽवगच्छिऊण भणिओ नन्दओ । भद्द नन्दय, पुच्छाहि एए बाहिं परिब्भमन्ते जूययरे, जहा 'भद्दाणं किमवरद्धमिमिणा भद्देणं' ति । निग्गओ नन्दओ । पुच्छिया तेण जूययरा । सिट्ठं चिमेहिं । एसो खु वायामयगन्थेणं सोलस सुवण्णे हारिऊण अन्न-सहिएण निरुद्धो वि छिद्दं लहिऊण छोहयावडाण अम्हाण अदाऊण सुवण्णयं पलाइऊण इह पविट्ठो त्ति । तओ साहियमिणं नन्दएणं धणस्स । भणिओ य तेण–देहि एयाण सोलस सुवण्णे । दिन्ना नन्दएण । गया जूययरा । भणिओ य सो धणेण–भद्द, उट्ठेहि,

विपपादप इव अपकारनिमित्तमेव प्राणिनां समुत्पन्नोऽस्मि कुसुमपुरनिवासी महेश्वरदत्तो नाम अहमिति । सपुण्यजनवर्जितेन सकल-दोषनिधानभूतेन द्यूतेन ईदृशीमवस्थां प्राप्तोऽस्मि । ततो धनेन चिन्तितम्–अहो तस्य विवेकः, एतदवस्थागतमपि आत्मानं जानाति, अकार्याचरणं च परिवेदयति, ततो गुरुकः खलु कोऽप्येष इति चिन्तयित्वा भणितम् । भद्र ! ततः किं ते क्रियताम् ? । ततस्तेन अनुचितविभ्रमं मिलल्लोचनं शुष्यद्वदनं स्खलदक्षरं ईषद् जल्पित्वा न जल्पितमेव । ततो धनेन 'हारितं किमपि भविष्यति तद् न शक्नोति प्रार्थितुम्' इति अर्थतोऽवगत्य भणितो नन्दकः । भद्र नन्दक ! पृच्छ एतान् बहिः परिभ्रमतो द्यूतकारान्, यथा 'भद्राणां किमपराद्धमेतेन भद्रेण' इति । निर्गतो नन्दकः । पृष्टास्तेन द्यूतकाराः । शिष्टं च एभिः । एषः खलु वाचामयग्रन्थेन षोडश सुवर्णानि हारयित्वा अद्य सखिकेन (?) निरुद्धोऽपि छिद्रं लब्ध्वा क्षोभव्यापृतेभ्योऽस्मभ्यमदत्त्वा सुवर्णकं पलाय्य इह प्रविष्ट इति । ततः

१ हारविऊण ख

मुञ्च विसायं। कज्जपहाणा खु पुरिसा हवन्ति, विसायबहुलो य इत्थियाजणो। ता मज्जेउ भद्दो। तओ विलिओ विय उट्ठिओ महेसरदत्तो, मज्जिओ सह धणेणं। दिन्नं से खोमजुयलं, परिहियं च तेणं। भुत्तुत्तरकालम्मि य भणिओ धणेणं–भद्द, एगजाइओ सज्जणभावओ य साहारणं ते इमं दाविणजायं। ता इओ किंपि गिण्हिऊण सयं चेव निओयमणुचिट्ठउ भद्दो। किं इमिणा भद्दस्स वि अणभिमएणं विबुहजणनिन्दिएणं उभयलोयअईवकुच्छिएणं अहमजणतुट्ठिजणएण जूययारचेट्ठिएणं ति। महेसरदत्तेण चिन्तियं–अहो मे अहन्नया, तायरुद्ददेवकुलसरिसं इमस्स चेट्ठियं, मम उण इमं ईइसं ति। अवि य–

न वि तह परोवयारं अकरेन्तो लाघवं नरो लहइ। जह किज्जन्तुवयारो परेण करुणापवन्नेणं॥

ता किं इमिणा, अवलम्बेमि पोरिसं, करेमि संपयं पि सकुलसरिसं ति। चिन्तिऊण भणियं महेसरदत्तेणं–अज्ज, धन्नो खु

कथितमिदं नन्दकेन धनाय। भणितश्च तेन। देहि एतेभ्य षोडश सुवर्णानि। दत्तानि नन्दकेन। गता द्यूतकाराः। भणितश्च स धनेन–भद्र! उत्तिष्ठ, मुञ्च विषादम्, कार्यप्रधानाः खलु पुरुषा भवन्ति, विषादबहुलश्च स्त्रीजनः, ततो मज्जतु भद्र इति। ततो व्यलीक इव उत्थितो महेश्वरदत्त, मज्जितो सह धनेन। दत्तं तस्मै क्षौमयुगलम्, परिहितं च तेन। भुक्तोत्तरकाले च भणितो धनेन–भद्र! एकजातिकः सज्जनभावतश्च साधारणं ते इदं द्रव्यम्, तत इतः किमपि गृहीत्वा स्वयमेव नियोगमनुतिष्ठतु भद्रः। किमनेन भद्रस्याप्यनभिमतेन विबुधजननिन्दितेन उभयलोकातिकुत्सितेन अधमजनतुष्टिजनकेन द्यूतकारचेष्टितेनेति। महेश्वरदत्तेन चिन्तितम्–अहो! मेऽधन्यता, तातरुद्रदेवकुलसदृशमस्य चेष्टितम्, मम पुनरिदमीदृशमिति। अपि च–

नापि तथा परोपकारमकुर्वन् लाघवं नरो लभते। यथा क्रियमाणोपकारः परेण करुणाप्रपन्नेन॥

ततः किमनेन? अवलम्बे पौरुषम्, करोमि साम्प्रतमपि स्वकुलसदृशमिति चिन्तयित्वा भणितं महेश्वरदत्तेन–आर्य! धन्यः खल्वहम्,

अहं, जस्स मे तुमए सह दंसणं समुप्पन्नं। अओ परिचत्तं चेव मए संपयं बहुजणाणहिमयं चेट्ठियं, पडिवन्नो अहं पुरिसगुणेहिं, विमुक्को अलच्छीए। ता किं बहुणा जंपिएणं। अवस्समहं अज्जप्पभावेणेव अज्जस्स उवएसपरिस्समं सफलं करेऊण अज्जं पेक्खामि त्ति भणिऊण निग्गओ गेहाओ नयरीओ य। तओ य 'किं करेमि, किं लङ्घेमि दविणजायनिमित्तं भगवन्तं जलनिहिं। अत्थरहिओ खु पुरिसो अपुरिसो चेव। दरिद्दस्स हि न वित्थिरइ जसो, न वियम्भए कित्ती, न सज्जणेण संगमो न परोवयारसंपायणं ति। अहवा अयण्डमणोरहभङ्गुरेसु विजियसुरासुरेसु य सहरसुद्दामभमिरेसु कालदण्डेसु किमणेणालोइएणं। दुल्लहं माणुसजम्मणं, ता अङ्गीकरोमि भयवन्तं उभयलोयसुहावहं धम्मं। एवं च कए समाणे इमस्स वि सत्थवाहपुत्तस्स परमत्थओ उवगयं चेव हवइ' त्ति चिन्तिऊण पवन्नो पिउवयंसयस्स जोगीसराभिहाणस्स कावालियस्स समीवे पव्वज्जं ति ॥

इओ य निवेइओ निययाहिप्पाओ धणेणं नन्दयधणसिरीणं। भणिओ य तेहिं—के अम्हे भवओ समीहियन्तरायकरणस्स?। जं

यस्य मे त्वया सह दर्शनं समुत्पन्नम्, अतः परित्यक्तमेव मया साम्प्रतं बुधजनानभिमतं चेष्टितम्, प्रतिपन्नोऽहं पुरुषगुणैः, विमुक्तोऽलक्ष्म्या। ततः किं बहुना जल्पितेन? अवश्यमहमार्यप्रभावेणैव आर्यस्य उपदेशपरिश्रमं सफलं कृत्वा आर्यं प्रेक्षे (प्रेक्षिष्ये) इति भणित्वा निर्गतो गेहाद् नगरीतश्च। ततश्च किं करोमि? 'किं लङ्घे द्रव्यजातनिमित्तं भगवन्तं जलनिधिम्, अर्थरहितः खलु पुरुषोऽपुरुष एव, दरिद्रस्य हि न विस्तीर्यते यशः, न विजृम्भते कीर्तिः, न सज्जनेन संगमो न परोपकारसंपादनमिति। अथवा अकाण्डमनोरथभङ्गुरेषु विजितसुरासुरेषु च सहर्षमुद्दामभ्रमितृषु कालदण्डेषु किमनेनालोचितेन? दुर्लभं मानुषजन्म, ततः अङ्गीकरोमि भगवन्तमुभयलोकसुखावहं धर्मम्। एवं च कृते सति अस्यापि सार्थवाहपुत्रस्य परमार्थत उपकृतमेव भवति' इति चिन्तयित्वा प्रपन्नः पितृवयस्यस्य योगीश्वराभिधानस्य कापालिकस्य समीपे प्रव्रज्यामिति

वो रोयइ, तमेव अणुचिट्ठउ अज्जो त्ति । तओ गहियं धणेण परतीरगामियं भण्डं, गवेसावियं पवहणं ॥

एत्थन्तरंमि भणिओ धणसिरीए नन्दओ । जहा-वावाएमो एयं, गच्छामो अन्नत्थ, किं णे समुद्दतरणेणं । नन्दएण भणियं— हा न जुत्तमेयं, सामी खु एसो सम्भाविओ य । ता न तुमए एयं सुविणे वि चिन्तियव्वं ति । तओ चिन्तियं धणसिरीए । न एस एयं ववसइ; ता अहं चेव केणइ उवाएण एयं करिस्सामि त्ति । कओ तीए नागदत्तापरिव्वाइयाओ निमामिऊण आयङ्कारओ कालन्तरनिवाई कम्मणजोगो त्ति ॥

एत्थन्तरंमि संजत्तियं पवहणं, निमियं गरुयभण्डं । तओ पसत्थदियहंमि निग्गओ धणो, गओ वेलाउलं । दिन्नं दीणाणाहाण दविणजायं । संपूइओ जलनिही । अग्घियं जाणवत्तं । आरूढो खु एसो सह परियणेण । उक्खित्ता नङ्गरा, आऊरिओ सङ्खकुन्द-

---

इतश्च निवेदितो निजाभिप्रायो धनेन नन्दकधनश्रीभ्याम् । भणितश्च ताभ्याम्-'के वयं भवतः समीहितान्तरायकरणस्य ? यदुभयं रोचते तदेव अनुतिष्ठतु आर्य इति । ततो गृहीतं धनेन परतीरगामिकं भाण्डम् , गवेषितं प्रवहणमिति ।

अत्रान्तरे भणितो धनश्रिया नन्दकः, यथा व्यापादयाव एतम्, गच्छावोऽन्यत्र, किमावयोः समुद्रतरणेन ? । नन्दकेन भणितम्- हा ! न युक्तमेतद् , स्वामी खल्वेषः सद्भावितश्च, ततो न त्वया एतत्स्वप्नेऽपि चिन्तयितव्यमिति । ततश्चिन्तितं धनश्रिया-न एष एतद् व्यवस्यति, ततोऽहमेव केनचिदुपायेन एतत्करिष्यामीति । कृतस्तया नागदत्तापरिव्राजिकातो निशम्य आतङ्कारकः कालान्तरनिपाती कार्मणयोग इति ।

✓ अत्रान्तरे संयात्रितं प्रवहणम्, स्थापितं गुरुकभाण्डम् । ततः प्रशस्ते दिने निर्गतो धनः, गतो वेलाकुलम् । दत्तं दीनानाथेभ्यो द्रविणजातम् । संपूजितो जलनिधिः, अर्घितं यानपात्रम् । आरूढः खल्वेषः सह परिजनेन । उत्क्षिप्ता नाङ्गराः, आपूरितः शङ्खकुन्दधवलः

घरलो तियनडो ॥

तो लङ्घिउं पवत्तं कच्छहकरिमयरनियरतिमिकलियं । सङ्घउलाउलदेसं पायालतलं व गम्भीरं ॥

जलगयजलहरपडिमापडिवारणदंसणेण अच्चत्थं । दप्पुद्धुरकरिमयरुच्छलन्तसंखोहियतरङ्गं ॥

वेलाउललयलीहरनिसण्णगन्धव्वमिहुणरमणिज्जं । हीरिन्दनीलमरगयमऊहपरिरञ्जियजलोहं ॥

मलयाचलदरिमन्दिरनिसण्णसिद्धवहुपुलइयसुवेलं । कप्पूरसण्डमण्डियमहिन्दकरिदलियवियडतडं ॥

पवणधुयजललवाहयसइसरसरसन्ततीरतालवणं । विद्दुमलयाहिरामं सिन्धुवइं पवणवेगेण ॥

एवं च जाव कइवयदियहे(हा) गच्छन्ति, ताव दिन्नो धणसिरीए जोओ पुव्ववण्णिओ धणस्स । गहिओ य एसो थेवदियहेहिं चेव अकयपडियारो महागाहिणा । जायं से महोयरं, परिसुक्काओ भूयाओ, उसूणं वयणं, गण्डियाओ जङ्घाओ, फुडिया करचरणा, न

सितगदः ।

ततो (यानपात्रं) लङ्घितुं प्रवृत्तं कच्छपकरिमकरनिकरतिमिकलितम् । शङ्खकुलाकुलदेशं पातालतलमिव गम्भीरम् ॥

जलगतजलधरप्रतिमप्रतिवारणदर्शनेन अत्यर्थम् । दर्पोद्धुरकरिमकरोच्छलत्संक्षोभिततरङ्गम् ॥

वेलाकुललतागृहनिषण्णगान्धर्वमिथुनरमणीयम् । हीरेन्द्रनीलमरकतमयूखप्रतिरञ्जितजलौघम् ॥

मलयाचलदरीमन्दिरनिषण्णसिद्धवधूप्रलोकितसुवेलम् । कर्पूरषण्डमण्डित-महेन्द्रकरिदलितविकटतटम् ॥

पवनधूत-जललवाहत-सदासरसरसत्तीरतालवनम् । विद्रुमलताभिरामं सिन्धुपतिं पवनवेगेन ॥

एवं यावत् कतिपयदिवसा गच्छन्ति तावद् दत्तो धनश्रिया योगः पूर्ववर्णितो धनस्य । गृहीतश्च एष स्तोकदिवसैरेव अकृतप्रतिकारो

१ वचन्ति त्त

रोयइ से भोयणं, बाहिज्जइ तिसाए, न चिट्ठइ पीयमुदयमुदरंमि। तओ विसण्णो धणो। चिन्तियं च तेण। किमेवमयण्डे चेव पावविलसियं। अहवा नत्थि अयालो पावविलसियस्स। ता किं करेमि?। उत्तम्मइ मे परियणो, विसण्णा धणसिरी, पव्वायवयणो य नन्दओ। ता किं इमम्मि चेव रयणायरे वावाएमि अप्पाणयं ति। अहवा न एवमेएसिं सुहं होइ, अवि य अहिययरं दुहं ति। न य अकयपडियारस्स इमं कापुरिसचेट्ठियं जुज्जइ। भणियं च अम्बाए 'अविसाइणा होयव्वं' ति। पच्चासन्नं च जहासमीहियं अवरकूलं। ता इमं ताव एत्थ पत्तकालं, नन्दयं चेव भण्डसामित्तणे निउञ्जामि। विचित्ताणि खु विहिणो विलसियाणि। को जाणइ, किं भविस्सइ त्ति?। एसो य ताव तायसुकयं मम य भाइणेहं बहु मन्नमाणो एयं धणसिरिं बन्धवहत्थगयं करिस्सइ त्ति। चिन्तिऊण भणिओ य तेणं नन्दओ धणसिरी य। वयंस नन्दय, कम्मपरिणइवसेण एसा मे अवत्था, पच्चासन्नं च जहिच्छियं अवरकूलं, अणेगावायपीडियं च

महाव्याधिना। जातं तस्य महोदरम्, परिशुष्कौ भुजौ, उच्छूनं वदनम्, गण्डके (गलिते?) जङ्घे, स्फुटितौ करचरणौ, न रोचते तस्य भोजनम्, बाध्यते तृषा, न तिष्ठति पीतमुदकमुदरे। ततो विषण्णो धनः। चिन्तितं च तेन–किमेवमकाण्डे एव पापविलसितम्। अथवा नास्ति अकालो पापविलसितस्य। ततः किं करोमि? उत्ताम्यति मे परिजनः, विषण्णा धनश्रीः, म्लानवदनश्च नन्दकः। ततः किमस्मिन्नेव रत्नाकरे व्यापादयाम्यात्मानमिति। अथवा न एवमेतेषां सुखं भवति, अपि च अधिकतरं दुःखमिति। न चाकृतप्रतिकारस्येदं कापुरुषचेष्टितं युज्यते। भणितं चाम्बया 'अविषादिना भवितव्यम्' इति। प्रत्यासन्नं च यथासमीहितमपरकूलम्। तत इदं तावदत्र प्राप्तकालम्, नन्दकमेव भाण्डस्वामित्वे नियुनज्मि। विचित्राणि खलु विधेर्विलसितानि। को जानाति किं भविष्यतीति?। एष च तावत् तातसुकृतं मम च भ्रातृस्नेहं बहु मन्यमान एतां धनश्रियं बान्धवहस्तगतां करिष्यतीति। चिन्तयित्वा भणितश्च तेन नन्दको धनश्रीश्च। वयस्य नन्दक! कर्मपरिणतिवशेन एषा मेऽवस्था, प्रत्यासन्नं च यथेष्टमपरकूलम्, अनेकापायपीडितं च जीवितं सर्वसत्त्वानामेव, विशे-

जीवियं सव्वसत्ताणं चेव विसेसओ वाहिपीडियसरीराणं अम्हारिसाणं ति। अहिट्ठेहि इमं रित्थं, तुमं चेव एत्थ नायगो, समुत्तिण्णस्स य मे भयवन्तं जलनिहिं पच्छन्नस्सेव जहोचियं उवक्कमं करेज्जासि। तओ जइ मे रोगावगमो भविस्सइ, तओ सुन्दरं चेव; अन्नहा उ तायसुकयं बहुमन्नमाणेण ममं च भाउयसिणेहं पावियव्वा तए बन्धवाणं एसा भत्तारवच्छला धणसिरी। सुन्दरि, तए वि य इमो मोत्तूण पावं अहं विय दट्ठव्वो, न खण्डियव्वं इमस्स वयणं॥ एत्थन्तरम्मि सदुक्खं चेव परुन्नो नन्दओ धणसिरी य कइयवेणं। धणेण भणियं—वयंस नन्दय, न एस कालो विसायस्स; ता अवलम्बेहि पोरुसं, उज्झेहि काउरिसबहुमयं किलीवत्तणं, नियमेहि नियय हियंमि कालोचियं कज्जं। सुन्दरि, तुमं पि परिच्चय इत्थीयणहिययरायहाणिसोयं, विसुमरेहि चिन्तायासकारिणं सिणेहं, अवलम्बेहि कज्जं। एत्थ खलु सो पुरिसो इत्थिया वा पसंसिज्जइ, जो कालन्नू। कालन्नू य सन्तो उच्छाहवन्तो अवस्समावयं लङ्घेइ त्ति।। तओ पडिवन्नमणेहिं धनसासणं॥ पत्ताणि महाकडाहं नाम दीवं। गओ नन्दओ घेत्तूण पाहुडं नरवइमवलोइउं। बहुमन्निओ राइणा। दिन्नमावासत्थामं। ओयारियं

यतो व्याधिपीडितशरीराणामस्मादृशामिति। ततोऽधितिष्ठ इदं रिक्थम्, त्वमेवात्र नायकः, समुत्तीर्णस्य च मे भगवन्तं जलनिधिं प्रच्छन्नस्यैव यथोचितमुपक्रमं कुर्याः। ततो यदि मे रोगापगमो भविष्यति ततः सुन्दरमेव, अन्यथा तु तातसुकृतं बहु मन्यमानेन मम च भ्रातृस्नेहं प्रापयितव्या त्वया बान्धवानामेषा भर्तृवत्सला धनश्रीः। सुन्दरि! त्वयाऽपि चायं मुक्त्वा पापं अहमिव द्रष्टव्यः, न खण्डितव्यमस्य वचनम्। अत्रान्तरे सदुःखमेव प्ररुदितो नन्दकः, धनश्रीश्च कैतवेन। धनेन भणितम्—वयस्य नन्दक! न एष कालो विषादस्य, ततोऽवलम्बस्व पौरुषम्, उज्झ कापुरुषबहुमतं क्लीवत्वम्, नियमय निजहृदये कालोचितं कार्यम्। सुन्दरि! त्वमपि परित्यज स्त्रीजनहृदयराजधानीशोकम्, विसर चिन्ताऽऽयासकारिणं स्नेहम्, अवलम्बस्व कार्यम्। अत्र खलु स पुरुषः स्त्री वा प्रशस्यते यः कालज्ञः। कालज्ञश्च सन् उत्साहवान् अवश्यमापदं लङ्घयतीति। ततः प्रतिपन्नमाभ्यां धनशासनम्। प्राप्ता महाकटाहं नाम द्वीपम्। गतो नन्दको गृहीत्वा प्राभृतं

मण्डं। उवणीया धणस्स वेज्जा। पारद्धो उवक्कमो। तज्जोगदाणओ न य से वाही अवेइ। तओ चिन्तियं नन्दएणं। न नियदेसमपत्तस्स इमस्स एस वाही अवेइ त्ति, तओ न जुत्तमिह कालमक्खिविउं। तओ निओइयं भण्डं, गहियं च पडिभण्डं, सज्जियं जाणवत्तं। दिट्ठो नरवई, संपूइओ तेण। पयट्टो नियदेसमागन्तुं॥

अइक्कन्तेसु कइवयपयाणएसु चिन्तियं धणसिरीए। कहं न विवन्नो एसो। सदेसमुवगयाए य दुल्लहो एयस्स वावायणोवाओ, जीवमाणो य एसो निच्चं मे हिययसल्लभूओ त्ति। ता इमं एत्थ पत्तकालं। ठाइ चेव एसो पायक्खालयंमि रयणीए, तओ इमंमि चेव जलयरसत्तभासुरे सायरे पक्खिवामि त्ति। पक्खित्तो य एसो चवलभावओ जाणवत्तस्स अन्धयारयाए रयणीए तहब्भट्ठो चेव निस्संसयं न भविस्सइ। एवं च कए समाणे एसो वि नन्दओ मे मासओ भविस्सइ त्ति चिन्तिऊण संपाइयं धणसिरीए जहासमीहियं। पक्खित्तो

नरपतिमवलोकितुम्। दृष्टो मतो राजा। वृत्तमावासस्थानम्। अवतारितं भाण्डम्। उपनीता धनस्य वैद्याः। प्रारब्ध उपक्रमः। तद्योगदानतो न च तस्य व्याधिरपैति। ततश्चिन्तितं नन्दकेन। न निजदेशमप्राप्तस्यास्य एष व्याधिरपैतीति, ततो न युक्तमिह कालमाक्षेप्तुम्। ततो नियोजितं (विक्रीतं) भाण्डम्, गृहीतं च प्रतिभाण्डं, सज्जितं यानपात्रम्, दृष्टो नरपतिः, संपूजितस्तेन, प्रवृत्तो निजदेशमागन्तुम्।

अतिक्रान्तेषु कतिपयप्रयाणकेषु चिन्तितं धनश्रिया। कथं न विपन्न एषः। स्वदेशमुपगतया च दुर्लभ एतस्य व्यापादनोपायः। जीवंश्च एष नित्यं मे हृदयशल्यभूत इति। तत इदमत्र प्राप्तकालम्। तिष्ठत्येव एष पादक्षालने रजन्याम्, ततोऽस्मिन्नेव जलचरसत्त्वभासुरे सागरे प्रक्षिपामीति। प्रक्षिप्तश्च एष चपलभावतो यानपात्रस्य अन्धकारतया रजन्यां तथाभ्रष्ट एव निःसंशयं न भविष्यति। 'एवं च कृते सति एषोऽपि नन्दको मे शाश्वतो भविष्यति' इति चिन्तयित्वा संपादितं धनश्रिया यथासमीहितम्। प्रक्षिप्तो यामावशेषायां

१ दियहेसु ख। २ निच्चमेव ख। ३ पत्तयाल ख। ४ पाउक्खा० ग।

जामावसेसाए रयणीए पादक्खालयनिमित्तमुट्ठिओ पायालगम्भीरे समुद्दम्मि सत्थवाहपुत्तो। ठिया कंचि कालं। कओ तीए हाहारवो। उट्ठिओ नन्दओ। पुच्छिया एसा 'सामिणि! किमेयं किमेयं'ति। तओ सा अत्ताणमणुताडयन्ती सदुक्खमिव अहिययरं रोविउं पवत्ता। 'हा अज्जउत्त हा अज्जउत्त' त्ति भणन्ती निवडिया धरणिवट्ठे। तओ नन्दएण संजायासङ्केण सत्थवाहपुत्तसेज्जं निरूविय तमपेक्खमाणेण सगग्गयक्खरं पुणो वि वाहित्ता 'सामिणि, किमेयं किमेयं' ति। धणसिरीए भणियं–एसो खु अज्जउत्तो आयमणनिमित्तमुट्ठिओ पमायओ समुद्दे निवडिओ त्ति। तओ एयमायण्णिऊण बाहजलभरियलोयणो तन्नेहमोहियमई तम्मि चेव अत्ताणयं पक्खिविउमाढत्तो नन्दओ, धरिओ परियणेण। तओ अच्चन्तसोयाणलजलियमाणसो 'न एत्थ उवायन्तरं कमइ' त्ति विमण्णो। धराविओ तेण वोहित्थो। अन्नेसिऊण गोसे उच्चाइया नङ्गरा, पयट्टो सदुक्खं अहिप्पेयदेसाभिमुहो॥

रजन्यां पादक्षालननिमित्तमुत्थितः पातालगम्भीरे समुद्रे सार्थवाहपुत्रः। स्थिता कंचित्कालम्। कृतस्तया हाहारवः। उत्थितो नन्दकः। पृष्टैषा–'स्वामिनि! किमेतद् किमेतद्' इति। ततः साऽऽत्मानमनुताडयन्ती सदुःखमिव अधिकतरं रोदितुं प्रवृत्ता। 'हा आर्यपुत्र! हा आर्यपुत्र!' इति भणन्ती निपतिता धरणीपृष्ठे। ततो नन्दकेन संजाताशङ्केन सार्थवाहपुत्रशय्यां निरूप्य तमप्रेक्षमाणेन सगद्गदाक्षरं पुनरपि व्याहृता 'स्वामिनि! किमेतद् किमेतद्' इति। धनश्रिया भणितम्–एष खलु आर्यपुत्र आचमननिमित्तमुत्थितः प्रमादतः समुद्रे निपतित इति। ततः एवमाकर्ण्य वाष्पजलभृतलोचनस्तत्स्नेहमोहितमतिस्तस्मिन्नेवात्मानं प्रक्षिप्तुमारब्धो नन्दकः। धृतः परिजनेन। ततोऽत्यन्तशोकानलज्वलितमानसः 'नात्रोपायान्तरं क्रमते' इति विषण्णः। धारितस्तेन वोहित्थ। अन्वेष्य प्रातरुत्याजिता नाङ्गराः, प्रवृत्तः सदुःखमभिप्रेतदेशाभिमुखः।

१ पाउक्खा क-ग

इओ य सो सत्थवाहपुत्तो पवहणसमणन्तरमेव समासाइयपुव्वभिन्नबोहित्थफलगो सत्तरत्तेण समुत्तरिऊण सायरं लवणजलासेवण-विगयवाही संपत्तो तीरभायं। उत्तिण्णो सायराओ पुणो जायमिव अत्ताणयं मन्नमाणो उवविट्ठो तिमिरपायवसमीवे। चिन्तियं च तेणं--अहो मायाबहुलया इत्थियावग्गस्स, अहो निसंसया धणसिरीए, अहो असरिसो ममोवरि वेराणुबन्धो, अहो लहुइयं उभयकुलमिमीए। ता किं पुण से इमस्स ववसायस्स कारणं?। अहवा अविवेयबहुले इत्थियायणे को कारणं पुच्छइ त्ति?। इत्थिया हि नाम निवासो दोसाणं, निमित्तं साहसाणं, उप्पत्ती कवडाणं, खेत्तं मुसावायस्स, दुवारं असेयमग्गस्स, आययणमावयाणं, सोवाणं नरयाणं, अग्गला कुसलपुरपवेसस्स। ता किं इमिणा चिन्तिएणं, कज्जं चिन्तेमि। न एस कालो एयस्स आलोचियव्वस्स, अवि य उच्छाहस्स। 'उच्छाहममुञ्चमाणो पुरिसो अवस्सं चेव ववसायाणुरूवं फलं पावेइ, न य अतीयवत्थुचिन्ता दढं कायव्व' त्ति वुड्ढवाओ। थेवं च इमं पओयणं पुरिसस्स, गरुयं च जणणिजणया; ते य मे सुन्दरा चेव त्ति चिन्तिऊण उट्ठिओ पायवसमीवाओ। गओ थेवं भूमिभागं।

इतश्च स सार्थवाहपुत्रः प्रवहणसमनन्तरमेव समासादितपूर्वभिन्नबोहित्थफलकः सप्तरात्रेण समुत्तीर्य सागरं लवणजलासेवनविगतव्याधिः संप्राप्तस्तीरभागम्। उत्तीर्णः सागरात् पुनर्जातमिवात्मानं मन्यमान उपविष्टः तिमिरपादपसमीपे। चिन्तितं च तेन--'अहो मायाबहुलता स्त्रीवर्गस्य, अहो! नृशंसता धनश्रियः, अहो! असदृशो ममोपरि वैरानुबन्धः, अहो! लघु कृतमुभयकुलमनया। ततः किं पुनस्तस्या अस्य व्यवसायस्य कारणम्? अथवा अविवेकबहुले स्त्रीजने कः कारणं पृच्छति इति?। स्त्री हि नाम निवासो दोषाणाम्, निमित्तं साहसानाम्, उत्पत्तिः कपटानाम्, क्षेत्रं मृषावादस्य, द्वारमश्रेयोमार्गस्य, आयतनमापदाम्, सोपानं नरकानाम्, अर्गला कुशलपुरप्रवेशस्य। ततः किमनेन चिन्तितेन? कार्यं चिन्तयामि, न एष काल एतस्यालोचितव्यस्य, अपि चोत्साहस्य। 'उत्साहममुञ्चन् पुरुषोऽवश्यमेव व्यवसायानुरूपं फलं प्राप्नोति, न चातीतवस्तुचिन्ता दृढं कर्तव्या' इति वृद्धवादः। स्तोकं चेदं प्रयोजनं पुरुषस्य, गुरुकं जननीजनकौ, तौ च मे सुन्दरौ

दिट्ठा य तेणं वहणभङ्गविवन्नाए सावत्थीनरवइस्स सीहलदीवगामिणीए धूयाचेडियाए ['तीसे चेव पिउसन्तिगा चेडिया तीसे समप्पिया भण्डारिणीए, विवन्नम्मि य तंमि वहणए समुद्दवीईहिं घत्तिया कूले पञ्चत्तमुवगया सा चेडी तमुद्देसागएण दिट्ठा य तेणं तीसे] उत्तरीयदेसंमि तमुद्देसमुज्जोवयन्ती तेल्लोक्कसारा नाम रयणावलि त्ति। अबुज्झमाणेण य इमं वुत्तन्तं 'परकेरिगाए वि इमीए ववहरिऊण पुणो पुणो इणमेव उद्दिसिय कुसलपक्खं करेस्सामि' त्ति चिन्तिऊण गहिया य तेणं। पयट्टो विसयसंमुहं। दिट्ठो य तेणं जूययरवइयरविमोइओ पवन्नकावालियवओ सुसिद्धगारुडमन्तो मन्तसाहणत्थं चेव समुद्दतडमहिवसन्तो महेसरदत्तो। तेण वि एसो त्ति पच्चभिन्नाओ। तेणं भणिओ य-सत्थवाहपुत्त, कुओ तुमं, कहं वा ते ईइसी अवत्था? । तओ 'न गेहदुच्चरियमन्नस्स पयासिउं जुज्जइ'त्ति चिन्तिऊण भणियं धणेणं। जलनिहीओ अहं, वहणविओगओ ममेयं ईदिसी अवत्थ त्ति। महेसरदत्तेण भणियं। अन्नहिओ विही उन्नयाणं

पय-इति चिन्तयित्वा उत्थितः पादपसमीपात्। गतः स्तोकं भूमिभागम्। दृष्टा च तेन वहनभङ्गविपन्नायाः श्रावस्तीनरपतेः सिंहलद्वीपगामिन्या दुहितृचेटिकायाः [तस्या एव पितृसत्का चेटिका तस्याः समर्पिता भाण्डागारिण्याः, विपन्ने च तस्मिन् वहनके समुद्रवीचिभिः क्षिप्ता कूले पञ्चत्वमुपगता सा चेटी, तमुद्देसमागतेन दृष्टा च तेन तस्याः]उत्तरीयदेशे तमुद्देशमुद्द्योतयमाना त्रैलोक्यसारा नाम रत्नावली इति। अबुध्यमानेन चेमं वृत्तान्तं परकीययाऽप्यनया व्यवहार्य पुनः पुनरिदमेवोद्दिश्य कुशलपक्षं करिष्यामि' इति चिन्तयित्वा गृहीता तेन। प्रवृत्तो विषयसंमुखम्। दृष्टश्च तेन द्युतकारव्यतिकरविमोचितः प्रपन्नकापालिकव्रतः सुसिद्धगारुडमन्त्रो मन्त्रसाधनार्थमेव समुद्रतटमधिवसन् महेश्वरदत्तः। तेनापि एष इति प्रत्यभिज्ञातः। तेन भणितश्च-सार्थवाहपुत्र! कुतस्त्वम्, कथं वा ते ईदृशी अवस्था? ततो 'न गेहदुश्चरितमन्यस्य प्रकाशितुं युज्यते' इति चिन्तयित्वा भणितं धनेन-जलनिधितोऽहम्, वहनवियोगतो ममेयमीदृशी अवस्था

१ अयं कोष्ठान्तर्गतः पाठोऽधिकः खपुस्तके हरितालेन परिमार्जितश्च

महेसु, सुचञ्चला सिरि' त्ति सच्चो लोयवाओ। किलेसायासबहुलो गिहवासो, जेण भवओ त्ति कप्पपायवस्स विय परहियसंपायणामे-
त्तफलजम्मस्स ईदिसी अवत्थ त्ति। अहवा थेवमेयं। पणट्ठो वि ससी कालजोगओ अचिरेणं चेव संपुण्णयं पावइ, विसमदसाविभाए
य वट्टमाणा देवा वि परिकिलेसभाइणो हवन्ति, किमङ्ग पुण मच्चलोयवासी जणो। ता 'न तए संतप्पियव्वं। आवयाए वज्जकढिण-
हियया चेव महापुरिसा हवन्ति। उवयारिणी य आवया; जओ नज्जइ इमीए सज्जणासज्जणविसेसो, लक्खिज्जए अणुरत्तेयरपरियणो,
गम्मन्ति अत्तणो भागधेयाणि, निव्वडइ निच्चपच्छन्नो पुरिसयारो। नाऽणलमसंपत्तस्स कालागरुस्स सव्वहा गन्धोवलद्धी हवइ। 'न
चिरकालट्ठाइणी य एसा आवय' त्ति लक्खणाओ अवगच्छामि त्ति। अन्नं च–भवओ विहवो व्व साहारणो चेव मे एस खणमेत्त-
पीडायरो परिकिलेसो। परिचत्तसव्वसङ्गो य संपयमहं। ता किं ते उवगरेमि?। तहा वि गेण्हाहि एयं पढियमेत्तसिद्धं तक्खयाहिदट्ठस्स
वि पाणधारयं भयवया जिणयाणन्दपेण पणीयं गारुडमन्तं ति। भविस्सइ य इमिणा वि भवओ सविहवेण विय परमत्थसंपायणं ति।

इति। महेश्वरदत्तेन भणितम्–'भवद्विधो विधिकृतसार्ता महत्सु, सुचञ्चला श्रीः'-इति सत्यो लोकवादः। क्लेशायासबहुलो गेहवासः,
येन भवतोऽपि कल्पपादपस्येव परहितसंपादनमात्रफलजन्मन ईदृशी अवस्थेति। अथवा स्तोकमिदम्। प्रनष्टोऽपि शशी कालयोगतोऽ-
चिरेणैव संपूर्णतां प्राप्नोति। विषमदशाविभागे च वर्तमाना देवा अपि परिक्लेशभाजो भवन्ति, किमङ्ग पुनर्मर्त्यलोकवासी जनः। ततो
न त्वया संतपितव्यम्। आपदि वज्रकठिनहृदया एव पुरुषा भवन्ति। उपकारिणी चापद्, यतो ज्ञायतेऽनया सज्जनासज्जनविशेषः, लक्ष्यते
अनुरक्तेतरपरिजनः, गम्यन्ते आत्मनो भागधेयानि, निष्पद्यते नित्यप्रच्छन्नः पुरुषकारः। नानलमसंप्राप्तस्य कालागुरोर्गन्धोपलब्धिर्भवति।
'न चिरकालस्थायिनी चैषाऽऽपद्' इति लक्षणतोऽवगच्छामीति। अन्यच्च–भवतो विभव इव साधारण एव मे एष क्षणमात्रपीडाकरः
परिक्लेशः। परित्यक्तसर्वसंगश्च साम्प्रतमहम्। ततः किं तवोपकरोमि? तथापि गृहाणैनं पठितमात्रसिद्धं तक्षकादिदष्टस्यापि प्राणधारकं

धणेण चिन्तियं–अहो से अकारणवच्छलत्तणं। अहवा दुहियसत्तवच्छलो चेव मुणिजणो होइ। उ(अ)विपाकओवयारो य कहमहमिमस्स मन्तियं गेण्हामि त्ति चिन्तिऊण भणियं च तेणं–भयवं, अणुग्गिहीओ म्हि; मम कुसलचिन्तणं चेव भयवओ उवयारो। न तवस्सिजणाणुग्गिहीओ अकल्लाणं पावइ। पमाइणो य गिहत्था हवन्ति, उग्गाओ य मन्तदेवयाओ। ता अलं मे मन्तेण। महेसरदत्तेण भणियं–सोमदेवओ निप्पच्चवाओ पढ़ु एसो। धणेण भणियं–तहा वि अलमिमेणं ति। महेसरदत्तेण चिन्तियं–अहो महाणुभावया सत्थवाहपुत्तस्स। नूणमहमणेण न पच्चभिन्नाओ, तओ अकओवयारित्तणेण उवरोहसीलयाए न एयं गेण्हइ। ता पयासेमि से अप्पाणयं। चिन्तिऊणं भणियं च तेण–सत्थवाहपुत्त, सुमरेहि मं तामलित्तीए जूययरवइयरविमोइयं महेसरदत्तं। ता अलमन्नहा वियप्पिएणं। गेण्हाहि एयं, अन्नहा महई मे पीडा समुप्पज्जइ त्ति। तओ सुमरिऊण वुत्तन्तं से 'कयत्थो एसो' त्ति चिन्ति-

भगवता जिनलब्धेन प्रणीतं गारुडमन्त्रमिति। भविष्यति चानेनापि भवतः स्वविभवेनेव परार्थसंपादनमिति। धनेन चिन्तितम्–अहो ! अस्याकारणवात्सल्यम्, अथवा दुःखितसत्त्ववत्सल एव मुनिजनो भवति। अपि च–'अकृतोपकारश्च कथमहमस्य सत्कं गृह्णामि' इति चिन्तयित्वा भणितं च तेन–भगवन् ! अनुगृहीतोऽस्मि, मम कुशलचिन्तनमेव भगवत उपकारः। न तपस्विजनानुगृहीतोऽकल्याणं प्राप्नोति। प्रमादिनश्च गृहस्था भवन्ति, उग्राश्च मन्त्रदेवताः, ततोऽलं मे मन्त्रेण ?। महेश्वरदत्तेन भणितम्–सौम्यदेवतो निष्प्रत्यवायः स्फुटमेषः। धनेन भणितम्–तथापि अलमनेनेति। महेश्वरदत्तेन चिन्तितम्–अहो ! महानुभावता सार्थवाहपुत्रस्य, नूनमहमनेन न प्रत्यभिज्ञातः, ततोऽकृतोपकारित्वेनोपरोधशीलतया नैतं गृह्णाति। ततः प्रकाशयामि अस्यात्मानम्–इति चिन्तयित्वा भणितं च तेन–सार्थवाहपुत्र ! स्मर मां ताम्रलिप्त्यां द्यूतकारव्यतिकरविमोचितं महेश्वरदत्तम्, ततोऽलमन्यथा विकल्पितेन। गृहाणैतम्, अन्यथा

१ °ताम्रा° ग

ऊण 'हवइ महई एयस्स पीड' त्ति अवगच्छिय तदुवरोहभीरुणा भणियं धणेणं–भयवं, जं तुब्भे आणवेह । तओ दिन्नो महेसरदत्तेण मन्तो, गहिओ धणेणं । गया तवोवणं । फणसादीएहिं कया पाणवित्ती । ठिओ एगदिवसं । अहिवन्दिऊण महेसरदत्तं पेसिओ य तेणं पयट्टो विसयसंमुहं । नारङ्गाइसंपाइयाहारो य पयत्तगोवियरयणावली कालक्कमेण पत्तो सावत्थिं ति ॥

तीए य नयरीए तीए चेव रयणीए राइणो वियारधवलस्स तक्करेहिं मुट्ठं भण्डायारं । तन्निमित्तं घेप्पन्ति भुयङ्गप्याया नयरवासिणो अन्ने य कप्पडियादओ त्ति । निज्जन्ति मन्तिपुरओ मुच्चन्ति य परिक्खिउं । तओ सो धणो एयमायण्णिऊण दुवारओ चेव अन्नओ गच्छमाणो गहिओ निउत्तपुरिसेहिं, भणिओ य 'भद्द, कओ तुमं' ति ? । तेण भणियं–'सुसम्मनयराओ' । तेहिं भणियं–कहिं वच्चिहिसि ? तेण भणियं–अग्गओ गओ आसि, संपयं तं चेव वच्चिहामि त्ति । तेहिं भणियं–भद्द, न तए कुवियव्वं ति; अज्ज खु

महती मे पीडा समुत्पद्यते–इति । ततः स्मृत्वा वृत्तान्तं तस्य 'कृतार्थ एषः' इति चिन्तयित्वा 'भवति महती एतस्य पीडा' इत्यवगत्य तदुपरोधभिरुणा भणितं धनेन–भगवन्तः ! यद् यूयमाज्ञापयत । ततो दत्तो महेश्वरदत्तेन मन्त्रः, गृहीतो धनेन । गतौ तपोवनम् । पनसादिभिः कृता प्राणवृत्तिः । स्थित एकदिवसम् । अभिवन्द्य महेश्वरदत्तं प्रेषितश्च तेन प्रवृत्तो विषयसंमुखम् । नारङ्गादिसंपादिताहारश्च प्रयत्नगोपितरत्नावलिः कालक्रमेण प्राप्तः श्रावस्तीमिति ।

तस्यां च नगर्यां तस्यामेव रजन्यां राज्ञो विचारधवलस्य तस्करैर्मुष्टं भाण्डागारम् । तन्निमित्तं गृह्यन्ते भुजङ्गप्राया नगरवासिनोऽन्ये च कार्पटिकादय इति । नीयन्ते च मन्त्रिपुरतो मुच्यन्ते च परीक्षितुम् । ततः स धन एवमाकर्ण्य द्वारत एवान्यतो गच्छन् गृहीतो नियुक्तपुरुषैः, भणितश्च भद्र ! कुतस्त्वमिति । तेन भणितम्–'सुशर्मनगरात्' । तैर्भणितम्–क्व व्रजिष्यसि ? तेन भणितम्–अग्रतो गत आसम्, साम्प्रतं तदेव व्रजिष्यामीति । तैर्भणितम्–न त्वया कुपितव्यमिति, अद्य खलु राज्ञो विचारधवलस्य केनचिद् मुष्टं भाण्डा-

राइणो वियारधवलस्स केहिंचि मुट्ठं भण्डायारं । तन्निमित्तं च कप्पडिया तुब्भेहिं आणेयव्व' त्ति निउत्ता अम्हे । ता एहि, वच्चामो मन्तिगेहं ति । धणेण भणियं–भद्द, अहमियाणिं चेवेहागओ, नाहं एयकम्मयारी । ता किं तहिं गएणं। तेहिं भणियं–निद्देसगारिणो अम्हे, ता अवस्सं गन्तव्वं ति । अणिच्छमाणो वि हियएण नीओ मन्तिगेहं, दंसिओ मन्तिस्स, भणिओ य तेणं–'भद्द कओ तुमं' ? तेणं तं चेव सिट्ठं ति । मन्तिणा भणियं–किं ते पाहेयमन्नं वा ? तओ तेण लोहअन्नाणमोहियमणेणं अवियारिऊणं आयइं भणियं निव्वियप्पेणं 'न किंचि संसणिज्जं ति । मन्तिणा भणियं 'फुडं मन्तेज्जासि' । तेण भणियं–किं भवओ वि अन्नहा निवेईयइ त्ति । मन्तिणा भणियं–जइ एवं, ता गच्छ । तओ गच्छमाणो तत्थेव भवणङ्गणे कहिंचि पमायच्छुडिएण गहिओ वेन्दुरापवङ्गमेण[1] । फालियं से निवसणं । एत्थन्तरंमि तमुद्देसमुज्जोवयन्ती सत्तरिसिमाला विय निवडिया उड्डिगाओ[2] तेलोक्कसारा रयणावलि त्ति । दिट्ठा मन्तिणा, मोयाविओ पवङ्गमाओ, गहिया रयणावली पच्चभिन्नाया य । भिन्नं मन्तिहियं । नूणं अकुसलं रायधूयाए, अन्नहा कुओ

गारम् । तन्निमित्तं च 'कार्पटिका युष्माभिरानेतव्याः'–इति नियुक्ता वयम् । तत एहि, व्रजामो मन्त्रिगृहमिति । धनेन भणितम्–भद्र ! अहमिदानीमेवेहागतः, नाहमेतत्कर्मकारी, ततः किं तत्र गतेन ? । तैर्भणितम्–निर्देशकारिणो वयम्, ततोऽवश्यं गन्तव्यमिति । अनिच्छन्नपि हृदयेन नीतो मन्त्रिगृहम्, दर्शितो मन्त्रिणः, भणितश्च तेन–भद्र ! कुतस्त्वम् ? तेन तदेव शिष्टमिति । मन्त्रिणा भणितम्–किं तव पाथेयमन्यद् वा ? ततस्तेन लोभाज्ञानमोहितमनसाऽविचार्य आयतिं भणितं निर्विकल्पेन–'न किंचित् शंसनीयमिति । मन्त्रिणा भणितम्–'स्फुटं मन्त्रयेः' । तेन भणितम्–किं भवतोऽप्यन्यथा निवेद्यते इति । मन्त्रिणा भणितम्–यद्येवं ततो गच्छ । ततो गच्छन् तत्रैव भवनाङ्गणे कथंचित् प्रमादात् छुटितेन गृहीतो मन्दुराप्लवङ्गमेन । स्फाटितं तस्य निवसनम् । अत्रान्तरे तमुद्देशमुद्द्योतयन्ती सप्तर्षिमालेव

१ वन्दुरा० ग । २ ओड्डिगाओ ग, उवड्डिगाओ क ।

इयं एयस्स ? । पुच्छिओ खु एसो । भद्द, कुओ तुह एसा ? । तओ सलज्जं भणियं धणेण—कयावि अहं खु जाणवत्तेण महाकडाहं गओ आसि । तत्थ मए एसा कीया । विवन्नं च मे आगच्छमाणस्स तं जाणवत्तं । तओ एद्दहमेत्तरित्थसामी भयवया देव्वेण संपाइओ म्हि । मन्तिणा भणियं—कया कीय त्ति ? । धणेण भणियं—अत्थि वासमेत्तं । मन्तिणा चिन्तियं । तिमाससमेत्तो कालो एयाए विद्दवाए, दुमाससमेत्तो य कालो रायधूयाए इओ गयाए, एसो य एवं जंपइ त्ति, ता कहमेयं ? । अवलचा य एसा एएणासि, असंबद्धपलावी खु एसो, देवस्स निवेएमि । निवेइयं मन्तिणा । आउलीहूओ राया । निरूविया रयणावली । हक्कारिऊण दंसिया भण्डगारिगाणं, पच्चभिन्नाया य तेहिं । तओ राइणा चिन्तियं—वावाइया मुद्धा वाणेण मे धूया, अन्नहा कहमेवमेयं जुज्जइ त्ति । कोहाभिभूएणावि अच्चन्तनयाणुसारिणा पुणो वि पुच्छाविओ त्ति । धणेण पुणो वि तं चेव साहियं । तओ राइणा पुणो वि रयणावलिं निएऊण

निपतिता ऊर्ध्विकात् (वस्त्रविशेषात्) त्रैलोक्यसारा रत्नावलिरिति । दृष्टा मन्त्रिणा, मोचितः प्लवङ्गमात्, गृहीता रत्नावली प्रत्यभिज्ञाता च । भिन्नं (व्याकुलं) मन्त्रिहृदयम् । नूनमकुशलं राजदुहितुः, अन्यथा कुत इयमेतस्य ? । पृष्टः खल्वेषः । भद्र ! कुतस्तवैषा ? ततः सलज्जं भणितं धनेन—कदाचिदहं खलु यानपात्रेण महाकटाहं गत आसम्, तत्र मया एषा क्रीता । विपन्नं च मे आगच्छतस्तद् यानपात्रम्, तत एतावन्मात्ररिक्थस्वामी भगवता दैवेन संपादितोऽस्मि । मन्त्रिणा भणितम्—कदा क्रीतेति ? धनेन भणितम्—अस्ति वर्षमात्रम् । मन्त्रिणा चिन्तितम्—त्रिमासमात्रः काल एतस्या वितीर्णायाः, द्विमासमात्रश्च कालो राजदुहितुरितो गतायाः, एष च एवं जल्पतीति, ततः कथमेतत् ? अपलापिता चैषा एतेनासीत्, असंबद्धप्रलापी खल्वेषः, देवाय निवेदयामि । निवेदितं मन्त्रिणा । आकुलीभूतो राजा । निरूपिता रत्नावली । आकार्य दर्शिता भाण्डागारिणः, प्रत्यभिज्ञाता च तैः । ततो राज्ञा चिन्तितम्—व्यापादिता मुग्धा वणिजेन मे दुहिता, अन्यथा कथमेवमेतद् युज्यते इति ? क्रोधाभिभूतेनापि अत्यन्तनयानुसारिणा पुनरपि पृष्ट इति । धनेन पुनरपि

पच्चभिन्नाणेण अहिययरं कुविएण 'न एयमन्नहा हवइ' त्ति वज्झो समाणत्तो। तओ य तणमसिविलित्तगत्तो वज्जन्तविरसडिण्डिमो अवराहट्ठावणत्थं च पडलिगानिमियरयणावली पयट्टाविओ वज्झथामं। तओ नीयमाणस्स हट्टमग्गावसेसे मंसाहिलासिणा ओलावएण 'मंसमेयं' ति कलिऊण अवहरिया रयणावली, नीया सनीडं। धणो वि य अहिययरं कुविएहिं रायपुरिसेहिं नीओ मसाणं ति। तं च केरिसं?

सुक्कपायवसाहानिलीणवायसं वायसरसन्तकरयररवं रवन्तसिवानायभीसणं भीसणदरदड्ढमडयदुरहिगन्धं गन्धवसालुद्धरुरुवेन्तसाणं साणकड्ढालनिवहभासुरं भासुरकव्वायपीइजणयं ति॥ अवि य–

पुरओ पत्थियदण्डो उग्गाहियकालचक्कदुव्वारो। कलिकालवन्हिसरिसो कालो वि जहिं छलिज्जेज्जा॥

तत्थ घोलाविओ लोहियामुहाभिहाणं पाणवाडयासन्नखण्डं। तओ वहगचण्डालस्स आदेसं दाऊण गया रायपुरिसा। नीओ

तस्यैव कथितम्। ततो राज्ञा पुनरपि रत्नावलिं दृष्ट्वा प्रत्यभिज्ञानेन अधिकतरं कुपितेन 'नैतदन्यथा भवति'–इति वध्यः समाज्ञप्तः। ततश्च तृणमषीविलिप्तगात्रो वाद्यमानविरसडिण्डिमोऽपराधस्थापनार्थं च पटलिकान्यस्तरत्नावलिः प्रवर्तितो वध्यस्थानम्। ततो नीयमानस्य हट्टमार्गावशेषे मांसाभिलाषिणा श्येनेन 'मांसमेतद्' इति कलयित्वाऽपहृता रत्नावली, नीता स्वनीडम्। धनोऽपि चाधिकतरं कुपितै राजपुरुषैर्नीतो श्मशानम्–इति। तच्च कीदृशम्—

शुष्कपादपशाखानिलीनवायसं वायसरसत्करकररवं रुवच्छिवानादभीषणं, भीषणदर(ईषद्)दग्धमृतकदुरभिगन्धं गन्धवसालुब्धरोरूयमाणश्वानं श्वानकङ्कालनिवहभासुरं भासुरक्रव्यादप्रीतिजनकमिति। अपि च

पुरतः प्रस्थितदण्ड उद्ग्राहितकालचक्रदुर्वारः। कलिकालवह्निसदृशः कालोऽपि यत्र छल्येतत्॥

येवं भूमिभायं चण्डालेण, पुलइओ पच्छा, चिन्तियं च तेणं–अहो इमाए आगितीए कहमकज्जयारी भविस्सइ ?। अहवा निद्देसयारी अहं, ता किं मम एइणा। सयं निओयमणुचिट्ठामि। निवेसाविओ जमगण्डीए, भणिओ य–अज्ज, सुदिट्ठं जीवलोयं करेहि, एवम-वसाणो य ते एस लोओ। अन्नं च–वयंसगा णे सावगा, तस्संसग्गिओ य णेगन्तकूरदिट्ठिणो अम्हे। रायसासणं चिमं अवस्सं संपाडे-यव्वं। विन्नत्तो य अम्हेहिं नरवई। जहा वावाइज्जमाणस्स 'सुहपरिणामो मरउ' त्ति मुहुत्तमेत्तं अम्हेहिं समीहियत्थसंपाडणं कायव्वं ति। कओ य णे पसाओ राइणा। ता आणवेउ अज्जो, किं ते संपाडीयइ ?। धणेण चिन्तियं–अहो विसिट्ठया चण्डालस्स। अहवा दीणसत्तवच्छलो परोवयारनिरओ अणुयम्पारई न एस कम्मचण्डालो, किं तु जाइचण्डालो। सज्जणो खु एसो। अकाले य मे दंसणं एतेण सह जायं ति। अहवा किं एइणा, गओ मे कालो पुरिसचेट्ठियस्स; न संपज्जइ समीहियं अप्पपुण्णाणं ति दीहं नीससिऊण

तत्र प्रापितो लोहितमुखाभिधानं श्वपाक(चंडाल)पाटकासन्नगण्डम् (वनम्) ततो वधकचाण्डालायादेशं दत्त्वा गता राजपुरुषाः। नीतः स्तोकां भूमिभागं चण्डालेन, प्रलोकितः पश्चात्। चिन्तितं च तेन–अहो ! अनयाऽऽकृत्या कथमकार्यकारी भविष्यति ? अथवा निर्देशकारी अहम्। ततः किं मम एतेन ? स्वं नियोगमनुतिष्ठामि। निवेशितो यमगण्डिकायां, भणितश्च–आर्य ! सुदृष्टं जीवलोकं कुरु। एवमवसानश्च तवैष लोकः। अन्यच्च वयस्या नः श्रावकाः, तत्संसर्गिणश्च नैकान्तक्रूरदृष्टयो वयम्। राजशासनं चेदमवश्यं संपादयित-व्यम्। विज्ञप्तश्चास्माभिर्नरपतिः। यथा व्यापाद्यमानस्य 'शुभपरिणामो म्रियताम्' इति मुहूर्तमात्रमस्माभिः समीहितार्थसंपादनं कर्तव्यमिति। कृतश्च नः प्रसादो राज्ञा। तत आज्ञापयत्वार्यः, किं तव संपाद्यते ?। धनेन चिन्तितम्–अहो ! विशिष्टता चण्डालस्य। अथवा दीनस-त्त्ववत्सलः परोपकारनिरतोऽनुकम्पारतिर्न एष कर्मचण्डालः, किन्तु जातिचण्डालः, सज्जनः खल्वेषः। अकाले च मे दर्शनमेतेन सहजात-

1 मगेइणा क

भणियं सविलिएणं। भद्द, संपाडेहि रायसासणं, किमन्नेणं ति। तओ 'अदीणभावपिसुणियमहापुरिसभावो अओ चेव अणवराहो वि एसो मए वावाइयव्वो'त्ति विसण्णेन बाहजलभरियलोयणेणं सगग्गयं भणिओ चण्डालेण–अज्ज, जइ एवं, ता सुमरेहि इट्ठदेवयं, परिच्चय विसयरायं, अङ्गीकरेहि धम्मं, तहा ठाहि सग्गाहिमुहं ति। तओ 'धिरत्थु जीवलोयस्स, न संपाडिओ परत्थो त्ति चिन्तिऊण ठिओ सग्गाहिमुहं। गहियं चण्डालेण कयन्तजीहाकरालभासुरं करवालं, निकड्ढियं पडियाराओ, वाहियं ईसि नियभुयासिहरे। भणियं च तेणं–अहो जणा, इमिणा किल कहंचि रायधूयं वञ्चिऊण अवहडा तेलोक्कसारा रयणावली। इमिणा अवराहेण एस वावाइज्जइ, ता जइ अन्नो वि कोइ रायविरुद्धमासेवइस्सइ तं पि राया सुतिक्खेण दण्डेण एवं चेव सासइस्सइ त्ति भणिऊण वाहियं करवालं। कारुण्णसुन्नभावयाए य अदाऊण पहारं विमुक्कखग्गो निवडिओ धरणीए चण्डालो। भणिओ धणेण–भद्द, मा मे इमिणा अइसंभमेण हिययं पीडेहि।

मिति। अथवा किमेतेन? गतो मे कालः पुरुषचेष्टितस्य, 'न संपद्यते समीहितमल्पपुण्यानाम्' इति दीर्घं निःश्वस्य भणितं सव्यलीकेन। भद्र! संपादय राजशासनम्, किमन्येनेति। ततोऽदीनभावपिशुनितमहापुरुषभावोऽत एवानपराधोऽपि एष मया व्यापादयितव्यः' इति विषण्णेन बाष्पजलभृतलोचनेन सगद्गदं भणितश्चण्डालेन। आर्य! यद्येवं ततः स्मरेष्टदेवताम्, परित्यज्य विषयरागम्, अङ्गीकुरु धर्मम्, तथा तिष्ठ स्वर्गाभिमुखमिति। ततो 'धिगस्तु जीवलोकम्, न संपादितः परार्थः' इति चिन्तयित्वा स्थितः स्वर्गाभिमुखम्। गृहीतश्चण्डालेन कृतान्तजिह्वाकरालभासुरः करवालः, निष्कर्षितः प्रतीकारात्, वाहित ईषद् निजभुजाशिखरे। भणितं तेन–'अहो जना! अनेन किल कथंचिद् राजदुहितरं वञ्चयित्वाऽपहृता त्रैलोक्यसारा रत्नावली। अनेनापराधेन एष व्यापाद्यते। ततो यदि कोऽपि राजविरुद्धमासेविष्यते तमपि राजा सुतीक्ष्णेन दण्डेन एवमेव शासिष्यति' इति भणित्वा वाहितः करवालः। कारुण्यशून्यभावतया च अदत्त्वा

१ विसाय ख। २ दण्डेण क

अणुचिट्ठाहि रायसासणं, निओगकारी तुमं ति। चण्डालेण भणियं–अज्ज, न सक्कुणोमि असंपाडिओवयारन्तरस्स पहरिउं। ता किं ते पिययरं संपाडेमि त्ति; आणवेउ अज्जो॥

एत्थन्तरंमि राइणो पढमपुत्तो सुमङ्गलो नाम, सो उज्जाणमुवगओ अहिणा दट्ठो। उग्गयाए विसस्स थेववेलाए चेव पणट्ठसन्नो जाओ। आणीओ नरवइसमीवं। सद्दाविया गारुडिया, आगया य तुरियतुरियं। दिट्ठो तेहिं। 'अहो पणट्ठा से सन्न' त्ति विसण्णा खु एए। पउत्ताइं मन्तोसहाइं, न जाओ से विसेसो। विसण्णो राया। चिन्तियं च तेणं–अचिन्ताओ पुरिससत्तीओ। कयाइ अन्नो वि कोइ सुसिद्धगारुडमन्तो नरिन्दो जीवावेइ त्ति। तो घोसावेमि ताव समन्तओ पडहगेहिं। जहा–अहो अज्ज चेव एत्थ रायपुत्तो [सुमङ्गलो नाम सो उज्जाणमुवगओ] अहिणा दट्ठो। जो तं जीवावेइ, सो जं चेव पत्थए तं चेव दिज्जइ त्ति चिन्तिऊण-आदिट्ठा

प्रहारं विमुक्तखड्गो निपतितो धरण्यां चण्डालः। भणितो धनेन–भद्र! मा मेऽनेनातिसंभ्रमेण हृदयं पीडय, अनुतिष्ठ राजशासनम्, नियोगकारी त्वमिति। चण्डालेन भणितम्–आर्य! न शक्नोमि असंपादितोपकारान्तरं (त्वां) प्रहर्तुम्, ततः किं ते प्रियतरं संपादयामीति, आज्ञापयत्वार्यः।

अत्रान्तरे राज्ञः प्रथमपुत्रः सुमङ्गलो नाम, स उद्यानमुपगतोऽहिना दष्टः। उग्रतया विषस्य स्तोकवेलायामेव प्रनष्टसंज्ञो जातः। आनीतो नरपतिसमीपम्। शब्दायिता गारुडिकाः, आगताश्च त्वरितत्वरितम्। दृष्टस्तैः। 'अहो! प्रनष्टा अस्य संज्ञा' इति विषण्णाः खल्वेते। प्रयुक्तानि मन्त्रौषधानि, न जातोऽस्य विशेषः। विषण्णो राजा। चिन्तितं च तेन–अचिन्त्याः पुरुषशक्तयः, कदाचिद् अन्योऽपि कश्चित् सुसिद्धगारुडमन्त्रो नरेन्द्रो (विषवैद्यः) जीवयतीति। ततो घोषयामि तावत्समन्तात् पटहकैः। यथा–'अहो! अद्यैवात्र राजपुत्रः [सुमङ्गलो नाम स उद्यानमुपगतो] अहिना दष्टः, यस्तं जीवयति स यदेव प्रार्थयते तदेव दीयते' इति चिन्तयित्वा आदिष्टाः

पाडहिगा पयट्टा नयरारामदेउलसहाइमग्गेहिं ॥

एत्थन्तरंमि आगओ एगो पाडहिगो तमुद्देसं। आयण्णिओ से सद्दो धणेण। जहा–अहिणा दट्ठो रायपुत्तो; जो तं जीवावेइ, सो जं चेव पत्थेइ तं चेव दिज्जइ त्ति। तओ सहरिसेण भणिओ चण्डालो। भद्द, जइ ते निब्बन्धो, ता एयं संपाडेहि। जीवावेमि ताव एयं भुयङ्गदट्ठं, पच्छा मारेज्जासि त्ति। हरिसिओ चण्डालो। चिन्तियं च तेण–जो मे सामिसुयं सयलनरिन्दपच्चक्खायं पि जीवाव इस्सइ, तं कहं दक्खिण्णमहोयही गुणेगन्तपक्खवाई महाराओ वावाइस्सइ ?। ता जीविओ खु एसो, कहं वा एस एवं विवज्जइस्सइ त्ति चिन्तिऊण तेण सद्दिओ पाडहिओ। साहिओ य वुत्तन्तो रायपुरिसस्स। तेण भणियं–भद्द, किमेत्थ सच्चयं, जं एस जंपइ ?। धणेण भणियं–अत्थि ताव मम पन्नगविसावहारी मन्तो। कज्जसिद्धीए उ देव्वो पमाणं। अविसओ खु एसो पुरिसयारस्स। तहावि पेच्छामि

पाटहिकाः, प्रवृत्ता नगरारामदेवकुलसभादिमार्गेषु।

अत्रान्तरे आगत एकः पाटहिकस्तमुद्देशम्। आकर्णितस्तस्य शब्दो धनेन। यथा–अहिना दष्टो राजपुत्रः, यस्तं जीवयति स यदेव प्रार्थयते तदेव दीयते इति। ततः सहर्षेण भणितश्चण्डालः। भद्र ! यदि ते निर्बन्धस्तत एतं संपादय। जीवयामि तावदेतं भुजङ्गदष्टं, पश्चाद् मारयेरिति। हर्षितश्चण्डालः। चिन्तितं च तेन। यो मे स्वामिसुतं सकलनरेन्द्र(विषवैद्य)प्रत्याख्यातमपि जीवयिष्यति तं कथं दाक्षिण्यमहोदधिर्गुणैकान्तपक्षपाती महाराजो व्यापादयिष्यति ?। ततो जीवितः खल्वेषः। कथं वा एष एवं विपत्स्यते इति चिन्तयित्वा तेन शब्दितो पाटहिकः। कथितश्च वृत्तान्तो राजपुरुषाय। तेन भणितम्–भद्र ! किमत्र सत्यम्, यदेष जल्पति ?। धनेन भणितम्–अस्ति तावन्मम पन्नगविषापहारी मन्त्रः। कार्यसिद्धौ तु दैवं प्रमाणम्। अविषयः खल्वेषः पुरुषकारस्य, तथाऽपि पश्यामि[2] तावदिति। राज-

---

१ विवज्जइत्ति क २ मन्त्रशक्तिमिति शेषः।

ताव त्ति। रायपुरिसेण चिन्तियं–अहो से अवत्थाणगरुओ आलावो अणुद्धओ य। ता अवस्सं जीवावेइ एस रायपुत्तं ति। मोयाविऊण नीओ नरवइसमीवं, दंसिओ राइणो, साहिओ वुत्तन्तो। तओ तं दट्ठूण चिन्तियमणेण–महाणुभावागिई खु एसो। ता कहं परदव्वावहारं करिस्सइ?। अहवा पुणो वियप्पिस्सामि, न एस वियारणाए समओ; विसमा गती विसस्स, मा अच्चाहियं मे भविस्सइ पुत्तयस्स त्ति चिन्तिऊण बाहजलभरियनयणेणं ईसिपरिक्खलन्तवयणेण भणिओ खु तेणं राइणा। भद्द, जीयावेहि मे सुयं ति। तओ धणेण भणियं–देव, मुञ्च विसायं, पेच्छ भयवओ मन्तस्स सामत्थं ति भणिऊण सुमरिओ मन्तो। अचिन्तसामत्थओ य तस्स वियम्भन्तवयणकमलो पसुत्तो व्व सुहनिद्दाखए उट्ठिओ कुमारो।

एत्थन्तरंमि समुद्धाइओ साहुवायकलयलो। परितुट्ठो राया, हरिसविसेसओ अणुचियं पि थेवयाए खित्तं धणस्स कडिसुत्तयं।

पुरुषेण चिन्तितम्–अहो! तस्यावस्थानगुरुक आलापोऽनुद्धतश्च। ततोऽवश्यं जीवयत्येष राजपुत्रमिति मोचयित्वा नीतो नरपतिसमीपम्। दर्शितो राज्ञे, कथितो वृत्तान्तः। ततस्तं दृष्ट्वा चिन्तितमनेन। महानुभावाकृतिः खल्वेष, ततः कथं परद्रव्यापहारं करिष्यति?। अथवा पुनर्विकल्पयिष्ये, न एष विचारणायाः समयः, विषमा गतिर्विषस्य, मा अत्याहितं भविष्यति मे पुत्रस्येति चिन्तयित्वा बाष्पजलभृतनयनेन ईषत्परिस्खलद्वचनेन भणितः खलु तेन राज्ञा। भद्र! जीवय मे सुतमिति। ततो धनेन भणितम्–देव! मुञ्च विषादम्, पश्य भगवतो मन्त्रस्य सामर्थ्यमिति भणित्वा स्मृतो मन्त्रः। अचिन्त्यसामर्थ्यतश्च तस्य विजृम्भमाणवदनकमलः प्रसुप्त इव सुखनिद्राक्षये उत्थितः कुमारः।

अत्रान्तरे समुद्धावितः साधुवादकलकलः। परितुष्टो राजा, हर्षविशेषतोऽनुचितमपि कल्यां क्षिप्तं धनस्य कटिसूत्रम्। स्पृष्टं च

---

१ बाहुल्लोयणेण क। २ •वेयण क। ३ पेच्छह क।

वरिसियं च देवीहिं आहरणवरिसं । धणेण भणियं–महाराय, किमणेणं ति । राइणा भणियं–भद्द, भण, किं ते अवरं संपाडीयउ ? । धणेण भणियं–देव, अलमणेण । इमं पुण संपाडेउ देवो तस्स वहनिओगकारिणो अचण्डालभावस्स चण्डालाभिहाणस्स समीहियं मणोरहं ति । राइणा चिन्तियं–अहो से गरुयया । न ईइसो विसुद्धसत्तजुत्तो अकज्जं समायरइ । ता को उण एसो ? । पुच्छामि एयं । अहवा संपाडेमि ताव एयस्स समीहियं, पुणो पुच्छिस्सं ति चिन्तिऊण भणियं राइणा–सद्दावेह चण्डालं, पुच्छह य, को से मणोरहो ? । तओ गओ पडिहारो, पुच्छिओ य तेण । अरे खड्गिलय, परितुट्ठो ते राया, अहवा रायपुत्तजीवियदायगो नरिन्दचूडामणी; ता भण, किं ते करीयउ त्ति ? । तओ खड्गिलेण चिन्तियं–नत्थि अग्घो सज्जणचरियस्स, न याऽविसओ महाणुभावयाए त्ति चिन्तिऊण भणियं–भद्द, अवि मुक्को सो देवेणं नरिन्दचूडामणी ? । तेण भणियं–अरे खड्गिलय, को एत्थ संदेहो ? । कयन्नुसेहरयभूओ देवो, ता भण समीहियं । तेण भणियं–जइ एवं, ता करेउ देवो पसायं; अलं अम्हाणं इमीए बुहजणगरहणिज्जाए उभयलोयविरुद्धाए

देवीभिराभरणवर्षम् । धनेन भणितम्–महाराज ! किमनेनेति । राज्ञा भणितम्–भद्र ! भण किं तेऽपरं संपाद्यताम् । धनेन भणितम्–देव ! अलमनेन । इमं पुनः संपादयतु देवस्तस्य वधनियोगकारिणोऽचण्डालभावस्य चण्डालाभिधानस्य समीहितं मनोरथमिति । राज्ञा चिन्तितम्–अहो ! तस्य गुरुकता, न ईदृशो विशुद्धसत्त्वयुक्तोऽकार्यं समाचरति । ततः कः पुनरेषः ? पृच्छाम्येतम् । अथवा संपादयामि तावदेतस्य समीहितम्, पुनः प्रक्ष्यामि–इति चिन्तयित्वा भणितं राज्ञा । शब्दयत चण्डालम्, पृच्छत च, कस्तस्य मनोरथः ? ततो गतः प्रतीहारः, पृष्टश्च तेन । अरे खड्गिलक ! परितुष्टस्तव राजा, अथवा राजपुत्रजीवितदायको नरेन्द्रचूडामणिः, ततो भण, किं ते क्रियतामिति ? । ततः खड्गिलकेन चिन्तितम्–नास्ति अर्घः सज्जनचरितस्य, न चाविषयो महानुभावताया इति चिन्तयित्वा भणितम्–अपि मुक्तः स देवेन नरेन्द्र(विपवैद्य)चूडामणिः ? । तेन भणितम्–अरे खड्गिलक ! कोऽत्र संदेहः ? कृतज्ञशेखरभूतो देवः, ततो भण समीहितम् ।

जीविगाए त्ति। पडिहारेण भणियं–अरे दव्वजायं पत्थेहि, किं इमेणं। खङ्गिलेण भणियं–अओ वि अवरं दव्वजायं ति?। तओ पडिसोऊण निवेइयं पडिहारेण राइणो। भणियं च राइणा–अहो से विवेगो अलोभया य। धणेण भणियं–देव, जाइमेत्तचण्डालो खु एसो महाणुभावो; ता करेउ एयस्स ववसियं देवो त्ति। राइणा भणियं–भद्द, कतं चेव एयं; इमं पुण से अवरं, देउ भद्दो सहत्थेण एयस्स दीणारलक्खं चण्डालकुडुम्बसहस्सवासिणिं विञ्झवासिणिं च पट्टणस्स अवरबाहिरियं ति। तओ धणेण भणियं 'जं देवो भणइ' त्ति। पडिवज्जिऊण संपाडियं रायसासणं ति। तुट्ठो खङ्गिलगो न तहा वित्तलाहेण जहा धणजीविएण॥

तओ धणमुवचरिऊण भणियं राइणा। भद्द, ववसायाओ चेव अवगओ ते सुकुलजम्मो। ता किन्निवासिणं किन्नामधेयं वा भवन्तमवगच्छामि?। तओ 'परसन्तिया रयणावली, तहावि गहिया, अहो मे सुकुलजम्मो' त्ति सरिऊण विमुक्कदीहनीसासं लज्जावण-

तेन भणितम्–यद्येवं ततः करोतु देवः प्रसादम्। अलमस्माकमनया बुधजनगर्हणीयया उभयलोकविरुद्धया जीविकयेति। प्रतीहारेण भणितम्–अरे द्रव्यजातं प्रार्थयस्व, किमनेन? खड्गिलेन भणितम्–अतोऽपि अपरं द्रव्यजातमिति?। ततः प्रतिश्रुत्य निवेदितं प्रतीहारेण राज्ञे। भणितं च राज्ञा–अहो! तस्य विवेको अलोभता च। धनेन भणितम्–देव! जातिमात्रचण्डालः खलु एष महानुभावः, ततः करोतु एतस्य व्यवसितं देव इति। राज्ञा भणितम्–भद्र! कृतमेवैतत्। इदं पुनस्तस्यापरम्, ददातु भद्रः स्वहस्तेन एतस्मै दीनारलक्षं चण्डालकुटुम्बसहस्रवासिनीं विन्ध्यवासिनीं च पत्तनस्य अपरबाह्यां(भूमिम्–)इति। ततो धनेन भणितं 'यद् देव आज्ञापयति' इति प्रतिपद्य संपादितं राजशासनमिति। तुष्टः खड्गिलको न तथा वित्तलाभेन यथा धनजीवितेन।

ततो धनमुपचर्य भणितं राज्ञा। भद्र! व्यवसायादेव अवगतं ते सुकुलजन्म, ततः किन्निवासिनं किन्नामधेयं वा भवन्तमवगच्छामि?

१ ॰मुरि्तऊण क

पवयणेण भणियं धणेणं । देव, कीइसो अकज्जयारिणो ववसाओ, को वा एत्थ दोसो सुकुलस्स ?। किं न संभवन्ति लच्छिनिलएसु कमलेसु किमओ ?। वाणियओ अहयं जाइमेत्तेण, न उण सीलेणं, सुसम्मनयरवासी धणाभिहाणो य । तओ राइणा 'अहो मे धन्नया, जं न एयं पुरिसरयणं विणासियं' ति चिन्तिऊण भणियं । कहं तएजारिसा अकज्जयारिणो हवन्ति ?। ता कहेहि परमत्थं, कहं तुमए एसा रयणावली पाविय त्ति ? ॥

एत्थन्तरंमि य ससंभममुवसप्पिऊण विन्नत्तं महापडिहारीए । देव, एसा खु मणोरमाभिहाणा उज्जाणवालिया रायधूयावयणाओ वहणभङ्गेण विउत्तपरियणा देवं विन्नवेइ । जहा–देव, इओ गच्छन्ताणं अम्हाणं समुद्दमज्झंमि तक्खणा चेव चण्डमारुयपणोल्लियं इत्थियाहियए व्व गुज्झं फुट्टं जाणवत्तं ति । तओ य देवस्स पहावेणं तहाविहफलगलाभसंपाइयपाणवित्ती जीविया रायधूया विणयवई । संपत्ता य कहंचि नियभायधेएहिं नयरिमिमीए । मेहवणसंठियाए पेसिया अहं, जहा विन्नवेहि एयं वुत्तन्तं तायस्स । एयं सुणिऊण

ततः परसत्का रत्नावली, तथाऽपि गृहीता, अहो ! मे सुकुलजन्म' इति स्मृत्वा विमुक्तदीर्घनिःश्वासं लज्जाऽवनतवदनेन भणितं धनेन । देव ! कीदृशोऽकार्यकारिणो व्यवसायः, को वाऽत्र दोषः सुकुलस्य ? किं न संभवन्ति लक्ष्मीनिलयेषु कमलेषु कृमयः । वाणिजकोऽहं जातिमात्रेण न पुनः शीलेन, सुशर्मनगरनिवासी धनाभिधानश्च । ततो राज्ञा 'अहो मे धन्यता, यन्नैतत् पुरुषरत्नं विनाशितम्' इति चिन्तयित्वा भणितम्–कथं त्वया सदृशा अकार्यकारिणो भवन्ति ? ततः कथय परमार्थम्, कथं त्वयैषा रत्नावली प्राप्तेति ? ।

अत्रान्तरे च ससंभ्रममुत्सर्प्य विज्ञप्तं महाप्रतीहार्या । देव ! एषा खलु मनोरमाभिधाना उद्यानपालिका राजदुहितृवचनाद् वहनभङ्गेन वियुक्तपरिजना देवं विज्ञपयति । यथा–देव ! इतो गच्छतामस्माकं समुद्रमध्ये तत्क्षणादेव चण्डपवनप्रणोदितं स्त्रीहृदये इव गुह्यं स्फुटितं यानपात्रमिति । ततश्च देवस्य प्रभावेन तथाविधफलकलाभसंपादितप्राणवृत्तिर्जीविता राजदुहिता विनयवती । संप्राप्ता च

देवो पमाणं ति। तओ ससंभन्तो 'इमीए चेव रयणावलीवुत्तन्तमुवलभिस्सं'ति उट्ठिओ राया, पयट्टो य मेहवणं, पत्तो य महया चडगरेणं। दिट्ठा य रायधूया। अलंकारेऊण य पवेसिया सावत्थिं। पुच्छिया य रयणावलीवुत्तन्तं। साहिओ य तीए। जहा–तंमि वहणभङ्गदियहे चूयलइयाए समप्पिया संगोविया य तीए उत्तरीयबन्धणेण। तओ य विवन्ने जाणवत्ते कायन्तवसविउत्ते य परियणे न याणामि कीइसो से विपरिणामो त्ति। तओ राइणा धणमवलोइऊण भणियं–भद्द, कहं तुह एसा हत्थगोयरं गय त्ति?। धणेण भणियं–देव, समुद्दतीरे सयं गहणेणं ति। राइणा चिन्तियं–विवन्ना चूयलइया, कहमन्नहा सयं गहणं ति। भणियं च–भद्द, अवि दिट्ठं तए तत्थ किंचि कङ्कालपायं ति। धणेण भणियं–देव, दिट्ठं; अओ चेव परदव्वावहारेण अकज्जकारिणमप्पाणं मन्नेमि त्ति। राइणा भणियं–न एरिसं परदव्वावहरणं गिहिणो; ता अलमईयवत्थुचिन्तणेणं। भण, किं ते करेमि त्ति?। धणेण भणियं–कयं देवेण कर-

---

कथंचिद् निजभागधेयैर्नगरीसमीपम्। मेघवनसंस्थितया प्रेषिताऽहम्, यथा विज्ञपय एतं वृत्तान्तं तातस्य। एतच्छ्रुत्वा देवः प्रमाणमिति। ततः ससंभ्रान्तः 'अनयैव रत्नावलीवृत्तान्तमुपलप्स्ये' इत्युत्थितो राजा, प्रवृत्तश्च मेघवनम्, प्राप्तश्च महता चटकरेण (वेगेन)। दृष्टा च राजदुहिता। अलंकार्य च प्रवेशिता श्रावस्तीम्। पृष्टा च रत्नावलीवृत्तान्तम्। कथितश्च तया। यथा–तस्मिन् वहनभङ्गदिवसे चूतलतिकायै समर्पिता, संगोपिता च तयोत्तरीयबन्धनेन। ततश्च विपन्ने यानपात्रे कृतान्तवशवियुक्ते च परिजने न जानामि कीदृशस्तस्य विपरिणाम इति। ततो राजा धनमवलोक्य भणितम्–भद्र! कथं तवैषा हस्तगोचरं गतेति?। धनेन भणितम्–देव! समुद्रतीरे स्वयं ग्रहणेनेति। राजा चिन्तितम्–विपन्ना चूतलतिका, कथमन्यथा स्वयंग्रहणमिति। भणितं च–भद्र! अपि दृष्टं त्वया तत्र किञ्चित्कङ्कालप्रायमिति? धनेन भणितम्–देव! दृष्टम्, अत एव परद्रव्यापहारेणाकार्यकारिणमात्मानं मन्ये इति। राजा भणितम्–नेदृशं परद्रव्यापहरणं गृहिणः, ततोऽलमतीतवस्तुचिन्तनेन। भण, किं तव करोमीति? धनेन भणितम्–कृतं देवेन करणीयम्, यत् तस्य

णिज्जं, जं तस्स निओगकारिणो समीहियब्भहियमणोरहापूरणं ति। राइणा भणियं–भद्द, किं तेण; थेवं खु तं तस्स वि समिक्खि-यकारिणो चेट्ठियस्स, किमङ्ग पुण भवओ जीवियब्भहियसुयजीवियदायगस्स। धणेण भणियं–देवदंसणाओ वि अवरं करणिज्जं ति?। देव, संपुण्णा मे मणोरहा देवदंसणेणं ति। तओ राइणा दाऊणमणग्घेयं नियमाहरणं विइण्णपच्चइयनरसहाओ पेसिओ सुसम्म-नयरं। तओ आपुच्छिऊण नरवइं निग्गओ सह रायपुरिसेहिं धणो॥

पत्तो य कइवयदियहेहिं गिरिथलयं नाम पट्टणं। तत्थ वि य तंमि चेय दियहे राइणो चण्डसेणस्स मुट्ठं सव्वसारं नाम भण्डा-गारभरणं। तओ आउलीहूया नायरया नगरारक्खिया य। गवेसिज्जन्ति चोरा, मुद्दिज्जन्ति भवणवीहीओ, परिक्खिज्जन्ति आगन्तुगा। एयन्तरंमि य संपत्तमेत्ता चेव गहिया इमे रायपुरिसेहिं, भणिया य तेहिं। भद्दा, न तुब्भेहिं कुप्पियव्वं। साहिओ वुत्तन्तो। तेहिं भणियं–को एस अवसरो कोवस्स? तेहिं वच्चामो जत्थ तुब्भे नेह त्ति। नीया पञ्चउलसमीवं, पुच्छिया पञ्चउलिएहिं 'कओ तुब्भे'

नियोगकारिणः समीहिताभ्यधिकमनोरथापूरणमिति। राज्ञा भणितम्–भद्र! किं तेन? स्तोकं खलु तत् तस्यापि समीक्षितकारिणश्चे-ष्टितस्य, किमंग पुनर्भवतो जीविताभ्यधिकसुतजीवितदायकस्य। धनेन भणितम्–देवदर्शनादपि अपरं करणीयमिति? देव! संपूर्णा मे मनोरथा देवदर्शनेनेति। ततो राज्ञा दत्त्वाऽनर्घ्यं निजकमाभरणं वितीर्णप्रत्ययितनरसहायः प्रेषितः सुशर्मनगरम्। तत आपृच्छ्य नरपतिं निर्गतः सह राजपुरुषैर्धनः।

प्राप्तश्च कतिपयदिवसैर्गिरिस्थलं नाम पट्टनम्। तत्रापि च तस्मिन्नेव दिवसे राज्ञश्चण्डसेनस्य मुष्टं सर्वसारं नाम भाण्डागारभवनम्। तत आकुलीभूता नागरका नगरारक्षकाश्च। गवेष्यन्ते चौराः, मुद्र्यन्ते भवनवीथयः, परीक्ष्यन्ते आगन्तुकाः। अत्रान्तरे च संप्राप्तमात्रा

१ एइ ग

त्ति ? । तेहिं भणियं–'सावत्थीओ' । कारणिएहिं भणियं–'कहिं गमिस्सह'त्ति ? । तेहिं भणियं–'सुसम्मनयरं' । कारणिएहिं भणियं–'किंनिमित्तं'त्ति ? । तेहिं भणियं–नरवइसमाएसाओ एयं सत्थवाहपुत्तं गेण्हिउं ति । कारणिएहिं भणियं–अत्थि तुम्हाणं किंचि दविण-जायं ? । तेहिं भणियं–'अत्थि' । कारणिएहिं भणियं 'किं तयं'ति ? । तेहिं भणियं–इमस्स सत्थवाहपुत्तस्स नरवइवितिण्णं रायालंकरणयं ति । कारणिएहिं भणियं–पेच्छामो ताव 'केरिसं ? । तओ विसुद्धचित्तयाए दंसियं । पच्चभिन्नायं भण्डारिएण । भणियं च तेण–एयं पि देवसन्तियं चेव कालन्तरावहरियं रायालंकरणयं ति । तओ संखुद्धा ते पुरिसा पुच्छिया य पञ्चउलेण । भद्दा, अवितहं कहेह, कओ तुम्हाणमेयं ? । तेहिं भणियं–किमन्नहा तुम्हाणं निवेईयइ ? । तओ कारणिएहिं निवेइओ एस वुत्तन्तो चण्डसेणस्स । 'सो चेव मे राया सव्वमेयं कारवेइ' त्ति कुविओ एसो । नेयाविया इमे चारयं; 'पावियव्वो एएसिं सयासाओ सव्वो अत्थो' त्ति

पथ गृहीता इमे राजपुरुषैः, भणिताश्च तैः । भद्रा ! न युष्माभिः कुपितव्यम् । कथितो वृत्तान्तः । तैर्भणितम्–क पवोऽवसरः कोपस्य ? तत्र व्रजामो यत्र यूयं नयतेति । नीताः पञ्चकुलसमीपम् । पृष्टाश्च पञ्चकुलिकैः 'कुतो यूयम्'–इति । तैर्भणितम्–'श्रावस्तीतः' । कारणिकैर्भणितम्–'कुत्र गमिष्यथ' इति ? । तैर्भणितम्–'सुशर्मनगरम्' । कारणिकैर्भणितम्–'किंनिमित्तम्'–इति ? तैर्भणितम्–नरपतिसमादेशात् सार्थवाहपुत्रं ग्रहीतुमिति । कारणिकैर्भणितम्–अस्ति युष्माकं किंचिद् द्रविणजातम् ? तैर्भणितम्–'अस्ति' । कारणिकैर्भणितम्–'किं तद्' इति ? तैर्भणितम्–अस्य सार्थवाहपुत्रस्य नरपतिवितीर्णं राजाऽलंकरणमिति । कारणिकैर्भणितम्–प्रेक्षामहे तावत् कीदृशम् ? ततो विशुद्धचित्ततया दर्शितम् । प्रत्यभिज्ञातं भाण्डागारिकेन । भणितं च तेन–एतदपि देवसत्कमेव कालान्तरापहृतं राजाऽलंकरणमिति । ततः संक्षुब्धास्ते पुरुषाः पृष्टाश्च पञ्चकुलेन । भद्रा ! अवितथं कथयत, कुतो युष्माकमेतत् ? । तैर्भणितम्–किमन्यथा युष्माकं निवेद्यते ?

---

१ कीदृशं क

पराचिया पयत्तेण ॥

तहिं च परमदुक्खिया जाव कइवयदियहे परिवसन्ति, ताव तत्थेव रायपुरिसेहिं परिव्वायगरूवधारी रयणीए परिब्भमन्तो सरित्थो चेव गहिओ महाभुयङ्गो त्ति। नीओ मन्तिसमीवं। तेण वि य 'लिङ्गधारी चोरियं करेइ त्ति, नत्थि से अन्नं पि अकरणिज्जं' ति कलिऊण वज्झो समाणत्तो।

रायपुरिसेहि तणमसिगेरुयभूईविलित्तसव्वङ्गो। कोसियमालाभूसियसिरोहरो विगयवसणो य ॥
निहिउत्तमङ्गकणवीरदामलम्बन्तभासुरालोओ। छित्तरकयायवत्तो उब्भडसियरासहारूढो ॥
डिण्डिमयसद्दमेलियबहुजणपरिवारिओ य सो नवरं। दक्खिणदिसाए नीओ भीमं अह वज्झथाणं ति ॥

ततः शबरसिंहेननिवेदित एव वृत्तान्तश्चण्डसेनाय। 'स एव मम राजा सर्वमेतत् कारयति' इति कुपित एवः। नायिता इमे चारकम्, 'प्रापयितव्य एतेषां सकाशात् सर्वोऽर्थः' इति धारिताः प्रयत्नेन ॥

तत्र च परमदुःखिता यावत् कतिपयदिवसान् परिवसन्ति, तावत् तत्रैव राजपुरुषैः परिव्राजकरूपधारी रजन्यां परिभ्रमन् सरिक्थ एव गृहीतो महाभुजङ्ग इति। नीतो मन्त्रिसमीपम्। तेनापि च 'लिङ्गधारी चौर्यं करोति इति नास्ति तस्य अन्यदपि अकरणीयम्' इति कल्पयित्वा वध्यः समाज्ञप्तः ॥

राजपुरुषैस्तृणमषीगैरिकभूतिविलिप्तसर्वाङ्गः। कौशिकमालाभूषितशिरोधरो विगतवसनश्च ॥
निहितोत्तमाङ्गकणवीरदामलम्बमानभासुरालोकः। छित्तर(शूर्प)कृतातपत्र उद्भटसितरासभारूढः ॥
डिण्डिमकशब्दमेलितबहुजनपरिवारितश्च स नवरम्। दक्षिणदिशि नीतो भीममथ वध्यस्थानमिति ॥

नीससिऊण सुदीहं सविलयमह पेच्छिऊण य जणोहं। परिचिन्तियं च तेणं कहमलियं होइ मुणिवयणं ॥
एण्हिं पि मज्झ जुत्तं गहियं जं जस्स सन्तियं रित्थं। साहेमि तयं सव्वं धरणिगयं तस्स किं तेणं ॥
इय चिन्तिऊण भणिया तेणं नरणाहसन्तिया पुरिसा। मोत्तूण मं न मुट्ठं थाणमिणं केणइ निरुत्तं ॥
सव्वं च तयं दव्वं चिट्ठइ एत्थेव नवर थाणंमि। आरामसुन्नदेउलगिरिनदितीरेसु धरणिगयं ॥
घेत्तूण य तं तुब्भे अप्पेह जणस्स जस्स जं तणयं। सिट्ठे मए सचिण्हं पच्छा मारेज्जह ममं ति ॥
सिट्ठं च तओ सव्वं सपच्चयं जं जओ जया गहियं। चिट्ठइ य जत्थ देउलगिरिनदितीराइसु तहेव ॥
गन्तूण तेहि वि तओ सिट्ठममच्चस्स सव्वमेयं तु। जोणावियं च तेण वि पच्चइयनरेहि तं दव्वं ॥

निःश्वस्य सुदीर्घं सव्यलीकमथ प्रेक्ष्य च जनौघम्। परिचिन्तितं च तेन कथमलीकं भवति मुनिवचनम् ॥
इदानीमपि मम युक्तं गृहीतं यद् यस्य सत्कं रिक्थम्। कथयामि तत् सर्वं धरणीगतं तस्य किं तेन ॥
इति चिन्तयित्वा भणितास्तेन नरनाथसत्काः पुरुषाः। मुक्त्वा मां न मुष्टं स्थानमिदं येनचिन्निरुक्तम् ॥
सर्वं च तद् द्रव्यं तिष्ठति अत्रैव नवरं स्थाने। आरामशून्यदेवकुलगिरिनदीतीरेषु धरणीगतम् ॥
गृहीत्वा च तद् यूयमर्पयत जनस्य यस्य यद् सत्कम्। शिष्टे मया सचिह्नं पश्चाद् मारयत मामिति ॥
शिष्टं च ततः सर्वं सप्रत्ययं यद् यतो यदा गृहीतम्। तिष्ठति च यत्र देवकुलगिरिनदीतीरादिपु तथैव ॥
गत्वा तैरपि ततः शिष्टममात्यस्य सर्वमेतत्तु। दर्शितं च तेनापि प्रत्ययितनरैस्तत् सर्वम् ॥

---

१ सदीह क। २ तत्थ क। ३ ठाणमि ग।

दिट्ठं च निरवसेसं सिट्ठं जं जंमि जंमि थाणंमि । पुव्वगहिएण रहियं रायालंकारदव्वेणं ॥

दट्ठूण य तं दव्वं चिन्ता मन्तिस्स नवरमुप्पन्ना । पुव्वगहिएहि पत्तं तं दव्वं अन्नहा कहवि ॥

एयं चिन्तिऊणं सो परिवायगरूवधारी भुयङ्गो । करुणापवन्नेण मन्तिणा सद्दाविऊण सविणयं भणिओ त्ति ।

वेसग्गहावविरुद्धेण तुज्झ चरिएण विम्हओ मज्झ । साहेहि ता फुडत्थं किमेयमवरोप्परविरुद्धं ॥

एयं च भणियमेत्तेण भणियं परिव्वायएण । नत्थि खलु विसयलुद्धाणमवरोप्परविरुद्धं ति । अवि य–

जणणिजणयाण सुकयं न गणेन्ति न बन्धुमित्तसामीणं । विसयविसमोहियमणा पुरिसा परलोगमग्गं च ॥

एयं च सिट्ठमेत्ते भणियममच्चेण जुज्जए एयं । विन्नाणदरिद्दाणं न उणो तुमए सरिच्छाणं ॥

दृष्टं च निरवशेषं शिष्टं यद् यस्मिन् यस्मिन् स्थाने । पूर्वगृहीतेन रहितं राजालंकारद्रव्येण ॥

दृष्ट्वा च तद् द्रव्यं चिन्ता मन्त्रिणो नवरमुत्पन्ना । पूर्वगृहीतैः प्राप्तं तद् द्रव्यं अन्यथा कथमपि ॥

एवं च चिन्तयित्वा परिव्राजकरूपधारी भुजङ्गः । करुणाप्रपन्नेन मन्त्रिणा शब्दयित्वा सविनयं भणित इति ।

वेषस्वभावविरुद्धेन तव चरितेन विस्मयो मम । कथय ततः स्फुटार्थं किमेतद् अपरापरविरुद्धम् ॥

एवं च भणितमात्रेण भणितं परिव्राजकेन । नास्ति खलु विषयलुब्धानामपरापरविरुद्धमिति । अपि च—

जननीजनकानां सुकृतं न गणयन्ति न बन्धुमित्रस्वामिनाम् । विषयविषमोहितमनसः पुरुषाः परलोकमार्गं च ॥

एवं च शिष्टमात्रे भणितममात्येन युज्यते एतत् । विज्ञानदरिद्राणां न पुनस्त्वया सदृशानाम् ॥

---

१ एयं च चिन्तिऊणं परिव्वायगरूवधारणभुयङ्गो । करुणापवन्नचित्तेण मन्तिणा सविणयं भणिओ ॥ इति ख-ग पुस्तके

ता साहेहि अवितहं परधणगहणस्स कारणं मज्झ । सयलाणुवालणस्स य हिरियं मोत्तूण किं बहुणा ॥

एवं च भणिए भणियं परिव्वायएण ।

निसुणसु अवहियमणसो वुत्तन्तं मज्झ पुच्छिओ जो ते । तह साहेमि फुडत्थं जह कहियं ओहिनाणेणं ॥

अत्थि इहेव भरहंमि पुण्डो नाम जणवओ। तंमि अमरावइसरिसं पुण्डवद्धणं नाम नयरं। तत्थ अग्गिवेसायणसगोत्तो सोमदेवो नामं माहणो । तस्स सुओ नारायणाभिहाणो अहं ति । तंमि नयरे 'जीवघाएण सग्गो' त्ति कुमत्थं परूवेन्तो चिट्ठामि जाव केइ पुरिसा समन्तओ वुण्णनयणतरलच्छं पलोएमाणा चोर त्ति कलिऊण वज्झा निज्जन्ति । ते य दट्ठूण भणियं मए 'घाएह एए महाभुयङ्गे' त्ति । तओ तं मम वयणं सोऊण एक्केण साहुणा समुप्पन्नोहिनाणेण नाइदूरट्ठिएणेव जंपियमहो कट्ठमन्नाणं ति । तं च मे साहुवयणं सोऊण समुप्पन्ना चिन्ता । किमेएण मं उद्दिसिऊण पसन्तरूवेणावि एवं जंपियं ति । तओ सो मए चलणेसु निवडिऊण

ततः कथय अवितथं परधनग्रहणस्य कारणं मम । सकलानुपालनस्य च ह्रियं मुक्त्वा किं बहुना ॥

एवं च भणिते भणितं परिव्राजकेन—

निशृणु अवहितमना वृत्तान्तं मम पृष्टो यस्त्वया । तथा कथयामि स्फुटार्थं यथा कथितमवधिज्ञानेन ॥

अस्ति इहैव भारते पुण्ड्रो नाम जनपदः । तस्मिन् अमरावतीसदृशं पुण्ड्रवर्धनं नाम नगरम् । तत्राग्निवेश्यायनसगोत्रः सोमदेवो नाम ब्राह्मणः । तस्य सुतो नारायणदेवाभिधानोऽहमिति । तस्मिन् नगरे 'जीवघातेन स्वर्गः' इति कुशास्त्रं प्ररूपयन् तिष्ठामि, यावत् केचित् पुरुषाः समन्ततस्त्रस्तनयनतरलाक्षं प्रलोकमानाः 'चोरः'-इति कलयित्वा वध्या नीयन्ते । तांश्च दृष्ट्वा भणितं मया 'घातयत एतान् महाभुजङ्गान्'-इति । ततस्तद् मम वचनं श्रुत्वा एकेन साधुना समुत्पन्नावधिज्ञानेन नातिदूरस्थितेनैव जल्पितम्-अहो कष्टमज्ञानम्' । तच्च

पुच्छिओ 'भयवं, किमन्नाणं' ति। तेण कहियं-सव्वसत्ताणमसन्ताहिओयदाणं विरुद्धोवएसो य। मए भणियं-को असन्ताहिओ-ओ, को वा विरुद्धोवएसो त्ति?। साहुणा भणियं-जमेए पुव्वकयकम्मपरिणइवसेण वसणपत्ते निरवराहे वि महासुयङ्गे त्ति अहिलवसि, एस असन्ताहिओओ; जओ सच्चं पि परपीडाकरं न वत्तव्वं ति। एसा य वो सुती पइयपइयाभिहाणे चोरचोरभणणे य तत्तुल्लदोसया, सईभूया[ए] वि सयासुद्धसहावा[ए] वि असइपयाभिहाणे अचोरचोरभणणेण य मिच्छाभिहाणाओ दुगुणो दोसो त्ति। जं पुण 'जीव-घाएण सग्गो' त्ति परूवेसि एस विरुद्धोवएसो; जओ न जीवघाओ परलोए सुहफलओ होइ। भणियं च सयलेहिं तित्थनायगेहिं। न हिंसियव्वाणि सव्वभूयाणि। अहवा-

मे साधुवचनं श्रुत्वा समुत्पन्ना चिन्ता। किमेतेन मामुद्दिश्य प्रशान्तरूपेणापि एतज्जल्पितमिति। ततः स मया चरणयोर्निपत्य पृष्टः-भगवन्! किमज्ञानमिति। तेन कथितम्-सर्वसत्त्वानामसदभियोगदानं विरुद्धोपदेशश्च। मया भणितम्-कोऽसदभियोगः को वा विरुद्धो-पदेश इति? साधुना भणितम्-यद् एतान् पूर्वकृतकर्मपरिणतिवशेन व्यसनप्राप्ते निरपराधेऽपि 'महाभुजङ्गान्' इति अभिलपसि, एषोऽ-सदभियोगः। यतः सत्यमपि परपीडाकरं न वक्तव्यमिति। एषा च वः श्रुतिः-पतितपतिताभिधाने चौरस्य चौरभणने च तत्तुल्यदोषता। सतीभूताया अपि सदाशुद्धस्वभावाया अपि असतीपदाभिधाने अचौर(स्य)चौरभणनेन च मिथ्याभिधानाद् द्विगुणो दोष इति। यत्पुनर् 'जीवघातेन स्वर्गः'-इति प्ररूपयसि एष विरुद्धोपदेशः, यतो न जीवघातः परलोके शुभफलदो भवति। भणितं च सकलैः तीर्थनायकैः-'न हिंसितव्यानि सर्वभूतानि। अथवा-

१ ०भिहाणे उ क

जो कोहेण ऽभिभूओ घायइ जीवे सया निरणुकम्पो। सो भवचारगवासं पुणो पुणो पावए बहुसो ॥

अवि य–

जम्मन्तरदिन्नस्स य फलसेसमिहेव पाविहिसि जम्मे। थेवदियहेहि बालय नवरमसन्ताहिओगस्स ॥

मए भणियं–भयवं, केरिसो जम्मन्तरविइण्णो असन्ताहिओगो, केरिसं वा तस्स फलमणुहूयं मए, केरिसं वा फलसेसं ति?। साहुणा भणियं–वच्छ सुण।

अत्थि इहेव भारहे वासे उत्तरावहे विसए गज्जणयं नाम पट्टणं। तत्थ आसाढो नाम माहणो। रुच्छुया से भारिया। ताणं इओ अतीयपञ्चमभवंमि चण्टदेवाभिहाणो[1] पुत्तो तुमं आसि। काराविओ वेयज्झयणं, सुणाविओ सत्थाइं आसाढेण। समुप्पन्नो ते विन्ना-

---

यः क्रोधेनाभिभूतो घातयति जीवान् सदा निरनुकम्पः। स भवचारकवासं पुनः पुनः प्राप्नोति बहुशः ॥

अपि च—

जन्मान्तरदत्तस्य च फलशेषमिहैव प्राप्स्यसि जन्मनि। स्तोकदिवसैर्बालक! नवरमसदभियोगस्य ॥

मया भणितम्–भगवन्! कीदृशो जन्मान्तरवितीर्णोऽसदभियोगः, कीदृशं वा तस्य फलमनुभूतं मया, कीदृशं वा फलशेषमिति?। साधुना भणितम्–शृणु।

अस्ति इहैव भारते वर्षे उत्तरापथे विषये गज्जनकं नाम पत्तनम्। तत्राषाढो नाम ब्राह्मणः। रुच्छुका तस्य भार्या। तयोरितोऽतीत पञ्चमभवे चण्डदेवाभिधानः पुत्रस्त्वमासीः। कारितो वेदाध्ययनम्, श्रावितः शास्त्राणि आषाढेन। समुत्पन्नस्ते विद्याभिमानः। स्थितो

---

१ चन्ददेवा० क

हिमाणो । ठिओ गज्जणयसामिणो वीरसेणस्स समीवे, संपूइओ तेण, विइण्णं जीवणं, बहु मन्नए राया। अइक्कन्तो कोइ कालो । अन्नया य तंमि चेव नयरे परिव्वायगभत्ता विणीयसेट्ठिस्स धूया बालविहवा वीरमई नाम; सा य अविवेयबहुलयाए इत्थियाणं दुज्जययाए मोहस्स अहिलसणीययाए विसयाणं वियारकुलहरयाए जोव्वणस्स अणवेक्खिऊण नियकुलं अणालोचिऊण आयइं तन्नयरिवत्थव्वग सीहलाभिहाणेण मालागारेण समं पवसिय त्ति । इओ य तंमि चेव दियहे तीसे चेव पूयणिओ समसमयायारपरिवालणरई जोगप्पा नाम परिव्वायगो, सो निस्सङ्गयाए पव्वइयगाणं कज्जाभावेण य संसियव्वस्स अणाइक्खिऊण कस्सइ थाणेसरं गओ त्ति । जाओ य लोयवाओ 'अहो वीरमई पवसिय' त्ति । विन्नायं च तुमए परिव्वाययगमणं । तओ असुद्धयाए आसयस्स विचित्तचरिययाए सत्ताणं समुप्पन्ना ते चिन्ता । नूणं सा जोयप्पणा सह पवसिया भविस्सइ ॥ अन्नया पवत्ता रायकुले कहा, जहा विणीयसेट्ठिस्स धूया न याणिज्जइ कहिं पवसिय त्ति ? । तओ तए उज्झिऊण सत्थायारं अवलम्बिऊण इयरपुरिसमग्गं अणवेक्खिऊण अत्तणो लहुययं[1]

गज्जनकस्वामिनो वीरसेनस्य समीपे, संपूजितस्तेन, वितीर्णं जीवनम्, बहु मन्यते राजा । अतिक्रान्तो कोऽपि कालः । अन्यदा च तस्मिन्नेव नगरे परिव्राजकभक्ता विनीतश्रेष्ठिनो दुहिता बालविधवा वीरमती नाम । सा च अविवेकबहुलतया स्त्रीणां, दुर्जयतया मोहस्य, अभिलषणीयतया विषयाणां, विकारकुलगृहतया यौवनस्य, अनपेक्ष्य निजकुलम्, अनालोच्यायतिं तन्नगरीवास्तव्यकसिंहलाभिधानेन मालाकारेण समं प्रोषितेति । इतश्च तस्मिन्नेव दिवसे तस्या एव पूजनीयः स्वसमयाचारपरिपालनरतिर्योगात्मा नाम परिव्राजकः । स निःसंगतया प्रव्रजितानां कार्याभावेन च शंसितव्यमनाख्याय कस्यचिद् स्थानेश्वरं गत इति । जातश्च लोकवादः—'अहो वीरमती प्रोषिता'—इति । विज्ञातं त्वया परिव्राजकगमनम् । ततोऽशुद्धतयाऽऽशयस्य विचित्रचरिततया सत्त्वानां समुत्पन्ना ते चिन्ता—'नूनं सा योगात्मना

[1] हलुयय क

अयाणिऊण सेट्ठिउम्माहयं एवं जंपियं ति। किमेत्थ जाणियव्वं, अहं जाणामि। राइणा भणियं–'कहं' ति ?। तए भणियं–जोयप्पणा सद्धिं पवसिय त्ति। राइणा भणियं–परिचत्तनियकलत्तारम्भो खु सो भगवं। तए भणियं–अओ चेव परकलत्ताइं पत्थेइ। महाराय, एवंविहा चेव एए पासण्डिणो। न एत्थ परमत्थवुद्धी कायव्व त्ति। एयं च सोऊण विपरिणया धम्मंमि केइ पाणिणो। सवणपरंपराए य आयण्णियमिणं सेसपरिव्वायएहिं; वज्झो कओ जोयप्पा, जाया य से सपक्खपरपक्खेहिं पायं विडम्बणा। एवंविहमिच्छापरिणामवत्तिणा बद्धं तए तिव्वं कम्मं। अइक्कन्तो कोइ कालो। परिक्खीणमहाउयं॥ तओ अपरिचत्तयाए आरम्भस्स मायाबहुलयाए सेसकालं अणासेवणाए धम्मस्स विचित्तयाए कम्मपरिणईणं मओ समाणो कोल्लागसन्निवेसे समुप्पन्नो एलगत्ताए त्ति। अइक्कन्तो कोइ कालो। तक्कम्मदोसेण य सडिया ते जीहा। गहिओ महावेयणाए। थेवकालेणं चेव झीणं च ते आउयं। तओ मरिऊण तक्कम्मसेसयाए

सह प्रोषिता भविष्यति। अन्यदा प्रवृत्ता राजकुले कथा, यथा विनीतश्रेष्ठिनो दुहिता न ज्ञायते कुत्र प्रोषितेति ?। ततस्त्वया उज्झित्वा शास्त्राचारम्, अवलम्ब्य इतरपुरुषमार्गम्, अनवेक्ष्यात्मनो लघुकताम्, अज्ञात्वा श्रेष्ठि उन्माथं (विनाशं) एवं जल्पितमिति। किमत्र ज्ञातव्यम् ? अहं जानामि। राज्ञा भणितम्–'कथम्'–इति। त्वया भणितम्–योगात्मना सार्धं प्रोषितेति। राज्ञा भणितम्–परित्यक्तनिजकलत्रारम्भः खलु स भगवान्। त्वया भणितम्–अत एव परकलत्राणि प्रार्थयते। महाराज! एवंविधा एवैते पाखण्डिनः। नात्र परमार्थबुद्धिः कर्तव्येति। एतच्च श्रुत्वा विपरिणता धर्मे केचित् प्राणिनः। श्रवणपरम्परया चाकर्णितमिदं शेषपरिव्राजकैः, वाह्यः कृतो योगात्मा, जाता च तस्य स्वपक्षपरपक्षैः प्रायो विडम्बना। एवंविधमिथ्यापरिणामवर्तिना बद्धं त्वया तीव्रं कर्म। अतिक्रान्तः कोऽपि कालः। परिक्षीणमथायुष्कम्। ततोऽपरित्यक्ततयाऽऽरम्भस्य- मायाबहुलतया शेषकालमनासेवनया धर्मस्य विचित्रतया कर्मपरिणतीनां मृतः सन् कोल्लाकसन्निवेशे समुत्पन्न एडकतयेति। अतिक्रान्तः कोऽपि कालः। तत्कर्मदोषेण च शटिता ते जिह्वा। गृहीतो महावेदनया। स्तोककालेनैव क्षीणं च

कोल्लागसन्निवेसाडवीए चेव समुप्पन्नो गोमाउगत्ताए त्ति । तत्थ वि य तक्कम्मपेरियतहाविहफलभक्खणेण सडिया ते जीहा ।
अइक्कन्तो कोइ कालो । तओ मरिऊण तक्कम्मसेसयाए चेव समुप्पन्नो साएयनरवइविलासिणीए मयणलेहाभिहाणाए सुयत्ताए त्ति।
पत्तो जोव्वणं, वल्लहो नरवइस्स । अन्नया तक्कम्मदोसओ चेव सुरापाणमत्तेणं विणा वि कज्जेणं दढमक्कोसिया रायजणणी । सुओ
रायउत्तेण, वारोविओ तेणं । तओ तं पि अक्कोसिउं पयत्तो । कुविएण छिन्दाविया ते जीहा । ववगओ मओ । लज्जिओ खु अत्तणो
वुत्तन्तेणं । पडिवन्नो य अणसणं । मासमेत्तेण कालेण विमुक्को पाणेहिं । समुप्पन्नो य एत्थ पुण्डवद्धणंमि माहणसुयत्ताए त्ति ।
एयमणुहूयं तए ॥

तओ मएयं सोऊण समुप्पन्नो संवेगो, जाओ भवविराओ । चिन्तियं मए । अहो दुक्खहेउत्तणं पमायचरियस्स । पुच्छिओ
साहू । भयवं, केरिसं फलसेसं ति ?। तओ तेण अइसयनाणिणा विसेसेणं इमं अवलोइऊण भणियं मक्करुणेणं । वच्छ, अविवेगिजणाणुरूया

तवायुः । ततो मृत्वा तत्कर्मशेषतया कोल्लाकसन्निवेशाटव्यामेव समुत्पन्नो गोमायुरूतयेति । तत्रापि च तत्कर्मप्रेरिततथाविधफलभक्षणेन
शटिता ते जिह्वा । अतिक्रान्तः कोऽपि कालः । ततो मृत्वा तत्कर्मशेषतयैव समुत्पन्नो साकेतनरपतिविलासिन्यां मदनलेखाभिधानायां
सुततयेति । प्राप्तो यौवनम्, वल्लभो नरपतेः । अन्यदा तत्कर्मदोषत एव सुरापानमत्तेन विनाऽपि कार्येण दृढमाक्रुष्टा राजजननी । श्रुतो
राजपुत्रेण, वारितस्तेन, ततस्तमपि आक्रोष्टुं प्रवृत्तः । कुपितेन छेदिता ते जिह्वा । व्यपगतो मदः । लज्जितः खल्वात्मनो वृत्तान्तेन ।
प्रतिपन्नश्चानशनम् । मासमात्रेण कालेन विमुक्तो प्राणेभ्यः । समुत्पन्नश्चात्र पुण्ड्रवर्धने ब्राह्मणसुततयेति । एतदनुभूतं त्वया ।
ततो मयैतत् श्रुत्वा समुत्पन्नः संवेगः, जातो भवविरागः, चिन्तितं मया-अहो ! दुःखहेतुत्वं प्रमादचरितस्य । पृष्टो साधुः, कीदृशं

---

१ मयणलया० क २ पोण्डवद्धणंमि क

सयललोए विडम्बणा सेसं ति । तओ मए समुप्पन्नवेरग्गेण मुणिवयणभीएण सुगहियनामगुरुसमीवे पवन्ना पव्वज्जा । अइक्कन्तो कोइ कालो । लद्धाओ य गुरुसुरलोयगमणकाले मए गुरुसुस्सूसापरेण गुरुसयासाओ तालुग्घाडणिगयणगामिणीओ दुवे महाविज्जाओ । भणिओ म्हि गुरुणा–वच्छ ! एयाओ धम्मकायपरिवालणत्थं कहिंपि महावसणकालंमि चेव तए पउञ्जियव्वाओ, न उण सया असारविसयसुहसाहणत्थं ति। अन्नं च, एयाओ धारयन्तेणं परिहासेणावि अलियं न जंपियव्वं; पमायओ जंपिए समाणे तक्खणं चेव नाहिप्पमाणनिमलजलगएणं उद्धबाहुणा अणिमिसलोयणेणं एयासिं चेव अट्ठमहस्सेणं जावो दायव्वो त्ति । तओ मए पावमोहियमणेणं साहुसिट्ठनियइवसवत्तिणा अविज्जाणुरायनडिएणं गुरुवयणपडिकूलं इहपरलोगमग्गविरुद्धं सव्वमियमणुचिट्ठियं । जंपियं च मए कल्लं असंपत्ताए भयवईए सञ्झाए आवसहासन्नारामवउलतलगएणं पमायओ तरुणरामायणपुच्छिएण अपरिहाससीलेण वि परिहासेणं उभ-

---

फलशेषमिति। ततस्तेनातिशयज्ञानिना विशेषेणेममवलोक्य भणितं सकरुणेन। वत्स! अविवेकिजनानुरूपा सकललोके विडम्बना शेषमिति। ततो मया समुत्पन्नवैराग्येन मुनिवचनभीतेन सुगृहीतनामगुरुसमीपे प्रपन्ना प्रव्रज्या। अतिक्रान्तः कोऽपि कालः। लब्धे च गुरुसुरलोकगमनकाले मया गुरुशुश्रूषापरेण गुरुसकाशात् तालोद्घाटिनी–गगनगामिन्यौ द्वे महाविद्ये। भणितोऽस्मि गुरुणा–वत्स! एते धर्मकायपरिपालनार्थं कुत्रापि महाव्यसनकाले एव त्वया प्रयोक्तव्ये, न पुनः सदाऽसारविषयसुखसाधनार्थमिति। अन्यच्च–एते धारयता परिहासेनापि अलीकं न जल्पितव्यम्, प्रमादतो जल्पिते सति तत्क्षणमेव नाभिप्रमाणविमलजलगतेन ऊर्ध्वबाहुनाऽनिमिषलोचनेन एतयोरेवाष्टसहस्रेण जापो दातव्य इति। ततो मया पापमोहितमनसा साधुशिष्टनियतिवशवर्तिनाऽविद्यानुरागनटितेन (व्याकुलितेन) गुरुवचनप्रतिकूलमिहपरलोकमार्गविरुद्धं सर्वमिदमनुष्ठितम्। जल्पितं च मया कल्येऽसंप्राप्तायां भगवत्यां सन्ध्यायामावसथासन्नारामवकुलतलगतेन

यलोयविरुद्धं अलियवयणं ति। मन्तिणा भणियं 'किं जंपियं' ति ?। परिव्वायएण भणियं-पुच्छिओ म्हि कल्लं तक्खणकयजलावगाहणाहिं आवसहदेवयादंसणत्थमागयाहिं महुरपरिक्खलन्तवयणाहिं सविब्भमुब्भन्तपेच्छिरीहिं तरुणरामाहिं। भयवं, कीस तुमं तरुणगो चेव जीवलोयसारभूयं जम्मन्तरंमि वि तवस्सिजणपत्थणिज्जं हरिहरपियामहप्पमुहतियसवरसेवियं सयललोयसलाहणिज्जं विसयसोक्खं उज्झिऊण इमं ईइसं दुक्करं वयविसेसं पवन्नो त्ति ?। तओ मए तासिं हिययगयं परिहासगब्भिणं भावं वियाणिऊण विमुक्कदीहनीसासं कालाणुरूयमलियं चेव जंपियं। जहा हिययाणुकूलपिययमाविरहसंतावपीडिएणं इमं ईइसं दुक्करं वयमब्भुवगयं ति। जंपिऊण य इमं वयणं पमायओ चेव न कओ गुरुजणोवइट्ठो जावो। अकयजावो य वसणवसगो वि य जाए अड्ढरत्तसमए अत्थमिए भुवणपईवे चन्दे पसुत्ते नायरलोयनिवहे तिमिरदुस्संचरेसु रायमग्गेसु कहकहवि गन्तूण पुव्वभण्डियं पिव अकयपडिदुवारपिहाणं पविट्ठो सागरसेट्ठिगेहं ति। तओ गहियसुवण्णरुप्पभण्डो निग्गच्छन्तो चेव सागरसेट्ठिगेहाओ आयण्णियपुरिसपयसंचारो

प्रमादतस्तरुणरामाजनपृष्टेनापरिहासशीलेनापि परिहासेनोभयलोकविरुद्धमलीकवचनमिति। मन्त्रिणा भणितम्-किं जल्पितमिति ? परिव्राजकेन भणितम्-पृष्टोऽस्मि कल्ये तत्क्षणकृतजलावगाहनाभिरावसथदेवतादर्शनार्थमागताभिर्मधुरपरिस्खलद्वचनाभिः सविभ्रमोद्भ्रान्तप्रेक्षणशीलाभिः तरुणरामाभिः। भगवन्! किमर्थं त्वं तरुण एव जीवलोकसारभूतं जन्मान्तरेऽपि तपस्विजनप्रार्थनीयं हरिहरपितामहप्रमुखत्रिदशवरसेवितं सकललोकश्लाघनीयं विषयसौख्यमुज्झित्वेममीदृशं दुष्करं व्रतविशेषं प्रपन्न इति ? ततो मया तासां हृदयगतं परिहासगर्भितं भावं विज्ञाय विमुक्तदीर्घनिःश्वासं कालानुरूपमलीकमेव जल्पितम्। यथा-हृदयानुकूलप्रियतमाविरहसंतापपीडितेन इममीदृशं दुष्करं व्रतमभ्युपगतमिति। जल्पित्वा चेदं वचनं प्रमादत एव न कृतो गुरुजनोपदिष्टो जापः। अकृतजापश्च व्यसनवशगोऽपि च जातेऽर्धरात्रसमयेऽस्तमिते भुवनप्रदीपे चन्द्रे प्रसुप्ते नागरलोकनिवहे तिमिरदुःसंचरेषु राजमार्गेषु कथं कथमपि गत्वा पूर्वभांडिकमिव (वान्धवमिव)

सिंगारसागरनिमग्गमाणो मलियविसालकुसुमसयणो सुमरियविज्जाहरिंदवीणमाणो विसमसरसमरनायमाणो कुसुमबाणबाणग-
हयंगेहिं महरमणहरगाइयविडिमावयवेहिं इओ तओ तुलियमरमसन्नेहिं गहिओ गयपुरिमेहिं । अओ परमरागो मेरु ते मईओ
गुणन्नो । मंदर तुमं पमाणं ति भणिऊण तुण्हिक्को ठिओ परिभायगो त्ति ॥
मलिणा भणियं-भयवं, कहं पुण एत्थ एगदिवसागमीओ गयालंकारो नत्थि ? । तेण भणियं-दिओ गुणो मए मागधी-
नयरम्मि । मलिणा भणियं-'किं विमिणं' ति ? । तेण भणियं-सुण ।
अत्थि मे मागधीनिवासी गन्धव्वदत्तो नाम वयंसओ जीरियाओ य अब्भहिओ । तेण नयरनिवासिणो इन्दवम्माभिहाणस्स
सेट्ठिणस्स पुत्ता नागदत्ता नाम कन्नगा नेहाणुगयमणाओ अवहरिया त्ति पच्चूसे सिरिमहूसवे जोव्वणाभिमाणिणा हरहा त्ति
भुयगविमाणविमाणे भणिओ नागकंधहितोत्ति । तओ सूरकिरणसंवलियामणे निम्मंसदेह नागरंधहित्तिसाकत्तिगुणपदसंगारे
विवाहगमणमयणधताः स्वनिवासिनां वंगमनः स्वनिवासिनवरविभाग विमलनवनगरप्रधानः कुसुमाकरसमयानुरागदक्षे-
गेहंशा, कथं वा, वाहनमयापूरितविस्तरे विमलनवकन्याकानिवासानुकूले विभ्रमदोष परसपरसकरैः । अतः परमपराग पर हरहा महीयो गुणाकरः । मंदिर
२२ प्रमाणमिति भणित्वा तूष्णीकः स्थितः परिव्राजक इति ।
मलिनया भणितम्-भगवन् ! कथं पुनरत्र एकदिवसागतानो गजालंकारो नास्ति ? । तेन भणितम्-दृष्टः मदीय मया धाम्यनिवासनगरे ।
मलिनया भणितम्-'किं विमिदम्'-इति ? तेन भणितम्-शृणु ।
अस्ति मे धाम्य निवासी गन्धर्वदत्तो नाम वयस्यो जीवितादप्यधिकः । तेन नगरनिवासिनः इन्द्रवर्माभिधानस्य श्रेष्ठिनः कन्या

१ गब्रंघ० ब

अत्तणो विणासमालोचिय अवलम्बिऊग पुरिसयारं अवहरिऊण परिणीय त्ति। एयव्वइयरंमि रुट्ठो से राया। अवहरिया वासवदत्ता। निच्छूढो नयरीओ। आगओ मे समीवं जीवियाभिहाणवयंसगसहाओ। पुच्छिओ य आगमणपओयणं। साहियं च तेणं। तओ मए तमणुपुच्छिऊण रायालंकारकोसल्लियसहाओ पेसिओ नरिन्दपच्चायणनिमित्तं जीविओ। गओ य सो सावत्थिं। अलंकारदरिसणपुव्वयं विन्नत्तो तेण राया एयव्वइयरेण। कओ से राइणा पसाओ। पेसिया गन्धव्वदत्तस्स सावत्थिपवेसणनिमित्तं महन्तया। नीओ महन्त-एहिं, पवेसिओ राइणा महाविभूईए, दिट्ठो य जणणिजणयपमुहेण सयणवग्गेण। पाविया तेण कण्ठगयपाणा वासवदत्ता। ता एयं निमित्तं॥

मन्तिणा भणियं–साहु ववसियं, मित्तकज्जवच्छला चेव सप्पुरिसा हवन्ति। 'निद्दोसा खु ते पुव्वगहिय' त्ति मन्तिऊग मोया-विया धणाई। 'भयवं, तुमए वि सविवेगाणुरूवमायरियव्वं' ति भणिऊग विसज्जिओ परिव्वायओ॥

दुहिता वासवदत्ता नाम कन्यका स्नेहानुरागवशतोऽन्यदत्ताऽपि प्रस्तुते विवाहमहोत्सवे यौवनाभिमानिना इतरथाऽपि आत्मनो विनाश मालोच्य, अवलम्ब्य पुरुषकारमपहृत्य परिणीतेति। एतद्व्यतिकरे रुष्टस्तस्मै राजा। अपहृता वासवदत्ता। निःक्षिप्तो नगर्याः। आगतो मम समीपं जीविकाभिधानवयस्यसहायः। पृष्टश्चागमनप्रयोजनम्। कथितं च तेन। ततो मया तमनुपृच्छ्य राजालंकारकौशलिक(उपहार)-सहायः प्रेषितो नरेन्द्रप्रत्यायननिमित्तो जीविकः। गतश्च स श्रावस्तीम्। अलंकारदर्शनपूर्वकं विज्ञप्तस्तेन राजा एतद्व्यतिकरेण। कृत-स्तस्य राज्ञा प्रसादः। प्रेषिता गन्धर्वदत्तस्य श्रावस्तीप्रवेशननिमित्तं महत्तकाः। नीतो महत्तकैः, प्रवेशितो राज्ञा महाविभूत्या, दृष्टश्च जननीजनकप्रमुखेन स्वजनवर्गेण। प्राप्ता तेन कण्ठगतप्राणा वासवदत्ता। तत् एतन्निमित्तम्।

मन्त्रिणा भणितम्–साधु व्यवसितम्, मित्रकार्यवत्सला एव सत्पुरुषा भवन्ति। 'निर्दोषाः खलु पूर्वगृहीताः' इति मन्त्रयित्वा मोचिता

धणो वि य ते रायपुरिसे पेसिऊण सावत्थिं पयट्टो जलनिहितीरसंठियं वयराडं नाम नयरं। कहाणयविसेसेण पत्तो पउमावइं नाम अडविं। तीए वि य कइवयकप्पडियपरिवारियस्स एगंमि विभागे उट्ठियं वणगइन्दपीढं। पणट्ठा दिसोदिसं कप्पडिया। धाइओ गयकलहगो धणमग्गेणं। गहिओ खु एसो, पाडिओ धरणिवट्ठे। परिणओ गयकलहगो। देव्वजोएणं न वावाइओ धणो। तओ उवरिं घत्तिऊण दन्तमुसलेहिं 'पडिच्छिस्सं' ति गहिओ करेणं, विक्खित्तो य उवरिं विलग्गो समासन्नवत्तिणीए नग्गोहसालाए। इओ य तयन्नकलहगपीडियाए रसियं करेणुयाए। तओ तं मोत्तूण वलिओ गयकलहगो। आरूढो धणो नग्गोहसिहरं। दिट्ठा य तेण तत्थ नीडंमि ओलावगविमुक्का तेल्लोक्कसारा रयणावली। पच्चभिन्नाया गहिया य। चिन्तियं च तेणं। छुट्टामि जइ गओवद्दवस्स, ता पणामेमि एयं परमोवयारिणो सावत्थीनरवइस्स; पच्छा जहासमीहियमणुचिट्ठिस्सं ति। ठिओ कंचि वेलं, अइक्कन्तं गयपीढं, ओइण्णो

धनावहः। 'भगवन्! त्वयाऽपि स्वविवेकानुरूपमाचरितव्यम्' इति भणित्वा विसर्जितो परिव्राजकः।

धनोऽपि च तान् राजपुरुषान् प्रेषयित्वा श्रावस्तीं प्रवृत्तो जलनिधितीरसंस्थितं वराटं नाम नगरम्। कथानकविशेषेण प्राप्तो पद्मावतीं नामाटवीम्। तस्यामपि च कतिपयकार्पटिकपरिवृतस्य एकस्मिन् विभागे उत्थितं वनगजेन्द्रयूथम्। प्रनष्टा दिशि दिशि कार्पटिकाः। धावितो गजकलभको धनमार्गेण। गृहीतः खल्वेषः। पातितो धरणीपृष्ठे। परिणतो (तिर्यक्प्रहारवान्) गजकलभकः। दैवयोगेन न व्यापादितो धनः। तत 'उपरि क्षिप्त्वा दन्तमुशलाभ्यां प्रत्येषिष्यामि' इति गृहीतो करेण। विक्षिप्तश्चोपरि विलग्नः समासन्नवर्तिन्यां न्यग्रोधशाखायाम्। इतश्च तदन्यकलभकपीडितया रसितं करेण्वा। ततस्तं मुक्त्वा वलितो गजकलभकः। आरूढो धनो न्यग्रोधशिखरम्। दृष्टा च तेन तत्र नीडे श्येनविमुक्ता त्रैलोक्यसारा रत्नावली, प्रत्यभिज्ञाता गृहीता च। चिन्तितं च तेन। छुटामि यदि गजोपद्रवात् ततः परानयामि एतां परमोपकारिणः श्रावस्तीनरपतेः। पश्चाद् यथासमीहितमनुष्ठास्यामीति। स्थितः कांचिद् वेलाम्।

तरुवराओ, पयट्टो सावत्थिं, संपत्तो वसिमं ॥

इओ य गया ते पुरिसा सावत्थिं। निवेइओ वुत्तन्तो नरवइस्स। कुविओ तेसिं राया। अहो अबुद्धिया तुम्हे, जं तहाविहं पुरिसरयणं तहा एगागिणं मोत्तूणमागय त्ति। ता एस मे दण्डो; तं चेव अगिण्हिऊण न तुब्भेहिं सावत्थिं पइसियव्वं ति। भणिऊण निच्छूढा नयरीओ। लग्गा धणं गवेसिउं। दिट्ठो य तेहिं पियमेलयाभिहाणे सन्निवेसे सत्थवाहपुत्तो। साहिओ णेहिं वुत्तन्तो इमस्स, इमेण वि य तेसिं। तओ कइवयदियहेहिं पत्तो सावत्थिं। दिट्ठो नरवई, परितुट्ठो हियएण, साहिओ वुत्तन्तो नरवइस्स। देव, इमिणा पयारेण लद्धा रयणावली दंसिया य। विम्हिओ राया। 'अहो विचित्तया कज्जपरिणईणं' ति चिन्तिऊण भणियं च तेण। भद्द, तुह चेव मए एसा संपाडिय त्ति, न कायव्वो मे पणयभङ्गो। अहवा साहारणं चेव ते एयं रज्जं पि, किं संपाडीयइ त्ति?। तओ अइक्कन्तेसु कइवयदिणेसु काऊण महामहन्तं सत्थं भरिऊण विचित्तभण्डस्स दाऊण नाणामणिरयणसारमणग्घेयमाहरणं उचियवाणि-

---

अतिक्रान्तं गजयूथम्। अवतीर्णस्तरुवरात्। प्रवृत्तः श्रावस्तीम्। संप्राप्तो वसतिम्।

इतश्च गतास्ते पुरुषाः श्रावस्तीम्। निवेदितो वृत्तान्तो नरपतये। कुपितस्तेभ्यो राजा। अहो! अबुद्धिका यूयम्, यत् तथाविधं पुरुषरत्नं तथैकाकिनं मुक्त्वाऽऽगता इति। तत एष युष्माकं दण्डः, तमेवागृहीत्वा न युष्माभिः श्रावस्तीं प्रवेष्टव्यमिति भणित्वा निःक्षिता (निष्कासिताः) नगरीतः। लग्ना धनं गवेषयितुम्। दृष्टश्च तैः प्रियमेलकाभिधाने सन्निवेशे सार्थवाहपुत्रः। कथितस्तैर्वृत्तान्तोऽस्मै, अनेनापि च तेभ्यः। ततः कतिपयदिवसैः प्राप्तः श्रावस्तीम्। दृष्टो नरपतिः, परितुष्टो हृदयेन। कथितो वृत्तान्तो नरपतये। देव! अनेन प्रकारेण लब्धा रत्नावली, दर्शिता च। विस्मितो राजा। 'अहो विचित्रता कार्यपरिणतीनाम्'-इति चिन्तयित्वा भणितं च तेन। भद्र! तवैव मयैषा संपादितेति न कर्तव्यो मे प्रणयभङ्गः। अथवा साधारणमेव तवैतद् राज्यमपि, किं संपाद्यते इति। ततोऽतिक्रान्तेषु कतिप

पयवेसेणेव पेसिओ सुसम्मणयरं धणो त्ति।

पत्तो कालक्कमेणं, विन्नाओ जणेण। परितुट्ठो से गुरुजणो, निग्गओ पच्चोणिं। दिट्ठो य जणणिजणएहिं, निवडिओ चलणेसु तेसिं, अभिणन्दिओ जणणिजणएहिं। कया सव्वाययणेसु पूया, दिन्नं महादाणं, पवेसिओ नरिन्देण सम्माणिऊण महया विभूईए। कयं च गुरूहिं महोच्छवभूयं वद्धावणयं ति। पइरिक्के पुच्छिओ धणसिरिवुत्तन्तं जणणिजणएहिं। साहिओ तेण। विम्हिया जणणिजणया। भणियो य तेहिं–वच्छ, अलं तीए। अणुचिया खु सा पावकम्मा भवओ। न रेहइ कप्पपायवे कवियच्छुवल्लि त्ति। ता अन्नं ते समाणरूवकुलविहवसहावं दारियं गवेसामो। न तए एत्थ संतप्पियव्वं। न मुचइ ससी जोण्हाए त्ति। तेण भणियं–को एत्थ अवसरो संतावस्स, ईइसो खलु संसारसहावो त्ति। तेहिं भणियं–साहु साहु, महापुरिसो खु तुमं। ता किं एत्थ अवरं भणीयए त्ति॥

पवित्रेषु कृत्वा अतिमहान्तं सार्थं भृत्वा विचित्रभाण्डं, दत्त्वा नानामणिरत्नसारमनर्घ्यमाभरणमुचितवाणिजकवेशेनैव प्रेषितः सुशर्मनगरं धन इति।

प्राप्तः कालक्रमेण, विज्ञातो जनेन। परितुष्टस्तस्य गुरुजनो, निर्गतः संमुखम्। दृष्टश्च जननीजनकाभ्याम्। निपतितश्चरणेषु तयोः। अभिनन्दितो जननीजनकाभ्याम्। कृता सर्वायतनेषु पूजा, दत्तं महादानम्, प्रवेशितो नरेन्द्रेण सम्मान्य महत्या विभूत्या। कृतं च गुरुभिर्महोत्सवभूतं वर्धापनकमिति। प्रतिरिक्ते पृष्टो धनश्रीवृत्तान्तं जननीजनकाभ्याम्। कथितस्तेन। विस्मितौ जननीजनकौ। भणितश्च ताभ्याम्–वत्स! अलं तया। अनुचिता खलु सा पापकर्मा भवतः। न राजते कल्पपादपे कपिकच्छुवल्लिरिति। ततोऽन्यां तव समानरूपकुलविभवस्वभावां दारिकां गवेषयावः। न त्वयाऽत्र संतप्तव्यम्। न मुच्यते शशी ज्योत्स्नाया इति। तेन भणितम्–कोऽत्रावसरः संतापस्य, ईदृशः खलु संसारस्वभाव इति। तैर्भणितम्–साधु साधु महापुरुषः खलु त्वम्। ततः किमत्रापरं भण्यते इति।

तओ कया से गुरूहिं धणदेवमहिमा। निग्गओ धणो सह निद्धमित्तेहिं। पूजिओ जक्खो, कया अत्थिजणपडिवत्ती। गओ य भुत्तुत्तरसमए तयासन्नं चेव सिद्धत्थं नाम उज्जाणं। दिट्ठो य तत्थ असोयपायवतलगओ इरियाइपञ्चसमिइओ मणवयकायगुत्तो गुत्तिन्दिओ गुत्तबम्भयारी अममो अकिञ्चणो छिन्नगन्थो निरुवलेवो, किं बहुणा, अट्ठारससीलङ्गसहस्सधारी अणेयसाहुपरियओ जसोहरो नाम कोसलाहिवस्स विणयंधरस्स पुत्तो समणसीहो त्ति। तं च दट्ठूण समुप्पन्नो से पमोओ, वियम्भिओ धम्मववसाओ। चिन्तियं च णेणं। अहो से रूवं, अहो चरियं; अहो से दित्ती, अहो सोमया; अहो से पुरिसयारो, अहो मद्दवं; अहो से लायण्णं, अहो विसयनिप्पिवासया; अहो से जोव्वणं, अहो अणङ्गविजओ त्ति। ता धन्नो खु एसो दट्ठव्वो पज्जुवासणिज्जो य। गओ तस्स समीवं। वन्दिओ णेण भयवं जसोहरो सेससाहुणो य। दिन्नो से गुरुणा धम्मलाहो सेससाहूहि य। उवविट्ठो गुरुपायमूले। भणियं च तेणं—भयवं, किं पुण ते निव्वेयकारणं, जेण तुमं रूवि व्व पञ्चबाणो विसयसुहमवहत्थिऊण पव्वज्जं पवन्नो सि?। जसोहरेण

ततः कृता तस्य गुरुभ्यां धनदेवमहिमा। निर्गतो धनो सह स्निग्धमित्रैः। पूजितो यक्षः, कृताऽर्थिजनप्रतिपत्तिः। गतश्च भुक्तोत्तरसमये तदासन्नमेव सिद्धार्थं नामोद्यानम्। दृष्टश्च तत्राशोकपादपतलगत ईर्यादिपञ्चसमितिको मनोवचःकायगुप्तो गुप्तेन्द्रियो गुप्तब्रह्मचारी अममोऽकिञ्चनश्छिन्नग्रन्थो निरुपलेपः—किं बहुना, अष्टादशशीलाङ्गसहस्रधारी, अनेकसाधुपरिगतो यशोधरो नाम कोशलाधीपस्य विनयन्धरस्य पुत्रः श्रमणसिंह इति। तं च दृष्ट्वा समुत्पन्नस्तस्य प्रमोदः, विजृम्भितो धर्मव्यवसायः। चिन्तितं च तेन—अहो! अस्य रूपम्, अहो! चरितम्, अहो! अस्य दीप्तिः, अहो! सौम्यता, अहो! अस्य पुरुषकारः, अहो! मार्दवम्, अहो! अस्य लावण्यम्, अहो! विषयनिष्पिपासता, अहो! अस्य यौवनम्, अहो! अनङ्गविजय इति। ततो धन्यः खल्वेष द्रष्टव्यः, पर्युपासनीयश्च। गतस्तस्य समीपम्। वन्दितस्तेन भगवान् यशोधरः शेषसाधवश्च। दत्तस्तस्मै गुरुणा धर्मलाभः, शेषसाधुभिश्च। उपविष्टो गुरुपादमूले। भणितं च तेन—किं

भणियं-एगन्तनिव्वेयकुलहराओ संसाराओ वि अवरं निव्वेयकारणं ति ? । धणेण भणियं-भयवं, सयलजणसाहारणो खु एस संसारो;
अओ विसेसकारणं पुच्छामि । जसोहरेण भणियं-विसेसो वि सामन्नमज्झगओ चेव, तहावि निययमेव चरियं मे निव्वेयकारणं ति।
धणेण भणियं-करेउ भयवं अणुग्गहं, कहेउ अम्हाणं पि निव्वेयकारणं नियचरियं ति । तओ जसोहरेण 'कल्लाणागिई पसन्तरूवो
य एसो कयाइ निव्वेयमुवगच्छइ' त्ति चिन्तिऊण भणियं । सोम ! जइ एवं, ता सुण ।
अत्थि इहेव वासे विसाला नाम नयरी । तत्थ अमरदत्तो नाम नरवई होत्था। इओ य अतीयनवमभवंमि तस्स पुत्तो सुरिन्ददत्तो
नाम अहमासि त्ति । जणणी य मे जसोहरा, भज्जा य नयणावलि त्ति । ताओ य मे रज्जं दाऊण पवन्नो समणत्तणं । अहमवि संपत्त-
सम्मत्तो नयणावलीनेहमोहियमणो रज्जसणाहं विसयसुहमणुहवन्तो चिट्ठामि, जाव आगओ मे पलियच्छलेण धम्मदूओ । निवेइओ

पुनस्ते निर्वेदकारणम्, येन त्वं रूपीव पञ्चबाणो विषयसुखमपहस्तयित्वा प्रव्रज्यां प्रपन्नोऽसि ? यशोधरेण भणितम्-एकान्तनिर्वेदकुल-
गृहात् संसारादपि अपरं निर्वेदकारणमिति ? धनेन भणितम्-भगवन्! सकलजनसाधारणः खल्वेष संसारः, अतो विशेषकारणं
पृच्छामि । यशोधरेण भणितम्-विशेषोऽपि सामान्यमध्यगत एव, तथापि निजकमेव चरितं मम निर्वेदकारणमिति । धनेन भणितम्-
करोतु भगवान् अनुग्रहम्, कथयतु अस्माकमपि निर्वेदकारणं निजकचरितमिति । ततो यशोधरेण 'कल्याणाकृतिः प्रशान्तरूपश्चैष
कदाचिद् निर्वेदमुपगच्छति' इति चिन्तयित्वा भणितम् । सौम्य ! यद्येवं ततः शृणु ।
अस्ति इहैव वर्षे विशाला नाम नगरी । तत्रामरदत्तो नाम नरपतिरभूत् । इतश्चातीतनवमभवे तस्य पुत्रः सुरेन्द्रदत्तो नामाहमास-
मिति । जननी च मम यशोधरा, भार्या च नयनावलिरिति । तातश्च मे राज्यं दत्त्वा प्रपन्नः श्रमणत्वम् । अहमपि संप्राप्तसम्यक्त्वो
नयनावलिस्नेहमोहितमना राज्यसनाथं विषयसुखमनुभवन् तिष्ठामि । यावदागतो मे पलितच्छलेन धर्मदूतः । निवेदितश्च मह्यं सारसि-

य मे सारसियाभिहाणाए नयणावलीचेडियाए । तओ समुप्पन्नो मे निव्वेओ । चिन्तियं मए । अहो चञ्चलया जीवलोयस्स, अहो परिणामो पोग्गलाणं, अहो असारं मणुयत्तणं, अहो पहवइ महामोहो । अवि य–

अणुदियहं वच्चन्ताणिऽमाइ कह किं जणो न लक्खेइ । जीयस्स जोव्वणस्स य दियहनिसाखण्डखण्डाइं ॥

दियहनिसाघडिमालं आउयसलिलं जणस्स घेत्तूण । चन्दाइच्चबइल्ला कालरहट्टं भमाडेन्ति ॥

झीणे आउयसलिले परिसुस्सन्तंमि देहसस्संमि । नत्थि हु कोवि उवाओ तह वि जणो पावमायरइ ॥

अलं ता मे पमाएणं । पवज्जामो पुव्वपुरिससेवियं समणत्तणं । साहिओ निययाहिप्पाओ नयणावलीए । भणियं च तीए– अज्जउत्त, जं भे रोयइ त्ति । न खलु अहं अज्जउत्तस्स पडिकूलयारिणी; अवि य 'जं तुमं पव्वज्जिहिसि, अहं पि तं चेव' त्ति निवेइयं चेव अज्जउत्तस्स । तओ मए चिन्तियं । अहो निब्भराणुरायया ममोवरि देवीए, अहो महत्थत्तणं, अहो विवेगो, अहो चित्तणुयया,

---

काभिधानया नयनावलिचेटिकया । ततः समुत्पन्नो मम निर्वेदः । चिन्तितं च मया–अहो ! चञ्चलता जीवलोकस्य, अहो ! परिणामः पुद्गलानाम्, अहो ! असारं मनुजत्वम्, अहो ! प्रभवति महामोहः । अपि च–

अनुदिवसं व्रजन्ति इमानि कथय किं जनो न लक्षयति । जीवितस्य यौवनस्य च दिवसनिशाखण्डखण्डानि ॥

दिवसनिशाघटीमालमायुःसलिलं जनस्य गृहीत्वा । चन्द्रादित्यबलीवर्दौ कालारघट्टं भ्रामयतः ॥

क्षीणे आयुःसलिले परिशुष्यति देहसस्ये । नास्ति खलु कोऽप्युपायः तथापि जनः पापमाचरति ॥

अलं ततो मम प्रमादेन, प्रपद्यामहे पूर्वपुरुषसेवितं श्रमणत्वम् । कथितो निजकाभिप्रायो नयनावल्यै । भणितं च तया–आर्यपुत्र ! यत् तुभ्यं रोचते, न खल्वहमार्यपुत्रस्य प्रतिकूलकारिणी, अपि च यत्त्वं प्रव्रजिष्यसि, अहमपि च तदेवेति निवेदितमेवार्यपुत्रस्य । ततो

अहो छन्दाणुवत्तणं, अहो समसुहदुक्खया, अहो एगसहावत्तणं[1] ति ॥

एत्थन्तरंमि निवेइओ मे कालो मङ्गलपाढएहिं । पढियं च तेहिं ।

आसाइऊण उययं कमेण परियड्ढिऊण य पयावं । उज्जोविऊण भुवणं अत्थमइ दिवायरो एण्हिं ॥

तओ मए चिन्तियं—धिरत्थु जीवलोयस्स; एयस्स वि दिणयरस्स एगदिवसंमि चेव एत्तिया अवत्थ त्ति । तओ अहं अत्थाइया-मण्डवंमि कंचि कालं गमेऊण मियङ्कजोण्हापसाहियभुवणभवणे उद्दामकामिणीयणवियम्भियमयणपसरे य पओसे गओ विइण्णमणिरयणमङ्गलपदीवसणाहं कुट्टिमविमुक्कवरसुरहिकुसुमपयरं बहलकत्थूरियाविलित्तविमलमणिभित्तिं पवरदेवंगवत्थवोक्खारिय[2]कणयखम्भं उज्जलविचित्तवत्थविरइयवियाणयं जरढविदुमायम्बघडियपल्लङ्कसणाहं अत्थुरियपवरतूलीविइण्णगण्डोवहाणयं विमलकलधोयमओव-

मया चिन्तितम्—अहो ! निर्भरानुरागता ममोपरि देव्याः, अहो ! महार्थत्वम्, अहो ! विवेकः, अहो ! चित्तानुगता, अहो ! छन्दोऽनुवर्तनम्, अहो ! समसुखदुःखता, अहो ! एकस्वभावत्वमिति ।

अत्रान्तरे निवेदितो मे कालो मङ्गलपाठकैः । पठितं च तैः—

आस्वाद्योदयं क्रमेण परिवर्त्य च प्रतापम् । उद्द्योत्य भुवनमस्तमेति दिवाकर इदानीम् ॥

ततो मया चिन्तितम्—धिगस्तु जीवलोकम्, एतस्यापि दिनकरस्य एकदिवसे एव एतावत्यवस्थेति । ततोऽहमास्थानिकामण्डपे कश्चित् कालं गमयित्वा मृगाङ्कज्योत्स्नाप्रसाधितभुवनभवने उद्दामकामिनीजनविजृम्भितमदनप्रसरे च प्रदोषे गतो विकीर्णमणिरत्नमङ्गलप्रदीपसनाथं कुट्टिमविमुक्तवरसुरभिकुसुमप्रकरं बहलकस्तूरिकाविलिप्तविमलमणिभित्तिम्, प्रवरदेवाङ्ग(देवदूष्य)वस्त्रविभूषितकनकस्तम्भम्,

1 एगयारत्तण क । 2 वोक्खारिय (दे.) विभूषितः ।

णीय[मणो]हरपडिग्गहं उल्लम्बियसुरहिकुसुमदामनियरं कणयमयमहमहेन्तधूवपडियाउलं पज्जलियविइत्तधूमवत्तिनिवहं चडुलकलहंसपारावयमिहुणसोहियं विरइयकप्पूरवीडयसणाहतम्बोलपडलयं वट्टियविलेवणपुण्णविविहवायायणनिमियमणिवट्टयं सुरहिपडवासभरियमणोहरोवणीयकणयकचोलं तप्पियवरवारुणीसुरहिकुसुमसंपाइयमयणपूयं रईए विव सपरिवाराए नयणावलीए समद्धासियं वासगेहं ति । उवविट्ठो पल्लङ्के। कंचि कालं गमेऊण निग्गओ देवीपरियणो। थेववेलाए पसुत्ता देवी। अहं च विसहसुहं विमुहियचित्तोवि नेहाणुरागओ 'देवी परिच्चइयव्वा, एद्दहमेत्तं एत्थ दुक्करं'ति चिन्तयन्तो चिट्ठामि, जाव सा देवी 'पसुत्तो नरवइ'त्ति मन्नमाणा मोत्तूण पल्लङ्कमोइण्णा कोट्टिमतलं। ससङ्का य उग्घाडिऊण दुवारं निग्गया वासगेहाओ। तओ मए चिन्तियं—किं पुण एसा अवेलाए अइन्नदुवारं निग्गय त्ति?। नूणं मम भाविविओयकायरा देहच्चायं ववसिस्सइ त्ति। तओ अहं घेत्तूण असिवरं निग्गओ तीए पिट्ठओ। गया य सा पासायवालस्स

उज्ज्वलविचित्रवस्त्रविरचितवितानकम्, जरठचित्रमातानयटितपल्यङ्कसनाथम्, आस्तृतप्रवरतूलीवितीर्णगण्डोपधानकम्, विमलकलधौतमयोपनीतमनोहरपतद्ग्रहम्, उल्लम्बितसुरभिकुसुमदामनिकरम्, कनकमयमघमघायमान(प्रसरद्)धूपघटिकाकुलम्, प्रज्वलितविचित्रधूमवर्तिनिवहम्, चडुलकलहंसपारापतमिथुनशोभितम्, विरचितकर्पूरवीटकसनाथताम्बूलपटलकम्, वर्तितविलेपनपूर्णविविधवातायनन्यस्तवृत्तम्(वृत्तभाजनम्), सुरभिपटवासभृतमनोहरोपनीतकनककच्चोलम्, तर्पितवरवारुणीसुरभिकुसुमसंपादितमदनपूजम्, रत्येव सपरिवारया नयनावल्या समध्यासितं वासगेहमिति। उपविष्टः पल्यङ्के। कंचित्कालं गमयित्वा निर्गतो देवीपरिजनः। स्तोकवेलायां प्रसुप्ता देवी। अहं च विषयसुखविमुखितचित्तोऽपि स्नेहानुरागतो 'देवी परित्यक्तव्या, एतावन्मात्रमत्र दुष्करम्' इति चिन्तयन् तिष्ठामि, यावत् सा देवी 'प्रसुप्तो नरपतिः' इति मन्यमाना मुक्त्वा पल्यङ्कमवतीर्णा कुट्टिमतलम्। सशङ्का चोद्घाट्य

१ अदिम० ख

खुज्जयस्स समीवं । उट्ठविओ तीए खुज्जओ । तओ मए चिन्तियं–हद्धी एयस्स साहिऊण जहासमीहियं करिस्सइ त्ति । एत्थन्तरंमि घुम्मन्तलोयणेणं भणियं खुज्जएणं–कीस तुमं अज्ज एत्तियाओ वेलाओ त्ति ?। तओ मए चिन्तियं–हा किमेयं अज्ज त्ति संलवइ ?। अहवा अणुचियागमणा इमाए वेलाए देवी, अओ एवं मन्तियं ति । होउ, पडिवयणं सुणेमि । तओ देवीए भणियं–अज्ज खु विसमधाउओ चिराओ पसुत्तो राया, अओ एस कालक्खेवो त्ति । तओ मए चिन्तियं–हा किमेयं ?। एत्थन्तरंमि कढिणहत्थेण तेण गहिया अगरुधूमामोयगब्भिणे केसहत्थे[3] देवी । तओ पाडिया तेण समयं देवी । सिक्कारमणहरं च तस्स य ममं च मयणकोवाणलसंधुक्कणं वियम्भियं तीए सह मोहचेट्ठियं । आलिङ्गिया तेण, चुम्बियं च से चलन्ततारयं वयणं । एयं च वायायणपविट्ठचन्दालोयभासियं वइयरमयच्छिऊण अविवेयपवणसंधुक्किओ पज्जलिओ मे मणम्मि कोवाणलो । कड्ढियं च तमालदलनीलं मण्डलग्गं । चिन्तियं च

द्वारं निर्गता वासगृहात् । ततो मया चिन्तितम्–किं पुनरेषाऽवेलायामदत्तद्वारं निर्गतेति ?। नूनं मम भाविवियोगकातरा देहत्यागं व्यवसास्यतीति । ततोऽहं गृहीत्वाऽसिवरं निर्गतस्तस्याः पृष्ठतः । गता च सा प्रासादपालस्य कुब्जकस्य समीपम् । उत्थापितस्तया कुब्जकः । ततो मया चिन्तितम्–हा धिक्, एतस्य कथयित्वा यथासमीहितं करिष्यतीति । अत्रान्तरे घूर्णल्लोचनेन भणितं कुब्जकेन–कस्मात् त्वमद्य एतावत्यां वेलायाम् ? ततो मया चिन्तितम्–हा ! किमेतद् 'अद्य' इति संलपति । अथवाऽनुचितगमनाऽस्यां वेलायां देवी, अत एवं मन्त्रितम् । भवतु, प्रतिवचनं शृणोमि । ततो देव्या भणितम्–अद्य खलु विषमधातुकश्चिरात् प्रसुप्तो राजा, अत एव कालक्षेप इति । ततो मया चिन्तितम्–हा ! किमेतत् ? अत्रान्तरे कठिनहस्तेन तेन गृहीताऽगुरुधूमामोदगर्भिते केशहस्ते देवी। ततो पातिता तेन समदं देवी। सित्कारमनोहरं च तस्य च मम च मदनकोपानलसंधुक्षणं विजृम्भितं तया सह मोहचेष्टितम् । आलिङ्गिता तेन, चुम्बितं च तस्याश्च-

१ ०धायवो ख। २ हा ! निस्सदेहमकज्जंति ख। ३ केसरलावे ख। ४ पडिया तेण समं क।

'वावाएमि एए दुवे वि पावे' त्ति। तओ तं चेव किरणावलीभासुरं जलन्तमिव पेच्छिऊण इसिं पगट्ठमविवेयन्धयारेण। जाया य मे चिन्ता। जेण मए परचक्कगयघडावियारणलालसा नरिन्दकेसरिणो विणिवाइया, सो कहं इमं पुरिससारमेयं देविं च अकज्जायरण-वावन्नसीलजीवियं वावाएमि त्ति?। अन्नं च-वीसत्थं जंपियमिमीए कीलियं च आ [1]बालभावाओ, भुत्ता सिणेहसारं, जणिओ अप्पाण-यतुल्लो पुत्तो। ता किं एइणा। अवि य-अविवेयबहुला चेव इत्थिया होइ। उज्जओ य अहं सामण्णपडिवत्तीए। एवं च गुणहरकुमारस्स वि लाघवभावेण पत्थुयविघाओ त्ति। अहो मे असरिसववसाओ त्ति विलिएण तक्खणं चेव समाणियं मण्डलग्गं, विरत्तं च मे चित्तं देवीओ। उवट्ठिओ धम्मववसाओ। गओ वासहरं, णुवन्नो सयणिज्जे, पवत्तो चिन्तिउं। अहो महिलिया नाम अभूमी विमलया, अणग्गी चुडुली, अभोयणा विसूइया, अणामिया वाही, [2]अवेयणा मुच्छा, अणुवसग्गा मारी, अणियला गोत्ती, अरज्जुओ पासो,

लत्तारकं वदनम्। एतं च वातायनप्रविष्टचन्द्रालोकभासितं व्यतिकरमवलोक्याविवेकपवनसंधुक्षितः प्रज्वलितो मे मनसि कोपानलः। कर्षितं च तमालदलनीलं मण्डलाग्रम्। चिन्तितं च 'व्यापदयामि एतौ द्वावपि पापौ' इति। ततस्तमेव किरणावलिभासुरं ज्वलन्तमिव प्रेक्ष्यैषत् प्रनष्टमविवेकान्धकारेण। जाता च मम चिन्ता-येन मया परचक्रगजघटाविदारणलालसा नरेन्द्रकेसरिणो विनिपातिताः, स कथमिमं पुरुषसारमेयं देवीं चाकार्याचरणव्यापन्नशीलजीवितां व्यापादयामीति?। अन्यच्च-विश्वस्तं जल्पितमनया, क्रीडितं चाबालभावात्, भुक्ता स्नेहसारम्, जनित आत्मतुल्यः पुत्रः। ततः किमेतेन?। अपि च अविवेकबहुलैव स्त्री भवति। उद्यतश्चाहं श्रामण्यप्रतिपत्त्या। एवं च गुणधरकुमारस्यापि लाघवभावेन प्रस्तुतविघात इति। अहो! ममासदृशव्यवसाय इति व्यलीकेन तत्क्षणमेव समानीतं (कोशे निक्षिप्तं) मण्डलाग्रम्। विरक्तं च मे चित्तं देव्याः। उपस्थितो धर्मव्यवसायः। गतो वासगृहम्, निपन्नो (सुप्तः) शयनीये, प्रवृत्तश्चिन्ति-

[1] बालभावओ क। [2] सवेयणा ख।

अहेउओ मच्चु त्ति। अहवा किं इमीए चिन्ताए। ईइसो एस संसारो। अओ चेव पवज्जामो समणत्तणं ति। एवं जाव सुहपरिणामो कंचि कालं चिट्ठामि, ताव आगया देवी। कयं मए पसुत्तचेड(ट्ठि)यं[1]। णुवन्ना य मम समीवे। ठिया कंचि कालं। पवत्ता चाडुयम्मकरणे। अहमवि तमेव सुत्तचेट्ठ(ट्ठ)यं अवलम्बिऊण ठिओ कंचि कालं। समालिङ्गिओ अहं तीए। मए वि अत्तणो चित्तवियारमदंसयन्तेण पुव्विं व बहु मन्निया। एत्थन्तरंमि पहयाइं पाहाउयतूराइं। पढियं कालनिवेयएण।

एसा वच्चइ रयणी विमुक्कतमकेसिया विवण्णमुही। पाणीयं पिव दाउं परलोयगयस्स सूरस्स

पहाया रयणी, कयं गोसकिच्चं। ठिओ म्हि अत्थाइयामण्डवे। कया सविसेसं सामन्तप्पमुहाणमणुजीवीणं पसाया। पविट्ठो मन्तिघरयं। आगया विमलमइप्पमुहा महामन्तिणो। साहिओ मए एतेसिं निययाहिप्पाओ, न बहुमओ तेसिं। भणियं च णेहिं।

तुम्। अहो महिला नामाभूमिर्विषलता, अनग्निश्चुड्डलिः (उल्का)। अभोजना विसूचिका, अनामको व्याधिः, अवेदना मूर्छा, अनुपसर्गा मारिः, अनिगडा गुप्तिः, अरज्जुको पाशः, अहेतुको मृत्युरिति। अथवा किमनया चिन्तया? ईदृश एव संसारः। अत एव प्रपद्यामहे श्रमणत्वमिति। एवं यावत् शुभपरिणामः कञ्चित् कालं तिष्ठामि तावदागता देवी। कृतं मया प्रसुप्तचेष्टितम्। निपन्ना च मम समीपे। स्थिता कंचित्कालम्। प्रवृत्ता चाटुकर्मकरणे। अहमपि तदेव सुप्तचेष्टितमवलम्ब्य स्थितः कञ्चित्कालम्। समालिङ्गितोऽहं तया। मयाऽपि आत्मनश्चित्तविकारमदर्शयता पूर्वमिव बहु मता। अत्रान्तरे प्रहतानि प्राभातिकतूर्याणि। पठितं कालनिवेदकेन।

एषा व्रजति रजनी विमुक्ततमःकेशिका विवर्णमुखी। पानीयमिव दातुं परलोकगताय सूराय॥

प्रभाता रजनी, कृतं प्रातःकृत्यम्। स्थितोऽस्मि आस्थानिकामण्डपे। कृता सविशेषं सामन्तप्रमुखाणामनुजीविनां प्रसादाः। प्रविष्टो

[1] पसुत्तचेट्ठय ख।

देव, अपरिणओ ताव कुमारगुणहरो, पयापरिरक्खणं पि धम्मो चेव त्ति। तओ मए भणियं—किं न याणह तुब्भे, कुलट्ठिई एसा अम्हाणं, जमागए धम्मदूए न चिट्ठियव्वं ति। तेहिं भणियं—देवो जाणइ त्ति॥ अइक्कन्तो सो दियहो, समागया रयणी। ठिओ अत्थाइयामण्डवे। कंचि वेलं गमेऊण गओ वासभवणं। नियचदेवीसिणेहभावओ समागया मे निद्दा। रयणीचरिमजामंमि दिट्ठो मए सुमिणओ। किलाहं धवलहरोवरि सिंहासणोवविट्ठो पडिकूलभासिणीए पाडिओ कहवि अम्बाए जसोहराए, पलोट्टमाणो गओ सत्तमभूमियाए, अणुपलोट्टमाणा अम्बा वि तह चेव त्ति; उट्ठिऊण कहवि आरूढो मन्दरगिरिं। एत्थन्तरंमि विउद्धो। चिन्तियं च मए। दारुणारम्भो विवागसुन्दरो य एस सुमिणओ। ता न याणामो, किं भविस्सइ त्ति?। अहवा पत्थुयं मए परलोयसाहणं। जं होइ, त होउ त्ति॥

तओ धम्मज्झाणमणुसरन्तस्स चेव अइक्कन्ता रयणी। कयं पभाओचियं। ठिओ म्हि अत्थाइयामण्डवे। आगया मे महल्लु-

---

मन्निगृहम्। आगता विमलमतिप्रमुखा महामन्त्रिणः। कथितो मया एतेषां निजाभिप्रायः, न बहुमतस्तेषाम्। भणितं च तैः–देव! अपरिणतस्तावत् कुमारगुणधरः, प्रजापरिरक्षणमपि धर्म एवेति। ततो मया भणितम्–किं न जानीथ यूयम्, कुलस्थितिरेषाऽस्माकम्, यदागते धर्मदूते न स्थातव्यमिति। तैर्भणितं–देवो जानातीति। अतिक्रान्तः स दिवसः, समागता रजनी। स्थित आस्थानिकामण्डपे। कांचिद् वेलां गमयित्वा गतो वासभवनम्। निवृत्तदेवीस्नेहभावतः समागता मे निद्रा। रजनीचरमयामे दृष्टो मया स्वप्नः। किलाहं धवलगृहोपरि सिंहासनोपविष्टः प्रतिकूलभाषिण्या पातितः कथमपि अम्बया यशोधरया, प्रलुठन् गतः सप्तमभूमिकायाम्। अनुप्रलुठन्ती अम्बाऽपि तथैवेति, उत्थाय कथमपि आरूढो मन्दरगिरिम्। अत्रान्तरे विबुद्धः। चिन्तितं च मया। दारुणारम्भो विपाकसुन्दरश्चैष स्वप्नः। ततो न जानीमः किं भविष्यतीति?। अथवा प्रस्तुतं मया परलोकसाधनम्, यद् भवति तद् भवत्विति।

जलपरियणपरिवारिया अम्बा । अब्भुट्ठिओ सविणयं । पुच्छिओ अहं तीए सरीरकुसलं । निवेइयं मए ईसिं अवणउत्तिमङ्गेण । निसण्णा य सा धवलदुगुल्लोत्थयाए महापीढियाए । तओ मए चिन्तियं । अहो लट्ठयं जायं, जं अम्बा वि एत्थ आगय त्ति । निवेएमि इमीए निययाहिप्पायं, विन्नवेमि एयं पव्वज्जमन्तरेणं । अहवा अच्चन्तनेहालुया अम्बा दुक्खं मे समीहियं संपाडइस्सइ त्ति । दिट्ठो य अकुसलसुमिणओ; तओ आसङ्केमि अम्बाओ एत्थ अन्तरायं । न जुत्तं च इमीए पडिकूलमासेविउं, जओ दुप्पडियाराणि अम्मापिईणि हवन्ति । विरत्तं च मे चित्तं भवपवञ्चाओ । न सक्कुणोमि इह चिट्ठिउं । ता उवाएण विन्नवेमि, जेण निस्संसय चेव एसा अणुजाणइ त्ति । एसो य एत्थुवाओ होउ । तं चेव सुमिणयं तहा साहेमि, जहा तस्स पडिघायणनिमित्तं वेसमेत्तं पडुच्च अणुजाणिहिइ इत्तरकालियं पव्वज्जमम्बा । तओ अहं तहा पव्वइओ चेव होहामि त्ति चिन्तिऊण सव्वत्थाइयासमक्खं विन्नत्ता अम्बा

ततो धर्मध्यानमनुस्मरत एवातिक्रान्ता रजनी । कृतं प्रभातोचितम् । स्थितोऽस्मि आस्थानिकामण्डपे । आगता मे महत्तरोज्ज्वलपरिजनपरिवारिताऽम्बा । अभ्युत्थितः सविनयम् । पृष्टश्चाहं तया शरीरकुशलम् । निवेदितं मया ईषदवनतोत्तमाङ्गेन । निषण्णा च सा धवलदुकूलास्तृतायां महापीठिकायाम् । ततो मया चिन्तितम्–अहो लष्टं जातं यदम्बाऽपि अत्रागतेति । निवेदयाम्यस्यै निजकाभिप्रायम् । विज्ञपयाम्येतं (स्वप्नं) प्रव्रज्यामन्तरेण । अथवाऽत्यन्तस्नेहालुरम्बा दुःखं मे समीहितं संपादयिष्यति । दृष्टश्चाकुशलस्वप्नः, तत आशङ्के अम्बातोऽत्रान्तरायम् । न युक्तं चास्याः प्रतिकूलमासेवितुम् , यतो दुष्प्रतीकारौ मातापितरौ भवतः । विरक्तं च मे चित्तं भवप्रपञ्चात् । न शक्नोमीह स्थातुम् । तत उपायेन विज्ञपयामि, येन निःसंशयमेव एषाऽनुजानातीति । एष चात्रोपायो भवतु । तमेव स्वप्नं तथा कथयामि यथा तस्य प्रतिघातननिमित्तं वेषमात्रं प्रतीत्यानुज्ञास्यति इत्वरकालिकां प्रव्रज्यामम्बा । ततोऽहं तथा प्रव्रजित एव भविष्यामीति चिन्तयित्वा सर्वास्थानिकासमक्षं विज्ञप्ताऽम्बा मया । अम्ब ! अद्य मया रजन्याश्चरमयामे दृष्टः स्वप्नः । तं शृणोत्वम्बा । अम्बया

मए। अम्ब, अज्ज मए रयणीए चरमजामंमि दिट्ठो सुमिणओ[1]। तं सुणेउ अम्बा। अम्बाए भणियं—कहेहि पुत्त! केरिसो त्ति[2]। तओ मए भणियं। अहं खु किल गुणहरकुमारस्स रज्जं दाऊण कयसिरतुण्डमुण्डणो सयलसङ्गचाई समणगो संवुत्तो, धवलहरोवरिसंठिओ य पडिओ। तओ विउद्धो ससज्झसो त्ति। तओ अप्पसत्थसुविणयं सोऊण सुविणयत्थ[3]कोवियाए भयसंभन्तथरहरेन्तहियंयाए[4] वामपाएण महिमण्डलं अक्कमिऊण थुथुक्कयरसणाहं जंपियं अम्बाए। पुत्त, पडिहयं ते अमङ्गलं, चिरं जीव, निरुवसग्गं च महिं पालेहि। एयस्स वि य पडिघायणनिमित्तं कीरउ इमं, कुमारस्स रज्जं दाऊण गिहंमि चेव इत्तिरियकालं समणलिङ्गपडिवज्जणं ति। मए भणियं—अम्ब, जं तुमं आणवेसि। अम्बाए भणियं—निवडणनिमित्तं च निवाइऊण वेयविहिणा जलथलखहयरे जीवे करेहि कुलदेवयच्चणेणं सन्तिकम्मं ति। तओ मए ठइया कण्णा, भणियं च—अम्ब, कीइसं जीवघाएणं सन्तिकम्मं ति?। अहिंसालक्खणो खु धम्मो। सुण—

भणितम्—कथय पुत्र! कीदृश इति। ततो मया भणितम्—अहं खलु किल गुणधरकुमाराय राज्यं दत्त्वा कृतशिरस्तुण्डमुण्डनः सकलसङ्गत्यागी श्रमणः संवृत्तः, धवलगृहोपरिस्थितश्च पतितः। ततो विबुद्धः ससाध्वस इति। ततोऽप्रशस्तस्वप्नं श्रुत्वा स्वप्नार्थकोविदया भयसंभ्रान्तकम्पमानहृदयया वामपादेन महीमण्डलमाक्रम्य थूथूत्कृतरसनाथं जल्पितमम्बया। पुत्र! प्रतिहतं तवामङ्गलम्, चिरं जीव, निरुपसर्गं च महीं पालय। एतस्यापि च प्रतिघातननिमित्तं क्रीयतामिदम्, कुमाराय राज्यं दत्त्वा गृहे एव इत्वरिककालं श्रमणलिङ्गप्रपदनमिति। मया भणितम्—अम्ब! यत्त्वमाज्ञापयसि। अम्बया भणितम्—निपतन[निवारण]निमित्तं च निपात्य वेदविधिना जलस्थलखचरान् जीवान् कुरु कुलदेवतार्चनेन शान्तिकर्मेति। ततो मया स्थगितौ कर्णौ, भणितं च—अम्ब! कीदृशं जीवघातेन शान्तिकर्मेति। अहिंसालक्षणः खलु धर्मः। शृणु—

---

१ सुविणओ क। २ कीइसो त्ति क–ख। ३ सुविणयसत्थ० क। ४ ०हियंयं क

मणमेत्तेण वि इहइं परस्स एक्कं पि मरणभीरुस्स । मरणं भूयाण कयं बहुभवमरणुब्भवं होइ ॥
जो इह परस्स दुक्खं करेइ सो अप्पणो विसेसेणं । न पमायकयं कम्मं जं विहलं होइ जीवाणं ॥
जं पि आइट्ठं 'करेहि सन्तिकम्मं' ति ।
तं सुणसु सन्तिकम्मं नरस्स सव्वत्थसाहणसमत्थं । जं पयणुयं पि निच्चं परस्स पावं न चिन्तेइ ॥
इहलोए परलोए य सन्तियम्मं अणुत्तरं तस्स । जह पेच्छइ अप्पाणं तह जो सव्वे सया जीवे ॥
अम्बाए भणियं-पुत्त, परिणामविसेसओ पुण्णपावे, एसा य धम्मसुई । सुण—
जस्स न लिप्पइ बुद्धी हन्तूण इमं जगं निरवसेसं । पावेण सो न लिप्पइ पङ्कयकोसो व्व सलिलेणं ॥

मनोमात्रेणापि इह परस्य एकमपि मरणभीरोः । मरणं भूतानां कृतं बहुभवमरणोद्भवं भवति ॥
य इह परस्य दुःखं करोति स आत्मनो विशेषेण । न प्रमादकृतं कर्म यद् विफलं भवति जीवानाम् ॥
यदपि आदिष्टं 'कुरु शान्तिकर्म' इति ।
तत् शृणु शान्तिकर्म नरस्य सर्वार्थसाधनसमर्थम् । यत् प्रतनुकमपि नित्यं परस्य पापं न चिन्तयति ॥
इहलोके परलोके च शान्तिकर्मानुत्तरं तस्य । यथा पश्यत्यात्मानं तथा यः सर्वान् सदा जीवान् ॥
अम्बया भणितम्-पुत्र ! परिणामविशेषतः पुण्यपापे, एषा च धर्मश्रुतिः । शृणु—
यस्य न लिप्यते बुद्धिर्हत्वेदं जगद् निरवशेषम् । पापेन न स लिप्यते पङ्कजकोश इव सलिलेन ॥

---

१ संतिगम्म क

अहवा जइ वि पावं हवइ, तह वि देहारोग्गनिमित्तं कीरउ इमं ।

पावं पि हु कायव्वं बुद्धिमया कारणं गणन्तेणं । तह होइ किंपि कज्जं विसं पि जह ओसहं होइ ॥

मए भणियं–अम्ब, जं तए'आणत्तं 'परिणामविसेसओ पुण्णपावे त्ति, एत्थ अकज्जपवत्तणे कीइसो परिणामो त्ति ?। अन्नं च सुण–

पुण्णमिणं पावं चिय सेवन्तो तप्फलं न पावेइ । हालाहलविसभोई न य जीवइ अमयबुद्धी वि ॥

न य तिहुयणे वि पावं अन्नं पाणाइवायओ अत्थि । जं सव्वे वि य जीवा सुहलवतण्हालुया इहइं ॥

एवं च ठिए समाणे कहं हिंसावई धम्मसुइ त्ति ? । जं च आणत्तं 'जइ वि पावं हवइ, तहवि देहारोग्गनिमित्तं कीरउ इमं' ति, एत्थ सुण ।

दीहाउओ सुरूवो नीरोगो होइ अभयदाणेणं । जम्मन्तरेवि जीवो सयलजणसलाहणिज्जो य ॥

अथवा यद्यपि पापं भवति तथाऽपि देहारोग्यनिमित्तं क्रियतामिदम् ।

पापमपि खलु कर्तव्यं बुद्धिमता कारणं गणयता । तथा भवति किमपि कार्यं विषमपि यथौषधं भवति ॥

मया भणितम्–यत् त्वयाऽऽज्ञप्तं–परिणामविशेषतः पुण्यपापे इति, अत्र अकार्यप्रवर्तने कीदृशः परिणाम इति ? अन्यच्च शृणु–

पुण्यमिदं पापमेव सेवन् तत्फलं न प्राप्नोति । हालाहलविषभोजी न च जीवत्यमृतबुद्धिरपि ॥

न च त्रिभुवनेऽपि पापमन्यत् प्राणातिपाततोऽस्ति । यत् सर्वेऽपि च जीवाः सुखलवतृष्णावन्त [illegible] ॥

एवं स्थिते सति कथं हिंसावती धर्मश्रुतिरिति ? । यच्चाज्ञप्तं 'यद्यपि पापं भवति तथाऽपि देहारोग्यनिमित्तं क्रियतामिदम्' इति । अत्र शृणु–

देहारोग्गनिमित्तं पि एयवयपालणं चिय खमं मे। पावाहिवड्डिएण य देहेण वि अम्ब किं कज्जं ? ॥

अम्बाए भणियं–पुत्त, अलं रिसिवयणवियारणाए, कीरउ इमं चेव मह वयणं ति जंपमाणी निवडिया मे चलणेसु। तओ मए चिन्तियं–अहो दारुणं; एगत्तो गुरुवयणभङ्गो, अन्नत्तो य वयभङ्गो त्ति। ता किं एत्थ कायव्वं ?। अहवा गुरुवयणभङ्गाओ वि वयभङ्गो चेव विवागदारुणो त्ति चिन्तिऊण विन्नत्ता अम्बा। जहा–अम्ब, जइ ते अहं पिओ, ता अलं इमिणा दोग्गइनिवायहेउणा समाइट्ठेण। अहवा वावाएमि अत्ताणयं, करेउ अम्बा मम मंससोणिएणं कुलदेवयच्चणं ति। तओ मए कड्डियं मण्डलग्गं। एत्थन्तरंमि 'हा हा मा साहसं' ति समुद्धाइओ अत्थाइयामण्डवंमि कलयलो। ससज्झसं विय उट्ठिया अम्बा, धरिओ तीए दाहिणभुयादण्डे, भणिओ य। पुत्त, अहो ते माइवच्छलत्तणं; किं विवन्ने तुमंमि अहं जीवामि ?। ता पयारन्तरकओ माइवहो चेव तए एसो

दीर्घायुः सुरूपो नीरोगो भवत्यभयदानेन। जन्मान्तरेऽपि जीवः सकलजनश्लाघनीयश्च ॥

देहारोग्यनिमित्तमपि एतद्व्रतपालनमेव क्षमं मे। पापाभिवर्धितेन च देहेनापि अम्ब ! किं कार्यम् ॥

अम्बया भणितम्–पुत्र ! अलं ऋषिवचनविचारणया, क्रियतामिदमेव मम वचनमिति जल्पन्ती निपतिता मे चरणयोः। ततो मया चिन्तितम्–अहो ! दारुणम्, एकतो गुरुवचनभङ्गः, अन्यतश्च व्रतभङ्ग इति। ततः किमत्र कर्तव्यम् ?। अथवा गुरुवचनभङ्गादपि व्रतभङ्ग एव विपाकदारुण इति चिन्तयित्वा विज्ञप्ताऽम्बा। यथा अम्ब ! यदि तवाहं प्रियः, ततोऽलमनेन दुर्गतिनिपातहेतुना समादिष्टेन। अथवा व्यापादयाम्यात्मानम्, करोत्वम्बा मम मांसशोणितेन कुलदेवतार्चनमिति। ततो मया कर्षितं मण्डलाग्रम्। अत्रान्तरे 'हा हा मा साहसम्' इति समुद्धावित आस्थानिकामण्डपे कलकलः। ससाध्वसेव चोत्थिताऽम्बा, धृतस्तया दक्षिणभुजादण्डे, भणितश्च–पुत्र ! अहो ! तव मातृवत्सलत्वम्, किं विपन्ने त्वयि अहं जीवामि ? ततः प्रकारान्तरकृतो मातृवध एव त्वयैव व्यवसित इत्येवं

ववसिओ त्ति एवं निरूवेहि। एत्थन्तरंमि कूइयं कुक्कुडेणं। सुओ अम्बाए सद्दो, भणियं च तीए। पुत्त, सूएइ अप्पाणं एस कुक्कुडो। अत्थि य इमो कप्पो, जं ईइसे पत्थुयंमि जस्स चेव सद्दो सुणीयइ, तस्स तप्पडिबिम्बस्स वा वावायणेण समीहियसंपायणं ति। ता चिट्ठन्तु अन्ने जीवा, एयं चेव कुक्कुडं वावाएहि त्ति। मए भणियं-अम्ब, न खलु अहं अम्बाएसेणावि अत्ताणयं मोत्तूण अन्नं वावाएमि। अम्बाए भणियं-पुत्त जइ एवं, ता किं एइणा; पिट्ठमयकुक्कुडवहेणावि ताव संपाडेहि मे वयणं ति जंपमाणी अवहरिऊण मण्डलग्गं पुणो वि निवडिया मे चलणेसु। एत्थन्तरंमि तन्नेहमोहियमणेण पणट्ठनाणावलोएण भणियं मए पावकम्मेण। अम्ब, एवं जं तुमं आणावेसि त्ति। अवि य।

बहुयं पि विन्नाणं नाइसहं होइ निययकज्जम्मि। सुट्ठु वि दूरालोयं ण पेच्छए अप्पयं अच्छि॥

एत्थन्तरंमि दिन्ना समाणत्ती लेप्पयाराणं। जहा-निव्वत्तेह अकालहीणं पिट्ठमयं कुक्कुडं ति। निव्वत्तिओ य तेहिं, उवणीओ

निरूपय। अत्रान्तरे कूजितं कुर्कुटेन। श्रुतोऽम्बया शब्दः, भणितं च तया-पुत्र! सूचयत्यात्मानमेष कुर्कुटः। अस्ति चायं कल्पः, यदीदृशे प्रस्तुते यस्यैव शब्दः श्रूयते तस्य तत्प्रतिबिम्बस्य वा व्यापादनेन समीहितसंपादनमिति। ततस्तिष्ठन्त्वन्ये जीवाः, एतमेव कुर्कुटं व्यापादयेति। मया भणितम्-न खल्वहमम्बादेशेनापि आत्मानं मुक्त्वाऽन्यं व्यापादयामि। अम्बया भणितम्-पुत्र! यद्येवं ततः किमेतेन, पिष्टमयकुर्कुटवधेनापि तावत्संपादय मम वचनमिति जल्पन्ती अपहृत्य मण्डलाग्रं पुनरपि निपतिता मम चरणयोः। अत्रान्तरे तत्स्नेहमोहितमनसा प्रनष्टज्ञानावलोकेन भणितं मया पापकर्मणा-अम्ब! एवं यत् त्वमाज्ञापयसीति। अपि च--

बहुकमपि विज्ञानं नातिसहं [नातिसमर्थं] भवति निजकार्ये। सुष्ठ्वपि दूरालोकं न पश्यत्यात्मानमक्षि॥

अत्रान्तरे दत्ता समाज्ञप्तिर्लेप्यकाराणाम्। निर्वर्तयताकालहीनं पिष्टमयं कुर्कुटम्। निर्वर्तितश्च तैः, उपनीतश्च मम समीपम्। ततः

मे समीवं । तओ सा अम्बा तं च कुक्कुडं ममं च घेत्तूण गया देवयापायमूलं । ठाविओ से अग्गओ। भणिओ अहं तीए। पुत्त, कड्ढेहि मण्डलग्गं । तओ मए ईसि विहसमाणेण कड्ढियं। अम्बाए य भणियं-भयवइ कुलदेवए, एस सव्वजीवाण वावायणवारए पुत्तदिट्ठदुस्सुमिणपडिघायणत्थमुवणीओ ते कुक्कुडो । वावाएइ य इमं एसो । ता एयस्स सरीरे कुसलं करिज्जासि त्ति भणिऊण सन्निओ अहं जहा 'वावाएहि एयं' ति। तओ मए घाइओ कुक्कुडो । कयं देवयच्चणं । भणिओ अम्बाए सिद्धकम्मो नाम सूवयारो। इमं मंससेसं लहुं रन्धेहि, जेण मे पुत्तो अहं च देवयासेसं पासामो त्ति । मए भणियं। अम्ब, अलं मंसभक्खणेण। सुण-

सुट्ठु वि गुणप्पसिद्धा तवनियमा दाणझाणविणिओगा। मन्तोसहा य विहला नरस्स मंसासिणो होन्ति ॥

खइयं वरं विसं पि हु खणेण मारेइ एक्कसिं चेव । मंसं पुणो वि खइयं भवमरणपरंपरं णेइ ॥

साऽम्बा तं च कुक्कुटं मां च गृहीत्वा गता देवतापादमूलम्। स्थापितस्तस्याग्रतः। भणितश्चाहं तया-पुत्र ! कर्षय मण्डलाग्रम् । ततो मयेषद् विहसता कर्षितम् । अम्बया च भणितम्-भगवति कुलदेवते ! एष सर्वजीवानां व्यापादनवारकः पुत्रदृष्टदुःस्वप्नप्रतिघातनार्थ-मुपनीतस्तव कुक्कुटः। व्यापादयति चेममेषः। तत एतस्य शरीरे कुशलं कुर्या इति भणित्वा संज्ञितोऽहं यथा 'व्यापादय एतम्' इति । ततो मया घातितः कुक्कुटः । कृतं देवतार्चनम् । भणितोऽम्बया सिद्धकर्मा नाम सूपकारः । इमं मांसशेषं लघु रन्धय, येन मे पुत्रोऽहं च देवताशेषं पश्याव इति । मया भणितम्-अम्ब ! अलं मांसशेषेण । शृणु--

सुष्ट्वपि गुणप्रसिद्धाः तपोनियमा दानध्यानविनियोगाः। मन्त्रौषधानि विफलानि नरस्य मांसाशिनो भवन्ति ॥

खादितं वरं विषमपि खलु मारयति एकश एव। मांसं पुनरपि खादितं भवमरणपरम्परां नयति ॥

---

[1] मन्तोसहाणि क-ग

मंसासिणो नरस्स हु पारत्तं आउयं च परिहाइ। परिवड्ढइ दोहग्गं दूसहदुक्खं च निरएसु ॥
भेसज्जं पि य मंसं देई अणुमन्नई य जो जस्स। सो तस्स मग्गलग्गो वच्चइ नरयं न संदेहो ॥
दुग्गन्धं बीभत्थं इन्दियमलसंभवं असुइयं च। खइएण नरयपडणं विवज्जणिज्जं अओ मंसं ॥
एए य मंसासिणो दोसा। इमे पुण अमंसासिणो गुणा।
सव्वजलमज्जणाइं सव्वपयाणाइ सव्वदिक्खाओ। एयाइ अमंसासित्तणस्स तणुयं पि न समाइं ॥
जे चोरसुमिणसउणा वण्हिपिसाया य भूयगहदोसा। एक्केण अमंसासित्तणेण ते तणसमी(मा)होन्ति ॥
मंसस्स वज्जणगुणा दो चेव अलं नरस्स जियलोए। जं जियइ निरुवसग्गं जं च मओ सोग्गइं लहइ ॥
अम्बाए भणियं। पुत्त, अलं वियारणाए। कयं चेव मे वयणं तुमए त्ति। ता किं एइणा। न य इमं सच्चयं मंसं ति। परियप्पणा

मांसाशिनो नरस्य खलु परत्रायुश्च परिहीयते। परिवर्धते दौर्भाग्यं दुस्सहदुःखं च निरयेषु ॥
भैषज्यमपि च मांसं ददाति अनुमन्यते च यो यस्य। स तस्य मार्गलग्नो व्रजति नरकं न संदेहः ॥
दुर्गन्धं बीभत्सं इन्द्रियमलसंभवमशुचिकं च। खादितेन नरकपतनं विवर्जनीयमतो मांसम् ॥
एते च मांसाशिनो दोषाः। इमे पुनरमांसाशिनो गुणाः।
सर्वजलमज्जनानि सर्वप्रदानानि सर्वदीक्षाः। एतानि अमांसाशित्वस्य तनुकमपि न समानि ॥
ये चौरस्वप्नशकुना वह्निपिशाचाश्च भूतग्रहदोषाः। एकेनामांसाशित्वेन ते तृणसमा भवन्ति ॥
मांसस्य वर्जनगुणौ द्वावेव अलं नरस्य जीवलोके। यज्जीवति निरुपसर्गं यच्च मृतः सुगतिं लभते ॥

सु एसा। तओ मए एयं पि पडिवन्नमणुचिट्ठियं च ॥

एत्थन्तरंमि बद्धं साणुबन्धमसुहकम्मं ति। बिइयदियहंमि य कओ कुमारस्स रज्जाभिसेओ। पयत्तो अहं पव्वइउं। भणिओ य देवीए-अज्जउत्त, अज्जेक्कं पुत्तरज्जसुहमणुभवामो, सुए पव्वइस्सामो त्ति। तओ मए चिन्तियं-किमेयमवरोप्परविरुद्धं देवीए ववसियं। अहवा एयं पि अत्थि चेव।

छड्डेइ जियन्तं पि हु मयं पि अणुमरइ काइ भत्तारं। विसहरगयं व चरियं वङ्कविवङ्कं महिलियाणं ॥

ता किं मम एइणा; जं एसा भणइ त्ति चिन्तिऊण भणियं-सुन्दरि, पहवसि तुमं मम जीवियाओ वि। किं मए कयाइ तुह पणयभङ्गो कओ त्ति?। तओ चिन्तियं देवीए-पव्वयन्ते नरवइंमि अपव्वयन्तीए मए महन्तो कलङ्को, वावन्ने उण मन्तिवयणओ

अन्यया भणितम्-पुत्र अलं विचारणया? कृतमेव मम वचनं त्वयेति। ततः किमेतेन। न चेदं सत्यं मांसमिति। परिकल्पना ह्येषा। ततो मया एतदपि प्रतिपन्नमनुष्ठितं च।

अत्रान्तरे बद्धं सानुबन्धमशुभकर्मेति। द्वितीयदिवसे च कृतः कुमारस्य राज्याभिषेकः। प्रवृत्तोऽहं प्रव्रजितुम्। भणितश्च देव्या। आर्यपुत्र! अद्यैकं (दिवसं) पुत्रराज्यसुखमनुभवावः, प्रातः प्रव्रजिष्यावः। ततो मया चिन्तितम्-किमेतद् अपरापरविरुद्धं देव्या व्यवसितम्? अथवा एतदपि अस्त्येव।

त्यजति जीवन्तमपि अनुम्रियते काचिद् भर्तारम्। विषधरगतमिव चरितं वक्रविवक्रं महिलानाम् ॥

ततः किं ममैतेन?। यदेषा भणतीति चिन्तयित्वा भणितम्-सुन्दरि! प्रभवसि त्वं मम जीवितादपि। किं मया कदाचित् तव प्रणयभङ्गः कृत इति? ततश्चिन्तितं देव्या-प्रव्रजति नरपतौ अप्रव्रजन्त्यां मयि महान् कलङ्कः, व्यापन्ने पुनर्मन्त्रिवचनतोऽननुम्रियमाणाया

अणणुमरन्तीए वि वालरज्जपरिवालणनिमित्तं न तहाविहो त्ति। ता वावाएमि अज्ज केणइ पयारेण महारायं ति। चिन्तिओ उवाओ। देमि से भोयणगयं चेव कहंचि चओरदिट्ठिं वञ्चिऊण अकालक्खेवघायणं विसं ति। अइक्कन्ता काइ वेला। तओ संपत्ताए भोयणवेलाए उवविट्ठो अहं। वित्थरियं महया विच्छड्डेण भोयणं। मुहनासियं संछइऊण ढुक्का भुञ्जावया। सद्दाविया देवी, आगया य एसा। अलक्खिज्जमाणतालउडविससंजोइएण किलाहारपरिणामणसमत्थेणं अलियपउत्तेण जोगवडएण सह आगन्तूण उवविट्ठा। एसा य भुत्ता सह मए। भुत्तावसाणे य आयमणवेलाए अवणीएसु चओरेसु पज्जन्तभक्खणिज्जं आहारपरिणामणसमत्थं अणेगदव्वसंजुयं उवणीयं मे जोयवडयं, भक्खियं मए निव्वियप्पेणं। भुत्तावसाणे य कयसोयायारो गओ वासभवणं। एत्थन्तरंमि वियम्भिओ विसवियारो, सिमिसिमियं मे अङ्गेहिं, जड्डयं गया जीहा, सामलीहूया कररुहा, पव्वायं वयणकमलं, निरुद्धो लोयणपसरो। तओ अहं तहाविहमणाचिक्खणीयमवत्थन्तरमणुहवन्तो निवडिओ सीहासणाओ। 'हा हा किमेयं' ति विसण्णो मे समीवमागओ पडिहारो।

अपि बालराज्यपरिपालननिमित्तं न तथाविध इति। ततो व्यापादयामि अद्य केनचित्प्रकारेण महाराजमिति। चिन्तित उपायः। ददामि तस्मै भोजनगतमेव कथंचित् चकोरदृष्टिं वञ्चयित्वाऽकालक्षेपघातनं विषमिति। अतिक्रान्ता काचिद् वेला। ततः संप्राप्तायां भोजनवेलायामुपविष्टोऽहम्। विस्तृतं महता विच्छर्दैन (विस्तारेण) भोजनम्। मुखनासिकं संछाद्य (ढुक्का) प्रवृत्ताः भोजकाः (भोजयितारः)। शब्दायिता देवी। आगता चैषा। अलक्ष्यमाणतालपुटविषसंयोजितेन किलाहारपरिणामनसमर्थेन अलीकप्रयुक्तेन योगवटकेन सहागत्योपविष्टा। एषा च भुक्ता मया सह। भुक्तावसाने च आचमनवेलायामपनीतेषु चकोरेषु पर्यन्तभक्षणीयमाहारपरिणामनसमर्थमनेकद्रव्यसंयुतमुपनीतं मह्यं योगवटकम्। भक्षितं मया निर्विकल्पेन। भुक्तावसाने च कृतशौचाचारो गतो वासभवनम्। अत्रान्तरे विजृम्भितो विषविकारः। सिमिसिमितं ममाङ्गैः, जाड्यं गता जिह्वा, श्यामीभूता कररुहाः, (पव्वायं) म्लानं वदनकमलम्, निरुद्धो लोचनप्रसरः।

भणिओ य तेण 'देव, किमेयं' ति। तओ जडा जीह त्ति न जंपियं मए। निरूविओ तेण, उवलद्धो मे विसवियारो। भणियं च णेण। अरे वाहरह सिग्घं विसप्पओपनिग्घायणसमत्थे वेज्जे। तओ 'न सोहणं वेज्जवाहरणं' ति चिन्तयन्ती ससंभमसमुक्खित्तुत्तरीया हाहारवं करेमाणी निवडिया ममोवरि देवी। अवणीयं च तीए निरंसुगं चेव कन्दमाणीए महं अङ्गुट्ठयङ्गुलीहिं कण्ठगयं ममपीडाए जीवियं।

तओ अहं देवाणुप्पिया, पियाए वावाइओ समाणो अट्टज्झाणदोसेण हिमवन्तदाहिणदिसालग्गे सिलिन्धपव्वए समुप्पन्नो वरिहिणीए कुच्छिंसि। जाओ कालक्कमेण। तओ बालओ चेव जणणिं वावाइऊण गहिओ वाहजुवाणेण, दिन्नो सत्तुयपत्थएणं नन्दावाडयवासिणो गामतलवरस्स। तत्थ य अजायपक्खो सीउण्हातण्हावेयणाओ अणुहवन्तो चिट्ठामि। तिव्वयरीए छुहावेयणाए पडिपेल्लिओ किमिए खाइउं पयत्तो म्हि। तेहि य मे पावकम्मेहिं संधुक्किज्जमाणं वित्थारमुवगयं सरीरं। जाओ मे विविहरयणामेलसच्छहो पिच्छ-

---

ततोऽहं तथाविधमनाख्येयमवस्थान्तरमनुभवन् निपतितः सिंहासनात्। 'हा हा किमेतद्' इति विषण्णो मम समीपमागतः प्रतीहारः। भणितश्च तेन-'देव! किमेतद्' इति?। ततो जडा जिह्वेति न जल्पितं मया। निरूपितस्तेन, उपलब्धो मम विषविकारः। भणितं च तेन-अरे व्याहरत शीघ्रं विषप्रयोगनिर्घातनसमर्थान् वैद्यान्। ततो 'न शोभनं वैद्यव्याहरणम्' इति चिन्तयन्ती ससंभ्रमोत्क्षिप्तोत्तरीया हाहारवं कुर्वन्ती निपतिता ममोपरि देवी। अपनीतं च तया निरंशुकमेव क्रन्दन्त्या ममाङ्गुष्ठाङ्गुलिभिः कण्ठगतं मर्मपीडया जीवितम्।

ततोऽहं देवानुप्रिय! प्रियया व्यापादितः सन् आर्तध्यानदोषेण हिमवद्दक्षिणदिशालग्ने शिलिन्ध्रपर्वते समुत्पन्नो बर्हिण्याः कुक्षौ। जातः कालक्रमेण। ततो बालक एव जननीं व्यापाद्य गृहीतो व्याधयुवकेन। दत्तः सक्तुप्रस्थकेन नन्दावाटकवासिनो ग्रामतलवरस्य। तत्र च अजातपक्षः शीतोष्णतृष्णावेदना अनुभवंस्तिष्ठामि। तीव्रतरया क्षुद्वेदनया प्रतिप्रेरितः कृमीन् खादितुं प्रवृत्तोऽस्मि। तैश्च मम पापकर्मभिः संधुक्ष्यमाणं (पोष्यमाणं) विस्तारमुपगतं शरीरम्। जातश्च मम विविधरत्नापीडसच्छायः पिच्छकभारः। ततोऽहं ग्राहितो

पब्भारो। तओ अहं गाहिओ नट्टफलं, पेसिओ य तेण 'सुन्दरो' त्ति कलिऊण नियपुत्तस्स चेव पाहुडं राइणो गुणहरस्स॥ इओ य जसोहरा वि मे पुव्वजम्मजणणी मम मरणदिवसंमि चेव अट्टवसट्टा मरिऊण पावकम्मवलिययाए करहाडयविसए धन्नऊरयसन्निवेसंमि कुक्कुरीगब्भंमि कुक्कुरत्ताए उववन्ना। जाओ य कुक्कुरो। सो य 'मणपवणवेयदक्खो' त्ति धन्नपूरयसामिणा गुणहरस्स चेव पेसिओ कोसल्लियं ति। पत्ता अम्हे दुवे वि समयं चेव विसालं, पेसिया य अत्थाइयामण्डवगयस्स रन्नो, दिट्ठा य तेण। जाया एयस्स अम्हेसु पीई, पसंसिया दुवे वि। समप्पिओ सुणओ अयण्डमच्चुस्स सोणहियमयहरस्स, अहं च रायसउणपरिवालयस्स नीलकण्ठस्स। भणिओ य सोणहिओ। अरे जाणासि चेव तुमं, जहा अहं दोसु दढं पसत्तो पयावालणे पारद्धीए य। सुणएसु जीवघायणं सुहं ति, ता महन्तं जत्तं करेज्जासि त्ति। तेण भणियं 'जं देवो आणवेइ' त्ति। दुवे वि य अम्हे जहाविहिं लालेइ नरवई। एवं च अइक्कन्तो कोइ कालो॥

नाट्यफलाम्, प्रेषितश्च तेन 'सुन्दरः' इति कलयित्वा निजपुत्रस्यैव प्राभृतं राज्ञो गुणधरस्य। इतश्च यशोधराऽपि मम पूर्वजन्मजननी मम मरणदिवसे एव आर्तवशार्ता मृत्वा पापकर्मवलिकतया करहाटकविषये धान्यपूरकसंनिवेशे कुक्कुरीगर्भे कुक्कुरतयोपपन्ना। जातश्च कुक्कुरः। [illegible] च 'मन पवनवेगदक्षः' इति धान्यपूरकस्वामिना गुणधरस्यैव प्रेषितः कोसल्लियं (दे) उपहारम्। प्राप्तौ आवां द्वावपि समकमेव विशालाम् (उज्जयिनीम्)। प्रेषितौ चास्थानिकामण्डपगतस्य राज्ञः, दृष्टौ च तेन। जाता आवयोरेतस्य प्रीतिः, प्रशंसितौ द्वावपि। समर्पितः शुनकोऽकाण्डमृत्योः शौनिकिकमुख्यस्य, अहं च राजशकुनपरिपालकस्य नीलकण्ठस्य। भणितश्च शौनिकिकः-अरे जानास्येव त्वम्, यथाऽहं द्वयोर्दृढं प्रसक्तः प्रजापालने पापर्द्धयां च। शुनकैर्जीवघातनं सुखमिति, ततो महान्तं यत्नं कुर्या इति। तेन भणितम्-'यद् देव आज्ञापयति' इति। द्वावपि चावां यथाविधि लालयति नरपतिः। एवं चातिक्रान्तः कोऽपि कालः।

अन्नया य अहं गयणयलपासायसंठियं आरूढो इन्दनीलनिज्जूहयं। तत्थ अन्तेउराणं रसणनेउरनिनायगब्भिणं नवजलहरसद्दं पिव गुणणियामुरयनिग्घोसमायण्णिऊण नच्चिउं पयत्तो। तयवसाणे य वायायणविवरेगदेसेण दिट्ठा मए चित्तसालियाए सह खुज्जएण सयणुच्छङ्गे रइसुहमणुहवन्ती नयणावली। तं च मे दट्ठूण समुप्पन्नं जाइस्सरणं। तओ कम्मवसयत्तणेण अमरिसाणलपलित्तेणं चञ्चुनहग्गेहिं विं[ल]खिउमारद्धो। तीए वि तस्स सन्तियं खुज्जस्स गेण्हिऊणं लोहमयलउडयं कोहाभिभूयाए पहओ अहं पणइणीए। पहारविहलो निवडिओ सोवाणवत्तणीए, लुढमाणो पत्तो तमुद्देसं, जत्थ नरवई जूयं खेल्लइ त्ति। मग्गओ य मे 'गेण्ह गेण्ह' त्ति संलवन्तो समागओ देवीपरियणो। तं च तहाविहं सद्दं सोऊण तद्देसवत्तिणा तेण पुव्वभवजणणीसुणएण धाविऊण गहिओ अहं। घेप्पमाणं च मं पेच्छिऊण राइणा हाहारवं करेमाणेण पहओ सो सुणओ अक्खपाडएणं ति। पहारविहलंघलेण वमन्तरुहिरं मुक्को अहं तेण।

अन्यदा चाहं गगनतलप्रासादसंस्थितमारूढ इन्द्रनीलनिर्यूहकम्(गवाक्षम्)। तत्रान्तःपुराणां रशनानूपुरनिनादगर्भितं नवजलधरशब्दमिव गुणनिका(नाट्यशाला) मुरजनिर्घोषमाकर्ण्य नर्तितुं प्रवृत्तः। तदवसाने च वातायनविवरैकदेशेन दृष्टा मया चित्रशालायां सह कुब्जकेन शयनोत्सङ्गे रतिसुखमनुभवन्ती नयनावली। तां च मे दृष्ट्वा समुत्पन्नं जातिस्मरणम्। ततः कर्मवशगत्वेन अमर्षानलप्रदीप्तेन चञ्चुनखाग्रैर्विलिखितुमारब्धः। तयाऽपि तस्य सत्कं कुब्जस्य गृहीत्वा लोहमयलकुटं क्रोधाभिभूतया प्रहतोऽहं प्रणयिन्या। प्रहारविह्वलो निपतितो सोपानवर्तिन्याम्। लुठन् प्राप्तस्तमुद्देशम्, यत्र नरपतिर्द्यूतं खेलतीति। मार्गतश्च मे 'गृहाण गृहाण' इति संलपन् समागतो देवीपरिजनः। तं च तथाविधं मे शब्दं श्रुत्वा तद्देशवर्तिना तेन पूर्वभवजननीशुनकेन धावित्वा गृहीतोऽहम्। गृह्यमाणं च मां प्रेक्ष्य राज्ञा हाहारवं कुर्वता प्रहतः स शुनकोऽक्षपाटकेनेति। प्रहारविह्वलाङ्गेन वमद्रुधिरं मुक्तोऽहं तेन। कण्ठगतप्राणो निपतितो द्वावपि

१ विलिखया इ मए। तेहि वि य रइसगमनियलिएहि मूसलेहि पहओ अहं। पहारविहलो। २ अक्खपाडण स।

कण्ठगयपाणा निवडिया दुवे वि अम्हे धरणिवट्ठे। सोगमुवगओ राया। आणत्ता तेण पुरोहियप्पमुहा मणुस्सा। जहा तायस्स उवर-यस्स अग्गिकाए य कालायरुलवङ्गचन्दणकट्ठेहिं महन्तो सक्कारो कओ, सोग्गइनिबन्धणाइं दिन्नाइं महादाणाइं, तहा एयाण वि उवर-याण कायव्वं ति। एयमायण्णिऊण चिन्तियं मए। अहो णु खलु पुत्तएणं सव्वसक्कारो पाविओ, दिन्नाइं णे सोग्गइनिबन्धणाइं दाणाइं, अहं पुण तिरिक्खजोणीए वि अवोच्छिन्नाए छुहाए किमिए खायन्तो सुणएहि य खज्जमाणो चिट्ठामि। अहो गरुयया कम्माणं। एवं चिन्तयन्तस्स विमुक्कं सरीरयं जीविएणं ॥

तओ अहं देवाणुप्पिया, सुवेलपव्वयावरदिसाभाए अत्थि दुप्पवेसं नाम वणं, तम्मि य

उवभोगजोग्गपल्लवपुप्फफलच्छाहिउदगपब्भट्ठे। सीयन्नि-घोडि-वब्बूल-कयर-खइराइसंकिण्णे ॥

ताड-वड-खज-खज्जण-सुक्कतरुगहीरदुक्खसंचारे। विविहविसविडविनिग्गयवङ्कुडतिक्खग्गकण्टइए ॥

आवां धरणीपृष्ठे। शोकमुपगतो राजा। आज्ञप्तास्तेन पुरोहितप्रमुखा मनुष्याः। यथा तातस्योपरतस्याग्निकायाश्च कालागुरुलवङ्गचन्दन-काष्ठैर्महान् सत्कारः कृतः, सुगतिनिबन्धनानि दत्तानि महादानानि तथा एतयोरपि उपरतयोः कर्तव्यमिति। एतदाकर्ण्य चिन्तितं मया-अहो नु खलु पुत्रेण सर्वसत्कारः प्रापितः, दत्तानि आवयोः सुगतिनिबन्धनानि दानानि, अहं पुनस्तिर्यग्योनावपि अव्युच्छिन्नया क्षुधा कृमीन् खादन् शुनकैश्च खाद्यमानस्तिष्ठामि। अहो गुरुकता कर्मणाम्। एवं चिन्तयतो विमुक्तं शरीरं जीवितेन।

ततोऽहं देवानुप्रिय! सुवेलपर्वतापरदिग्भागेऽस्ति दुष्प्रवेशं नाम वनम्। तस्मिंश्च-

उपभोगयोग्यपल्लवपुष्पफलच्छायोदकप्रभ्रष्टे। श्रीपर्णी-घोण्टी(बदरी)बब्बूल-करीर-खदिरादिसंकीर्णे ॥

---

१ रुआ्दउ० ख। २ सीयन्नि० क-ग। ३ वच्चूल ग, वच्छूल ख। ४ खइरोल्लि० ख। गइरानिस० क। ५ गुरुञ्जयरग० क-ग।

एयारिसंमि य वणे नीसेसं चिय निराभिरामंमि । काणयमतीए गब्भे जणिओऽहं कुण्टपसएणं ॥

तत्थ गब्भे नरयकुम्भीपागाइरेगवेयणं विसहमाणो असंपडिए चेव पसवकाले जाओ म्हि दुप्पवेसे वणे। अव्वोच्छिन्नछुहा-पीडियाए य पणट्ठं मे जणणीए थणएसु खीरं। तओ अहं बुभुक्खापरिमिलाणदेहो तत्थ परिब्भमन्तो गोक्खुरयकण्टए खाइउमाढत्तो। तओ ममं पावेण वित्थारमुवगयं मे सरीरं। इओ य सो पुव्वपरजम्ममाइपुगओ अट्टज्झाणमुवगओ मरिऊण समुप्पन्नो इमंमि चेव दुप्पवेसे वणे भुयङ्गमत्ताए त्ति। दिट्ठो य सो मए कालपासो व्व विद्दुममणिरत्तनयणो घणन्धयारच्छवी ससिकलाकोडिधवलदाढो चलन्तजमलजीहो जलासयसमीवे दद्दुरं खायमाणो त्ति। तओ बुभुक्खापरिगएणं अवियारिऊण परिणइं गहिओ मए पुच्छदेसे। तेण वि य नयणसिहिसिहाजालाभासुरमवलोइऊण डक्को अहं वयणदेसे। एवं च अन्नाणकोहवसया दुवे वि अम्हे परोप्परं खाइउमा·

ताड-घट-खर्ज-खञ्जन-शुष्कतरु(अगुरु)गभीरदुःसंचारे। विविधविषधरविनिर्गतवनतीक्ष्णाग्रकण्टकिते ॥

एतादृशे च वने निःशेषमेव निरभिरामे। काणपसन्या गर्भे जनितोऽहं कुण्टपसवेन ॥

तत्र गर्भे नरककुम्भीपाकातिरेकवेदनां विषहन् असंपतिते एव प्रसवकाले जातोऽस्मि दुष्प्रवेशे वने। अव्युच्छिन्नक्षुत्पीडितायाश्च प्रनष्टं मे जनन्याः स्तनेषु क्षीरम्। ततोऽहं बुभुक्षापरिम्लानदेहस्तत्र परिभ्रमन् गोक्षुरकण्टकान् खादितुमारब्धः। ततः समं पापेन विस्तारमुपगतं मे शरीरम्। इतश्च स पूर्वतरजन्ममातृशुनक आर्तध्यानमुपगतो मृत्वा समुत्पन्नोऽस्मिन्नेव दुष्प्रवेशे वने भुजङ्गमतयेति। दृष्टश्च स मया कालपाश इव विद्रुममणिरक्तनयनो घनान्धकारच्छविः शशिकलाकोटिधवलदंष्ट्रश्चलद्यमलजिह्वो जलाशयसमीपे दर्दुरं खादन्निति। ततो बुभुक्षापरिगतेन अविचार्य परिणतिं गृहीतो मया पुच्छदेशे। तेनापि च नयनशिखिशिखाजालभासुरमवलोक्य दष्टो·

१ गब्भाणलकुम्भी० क।

रुद्धा। एत्थन्तरंमि अदिट्ठपुव्वेण गहिओ अहं तरच्छेण, पाडिओ महियले। तओ सो ममं खाइउं पयत्तो। किह? चम्मं चरचराए फालयन्तो, छिराओ तडतडाए तोडयन्तो सोणियं ढगढगाए घोट्टयन्तो, अट्ठियाइं कडकडाए मोडयन्तो त्ति। अवि य

तह खाइउं पयत्तो जह मज्झं खज्जमाणसद्देण। भीएण व नीसेसं जीवेण कलेवरं मुक्कं॥

तओ अहं, देवाणुप्पिया, एवं सकम्मविणिवाइओ समाणो तत्थेव विसालाए नयरीए दुट्ठोदयाभिहाणाए निन्नयाए महाद्दहंमि तत्थ मीणीए गब्भपुडए रोहियमच्छत्ताए समुप्पन्नो म्हि। सो वि य कण्हसप्पो तहा मरिऊण इमाए चेव सरियाए सुंसुमारत्ताए त्ति। जाया कालक्कमेणं। अन्नया अहं तत्थ चेव परिब्भमन्तो दिट्ठो सुंसुमारेण, गहिओ पुच्छभाए। एत्थन्तरंमि मज्जणनिमित्तं समागयाओ अन्तेउरचेडियाओ। दिन्ना चिलाइयाभिहाणाए चेडियाए झम्पा। तओ मं मोत्तूण सा गहिया अणेण। सयराहं च पलाणो अहं।

ऽहं यवनदेशे। एवं चाज्ञानक्रोधवशगौ द्वावपि आवां परस्परं खादितुमारब्धौ। अत्रान्तरेऽदृष्टपूर्वेण गृहीतोऽहं तरक्षेण, पातितो महीतले। ततः स मां खादितुं प्रवृत्तः। कथम्? चर्म चरचरेति स्फाटयन्, शिरास्तटत्तटदिति त्रोटयन्, शोणितं ढग्ढगिति (घुट्घुटिति) पिबन्, अस्थीनि कट्कटिति मोटयन्निति। अपि च-

तथा खादितुं प्रवृत्तो यथा मम खाद्यमानशब्देन। भीतेनेव निःशेषं जीवेन कलेवरं मुक्तम्॥

ततोऽहं देवानुप्रिय! एवं स्वकर्मविनिपातितः सन् तत्रैव विशालाया नगर्या दुष्टोदकाभिधानायां निम्नगायां महाह्रदे तत्र मीन्या गर्भपुटके रोहितमत्स्यतया समुत्पन्नोऽस्मि, सोऽपि कृष्णसर्पस्तथा मृत्वाऽस्यामेव सरिति सुंसुमारतया (शिशुमारतया) इति। जातौ कालक्रमेण। अन्यदाऽहं तत्रैव परिभ्रमन् दृष्टः सुंसुमारेण, गृहीतः पुच्छभागे। अत्रान्तरे मज्जननिमित्तं समागता अन्तःपुरचेटिकाः।

१ उयट्टयाए, ख, ढगडगाए ग। २ पियन्तो क।

तीए वि य 'हा क(अ)हं गहिया गहिय'त्ति महन्तमारडियं। धरिया लोएण। कलयलरवेण समागया मच्छबन्धा। ओयरिऊण मुया-विया चेडी, गहिओ य सुंसुमारो, मारिओ दुक्खमारेणं॥ अइक्कन्तो कोइ कालो। एत्थन्तरंमि अहं केवट्टपुरिसेहिं समासाइओ जालेणं गहिओ जीवन्तओ, 'महामच्छो' त्ति कलिऊण समुप्पन्नकज्जेहिं पाहुडनिमित्तमुवणीओ गुणहरस्स। परितुट्ठो राया। संपाडियं पओयणं तेसिं। नीओ तेण नयणावलीए समीवं। भणिया य एसा। अम्ब, एयस्स रोहियमच्छस्स पुच्छभायं तायं अज्जियं च उद्दिसिऊण माहणाणं रन्धावेहि, उवरिमभायं च पक्कतलियं काऊण मज्झमत्तणो य विसेसं[सं]करेज्जासि। एवं च मे सुणमाणस्स देविं च पेच्छिऊण समुप्पन्नं जाइस्सरणं। एवं च रन्ना समाणत्ते छिन्दिऊण पुच्छखण्डं पेसियं माहणाणं नयणावलीए। सेसदेहंमि निच्छल्लियाइं खव-ल्लाइं, दिन्नं तिगडुक्कडं हिङ्गुलोणं, परिसित्तो हलिद्दापाणिएण। तओ उव्वत्तन्तमक्खणभरियाए पक्खित्तो महाकवल्लीए, संवत्तुव्व-

---

वृत्ता चिलातिकाऽभिधानया चेटिकया शम्पा। ततो मां मुक्त्वा सा गृहीताऽनेन। झटिति पलायितोऽहम्। तयाऽपि च 'हा अहं गृहीता गृहीतेति महद्वारटितम्। धृता लोकेन। कलकलरवेण समागता मत्स्यबन्धाः। अवतीर्य मोचिता चेटी, गृहीतश्च शिशुमारः, मारितो दुःखमारेण। अतिक्रान्तः कोऽपि कालः। अत्रान्तरेऽहं कैवर्तपुरुषैः समासादितो जालेन गृहीतो जीवन्। 'महामत्स्यः' इति कलयित्वा समुत्पन्नकार्यैः प्राभृतनिमित्तमुपनीतो गुणधरस्य। परितुष्टो राजा। संपादितं प्रयोजनं तेषाम्। नीतस्तेन नयनावल्याः समीपम्, भणिता चैषा—अम्ब, एतस्य रोहितमत्स्यस्य पुच्छभागं तातमार्यिकां चोद्दिश्य ब्राह्मणानां (भोजनाय) रन्धय। उपरितन-भागं च पक्वतलितं कृत्वा ममात्मनश्च विशेषं संस्कुर्याः। एवं च मे शृण्वतो देवीं च प्रेक्षित्वा समुत्पन्नं जातिस्मरणम्। एवं च राज्ञा समाज्ञप्ते छित्वा पुच्छखण्डं प्रेषितं ब्राह्मणानां नयनावल्या। शेषदेहे छिन्नास्त्वचः, दत्तं त्रिकटूत्कटं हिङ्गुलवणम्। परिसिक्तो हरि-

---

१ किह ख। २ गयागु ख। ३ विसं० क-ग। ४ महाणसे क। ५ खल्लिलाइं ख।

घाएण वलिज्जिउं पयत्तो ।

तो छिन्नभिन्नपयकं खाहिइ पुत्तो ममं ति जाणामि । तिव्ववियणाहिभूओ न धम्मझाणं झियाएमि ॥

इय निरुयत्थिओ मे निरयगइसमाणएहि दुक्खेहिं । दढकम्मनियलबद्धो न मुयइ जीवो सरीरं ति ॥

एवं च तत्थ तिव्ववेयणाभिभूओ चिट्ठामि । एयं च ताव एयं ॥

इओ य विसालानयरीए पाणवाडए जा मा पुव्वभवजणणी सुंसुमारभवे वट्टमाणी वावाइया, सा तत्थ छेलियत्ताए समुप्पन्ना । तओ तीए गब्भंमि एलयत्ताए परिक्खित्तो म्हि । जाओ कालक्कमेणं । पत्तो जोव्वणं । महामोहमोहियमणो मेहुणनिमित्तं आरूढो अम्मयं । दिट्ठो य नियजूहवइणा; कंसायजोएणं तहा हओ मम्मदेसे, जहा पाणे परिच्चइऊणं नियवीएण चेव समुप्पन्नो तीए

घातनोदेन । तत उद्वर्तमानभक्षणभूतायां प्रक्षिप्तो महाकटाहाम् । संवर्तोद्वर्तनेन तलितुं प्रवृत्तः ।

ततश्छिन्नभिन्नपदं खादिष्यति पुत्रो मामिति जानामि । तीव्रवेदनाभिभूतो न धर्मध्यानं ध्यायामि ॥

इति विरुद्धस्थितो मे निरयगतिसमानैर्दुःखैः । दृढकर्मनिगडबद्धो न मुञ्चति जीवः शरीरमिति ॥

एवं च तत्र तीव्रवेदनाभिभूतस्तिष्ठामि । एतच्च तावदेतत् ।

इतश्च विशालानगर्यां प्राणवाटके या मे पूर्वभवजननी शिशुमारभवे वर्तमाना व्यापादिता सा तत्र छागीतया समुत्पन्ना । तत-स्तस्या गर्भे एडकतया प्रक्षिप्तोऽस्मि । जातः कालक्रमेण, प्राप्तो यौवनम् । महामोहमोहितमना मैथुननिमित्तमारूढोऽम्बाम् । दृष्टश्च निजयूथपतिना । कषायोगेन तथा हतो मर्मदेशे यथा प्राणान् परित्यज्य निजकबीजेनैव समुत्पन्नस्तस्या गर्भे । अपि च–

१ एवं ■ तिव्ववेयणाउ पाविऊण इमं पि ताव पावउ त्ति । उज्जेणी पाखगामे ना सा पुव्वभव० ख । २ कसायोदएणं ■ ।

गब्भंमि । अवि य–

कम्ममलविणडिएणं तत्थ मरन्तेण मन्दभग्गेणं । अप्पा हु अप्पण च्चिय जणिओ जणणीए गब्भंमि ॥

सा य पच्चासन्ने पसवकाले गुणहरेण रन्ना पारद्धीओ नियत्तमाणेण अणासाइयन्नपाणिणा तहाविहच्छेत्तभायंमि कायजड्डयाए मन्दं मन्दं परिसक्कमाणी आयण्णमायड्ढिऊण कोडण्डं विद्धा कण्णियसरेण । पहारगरुययाए निवडिया धरणिवट्ठे । लद्धलक्खो परितुट्ठो राया, समागओ तमुद्देसं । दिट्ठा फुरफुरेन्तपाणा 'आवन्नसत्ता एस' त्ति लक्खिया तेणं । तओ य से उयरं वियारिऊणं नीणिओ अहं । समप्पिओ अयापालयस्स । अन्नथणपाणेणं जीविओ । पत्तो कुमारभावं । एत्थन्तरंमि पारद्धीफलणनिमित्तं गुणहरेण रन्ना कुलदेवयापूयाविहाणं कयं । भोयणत्थं वावाइया पन्नरस महिसया । बम्भणजणभोयणत्थं च सुसंभियं कयं महिसमंसं । इओ य 'किर पवित्तमुहो मेसो हवइ'त्ति लोयवाओ(आ)आणाविओ अहयं कायसुणउच्छिट्ठरद्धपकपरिसोहणनिमित्तं सूवयारेणं, ठाविओ महाणसदुवारे ।

कर्ममलविनटितेन तत्र म्रियमाणेन मन्दभाग्येन । आत्मा खलु आत्मनैव जनितो जनन्या गर्भे ॥

सा च प्रत्यासन्ने प्रसवकाले गुणधरेण राज्ञा पापर्द्धितो निवर्तमानेन अनासादितान्यप्राणिना तथाविधक्षेत्रभागे कायजडतया मन्दं मन्दं परिष्वष्कन्ती (गच्छन्ती) आकर्णमाकृष्य कोदण्डं विद्धा कर्णिकशरेण । प्रहारगुरुतया निपतिता धरणीपृष्ठे । लब्धलक्ष्यः परितुष्टो राजा । समागतस्तमुद्देशम् । दृष्टा स्फुरत्प्राणा, 'आपन्नसत्त्वा एषा' इति लक्षिता तेन । ततश्च तस्या उदरं विदार्य [धहिर्] नीतोऽहम् । समर्पितोऽजापालकस्य । अन्यस्तनपानेन जीवितः, प्राप्तः कुमारभावम् । अत्रान्तरे पापर्द्धिफलननिमित्तं गुणधरेण राज्ञा कुलदेवतापूजाविधानं कृतम् । भोजनार्थं व्यापादिता पञ्चदश महिषाः । ब्राह्मणजनभोजनार्थं च सुसम्भृतं कृतं महिषमांसम् । इतश्च किल 'पवित्र-

---

१ अद्दारन्तो पोर पालो । समागन्ने पसाकाले मम पुत्तेण चेव [illegible] । २ ०फलनि० फ ।

तओ मए उस्सिद्धियं तं मंसं, भुत्तं बम्भणेहिं, विइण्णं आयमणं। उट्ठिया दियवरा, ठिया य पन्तिया-पन्तियाहिं। एत्थन्तरंमि विसेसुज्जलनेवत्थं अन्तेउरं घेत्तूण आगओ गुणहरो। तं च मे दट्ठूण समुप्पन्नं जाइस्सरणं। विन्नाओ मे सव्ववुत्तन्तो। चलणेसु निवडिऊणं थाइया बम्भणा। भणियं च तेण-एसा पन्तिया तायस्स उवणमउ, एसा य अज्जियाए, एयाओ य कुलदेवयाए त्ति। तं पडिस्सुयं बम्भणेहिं। चिन्तियं च मए-अहो एवं पि नाम पुत्तए जयन्ते अहं दुक्खिओ त्ति। एत्थन्तरंमि भोयणनिमित्तं चेव सयलमाइलोयपरियओ उवविट्ठो राया। दिट्ठाओ देवीओ, न दिट्ठा नयणावली। तओ मए चिन्तियं-अह कहिं पुण सा भविस्सइ?। एत्थन्तरंमि अन्नं उद्दिसिऊण भणियं एगाए चेडीए। हला सुन्दरिए, इह अज्जं चेव इमे महिसया वावाइया, ता किं पुण एस एवंविहो पूइगन्धो त्ति?। तीए भणियं-हला पेम्ममञ्जूसिए, न एस महिसगन्धो; एसो खु देवीए नयणावलीए तहाऽजिण्णे रस-लोलुयत्तणेण मच्छयं खाइऊण कोढगहियाए वणन्तरुग्गिण्णो देहनिस्सन्दवाओ। इयरीए भणियं-हला सुन्दरिए, न एस मच्छया-

---

मुखो मेषो भवति' इति लोकवादाद् आनायितोऽहं काकशुनकोच्छिष्टस्पृष्टपक्वपरिशोधननिमित्तं सूपकारेण। स्थापितो महानसद्वारे। ततो मया उच्छिष्टितं तन्मांसम्, भुक्तं ब्राह्मणैः, वितीर्णमाचमनम्। उत्थिता द्विजवराः, स्थिताश्च पङ्क्तिकापङ्क्तिकाभिः। अत्रान्तरे विशेषोज्ज्वलनेपथ्यमन्तःपुरं गृहीत्वाऽऽगतो गुणधरः। तं च मे दृष्ट्वा समुत्पन्नं जातिस्मरणम्। विज्ञातो मया सर्ववृत्तान्तः। चरणेषु निपत्याभिवादिता ब्राह्मणाः। भणितं तेन-एषा पङ्क्तिका तातस्योपनमतु, एषा चार्यिकायाः, एताश्च कुलदेवताया इति। तत्प्रतिश्रुतं ब्राह्मणैः। चिन्तितं च मया-अहो एवमपि नाम पुत्रे जयति अहं दुःखित इति। अत्रान्तरे भोजननिमित्तमेव सकलमातृलोकपरिवृत उपविष्टो राजा। दृष्टा देव्यः, न दृष्टा नयनावलिः। ततो मया चिन्तितम्-अथ कुत्र पुनः सा भविष्यति?। अत्रान्तरे अन्यामुद्दिश्य भणितमेकया चेट्या। हले सुन्दरिके! इह अद्यैव इमे महिषा व्यापादिताः, ततः किं पुनरेष एवंविधः पूतिगन्ध इति?। तया भणितम्-हले प्रेम-

हारमेत्तसमुप्पन्नो कोढो, किं तु तहासब्भावियमहारायविसंप्पओयवावायणजणियपावसमुत्थो त्ति । ता अलमम्हाणमिमीए । एहि अन्नओ गच्छम्ह, ता मा किंपि आणत्तियं देइस्सइ त्ति । गयाओ चेडियाओ। तओ सविसेसं पलोइया मए, दिट्ठा य एक्कपासोव्विट्ठा मक्खियगहस्ससंपायदूसिया विणिग्गयातम्बनयणा नयणावलि त्ति । तओ तं पेच्छिऊण तिव्वयरदुक्खसंतत्तो सोइउं पवत्तो । कहं ?

हा किह सा पच्चक्खं कम्ममलोच्छाइया पणइणी मे । जम्मन्तरं व पत्ता रूवविवज्जासभेएण ॥

थयणेण थणहरेणं चरणेहि य जीए निज्जिया आसि । सव्वविलयाणमहियं सोहा ससिकलसकमलाणं ॥

तीए च्चिय पेच्छ कहं अङ्गुलिविगमक्खयसंगमेहिं च । ते चेव हन्दि देसा धणियं उव्वेवया जाया ॥

मञ्जूषिके ! न एष मदिरागन्धः, एष खलु देव्या नयनावल्या तथाऽजीर्णं रसलोलुपत्वेन मत्स्यं खादित्वा कुष्ठगृहीतया व्रणान्तरद्गीर्णो देहनिःस्यन्दयातः । इतरया भणितम्–हले सुन्दरिके! नैष मत्स्याहारमात्रसमुत्पन्नः कुष्ठः, किन्तु तथासद्भावितमहाराजविप्रयोग-व्यापादनजनितपापसमुत्थ इति । ततोऽलमस्माकमनया। एहि, अन्यतो गच्छावः, ततो मा किमपि आज्ञप्तिकां दास्यतीति । गते चेटिके । ततः सविशेषं प्रलोकिता मया, दृष्टा च एकपार्श्वोपविष्टा मक्षिकासहस्रसंपातदूषिता विनिर्गतातात्रनयना नयनावलिरिति । ततस्तां प्रेक्ष्य तीव्रतरदुःखसंतप्तः शोचितुं प्रवृत्तः । कथम् ?

हा कथं सा प्रत्यक्षं कर्ममलावच्छादिता प्रणयिनी मे । जन्मान्तरमिव प्राप्ता रूपविपर्यासभेदेन ॥

वदनेन स्तनभरेण चरणाभ्यां च यया निर्जिताऽऽसीत् । सर्ववनिताभ्योऽधिकं शोभा शशिकलशकमलानाम् ॥

तस्या एव पश्य कथं अंगुलिविगमक्षयसंगमैश्च । ते एव हन्दि देशा गाढमुद्वेजका जाताः ॥

---

१ ॰ाणगढि स

तओ मए उस्सिङ्घियं तं मंसं, भुत्तं बम्भणेहिं, विइण्णं आयमणं। उट्ठिया दियवरा, ठिया य पन्तिया–पन्तियाहिं। एत्थन्तरंमि विसेसुज्जलनेवत्थं अन्तेउरं घेत्तूण आगओ गुणहरो। तं च मे दट्ठूण समुप्पन्नं जाइस्सरणं। विन्नाओ मे सव्ववुत्तन्तो। चलणेसु निवडिऊणं वाइया बम्भणा। भणियं च तेण–एसा पन्तिया तायस्स उवणमउ, एसा य अज्जियाए, एयाओ य कुलदेवयाए त्ति। तं पडिस्सुयं बम्भणेहिं। चिन्तियं च मए–अहो एवं पि नाम पुत्तए जयन्ते अहं दुक्खिओ त्ति। एत्थन्तरंमि भोयणनिमित्तं चेव सयलमाइलोयपरियओ उवविट्ठो राया। दिट्ठाओ देवीओ, न दिट्ठा नयणावली। तओ मए चिन्तियं–अह कहिं पुण सा भविस्सइ?। एत्थन्तरंमि अन्नं उद्दिसिऊण भणियं एगाए चेडीए। हला सुन्दरिए, इह अज्जं चेव इमे महिसया वावाइया, ता किं पुण एस एवंविहो पूइगन्धो त्ति?। तीए भणियं–हला पेम्ममञ्जूसिए, न एस महिसगन्धो; एसो खु देवीए नयणावलीए तहाऽजिण्णे रस-लोलुयत्तणेण मच्छयं खाइऊण कोढगहियाए वणन्तरुग्गिण्णो देहनिस्सन्दवाओ। इयरीए भणियं–हला सुन्दरिए, न एस मच्छया-

---

मुखो मेषो भवति' इति लोकवाशद् आनायितोऽहं काकशुनकोच्छिष्टरजस्वपरिशोधननिमित्तं सूपकारेण। स्थापितो महानसद्वारे। ततो मया उच्छिङ्घितं तन्मांसम्, भुक्तं ब्राह्मणैः, वितीर्णमाचमनम्। उत्थिता द्विजवराः, स्थिताश्च पङ्क्तिकापङ्क्तिकाभिः। अत्रान्तरे विशेषोज्ज्वलनेपथ्यमन्तःपुरं गृहीत्वाऽऽगतो गुणधरः। तं च मे दृष्ट्वा समुत्पन्नं जातिस्मरणम्। विज्ञातो मया सर्ववृत्तान्तः। चरणेषु निपत्याभिवादिता ब्राह्मणाः। भणितं तेन–एषा पङ्क्तिका तातस्योपनमतु, एषा चार्यिकायाः, एताश्च कुलदेवताया इति। तत्प्रतिश्रुतं ब्राह्मणैः। चिन्तितं च मया–अहो एवमपि नाम पुत्रे जयति अहं दुःखित इति। अत्रान्तरे भोजननिमित्तमेव सकलमातृलोकपरिवृत उपविष्टो राजा। दृष्टा देव्यः, न दृष्टा नयनावलिः। ततो मया चिन्तितम्–अथ कुत्र पुनः सा भविष्यति?। अत्रान्तरे अन्यामुद्दिश्य भणितमेकया चेट्या। हले सुन्दरिके! इह अद्यैव इमे महिषा व्यापादिताः, ततः किं पुनरेष एवंविधः पूतिगन्ध इति?। तया भणितम्–हले प्रेम-

हारमेत्तसमुप्पण्णो कोढो, किं तु तहासब्भावियमहारायविसप्पओयवावायणजणियपावसमुत्थो त्ति । ता अलमम्हाणमिमीए । एहि अण्णओ गच्छम्ह, ता मा किंपि आणत्तियं देइस्सइ त्ति । गयाओ चेडियाओ । तओ सविसेसं पलोइया मए, दिट्ठा य एक्कपासोवविट्ठा मच्छियसहस्ससंपायदूसिया विणिग्गयातम्बनयणा नयणावलि त्ति । तओ तं पेच्छिऊण तिव्वयरदुक्खसंतत्तो सोइउं पवत्तो । कहं ?

हा किह सा पच्चक्खं कम्ममलोच्छाइया पणइणी मे । जम्मन्तरं व पत्ता रूवविवज्जासभेएण ॥

थणोण थणहरेणं चरणेहि य जीए निज्जिया आसि । सव्वचिलयाणमहियं सोहा ससिकलसकमलाणं ॥

तीए च्चिय पेच्छ कहं अङ्गुलिविगमखयसंगमेहिं च । ते चेव हन्दि देसा घणियं उव्वेवया जाया ॥

मञ्जूषिके ! न एष मद्दिरागन्धः, एष खलु देव्या नयनावल्या तथाऽजीर्णे रसलोलुपत्वेन मत्स्यं खादित्वा कुष्ठगृहीतया व्रणान्तरदुर्गीर्णो देहनिःस्यन्दयातः । इतरया भणितम्–हले सुन्दरिके ! नैप मत्स्याहारमात्रसमुत्पन्नः कुष्ठः, किन्तु तथासद्भावितमहाराजविषप्रयोगव्यापादनजनितपापसमुत्थ इति । ततोऽलमस्माकमनया । एहि, अन्यतो गच्छावः, ततो मा किमपि आज्ञप्तिकां दास्यतीति । गते चेटिके । ततः सविशेषं प्रलोकिता मया, दृष्टा च एकपार्श्वोपविष्टा मक्षिकासहस्रसंपातदूषिता विनिर्गतातात्रनयना नयनावलिरिति । ततस्तां प्रेक्ष्य तीव्रतरदुःखसंतप्तः शोचितुं प्रवृत्तः । कथम् ?

हा कथं सा प्रत्यक्षं कर्ममलावच्छादिता प्रणयिनी मे । जन्मान्तरमिव प्राप्ता रूपविपर्यासभेदेन ॥

वदनेन स्तनभरेण चरणाभ्यां च यया निर्जिताऽऽसीत् । सर्वचनिताभ्योऽधिकं शोभा शशिकलशकमलानाम् ॥

तस्या एव पश्य कथं अंगुलिविगमक्षयसंगमैश्च । ते एव हन्दि देशा गाढमुद्वेजका जाताः ॥

1 ०गगर्णहि ग

केसाहरनयणेहिं सविब्भमुब्भन्तपेच्छिएहिं च । तिव्वतवाण मुणीण वि जा चित्तहरा दढमासि ॥

स च्चेय कह णु एण्हिं तेहिं चिय पावपरिणइवसेण । चिन्तिज्जन्ती वि पिया कामीण वि कुणइ निव्वेयं ॥

एवं च चिन्तयन्तो जाव कंचि कालं चिट्ठामि, ताव सद्दाविओ राइणा सूयारो, भणिओ य । अरे न रुचइ मे इमं महिसयमंसं, ता अन्नं किंपि लहुं आणेहि त्ति । तओ सूयारेण कलिऊण 'चण्डसासणो देवो, मा कालक्खेवो हविस्सइ' त्ति ममं चेव एक्कं सत्थियं छेत्तूण कयं भडित्तयं, पेसियं च रन्नो । तेण वि य 'तायस्स उवणमउ' त्ति भणिऊण दवावियं थेवमग्गासणत्थबम्भणाणं, पेसियं च किंपि नयणावलीए, भुत्तं च सेसमप्पणा ॥ एत्थन्तरंमि य जा सा मह जणणी गुणहरेण वावाइया आसि, सा कलिङ्गविसए महिसीए कुच्छिंसि महिसओ समुप्पन्नो; वड्ढिओ कालक्कमेणं । सो य भण्डभरयं वहन्तो समागओ विसालं नयरिं । वावाइओ य तेण

केशाधरनयनैः सविभ्रमसमुद्भ्रान्तप्रेक्षितैश्च । तीव्रतपसां मुनीनामपि या चित्तहरा दृढमासीत् ॥

सा एव कथं न्विदानीं तैरेव पापपरिणतिवशेन । चिन्त्यमानाऽपि प्रिया कामिनामपि करोति निर्वेदम् ॥

एवं च चिन्तयन् यावत् कंचित् कालं तिष्ठामि तावत् शब्दायितो राज्ञा सूपकारः, भणितश्च । अरे ! न रोचते मे इदं महिषमांसम्, ततोऽन्यत् किमपि लघु आनयेति । ततः सूपकारेण कलयित्वा 'चण्डशासनो देवः, मा कालक्षेपो भविष्यति' इति ममैवैकं सक्थि छित्त्वा कृतं भटित्रकम्, प्रेषितं च राज्ञः । तेनापि च 'तातस्योपनमतु' इति भणित्वा दापितं स्तोकमग्रासनस्थब्राह्मणेभ्यः, प्रेषितं च किमपि नयनावल्याः, भुक्तं च शेषमात्मना । अत्रान्तरे च या सा मम जननी गुणधरेण व्यापादिताऽऽसीत् सा कलिङ्गविषये महिष्याः कुक्षौ महिषः समुत्पन्नः । वर्धितः कालक्रमेण । स च भाण्डभरं वहन् समागतो विशालां नगरीम् । व्यापादितश्च तेन जलपानस्नाननिमित्तं सिप्रानदीं

१ दवाविय क । २ ०बम्भणस्स ख । ३ उज्जेणिं ख ।

जलपियणण्हाणनिमित्तं गिंधानइं समोयरन्तो आममन्दुरापहाणो वोल्लाहकिसोरो। [3]निवेइयं रन्नो। भणियं च णेण—अरे आणेह तं दुट्ठमहिसयं। नरवइसमाणन्तरं च आणीओ एसो। तओ तं दट्ठूण रोसफुरियाहरेण सूवयारं सद्दाविऊण भणियं राइणा। अरे एयं दुरायारं दुट्ठमहिसयं सजीवं चेव लहुं भडित्तयं करेहि त्ति। तेण वि य निहया सयलदिसासु लोहखोण्टया, लोहसङ्कलाहि च नियामिओ लोहखोण्टएसु। कयं च से निगड्डगहिकुलवणजलभरियं पुरओ महाकडाहं। पज्जालिओ य चउसु वि दिसासु नाइदूरंमि चेव खइरखर-सारकट्ठेहिं हुयासणो। तओ य सो महामहन्तेण अग्गिणा पच्चमाणो सुक्कोट्ठकण्ठतालू तिव्वतिसापरिगओ अहिययरं दुक्खं जणयन्तं खारपाणियं पिविउमाढत्तो। पलीविओ तेण सो देहमज्झे। निग्गयं च से वीयपासेणं किव्विसं। एत्थन्तरंमि समाणत्तं राइणा—पेसेहि लहुं महिसयभडित्तयं ति। तओ जत्थ जत्थ [4]पक्कमंसं, तओ तओ छिन्दिऊण पेसियं सूवयारेण। सित्तो य एसो घयउत्ते-डएहिं। पक्खित्तं च गहिणवट्टियं लोणं। विसेसेण पज्जालिओ जलणो। एत्थन्तरंमि आगओ रायपरियेसओ। भणियं च णेण—

जलपानस्नाननिमित्तं गिरिनदीं समवतरन् आममन्दुराप्रधानो वोल्लाहाश्वकिशोरः। निवेदितं राज्ञः, भणितं च तेन—अरे आनयत तं दुष्टमहिषम्। नरपतिसमादेशानन्तरं च आनीत एषः। ततस्तं दृष्ट्वा रोषस्फुरिताधरेण सूपकारं शब्दायित्वा भणितं राज्ञा। अरे एतं दुराचारं दुष्टमहिषं सजीवमेव लघु भटित्रकं कुरुतेति। तेनापि च निहता सकलदिक्षु लोहकीलकाः, लोहशृङ्खलाभिश्च नियमितो लोहकीलकेषु। कृतश्च तस्य निकटे ... भटित्रकं कुरुतेति। ... प्रज्वालितश्च चतुर्ष्वपि दिक्षु नातिदूरे एव खदिरवरसारकाष्ठैर्हुताशनः। ततश्च स अतिमहताऽग्निना पच्यमानः शुष्कौष्ठकण्ठतालुस्तीव्रतृट्परिगतोऽधिकतरं दुःखं जनयत् क्षारपानीयं पातुमारब्धः। प्रदीप्तस्तेन स देहमध्ये। निर्गतं च तस्य द्वितीयपार्श्वेण किल्बिषम्। अत्रान्तरे समादिष्टं राज्ञा—प्रेषय लघु महिषभटित्रकमिति। ततो यत्र यत्र पक्वमांसं ततस्ततो छित्त्वा प्रेषितं

१ गिरं नइं क। २ आमन्दुरा० ग। ३ निवेइओ य क। ४ लोहमयगों० क।

अरे अन्नं पि घिजाईयं भडित्तयं लहुं देहि त्ति । तओ पुलइओ अहं सूवयारेण[1] । 'भडित्तयं कज्जिहामि' त्ति संमूढो हियएण, उल्लुक्कं[2] सिराजालं, विहडिओ अट्ठिबन्धो, गलियाइं सव्विन्दियबलाइं । तओ कण्ठगयपाणो चेव गहिओ सूयारेण, छिन्नं मे बिइयपासयं । विमुक्को य मे देहो जीविएण ॥

तओ देवाणुप्पिया, एगसमयंमि चेव सो महिसयजीवो अहं च मरिऊण उप्पन्ना विसालापाणवाडए कुक्कुडीए गब्भंमि । अइक्कन्तो कोइ कालो । उवट्ठिए[3] पसवकाले वावाइया णे जणणी मज्जारपोयएण । कयवरोवरिं च तं खायमाणस्स गलियं अण्डयदुगं[4] गओ मज्जारो । पक्खित्तो य णे उवरिं काएवि चण्डालीए सुप्पकोणेण कज्जवो[5] । तदुम्हापहावेण[6] जीविया अम्हे । फुडियाइं अंडयाइं ।

सूपकारेण । सिक्तश्च एष घृतभरैः । प्रक्षिप्तं च श्लक्ष्णवर्तितं लवणम् । विशेषेण प्रज्वालितो ज्वलनः । अत्रान्तरे आगतो राजपरिवेषकः । भणितं च तेन-अरे अन्यदपि द्विजातीयं भटित्रकं लघु देहीति । ततः प्रलोकितोऽहं सूपकारेण । (अहं) 'भटित्रं करिष्ये' इति संमूढो हृदयेन, (उल्लुक्कं)स्तब्धं शिराजालम् । विघटितोऽस्थिबन्धः । गलितानि सर्वेन्द्रियबलानि । ततः कण्ठगतप्राण एव गृहीतः सूपकारेण, छिन्नं मे द्वितीयं पार्श्वम् । विमुक्तश्च मे देहो जीवितेन ।

ततो देवानुप्रिय ! एकसमये एव स महिषजीवोऽहं च मृत्वा उत्पन्नौ विशालाश्वपाकवाटके कुर्कुट्या गर्भे । अतिक्रान्तः कोऽपि कालः । उपस्थिते प्रसवकाले व्यापादिता आवयोर्जननी मार्जारपोतकेन । कचवरोपरि तां च खादतो गलितमण्डद्विकम् । गतो मार्जारः । प्रक्षिप्तश्चावयोरुपरि कयापि चाण्डाल्या शूर्पकोणेन कचवरः । तदुष्मप्रभावेण जीवितावावाम् । स्फुटितेऽण्डके । निर्गतावावाम् । गृहितौ

१ भडित्तयनिमित्तं अईवरोद्दाए दिट्ठीए । तओ अहं भडित्तयं वज्जिहामित्ति आमोइऊण समूढो ख । २ उल्लुक्के ग । ३ उवट्ठिए क । ४ अण्डयजुयं ख ।
५ कज्जवो-कचवरः ६ तउम्हा० क, तदुण्हा० ख ।

निग्गया अम्हे । गहियाइं [1]अणहुलाभिहाणेण चण्डालदारएणं, जीवाविया तेण । जायाओ णे चन्दचन्दिमासच्छहाओ पिच्छावलीओ, समुब्भूया मे सुयमुहगुञ्जद्धरायसरिसा चूला गरुडचञ्चुसरिसा य मे चञ्चू । एत्थन्तरंमि दिट्ठाइं अम्हे कालदण्डवासिएण । 'अहो इमाइं राइणो [2]खेल्लणजोग्गाइं'त्ति गहियाइं तेण । उवणीयाइं च गुणहरस्स । परितुट्ठो राया । समप्पियाइं च णे एयस्स चेव कालदण्डवासियस्स । भणिओ य एसो-अरे जत्थ जत्थ वच्चामि, तत्थ तत्थ एयाइं आणेयव्वाइं । पडिस्सुयमणेण । अन्नया सयलन्तेउरपरियरिओ वसन्तकीलानिमित्तं गओ कुसुमायरुज्जाणं राया । नीयाइं अम्हे तहिं कालदण्डवासिएणं । ठिओ उज्जाणतिलयभूए बालकयलीहरयपरिक्खित्ते माहवीलयामण्डवे राया । इयरो वि सह अम्हेहिं गओ असोयवीहियं । दिट्ठो य तत्थ भयवं [3]ससिस्सगणपरिवुडो ससिप्पहाभिहाणो आयरिओ त्ति । तओ अलियवन्दणं करेन्तो उवगओ साहुमूलं, धम्मलाहिओ तेणं । तओ तं तवसिरिविरायन्तदेहं दट्ठूणं आयण्णिऊण पयइसुन्दरं तस्स वयणं उवसन्तो विय एसो । भणियं च णेण-भयवं, कीइसो तुम्हाण धम्मो ? । भयवया

अनहुलाभिधानेन चण्डालदारकेण । जीवितौ तेन । जाताश्चावयोश्चन्द्रचन्द्रिकासच्छायाः पिच्छावल्यः । समुद्भूता मे शुकमुखगुञ्जार्धरागसदृशी चूडा, गरुडचञ्चूसदृशी च मे चञ्चूः । अत्रान्तरे दृष्टावावां कालदण्डपाशिकेन । 'अहो इमौ राज्ञः खेलनयोग्यौ' इति गृहीतौ तेन, उपनीतौ च गुणधरस्य । परितुष्टो राजा । समर्पितौ चावामेतस्यैव कालदण्डपाशिकस्य । भणितश्चैषः-अरे यत्र यत्र व्रजामि तत्र तत्र एतावानेतव्यौ । प्रतिश्रुतमनेन । अन्यदा सकलान्तःपुरपरिवृतो वसन्तक्रीडानिमित्तं गतः कुसुमाकरोद्यानं राजा । नीतावावां तत्र कालदण्डपाशिकेन । स्थित उद्यानतिलकभूते बालकदलीगृहपरिक्षिप्ते माधवीलतामण्डपे राजा । इतरोऽपि सहावाभ्यां गतोऽशोकवीथिकाम् । दृष्टश्च तत्र भगवान् स्वशिष्यगणपरिवृतः शशिप्रभाभिधान आचार्य इति । ततोऽलीकवन्दनं कुर्वन् उपगतः साधुमूलम् ।

[1] अणहुया० क, अणहुलभि० ख, अणुहुला० ग । [2] खेल्लण० क । [3] सुसिस्स० ख

भणियं-सुणं।

सयलसत्तसाहारणो एगो चेव धम्मो। मूढो य एत्थ अणहिगयसत्थपरमत्थो जणो भेए कप्पेइ। सो उण समासेण इमो–मणवयणकायजोगेहिं परपीडाए अकरणं, तहा सुपरिसुद्धस्स अणलियस्स भासणं, तणमेत्तस्स वि अदत्तादाणस्स अग्गहणं, मणवयणकायजोगेहिं अबम्भचेरपरिवज्जणं, गोसुवण्णहिरण्णाइएसुं च अपरिग्गहो; तहा निसिभत्तवज्जणं, बायालीसेसणादोससुद्धपिण्डपरिभोओ ॥

एत्थन्तरंमि भणियं दण्डवासिएणं। भयवं, अलं एइणा; कहेहि गिहिधम्मं। कहिओ से भयवया पञ्चाणुव्वयाइओ सावयधम्मो। भणियं च णेण–भयवं, करेमि अहमेयं धम्मं। नवरं पुव्वपुरिसकमागयं वेयविहिएण विहिणा न परिच्चएमि पसुवहं ति। भयवया

धर्मलाभितस्तेन। ततस्ते तयःश्रीथिराजहेहं हक्षाऽऽकर्ण्य प्रकृतिसुन्दरं तस्य वचनमुपशान्त ईषेपः। भणितं च तेन–भगवन्! कीदृशो युष्माकं धर्मः?। भगवता भणितम्–श्रृणु।

सकलसत्त्वसाधारण एक एव धर्मः। मूढश्चात्रानधिगतशास्त्रपरमार्थो जनो भेदान् कल्पयति। स पुनः समासेनायम्–मनोवचनकाययोगैः परपीडाया अकरणम्, तथा सुपरिशुद्धस्यानलीकस्य भाषणम्, तृणमात्रस्यापि अदत्तादानस्याग्रहणम्, मनोवचनकाययोगैरब्रह्मचर्यपरिवर्जनम्, गोसुवर्णहिरण्यादिकेषु चापरिग्रहः, तथा निशाभक्तवर्जनम्, द्विचत्वारिंशदेषणादोषशुद्धपिण्डपरिभोगः।

अत्रान्तरे भणितं दण्डपाशिकेन। भगवन्! अलमेतेन, कथय गृहिधर्मम्। कथितस्तस्य भगवता पञ्चाणुव्रतादिकः श्रावकधर्मः। भणितं च तेन–भगवन्! करोम्यहमेतं धर्मम्, नवरं पूर्वपुरुषक्रमागतं वेदविहितेन विधिना न परित्यजामि पशुवधमिति। भगवता

१ सुणउ मो त्ति

भणियं–जइ न परिचयसि, तओ इमं कुक्कुडमिहुणयं जहा तहा पाविहिसि संसारसायरे अणत्थं ति। दण्डवासिएण भणियं–भयवं, किं पुण न परिचत्तमिमेहिं, को वा पाविओ अणत्थो?। तओ भयवया जहा अम्हे जणगितणया आसि, जहा य पिट्ठमयकुक्कुडवहो कओ, जहा य

सिहिसाणसप्पसया मीणोहारा य अइयमेसा य। महिसयकुक्कुडपक्खी जाया संसारजलहिंमि ॥

जाइं च णे पत्ताइं तिव्वदुक्खाइं, सव्वमेयं सुयाइसयनाणिणा साहियं ति। एयं च सोऊण परं संवेगमावन्नो दण्डवासिओ। भणियं च णेण–भयवं, अलं मे इय परिणामदारुणेणं वेयविहिएणावि पसुवहेणं; देहि मे गिहिधम्मोचियाइं वयाइं। तओ भयवया तित्थयरभासिएणं विहिणा से दिन्नो संसारजलहिबोहित्थभूओ पञ्चनमोकारो, तहा थूलयपाणाइवायविरमणाइयाइं च

भणितम्–यदि न परित्यजसि तत इदं कुर्कुटमिथुनं यथा तथा प्राप्स्यसि संसारसागरेऽनर्थमिति। दण्डपाशिकेन भणितम्–भगवन्! किं पुनर्न परित्यक्तमाभ्याम्? को वा प्राप्तोऽनर्थः?। ततो भगवता यथाऽऽवां जननीतनयौ आस्व, यथा च पिष्टमयकुर्कुटवधः कृतः, यथा च–

*शिखिश्वान–सर्पषसया मीनोद्धारौ च अजाजमेषाश्च। महिष–कुर्कुटपक्षिणश्च जाता संसारजलधौ।

यानि चावयोः प्राप्तानि तीव्रदुःखानि सर्वमेतत् श्रुतातिशयज्ञानिना कथितमिति। एतच्च श्रुत्वा परं संवेगमापन्नो दण्डपाशिकः। भणितं च तेन–भगवन्! अलं मे इति परिणामदारुणेन वेदविहितेनापि पशुवधेन, देहि मे गृहिधर्मोचितानि व्रतानि। ततो भगवता तीर्थंकरभाषितेन विधिना दत्तः संसारजलधिबोहित्थभूतः पञ्चनमस्कारः, तथा स्थूलप्राणातिपातविरमणादिकानि च व्रतानि। गृहीतानि

1 उण्ड० रा। 2 भयवया भणियं–सुणाहि भद्द! इमं–तहा साहिउमारद्धो जहा रा। 3 उहारः शिशुमारः। 4 सारीरदुक्खाइं स०२० रा।

* मयूरश्वानौ, 2 सर्पषसयौ, 3 मीनशिशुमारौ, 4 अजाजौ, 5 मेषमहिषौ, 6 कुर्कुटपक्षियुगलं चेति षड् भवाः।

वयाइं । गहियाइं च णेण नियचरियसवणसमुप्पन्नजाइस्सरणेहिं परमसंवेगागएहि य अम्हेहिं । तओ परिओसविसेसओ संपत्तभुवणगुरुधम्मबोहेहिं निट्ठवियमाणुबन्धासुहकम्मेहिं कूजियं अम्हेहिं । सुयं च तं राइणा दूसहरन्तरगएणं जयावलीए सह सुरयसोक्खमणुहवन्तेणं ति । गहियमणेण पासत्थं धणुवरं, सन्धिओ तीरियासरो, 'देवि, पेच्छ मे सद्दवेहित्तणं' ति भणिऊण मुक्को, तओ णेण वावाइयाइं अम्हे ॥

समुप्पन्नाणि तक्खणं चेव भुत्तमुत्ताए जयावलीए चेव कुच्छिसि । आविब्भूयजिणधम्मबोहिगब्भपहावेण समुप्पन्नो तीए दढं अभयदाणपरिणामो । दिन्नं सत्तेसु अभयदाणं । जायाइं कालक्कमेणं अहं दारओ जणणी मे दारिय त्ति । गब्भत्थेहिं च अम्हेहिं जणणी अभयदाणपरा आसि; अओ पइट्ठावियाइं नामाइं मज्झं अभयरुई इयरीए अभयमइ त्ति । वड्ढियाइं च अम्हे देहोवचएण कलाकलावेण य । चिन्तियं च राइणा—करेमि अभयमईए विवाहं अभयरुइणो य जुवरज्जाभिसेयं ति ॥

च तेन निजचरितश्रवणसमुत्पन्नजातिस्मरणाभ्यां परमसंवेगागताभ्यां चावाभ्याम् । ततः परितोषविशेषतः संप्राप्तभुवनगुरुधर्मबोधाभ्यां निष्ठापितसानुबन्धाशुभकर्मभ्यां कूजितमावाभ्याम् । श्रुतं च तद् राज्ञा दूष्यगृहान्तरगतेन जयावल्या सह सुरतसौख्यमनुभवतेति । गृहीतमनेन पार्श्वस्थं धनुर्वरम्, सन्धितस्तिर्यक्शरः, 'देवि ! पश्य मे शब्दवेधित्वम्' इति भणित्वा मुक्तः, ततस्तेन व्यापादितावावाम् ।

समुत्पन्नौ तत्क्षणमेव भुक्तमुक्ताया जयावल्या एव कुक्षौ । आविर्भूतजिनधर्मबोधिगर्भप्रभावेण समुत्पन्नस्तस्या दृढमभयदानपरिणामः । दत्तं सत्त्वेष्वभयदानम् । जातौ कालक्रमेण अहं दारको जननी मे दारिकेति । गर्भस्थाभ्यां चावाभ्यां जननी अभयदानपराऽऽसीत्, अतः प्रतिष्ठिते नामनी ममाभयरुचिरितराया अभयमतिरिति । वर्धितौ चावां देहोपचयेन कलाकलापेन च । चिन्तितं च राज्ञा—करोमि अभयमत्या विवाहम्, अभयरुचेश्च यौवराज्याभिषेकमिति ।

एत्थन्तरंमि पयट्टो पारद्धिं राया, निग्गओ विसालाओ, पत्तो उज्जाणन्तरं। छिक्को कुसुमामोयसुरहिणा मारुएणं। अवलोइयं च णेण तमुज्जाणं। दिट्ठो य तत्थ तिलयपायवासन्ने झाणमुवगओ सुदत्तो नाम मुणिवरो। कुविओ राया, 'अवसउणो खु एसो पारद्धीए पयट्टस्स, ता एयस्स कयत्थणाए चेव माणेमि एयं' ति चिन्तिऊण छुच्छुक्कारसारं मुयाविया सुणया। अयालमच्चू विव सिग्घवेएण पत्ता मुणिवरसमीवं। सुहुयहुयासणो विय तवप्पहाए जलन्तदेहो दिट्ठो तेहिं मुणिवरो।

तो तं समुज्जलन्तं साणा दट्ठूण निप्पहा जाया। ओसहिगन्धामोडियपब्भट्ठविसा भुयङ्ग व्व॥

तवकम्मपहावेणं काऊण पयाहिणं सुणयवन्द्रं। धरणिगयमत्थएहिं पडियं पाए मुणिवरस्स॥

तओ तं दट्ठूण विलिओ राया। चिन्तियं च णेण—अहो वरं एए सुणहपुरिसा, न उण अहं पुरिससुणहो, जेण एवं तवचरणनिरयस्स भयवओ वि अकुसलं चिन्तियं ति। एत्थन्तरंमि समागओ सयलाए विसालानयरीए पहाणो साहुवन्दणनिमित्तं राइणो चेव

अत्रान्तरे प्रवृत्तः पापर्द्धि (मृगयां) राजा, निर्गतो विशालायाः, प्राप्त उद्यानान्तरम्। स्पृष्टः कुसुमामोदसुरभिना मारुतेन, अवलोकितं च तेन तदुद्यानम्। दृष्टश्च तत्र तिलकपादपासन्ने ध्यानमुपगतः सुदत्तो नाम मुनिवरः। कुपितो राजा। अपशकुनः खल्वेष पापर्द्धयां प्रवृत्तस्य, तत एतस्य कदर्थनयैव मानयाम्येतमिति चिन्तयित्वा छुच्छुत्कारसारं मोचिताः शुनकाः। अकालमृत्युरिव शीघ्रवेगेन प्राप्ताः मुनिवरसमीपम्। सुहुतहुताशन इव तपःप्रभया ज्वलद्देहो दृष्टस्तैर्मुनिवरः।

ततस्तं समुज्ज्वलन्तं श्वाना दृष्ट्वा निष्प्रभा जाताः। ओषधिगन्धामोटितप्रभ्रष्टविषा भुजङ्गा इव॥

तपःकर्मप्रभावेन कृत्वा प्रदक्षिणं शुनकचन्द्रम्। धरणीगतमस्तकैः पतितं पादयोर्मुनिवरस्य॥

ततस्त दृष्ट्वा व्यलीको राजा। चिन्तितं च तेन—अहो वरमेते शुनकपुरुषाः, न पुनरहं पुरुषशुनकः, येनैवं तपश्चरणनिरतस्य भग-

वालमित्तो जिणवयणभावियमई अरहदत्तो नाम सेट्ठिपुत्तो त्ति। विन्नाओ य तेण राइणो परलोयनिरवेक्खयाए मुणिवरोवसग्गो। तओ पणमिऊण भणिओ तेण नरवई 'देव, किमेयं' ति। राइणा भणियं-जमुचियं पुरिससारमेयस्स। अरहयत्तेण भणियं-देव, पुरिससीहो खु तुमं, ता किं एइणा। ओयरह तुरङ्गमाओ, वन्दह भयवन्तं सुदत्तमुणिवरं। एसो खु कलिङ्गाहिवस्स अमरदत्तस्स पुत्तो सुदत्तो नाम नरवई। एयस्स पढमजोव्वणे वट्टमाणस्स उवणीओ आरक्खिएण तक्करो। भणियं च तेण-देव, एएण परघरं पविसिऊण एगं महल्लगं वावाइय मुट्ठं घरं, नीसरन्तो गहिओ अम्हेहिं; संपयं देवो पमाणं ति। एयं च सोऊण सद्दाविया णेण धम्मसत्थपाढया, भणिया य। एयस्स इमिणा आरक्खिएण एस दोसो कहिओ, ता कीइसो इमस्स दण्डो त्ति। तेहिं भणियं-देव, पुरिसघायओ परदव्वावहारी य एसो; ता तियचउक्कचच्चरेहिं निवेइऊण जणवयाणं तओ नेत्तुप्पाडणकण्णनासुक्कत्तणकरचरणछेयणेहिं

यतोऽपि अकुशलं चिन्तितम्। अत्रान्तरे समागतः सकलायां विशालानगर्यां प्रधानः साधुवन्दननिमित्त राज्ञ एव वालमित्रं जिनवचनभावितमतिरर्हद्दत्तो नाम श्रेष्ठिपुत्र इति। विज्ञातश्च तेन राज्ञः परलोकनिरपेक्षतया मुनिवरोपसर्गः। ततः प्रणम्य भणितस्तेन नरपतिः, 'देव! किमेतद्' इति। राज्ञा भणितम्-यदुचित पुरुषसारमेयस्य। अर्हद्दत्तेन भणितम्-देव! पुरुषसिंहः खलु त्वम्, ततः किमेतेन, अवतर तुरंगमात्, वन्दस्व भगवन्तं सुदत्तमुनिवरम्। एष खलु कलिङ्गाधिपस्यामरदत्तस्य पुत्रः सुदत्तो नाम नरपतिः। एतस्य प्रथमयौवने वर्तमानस्योपनीत आरक्षकेण तस्करः। भणितं च तेन-देव! एतेन परगृहं प्रविश्य एकं महत्तरं व्यापाद्य मुषित गृहम्, निःसरन् गृहीतोऽस्माभिः, साम्प्रतं देवः प्रमाणमिति। एतच्च श्रुत्वा शब्दायितास्तेन धर्मशास्त्रपाठका भणिताश्च। एतस्यानेनारक्षकेण एष दोषः कथितः, ततः कीदृशोऽस्य दण्ड इति?। तैर्भणितम्-देव! पुरुषघातकः परद्रव्यापहारी चैषः, ततस्त्रिक-चतुष्क-चत्वरेषु निवेद्य

१ ०वरस्सुवसग्गो ख। २ उढवामिएण ख

जीवियनासो चेव इमस्स दण्डो त्ति रिसिवयणं। एवं चायण्णिऊण चिन्तियमणेण। अहो जहन्ना रायकुलजीविया, जं ईदिसं पि अणुमन्नीयइ त्ति। ता अलं मे अणेगोवद्दवभायणेणं रज्जसुहेणं ति। आणन्दसन्नियस्स भाइणेयस्स दाऊण रज्जं सुहम्मगुरुसमीवे पव्वज्जं ति। ता वन्दणीओ खु एसो॥

एयं सोऊणससंभन्तो गओ राया मुणिवरसमीवं। वन्दिओ णेण भयवं सुदत्तमुणिवरो। एत्थन्तरंमि समत्तो झाणजोगो। तओ धम्मलाहिओ णेणं भणिओ य। 'महाराय, उवविससु' त्ति। तओ 'अहो मए अकज्जं ववसियं'त्ति अहियजायपच्छायावो लज्जावणयवयणकमलो उवविट्ठो राया[2]। चिन्तियं च णेणं। इमस्स रिसिस्स घायओ अहं ति। एवं च पयासिऊण अत्तणो सिरच्छेयमन्तरेण न पायच्छित्तं पेक्खामि[3]। ता किं बहुणा; न सक्कुणोमि अकज्जायरणकलङ्कदूसियं अत्ताणं मुहुत्तयं पि धारेउं। अओ अलं मे

जनपदानां ततो नेत्रोत्पाटन-कर्णनासोत्कर्तन-करचरणच्छेदनंजीवितनाश एवास्य दण्ड इति ऋषिवचनम्। एव चाकर्ण्य चिन्तितमनेन। अहो जघन्या राजकुलजीविका यदीदृशमपि अनुमन्यते इति। ततोऽलं मेऽनेकोपद्रवभाजनेन राज्यसुखेनेति आनन्दसंज्ञिताय भागिनेयाय दत्त्वा राज्यं सुधर्मगुरुसमीपे प्रपन्नः प्रव्रज्यामिति। ततो वन्दनीयः खल्वेषः।

एतच्च श्रुत्वा ससंभ्रान्तो गतो राजा मुनिवरसमीपम्। वन्दितस्तेन भगवान् सुदत्तमुनिवरः। अत्रान्तरे समाप्तो ध्यानयोगः। ततो धर्मलाभितस्तेन भणितश्च-महाराज! उपविशेति। ततोऽ'हो मयाऽकार्यं व्यवसितम्' इति अधिकजातपश्चात्तापो लज्जावनतवदनकमल उपविष्टो राजा। चिन्तितं तेन-अस्य ऋषेर्घातकोऽहमिति। एवं च प्रकाश्यात्मनः शिरश्छेदमन्तरेण न प्रायश्चित्तं प्रेक्षे। ततः किं बहुना? न शक्नोम्यकार्याचरणकलङ्कदूषितमात्मानं मुहूर्तमपि धारयितुम्, अतोऽलं मे इह स्थितेन, संपादयामि यथा समीहितमिति। अत्रान्तरे

१ दिट्ठो रायमि इमस्स जीवियनासो चेव दण्डो ■। २ चिंतिउ पयत्तो-नेमम्म पुरओ ठाइउ सक्कुणोमि, रिसि० ख। ३ पेच्छामि ख।

इहत्थिएणं; संपाडेमि जहा समीहियं ति। एत्थन्तरंमि समुप्पन्नमणपज्जवनाणाइसएण भणियं सुदत्तमुणिवरेण। महाराय, अलं ते इमिणा चिन्तिएण। न खलु एयं एत्थ पच्छित्तं, जं तए परियप्पियं। जओ आयघाओ वि पडिकुट्ठो चेव धम्मपयत्थजाणएहिं। भणियं च—

भावियजिणवयणाणं ममत्तरहियाण नत्थि हु विसेसो। अप्पाणंमि परंमि य तो वज्जे पीडमुभओ[2] वि॥

जं च अकज्जायरणकलङ्कदूसियं अत्ताणं मन्नसि त्ति, एयस्स वि जिणवयणाणुट्ठाणजलं चेव पक्खालणं, न उण अन्नं ति। जं पि चिन्तियं 'संपाडेमि जहा समीहियं' ति, एत्थं पि अलं तेण भवाणुबन्धिणा संपाडिएण। संपाडेहि असंपाडियपुव्वं तेलोक्कबन्धवाणं जाइजरामरणबन्धणविमुक्काणं तित्थयराणं सासणं॥ एत्थन्तरंमि मणगयाहिप्पायपयडणेणं 'अहो भगवओ नाणं' ति मन्नमाणो 'इमाओ चेव पच्छित्तमवगच्छिस्सं' ति आणन्दवाहजलभरियलोयणो पडिओ मुणिवरस्स चलणेसु राया। विन्नत्तो तेण भयवं मुणिवरो 'भयवं,

समुत्पन्नमनःपर्यवज्ञानातिशयेन भणितं मुनिवरेण। महाराज! अलं तेऽनेन चिन्तितेन, न खल्वेतदत्र प्रायश्चित्तं यत्त्वया परिकल्पितम्। यत आत्मघातोऽपि प्रतिक्रुष्ट एव धर्मपदार्थज्ञायकैः। भणितं च—

भावितजिनवचनानां ममत्वरहितानां नास्ति खलु विशेषः। आत्मनि परस्मिंश्च ततो वर्जयेत् पीडामुभयोरपि॥

यच्चाकार्याचरणकलङ्कदूषितमात्मानं मन्यसे इति, एतस्यापि जिनवचनानुष्ठानजलमेव प्रक्षालनम्, न पुनरन्यदिति। यदपि चिन्तितं 'संपादयामि यथासमीहितमिति, अत्रापि अलं तेन भवानुबन्धिना संपादितेन। संपादयासंपादितपूर्वं त्रैलोक्यबान्धवानां जातिजरामरणबन्धनविमुक्तानां तीर्थकराणां शासनम्। अत्रान्तरे मनोगताभिप्रायप्रकटनेन 'अहो भगवतो ज्ञानम्' इति मन्यमानः 'अस्मादेव प्रायश्चित्तमवगमिष्यामि' इति आनन्दबाष्पजलभृतलोचनः पतितो मुनिवरस्य चरणयो राजा। विज्ञप्तस्तेन भगवान् मुनिवरः। भगवन्! कथय

१ इह जीविएणं ख। २ ०मुभयं वि ख।

कहेहि किमेत्थ पायच्छित्तं' ति ? । मुणिवरेण भणियं–महाराय, पडिवक्खासेवणं । तं पुण न नियाणवज्जणमन्तरेणं ति, नियाणं परिहरियव्वं । नियाणं च एत्थ मिच्छत्तमोहणीयसंगयं अन्नाणं । तं च अन्नहा ठिएसु भावेसु अन्नहा पवज्जणं ति । चिन्तियं च तुमए 'अवसउणो खु एसो, अओ कयत्थणाए मारेमि' त्ति । अवसउणत्ते य इमं ते निमित्तं पडिहाइ, जहा किल एस अण्हाणसेवी कयसिरतुण्डमुण्डणो विरुद्धपासण्डवेसधारी भिक्खोवजीवगो त्ति । ता एत्थ महाराय, मज्झत्थो भविऊण निसामेहि कारणं, के ण्हाणसेवणासेवणाए गुणदोस त्ति ? । तत्थ ण्हाणसेवणगुणा ।

देहो खणमेत्तसुई तंमि य राओ तहाहिमाणो य । विलयाण पत्थणिज्जो सुइ त्ति दप्पो य अक्खाणं ॥

इमे य दोसा ।

किमत्र प्रायश्चित्तमिति । मुनिवरेण भणितम्–महाराज ! प्रतिपक्षासेवनम् । तत्पुनर्न निदानवर्जनमन्तरेणेति निदानं परिहर्तव्यम् । निदानं चात्र मिथ्यात्वमोहनीयसंगतमज्ञानम् । तच्चान्यथा स्थितेषु भावेष्वन्यथा प्रपदनमिति । चिन्तितं च त्वया 'अपशकुनः खल्वेषः, अतः कदर्थनया मारयामीति । अपशकुनत्वे चेदं ते निमित्तं प्रतिभाति, यथा किल[1] एषोऽस्नानसेवी कृतशिरस्तुण्डमुण्डनो विरुद्धपाषण्डवेषधारी भिक्षोपजीवक इति । ततोऽत्र महाराज ! मध्यस्थो भूत्वा निशामय कारणम्, के स्नानसेवनासेवनायां गुणदोषा इति । तत्र स्नानसेवनगुणाः ।

देहः क्षणमात्रशुचिस्तस्मिंश्च रागस्तथाऽभिमानश्च । वनितानां प्रार्थनीयः शुचिरिति दर्पश्चाक्षाणाम् ॥

इमे च दोषाः–

---

१ किं क

जलगयजीवविघाओ उप्पीलणओ य अन्नसत्ताणं । अन्नारखीरधुवणे अन्नाणपयासणं चेव ॥

एए चेव विवज्जएणं अण्हाणगुणा ।

दोसा उण विबुहजणं पडुच्च न हु केइ एत्थ विज्जन्ति । जं सव्वसत्थसारो पाणिदया तिगरणविसुद्धा ॥

एयं गणमाणेहिं चूलोवणयंमि जन्नदिक्खाए । सव्वायरेण गहियं अण्हाणवयं दिएहिं[1] पि ॥

अन्नं च

अक्खण्डियवयनियमा गुत्ता दन्तिन्दिया जियकसाया । सज्झायझाणनिरया निचसुई मुणिवरा होन्ति ॥

सिरतुण्डमुण्डणं पि हु जइस्स सव्वासवा नियत्तस्स । पढमवयरक्खणट्ठा गुणावहं होइ नियमेणं ॥

जलगतजीवविघात उत्पीडनकश्चान्यसत्त्वानाम् । अङ्गारक्षीरधावने अज्ञानप्रकाशनमेव ॥

एते एव विपर्ययेणास्नानगुणाः ।

दोषाः पुनर्विबुधजनं प्रतीत्य न खलु केऽप्यत्र विद्यन्ते । यत्सर्वशास्त्रसारः प्राणिदया त्रिकरणविशुद्धा ॥

एतां गणयद्भिश्चूडोपनये यज्ञदीक्षायाम् । सर्वादरेण गृहीतमस्नानव्रतं द्विजैरपि ॥

अन्यच्च—

अखण्डितव्रतनियमा गुप्ता दान्तेन्द्रिया जितकषायाः । स्वाध्यायध्याननिरता नित्यशुचयो मुनिवरा भवन्ति ॥

शिरस्तुण्डमुण्डनमपि खलु यतेः सर्वास्रवाद् निवृत्तस्य । प्रथमव्रतरक्षणार्थं गुणावहं भवति नियमेन ॥

---

१ दिएहिं ति ग

पासण्डं पि य एयं सुमङ्गलं वीयरायदोसेहिं। जम्हा जिणेहि भणियं अओ विरुद्धं ति वामोहो ॥
सव्वारम्भनियत्तो अप्पडिबद्धो य उभयलोएसु। भिक्खोवजीवगो च्चिय पसंसिओ सव्वसत्थेसु ॥
एवं च, महाराय, परमगुणजुत्तत्तणेण तियसाण वि महामङ्गलं समणरूवं कहं ते अवसउणो त्ति ? ॥

एयमायण्णिऊण पणट्ठं राइणो मिच्छत्तं। अहो[1] 'नाणाइसओ' त्ति जंपमाणो निवडिओ चलणेसु। भणियं च णेण–भयवं, एयमेयं, जमाइट्ठं भयवया। वज्जियं मए नियाणं। ता खंमसु मे एयमवराहं ति। भयवया भणियं–उट्ठेहि देवाणुप्पिया उट्ठेहि, अलं ते संभमेणं। खमापहाणा चेय मुणिणो हवन्ति। खमियं मए सव्वसत्ताणं। निसामेहि तित्थयरभासियं खमाए परंपराभावणं। विणा वि वइयरं बालेणऽक्कोसिएणावि साहुणा खमा भावियव्वा 'सुन्दरो खु एसो जमेवमवि अहिणिविट्ठो न मं तालेइ'। तालिएणावि

पाखण्डमपि चैतत् सुमङ्गलं वीतरागद्वेषैः। यस्माज्जिनैर्भणितमतो विरुद्धमिति व्यामोहः ॥
सर्वारम्भनिवृत्तोऽप्रतिबद्धश्चोभयलोकेषु। भिक्षोपजीवक एव प्रशंसितः सर्वशास्त्रेषु ॥
एवं च महाराज! परमगुणयुक्तत्वेन त्रिदशानामपि महामङ्गलं श्रमणरूपं कथं तेऽपशकुन इति ?।

एतदाकर्ण्य प्रनष्टं राज्ञो मिथ्यात्वम्। अहो 'ज्ञानातिशयः' इति जल्पन् निपतितश्चरणयोः। भणितं च तेन–भगवन्! एवमेतद् यदादिष्टं भगवता। वर्जितं मया निदानम्। ततः क्षमस्व मे एतमपराधमिति। भगवता भणितम्–उत्तिष्ठ देवानुप्रिय! उत्तिष्ठ, अलं ते संभ्रमेण। क्षमाप्रधाना एव मुनयो भवन्ति। क्षामितं मया सर्वसत्त्वानाम्। निशामय तीर्थंकरभाषितं क्षमायाः परम्पराभावनाम्। विनाऽपि वैरं बालेनाक्रुष्टेनापि साधुना क्षमा भावयितव्या 'सुन्दरः खल्वेषः, यदेवमपि अभिनिविष्टो न मां ताडयति। ताडितेनापि

[1] एगा य जणपरिसा वेयड्ढं दिअवरेहिं जा भणिया। किमयुडणाम्ममि य जलामिसेय युवं जति ॥ स्न। २ खमेसु स्न।

साहुणा खमा भावेयव्वा 'सुन्दरो खु एसो, जमेवमवि अहिणिविट्ठो न मं जीवियाओ ववरोवेइ' त्ति। ववरोइज्जमाणेणावि साहुणा खमा भावेयव्वा 'सुन्दरो खु एसो, जमेवमवि अहिणिविट्ठो न मं संजमाओ भंसेइ, किं तु ममं चेव पुव्वकम्मपरिणई एस' त्ति। एयं च सोऊण परितुट्ठो राया। चिन्तियमणेणं—नत्थि अविसओ नाम भयवओ नाणस्स। अओ पुच्छामि भयवन्तं तायस्स अज्जियाए य गइविसेसं ति। पुच्छिओ भयवं, साहिओ य भयवया पिट्ठकुक्कुडवहनिमित्तो मऊराइलक्खणो जयावलीगब्भसमुप्पत्तिपज्जवसाणो त्ति। राइणा चिन्तियं—अहो जुगुच्छणीययां संसारस्स, अहो अणवत्थियसिणेहया इत्थियाणं, अहो गरुययां मोहस्स, अहो दारुणविवागया अकज्जायरणाणं, जमिह देवयानिमित्तं पिट्ठमयकुक्कुडवहो वि एवं परिणओ त्ति।

हा अहयं किं काहं निरत्थयं जेण जियसया बहुया। वावाइया फुरन्ता अन्नाणमलावलित्तेण ॥

साधुना क्षमा भावयितव्या 'सुन्दरः खल्वेषः, यदेवमपि अभिनिविष्टो न मां जीविताद् व्यपरोपयति' इति। व्यपरोप्यमाणेनापि साधुना क्षमा भावयितव्या 'सुन्दरः खल्वेषः, यदेवमपि अभिनिविष्टो न मां संयमाद् भ्रंशयति, किन्तु ममैव पूर्वकर्मपरिणतिरेषेति। एतच्च श्रुत्वा परितुष्टो राजा। चिन्तितमनेन—नास्ति अविषयो नाम भगवतो ज्ञानस्य। अतो पृच्छामि भगवन्तं तातस्यार्यिकायाश्च गतिविशेषमिति। पृष्टो भगवान्। कथितश्च भगवता पिष्टकुर्कुटवधनिमित्तो मयूरादिलक्षणो जयावलीगर्भसमुत्पत्तिपर्यवसान इति। राज्ञा चिन्तितम्—अहो जुगुप्सनीयता संसारस्य, अहो अनवस्थितस्नेहता स्त्रीणाम्, अहो गुरुकता मोहस्य, अहो दारुणविपाकताऽकार्याचरणानाम्, यदिह देवतानिमित्तं पिष्टमयकुर्कुटवधोऽपि एवं परिणत इति।

हा अहं किं करिष्यामि निरर्थकं येन जीवशतानि बहुकानि। व्यापादितानि स्फुरन्ति अज्ञानमलावलिप्तेन ॥

---

१ धसेइ ख। २ अणवट्ठिय० ग। ३ गुरुयया ख।

ता नूणं गन्तव्वं निरयं कण्डुज्जुएण[1] पन्थेण। नत्थि हु एत्थ उवाओ अहवा पुच्छामि भयवन्तं॥

एत्थन्तरंमि मुणियनरिन्दाहिप्पाएणं भणियं सुदत्तमुणिवरेण—महाराय, अत्थि उवाओ। सो उण तिगरणविसुद्धा जिणधम्म-पडिवत्ती। सा पुण पुव्वदुक्कडेसु अच्चन्तमणुयावो, जिणवयणजलेण चित्तरयणसोहणं, सव्वारम्भचाएण चारित्तपडिवत्ती, मेत्तीपमोयकारुण्ण[2]मज्झत्थयाणं च जीवगुणाहियकिलिस्समाणाविणीएसु भावणा। पडिवन्नचरणभावणा य पाणिणो तप्पभिइ[3]मेव अप्पमायाइसएण पवड्ढमाण[4]संवेगा निरइयारसीलयाए खवेन्ति पुव्वदुक्कडाइं पावकम्माइं, अभावओ निमित्तस्स न बन्धन्ति नवाइं। तओ ते, देवाणुप्पिया, परमसुहसमेया सुहपरंपराए चेव खविऊण कम्मजालं पावेन्ति जाइजरामरणरोयसोयरहियं परमपयं ति॥

राइणा भणियं—भयवं, जइ ताव तायअज्जियाणं एद्दहमेत्तस्स वि दुक्कडस्स ईइसो विवाओ, ता कहमहं महापावकम्मयारी

ततो नूनं गन्तव्यं निरयं काण्डर्जुकेन पथा। नास्ति खल्वत्रोपायोऽथवा पृच्छामि भगवन्तम्॥

अत्रान्तरे ज्ञातनरेन्द्राभिप्रायेण भणितं सुदत्तमुनिवरेण। महाराज! अस्त्युपायः। स पुनस्त्रिकरणविशुद्धा जिनधर्मप्रतिपत्तिः। सा पुनः पूर्वदुष्कृतेषु अत्यन्तमनुतापः, जिनवचनजलेन चित्तरत्नशोधनम्, सर्वारम्भत्यागेन चारित्रप्रतिपत्तिः, मैत्रीप्रमोदकारुण्यमाध्यस्थानां च जीव-गुणाधिक-क्लिश्यमाना-विनीतेषु भावना। प्रतिपन्नचरणभावनाश्च प्राणिनः तत्प्रभृत्येव अप्रमादातिशयेन प्रवर्धमानसंवेगा निरतिचारशीलतया क्षपयन्ति पूर्वदुष्कृतानि पापकर्माणि, अभावतो निमित्तस्य न बध्नन्ति नवानि। ततस्ते देवानुप्रिय! परमसुखसमेता सुखपरम्परयैव क्षपयित्वा कर्मजालं प्राप्नुवन्ति जातिजरामरणरोगशोकरहितं परमपदमिति।

राज्ञा भणितम्—भगवन्! यदि तावत् तातार्यिकानामेतावन्मात्रस्यापि दुष्कृतस्य ईदृशो विपाकस्ततः कथमहं महापापकर्मकारी

---

१ कन्दुज्जएण ग। २ ०कारुण० क। ३ तयप्पभुइ० क, तयप्पभिइ० ख। ४ पवड्ढमाण ख-ग।

विवागओ निरयाइएसु अभुञ्जिऊण तं कम्मविवागं सोग्गइं लहामि त्ति ?। भयवया भणियं–महाराय, सुण। नत्थि असज्झं नाम चरणपरिणामस्स। एसो खलु परमामयं पावविसपरिणईए, वज्जं कम्मपव्वयस्स, चिन्तामणी समीहियाणं, कप्पपायवो सिद्धिसुहफलस्स। जहेव महाराय, विसलेसभोइणो वि एत्थ पाणिणो अकयपडियारा पावेन्ति आवइं, मुज्झन्ति हियाहिएसु, न सेवन्ति माणुस्सयसुहाइं, परिच्चयन्ति जीवियं; तहेव एए पमाइणो जीवा काऊण पावकम्माइं अकाऊण पडियारं पावन्ति तप्फलं जाइजरामरणरोयसोयं ति। कयपडियारा उण परमामयसामत्थाओ निज्जिणन्ति कालकूडं पि महाविसं, किमङ्ग पुण विसलेसं ति; एवं च अणाइभवभावणाओ जीवा काऊण पावकम्मं सेविऊण तस्स पडिवक्खभूयं महाचरणपरिणामं निज्जिणन्ति अणेयभवजणयं पि पावकम्मं, किमङ्ग पुण एगभवियं ति ॥ एयं सोऊण हरिसिओ राया, भणियं च णेण। भयवं, अह कीइसो पुण एस चरणपरिणामो त्ति वुच्चइ?। भयवया

विपाकतो निरयादिकेष्वभुक्त्वा तं कर्मविपाकं सुगतिं लभे इति ?। भगवता भणितम्–महाराज! शृणु। नास्ति असाध्यं नाम चरणपरिणामस्य। एष खलु परमामृतं पापविषपरिणत्या, वज्रं कर्मपर्वतस्य, चिन्तामणिः समीहितानाम्, कल्पपादपः सिद्धिसुखफलस्य। यथैव महाराज! विषलेशभोजिनोऽपि अत्र प्राणिनोऽकृतप्रतीकाराः प्राप्नुवन्त्यापदम्, मुह्यन्ति हिताहितेषु, न सेवन्ते मानुष्यकसुखानि, परित्यजन्ति जीवितम्, तथैव एते प्रमादिनो जीवा कृत्वा पापकर्माणि अकृत्वा प्रतीकारं, प्राप्नुवन्ति तत्फलं जातिजरामरणरोगशोकमिति। कृतप्रतीकाराः पुनः परमामृतसामर्थ्याद् निर्जयन्ति कालकूटमपि महाविषम्, किमङ्ग पुनर्विषलेशमिति। एवं चानादिभवभावनातो जीवाः कृत्वा पापकर्म सेवित्वा तस्य प्रतिपक्षभूतं महाचरणपरिणामं निर्जयन्ति अनेकभवजनकमपि पापकर्म, किमङ्ग पुनरेकभविकमिति। एतत् श्रुत्वा हर्षितो राजा, भणितं च तेन। भगवन्! अथ कीदृशः पुनरेष चरणपरिणाम इत्युच्यते ?। भगवता

---

१ एव क

भणियं-सम्मन्नाणपुव्वय तिव्वरुईए दोसनियत्तणं ति। भणियं च-

जाणइ उप्पन्नरुई जइ ता दोसा नियत्तई सम्मं। इहरा अपवित्ती य वि अणियत्ती चेव भावेणं ॥

एसो अणुहवसिद्धो कम्मविगमहेऊ ॥ राइणा चिन्तियं-भयवन्तमणुसेवन्ताणं न दुल्लहं सम्मन्नाणं, समुप्पन्नसम्मन्नाणाण य संभवइ तिव्वरुई, तओ य सायत्तं दोसनियत्तणं। ता धन्नो अहं, जस्स मे भयवया दंसणं जायं ति। न अप्पपुण्णा महानिहिं पेच्छन्ति। ता अलमन्नेण, भयवओ चेव आणमणुचिट्ठामि त्ति चिन्तिऊण भणियं च णेण। भयवं, उचिओ अहं सामण्णपडिवत्तीए?। भयवया भणियं-महाराय, को अन्नो उचिओ त्ति? ॥

तओ संजायहरिसेण भणियं राइणा-अरे निवेएह मइसायरप्पमुहाणं अज्ज मन्तीणं। जहा कायव्वो देवाणुप्पिएहिं अभयरुइणो

भणितम्-सम्यग्ज्ञानपूर्वक तीव्ररुच्या दोषनिवर्तनमिति। भणित च—

ज्ञानात्युत्पन्नरुचिर्यदि ततो दोषान्निवर्तते सम्यक्। इतरथाऽप्रवृत्तिश्चापि अनिवृत्तिश्चैव भावेन ॥

एषोऽनुभवसिद्ध कर्मविगमहेतु। राज्ञा चिन्तितम्-भगवन्तमनुसेवमानाना न दुर्लभं सम्यग्ज्ञानम्, समुत्पन्नसम्यग्ज्ञानानां च संभवति तीव्ररुचि, ततश्च स्वायत्त दोषनिवर्तनम्। ततो धन्योऽहम्, यस्य मे भगवता दर्शनं जातमिति। न अल्पपुण्या महानिधिं प्रेक्षन्ते। ततोऽलमन्येन भगवत एवाज्ञामनुतिष्ठामीति चिन्तयित्वा भणित च तेन। भगवन्! उचितोऽहं श्रामण्यप्रतिपत्त्या?। भगवता भणितम्-महाराज! कोऽन्य उचित इति?।

तत सजातहर्षेण भणित राज्ञा-अरे निवेदयत मतिसागरप्रमुखाणामद्य मन्त्रिणाम्। यथा कर्तव्यो देवानुप्रियैरभयरुचे राज्याभिषेक

१ भयवया इह य

रंजाभिसेओत्ति, न कायव्वो य मम सन्तिओ खेओ; पवज्जामि अहं भयवया सुरासुरनमिएण भुवणगुरुणा पणीयं समणलिङ्गं। जं देवो आणवेइ त्ति जंपिऊण गया निओगकारिणो। निवेइयं तेहिं मन्तिजणवयाणं। सुओ एस वुत्तन्तो अन्तेउरेण। तओ नेहभयसंभमेणं परिच्चइय असमाणियं आलेक्खगन्धव्वाइ हाहारवमणाहं पयट्टमन्तेउरं। अहं पि तेहिंतो चेव एयं वइयरमायण्णिऊण अभयमईए समेओ त्ति। चलणपरिमक्कणेणेव पत्ता य णे नरनाहसमीवं। दिट्ठो मुणिन्दपायमूले संवेगमुवगओ राया रायपत्तीहिं, किह–

मेइणितलासणत्थो निच्छड्डियछत्तचामराडोवो। किं होज्ज न होज्ज त्ति य सवियक्कं नरवई एसो ॥
तो ताहि मप्पणामं समयं पक्खुभियभूसणरवेणं। अणिरूवियक्खरत्थो जयसद्दो से समुग्घुट्ठो ॥
तेण वि वेरग्गवसा अणायरविइण्णमन्थरच्छेण। उल्लोलन्तसिणेहं ईसि समोणामियं वयणं ॥

इति, न कर्तव्यो मम मत्क खेदः। प्रपद्येऽहं भगवता सुरासुरनतेन भुवनगुरुणा प्रणीतं श्रमणलिङ्गम्। 'यद् देव आज्ञापयति' इति जल्पित्वा गता नियोगकारिणः। निवेदितं तैर्मन्त्रिजनपदानाम्। श्रुत एष वृत्तान्तोऽन्तःपुरेण। ततः स्नेहभयसंभ्रमेण परित्यज्यासमाप्त आलेख्यगान्धर्वादि हाहारवसनाथं प्रवृत्तमन्तःपुरम्। अहमपि तेभ्य एव एतं व्यतिकरमाकर्ण्याभयमत्या समेत इति। चरणपरिष्व-ष्कणेनेव (शब्दविहारेणेव) प्राप्ताश्च वयं नरपतिसमीपम्। दृष्टो मुनीन्द्रपादमूले संवेगमुपगतो राजा राजपत्नीभिः। कथम्?

मेदिनीतलासनस्थो विच्छर्दितच्छत्रचामराटोपः। किं भवेद् न भवेदिति वा सवितर्कं नरपतिरेषः ॥
ताभिः सप्रणामं समकं प्रक्षुभितभूषणरवेण। अनिरूपिताक्षरार्थो जयशब्दस्तस्य समुद्घुष्टः ॥
तेनापि वैराग्यवशाद् अनादरवितीर्णमन्थराक्षेण। उल्लोलत्स्नेहमीषत् समवनामितं वदनम् ॥

१ रायपत्तीओ क-ग

एवं च संभासिएण सव्वन्तेउरजणेण पायवडिएण विन्नत्तो नरवई।

सीहो व्व पञ्जरत्थो झायसि पब्भट्ठरज्जो व्व ॥

खयदाढो व्व भुयङ्गो किं एयं वारिनियलियगओ व्व। तओ एवं विन्नत्तेण राइणा साहियं निरवसेसं मुणिवयणाइयं ति। तं च णे सोऊण समुप्पन्नं जाइस्सरणं। तओ तस्संभमेणं निवडियाइ धरणिवट्ठे। हा किमेयमवरं ति मन्नमाणीहिं विरुद्दयं रायपत्तीहिं। बाहजलसित्तगत्तं च णे उवरिं मुच्छमुवगया अम्बा। तओ लद्धाओ चेयणाओ, विउद्धा अम्हे, समासासिया अम्बा, विन्नत्तो राया। ताय, अलं णे संसारकिलेसायासकारएहिं विसएहिं; अणुजाणाहि ताव अम्हाणं पि सयलदुक्खविरेयणं समणत्तणं ति। राइणा भणियं—अहासुहं देवाणुप्पियाइं, मा पडिबन्धं करेह। तओ विजयधम्मणो नियभाइणेयस्स दाऊण रज्जं काऊण अट्ठाहियामहामहिमं सयलन्तेउरपहाणजणसमेओ घेत्तूण अम्हे अभिणिक्ख-

---

एवं च संभाषितेन सर्वान्तःपुरजनेन पादपतितेन विज्ञप्तो नरपतिः।

सिंह इव पञ्जरस्थो ध्यायसि प्रभ्रष्टराज्य इव ॥

क्षतदाढ इव भुजङ्गः किमेतत् वारिनिगडितगज इव। ततः एवं विज्ञप्तेन राज्ञा कथितं निरवशेषं मुनिवचनादिकमिति। तच्चावयोः श्रुत्वा समुत्पन्नं जातिस्मरणम्। ततस्तत्संभ्रमेण निपतितौ धरणीपृष्ठे। 'हा किमेतदपरम्' इति मन्यमानाभिर्विरुदितं राजपत्नीभिः। बाष्पजलसिक्तगात्रं चावयोरुपरि मूर्छामुपगताऽम्बा। ततो लब्धचेतनाः, विबुद्धावावाम्, समाश्वासिताऽम्बा, विज्ञप्तो राजा। तात! अलमावयोः संसारक्लेशायासकारकैर्विषयैः, अनुजानीहि तावदावयोरपि सकलदुःखविरेचनं श्रमणत्वमिति। राज्ञा भणितम्—यथासुखं देवानुप्रियौ! मा प्रतिबन्धं कुरुतम्। ततो विजयधर्मणो

---

१ खयदाढो व्व अही मत्तगइन्दो व्व वारिमज्झमि। सीहो व्व पञ्जरगओ क विमणमणो सि नरनाह ॥ [illegible]। २ तस्स सम० ख। ३ उट्ठिया अ० [illegible]। देवाणुप्पिया ख। ५ करेहि क-ख।

न्तो राया । विन्नत्तो मए भयवं सुदत्तमुणिवरो । भयवं, करेहि अणुग्गहं नयणावलीए धम्मकहाए; पावेउ भयवओ पभावेण एसा वि सयलदुक्खचिगिच्छयं जिणपणीयं धम्मं । भयवया भणियं–सोम, अविसओ खु एसा धम्मकहाए । संतप्पिओ इमीए अकज्जायरणापच्छासेवणाए कम्मवाही, बद्धं च तच्चपुढवीए परभवाउयं, अओ पावियव्वमवस्सं तीए नारगत्तणं, न पवज्जइ य एसा महामोहाओ जिणधम्मरयणं ति । तओ मए चिन्तियं–अहो दारुणविवागया अकज्जायरणस्स, ईइसो एस संसार[3]सहावो; ता किं करेमि त्ति ? । तओ अइसयनाणावलोयदूरेण भयवया भणियं–अलं ते इमिणा संसारविवद्धणेण तीए उवरिं अणुबन्धेण । एयं चेव सयललोयदुल्लहं कहंचि लद्धं पव्वज्जं करेहि त्ति । तओ गुरुगुणाणुभावेणं पालियं समणत्तणं, कालमासे य सिद्धन्तविहिणा करेऊण कालमुववन्नाइं सहस्साराभिहाणे देवलोए ।

निजभागिनेयस्य दत्त्वा राज्यं कृत्वाऽष्टाह्निकामहामहिमानं सकलान्तःपुरप्रधानजनसमेतो गृहीत्वाऽऽश्राममभिनिष्क्रान्तो राजा । विज्ञप्तो मया भगवान् सुदत्तमुनिवरः । भगवन् ! कुर्वनुग्रहं नयनावल्या धर्मकथया, प्राप्नोतु भगवतः प्रभावेण एषाऽपि सकलदुःखचिकित्सकं जिनप्रणीतं धर्मम् । भगवता भणितम्–सौम्य ! अविषयः खल्वेषा धर्मकथायाः । संतर्पितोऽनयाऽकार्याचरणापथ्यासेवनया कर्मव्याधिः, बद्धं च तृतीयपृथिव्याः परभवायुष्कम्, अतः प्राप्तव्यमवश्यं तया नारकत्वम्, न प्रपद्यते चैषा महामोहतो जिनधर्मरत्नमिति । ततो मया चिन्तितम्–अहो दारुणविपाकताऽकार्याचरणस्य, ईदृश एव संसारस्वभावः, ततः किं करोमीति । ततोऽतिशयज्ञानावलोकसूरेण भगवता भणितम्–अलं तेऽनेन संसारविवर्धनेन तस्या उपर्यनुबन्धेन । एतामेव सकललोकदुर्लभां कथंचिद् लब्धां प्रव्रज्यां कुर्विति । ततो

१ करेह क-ग । २ धम्मकहावरणेण ख । ३ ०सब्भावो क । ४ सयलतियलोय० क । ५ तओ पावनिग्घायट्ठाए य तवोकम्म[मि] जत्तो कायव्वो । तओ ख । ६ गुरुगुणाणुहावेण ख

तत्थ वि उवभुञ्जिऊण सुराउयं चविऊण देवलोयाओ कोसलाए विसयंमि साएए नयरे विणयंधरस्स रन्नो लच्छिमईए महादेवीए सुयत्ताए उववन्नो म्हि। जाओ कालक्कमेणं। कयं च मे नामं जसोहरो त्ति। अभयमईजीवदेवो वि चविऊण देवलोगाओ पाडलिपुत्ते नयरे ईसाणसेणस्स राइणो विजयाए महादेवीए कुच्छिंसि धूयत्ताए समुववन्नो त्ति। जाया कालक्कमेणं। पइट्ठावियं च से नामं विणयमइ त्ति। वड्ढियाइं च अम्हे देहोवचएणं कलाकलावेण य। पेसिया य मे सयंवरा ईसाणसेणेण विणयमई। सुयं च मए एयं। परितुट्ठो हियएणं। पत्ता य सा महया चडयरेणं, बहुमन्निया ताएणं, आवासिया नयरबाहिं। कयं वद्धावणयं। गणाविओ पारेज्जदियहो, समागओ मे मणोरहेहिं। निव्वत्तं ण्हाणयं। पयट्टो अहं महाविभूईए विणयमइं परिणेउं। वज्जन्तेहिं विविहमङ्गलतूरेहिं नच्चन्तेणं विलासिणिजणेणं पढन्तेहिं मङ्गलपाढएहिं गायन्तेण अम्मयालोएणं धवलगयवरारूढो समेओ, रायचन्देहिं पुलोइज्ज-

---

गुरुगुणानुभावेन पालितं श्रमणत्वम्। कालमासे च सिद्धान्तविधिना कृत्वा कालमुपपन्नो सहस्राराभिधाने देवलोके।

तत्रापि उपभुज्य सुरायुष्कं च्युत्वा देवलोकात् कोशलाया विषये साकेते नगरे विनयंधरस्य राज्ञो लक्ष्मीवत्या महादेव्या सुततयोपपन्नोऽस्मि। जातः कालक्रमेण। कृतं च मे नाम यशोधर इति। अभयमतीजीवदेवोऽपि च्युत्वा देवलोकात् पाटलिपुत्रे नगरे ईशानसेनस्य राज्ञो विजयाया महादेव्याः कुक्षौ दुहितृतया समुपपन्न इति। जाता कालक्रमेण। प्रतिष्ठापितं च तस्या नाम विनयमतीति। वर्धितौ चावां देहोपचयेन कलाकलापेन च। प्रेषिता च मे स्वयंवरा ईशानसेनेन विनयमती। श्रुतं च मयैतत्। परितुष्टो हृदयेन। प्राप्ता च सा महता चटकरेण (आडम्बरेण), बहु मता तातेन, आवासिता नगरबहिः। कृतं वर्धापनकम्। गणितो (पारेज्जय-दे.) विवाहदिवसः, समागतो मे मनोरथैः। निर्वृत्तं स्नपनकम्। प्रवृत्तोऽहं महाविभूत्या विनयमतीं परिणेतुम्। वाद्यमानैर्विविधमङ्गलतूर्यै-

---

१ राइव० फ

माणो पासायमालातलगयाहिं पुरसुन्दरीहिं पत्तो रायमग्गं। एत्थन्तरंमि फुरियं मे दाहिणलोयणेणं, समुप्पन्नो हरिसविसेसो। चिन्तियं मए–भवियव्वं अओ वि अवरेणं महापमोएणं ति ॥

एत्थन्तरंमि दिट्ठो मए गोयरपविट्ठो कल्लाणसेट्ठिभवणङ्गणे साहू। तं च मे दट्ठूण समुप्पन्नो संभमो। तओ अब्भत्थयाए साहुधम्मस्स विचित्तयाए कम्मपरिणईए अमोहदंसणयाए भयवओ समुप्पन्नं जाइस्सरणं। मुच्छिओ गइन्दखन्धे, निवडमाणो धारिओ पासवत्तिणा रामभद्दाभिहाणेण सयलहत्थारोहपहाणमयहरेणं। 'हा किमेयं' ति विसण्णो रामभद्दो। 'मा वायह'त्ति वारिया तूरियादी, उवसन्ता य खिप्पं। 'हा किमेयं'ति अविमादी वि दढं विसण्णचित्तो समागओ ताओ। 'पूगफलाइमयमइओ हविस्सइ' त्ति सिञ्चाविओ चन्दणपाणिएणं। लद्धा मए चेयणा, उम्मिल्लियं लोयणजुयं, कओ आसणपरिग्गहो, विरत्तं संसारसायराओ चित्तं। भणियं

रयता विलासिनीजनेन पठद्भिर्मङ्गलपाठकैर्गायनाऽभ्यालोकेन धवलगजवरारूढः समेतो राजचन्द्रैः प्रलोक्यमानः प्रासादमालातलगताभिः पुरसुन्दरीभिः प्राप्तो राजमार्गम्। अत्रान्तरे स्फुरितं मे दक्षिणलोचनेन, समुत्पन्नो हर्षविशेषः। चिन्तितं मया–भवितव्यमतोऽपि अपरेण महाप्रमोदेनेति।

अत्रान्तरे दृष्टो मया गोचरप्रविष्टः कल्याणश्रेष्ठिभवनाङ्गणे साधुः। तं च मे दृष्ट्वा समुत्पन्नो संभ्रमः। ततोऽभ्यस्ततया साधुधर्मस्य विचित्रतया कर्मपरिणत्या अमोघदर्शनतया भगवतः समुत्पन्नं जातिस्मरणम्। मूर्छितो गजेन्द्रस्कन्धे, निपतन् धारितः पार्श्ववर्तिना रामभद्राभिधानेन सकलहस्त्यारोहप्रधाननायकेन। 'हा किमेतद्' इति विषण्णो रामभद्रः। 'मा वादयत' इति वारितास्तूर्यादयः, उपशान्ताश्च क्षिप्रम्। 'हा किमेतद्' इति अविषाद्यपि दृढं विषण्णचित्तः समागतस्तातः। पूगफलादिमदमदिको भविष्यतीति सिक्तश्चन्दन-

तथाप्यस्ति मे तव मनोरथसंपादनेच्छा। तया भणितम्-यद्येव ततः शृणु। अस्ति महाराजदुहिता विलासवती नाम कन्यका। सा

---

* दुःखे निव्वरः। दुःखविषयस्य कथेर्णिव्वरादेशो वा भवति। सिद्ध ८-४-३ ॥ १ क-ड्डुज्जु० ख। २ गुणे क-ग। ३ पाल्लति निव्वणा नेहा ख।

पुण एत्थ कारणं। तीए भणियं 'मयणवियारो'। तओ मए भणियं—केण पुण भयवया वीयरागेण विय खण्डियं विणिज्जियसुरासुरस्स रइमणाणन्दयारिणो पञ्चबाणस्स सासणं। तीए भणियं—न याणामि खण्डियं न खण्डियं त्ति। एत्तिओ उण मे संतावो, जं से मणोरहविसओ न नज्जइ। मए भणियं 'कहं विय'। तीए भणियं—सुण। पवत्ते मयणमहूसवे निंग्गयासु नयरचच्चरीसु चच्चरियामेत्तसंगयाए दिट्ठो इमीए—अणुमाणओ वियाणामि—मुत्तिमन्तो विय कुसुमाउहो कोवि जुवाणओ। अन्नहा कहं ईइसस्स कन्नारयणस्स ईंणीइसे वरे अहिलासो त्ति। न पत्थइ पङ्कयसिरी हुदवणाइं। मुक्का य तीए तस्सुवरि सहत्थगुत्था बउलमालिया, निवडिया से इमी विय कण्ठदेसे मणोरहेहिं। तओ उवरिहुत्तमवलोइऊण निमिया य तेणं अन्नजणसंपायभीरुययाए घेत्तूण तीए हिययं पिव कण्ठंमिं। अइक्कन्तो य सो। विलासवई वि य तयप्पभूइंचेव परिचत्तनिययवावारा तहा कया वम्महेण, जहा आंविक्खिउं पि न पारीयइ त्ति। विन्नाओ य

मे भिन्नदेहा अपि आत्मनिर्विशेषा स्वामिन्यपि अस्वामिनीशीला। तस्या अपश्चिमाऽवस्था वर्तते। ततो मया भणितम्—किं पुनरत्र कारणम्?। तया भणितम्—'मदनविकारः'। ततो मया भणितम्—केन पुनर्भगवता वीतरागेणेव खण्डितं विनिर्जितसुरासुरस्य रतिमनआनन्दकारिणः पञ्चबाणस्य शासनम्?। तया भणितम्—न जानामि खण्डितं न खण्डितमिति। एतावान् पुनर्मे संतापः, यत्तस्या मनोरथविषयो न ज्ञायते। मया भणितम्—'कथमिव'। तया भणितम्—शृणु। प्रवृत्ते मदनमधूत्सवे निर्गतासु नगरचर्चरीषु चर्चरिकामात्रसंगतया दृष्टोऽनया—अनुमानतो विजानामि—मूर्तिमानिव कुसुमायुधः कोऽपि युवा। अन्यथा कथमीदृशस्य कन्यारत्नस्यानीदृशे वरेऽभिलाष इति?। न प्रार्थयते पङ्कजश्रीर्हठवनानि। मुक्ता च तया तस्योपरि स्वहस्तग्रथिता बकुलमालिका, निपतिता तस्येयमपि च कण्ठदेशे मनोरथैः। तत उपरिभूतमवलोक्य स्थापिता च तेनान्यजनसंपातभीरुकतया गृहीत्वा तस्या हृदयमिव कण्ठे। अतिक्रान्तश्च सः। विलासवत्यपि च

१ विणिग्गयासु रा। २ ०मीदिसस्स रा। ३ धनारिसे अ० रा। ४ ०मि मा° रा। ५ अइक्कन्तो तमु, साओ रा। ६ तयप्पभिइमेव रा। ७ आचिक्खिउ रा

गओ अहमिओ अज्ज अणङ्गसुन्दरीगेहं। दिट्ठा मए पव्वायवयणपङ्कया अणङ्गसुन्दरी, भणिया य। सुन्दरि, किं पुण ते उव्वेय-कारणं; आचिक्खं, जइ अकहणीयं न होइ। तीए भणियं–

कह तंमि *निव्वरिज्जइ दुक्खं कण्डुज्जुएण हियएण। अद्दाए पडिबिम्बं व जंमि दुक्खं न संकमइ ॥

मए भणियं–सुन्दरि!

विरला जाणन्ति गुणा विरला जंपन्ति ललियकव्वाइं। सामन्नधणा विरला परदुक्खे दुक्खिया विरला ॥

तहावि अत्थि मे तुह मणोरहसंपायणेच्छा। तीए भणियं–जइ. एवं, ता सुण। अत्थि महारायधूया विलासवई नाम कन्नया। सा मे भिन्नदेहा वि अत्ताणनिव्विसेसा सामिमाली वि असामिसालिसीला। तीए अपच्छिमा अवत्था वट्टइ। तओ मए भणियं। किं

भणितं च तेन-भो वयस्य! परित्यज विषादम्, अङ्गीकुरु प्रमोदम्, संपन्नं ते समीहितमिति। मया भणितम्-'कथमिव'। तेन भणितम्-शृणु।

गतोऽहमितोऽद्य अनङ्गसुन्दरीगेहम्। दृष्टा मया म्लानवदनपङ्कजाऽनङ्गसुन्दरी, भणिता च। सुन्दरि! किं पुनस्ते उद्वेगकारणम्? आचक्ष्व, यद्यकथनीयं न भवति। तया भणितम्—

कथं तस्मिन् कथ्यते दुःखं काण्डर्जुकेन हृदयेन। आदर्शे प्रतिबिम्बमिव यस्मिन् दुःखं न संक्रामति ॥

मया भणितम्-सुन्दरि!

विरला जानन्ति गुणान् विरला जल्पन्ति ललितकाव्यानि। श्रामण्यधना विरलाः परदुःखे दुःखिता विरलाः ॥

तथाप्यस्ति मे तव मनोरथसंपादनेच्छा। तया भणितम्-यद्येवं ततः शृणु। अस्ति महाराजदुहिता विलासवती नाम कन्यका। सा

* दुःखे निव्वरः। दु खविषयस्य कथेर्णिव्वरादेशो वा भवति। सिद्ध. ८-४-३ ॥ १ कन्दुज्जु० ख। २ गुणे क-ग। ३ पालति निद्धणा नेहा ख।

पुण एत्थ कारणं। तीए भणियं 'मयणवियारो'। तओ मए भणियं—केण पुण भयवया वीयरागेण विय खण्डियं विणिज्जियसुरासुरस्स रइमणाणन्दयारिणो पञ्चबाणस्स सासणं। तीए भणियं—न याणामि खण्डियं न खण्डियं ति। एत्तिओ उण मे संतावो, जं से मणोरहविसओ न नज्जइ। मए भणियं 'कहं विय'। तीए भणियं—सुण। पवत्ते मयणमहूसवे निग्गयासु[1] नयरचच्चरीसु चच्चरियामेत्तसंगयाए दिट्ठो इमीए—अणुमाणओ वियाणामि—मुत्तिमन्तो विय कुसुमाउहो कोवि जुवाणओ। अन्नहा कहं ईइसस्स[2] कन्नयारयणस्स अणीइसे[3] वरे अहिलासो त्ति। न पत्थइ पङ्कयसिरी हढन्नणाइं। मुक्का य तीए तस्सुवरि सहत्थगुत्था बउलमालिया, निवडिया से इमी विय कण्ठदेसे मणोरहेहिं[4]। तओ उवरिहुत्तमवलोइऊन निमिया य तेणं अन्नजणसंपायभीरुययाए घेत्तूण तीए हियायं पिव कण्ठंमि। अइक्कन्तो[5] य सो। विलासवई वि य तयप्पभूइमेव[6] परिचत्तनिययवावारा तहा कया वम्महेण, जहा अविक्खिउं[7] पि न पारीयइ त्ति। विन्नाओ य

मे भिन्नदेहा अपि आत्मनिर्विशेषा स्वामिन्यपि अस्वामिनीशीला। तस्या अपश्चिमाऽवस्था वर्तते। ततो मया भणितम्—किं पुनरत्र कारणम्?। तया भणितम्—'मदनविकारः'। ततो मया भणितम्—केन पुनर्भगवता वीतरागेणेव खण्डितं विनिर्जितसुरासुरस्य रतिमनआनन्दकारिणः पञ्चबाणस्य शासनम्?। तया भणितम्—न जानामि खण्डितं न खण्डितमिति। एतावान् पुनर्मे संतापः, यत्तस्या मनोरथविषयो न ज्ञायते। मया भणितम्—'कथमिव'। तया भणितम्—शृणु। प्रवृत्ते मदनमधूत्सवे निर्गतासु नगरचर्चरीषु चर्चरिकामात्रसंगतया दृष्टोऽनया—अनुमानतो विजानामि—मूर्तिमानिव कुसुमायुधः कोऽपि युवा। अन्यथा कथमीदृशस्य कन्यारत्नस्यानीदृशे वरेऽभिलाष इति?। न प्रार्थयते पङ्कजश्रीर्हठवनानि। मुक्ता च तया तस्योपरि स्वहस्तग्रथिता बकुलमालिका, निपतिता तस्येयमपि च कण्ठदेशे मनोरथैः। तत उपरिभूतमवलोक्य स्थापिता च तेनान्यजनसंपातभीरुकतया गृहीत्वा तस्या हृदयमिव कण्ठे। अतिक्रान्तश्च सः। विलासवत्यपि च

१ विणिग्गयासु ख। २ ०मीदिसस्स ख। ३ अनारिसे अ० ख। ४ ०मि मण० ख। ५ अइक्कन्तो तमु(?)साओ ख। ६ तयप्पभिइमेव ख। ७ आचिक्खिउं ख

एस वुत्तन्तो मए चच्चरियासयासाओ, पुणो रायधूयाओ त्ति। समासासिया सा मए। सामिणि, अलं विसाएणं, संवाएमि सामिणिं हिययवल्लहेण। न खण्डिज्जइ कोमुई मयलञ्छणेणं ति। भणिऊण पणिहिलोयणेहिं निरूविओ सो, न उण उवलद्धो त्ति। तओ य सा अज्ज मयणवियारओ चेव असंपाइयपओयणं मं अवगच्छिऊण निब्भरुक्कण्ठा पराहीणहियया संकन्तदूमहसरीरसंतावं परिच्चइय सयणीयं अवलम्बिय सहीयणं उवरितलमारूढा। दक्खिणाणिलेण य सविसेसपज्जलिज्जन्तमयणाणला उण्हं च दीहं च नीससिय तं चेव रायमग्गुद्देसं पुलोइउं पवत्ता। पच्चालिया य से अहिययरं बाहसलिलेण दिट्ठी। तओ सहसा चेव झणझणारवमुहलमणिवलयं विहुणिय करपल्लवं अवहत्थिय अङ्गसंधारयं सहियायणं मोहमुवगय त्ति। तओ ससंभन्तो उट्ठिओ अहं, भणिओ य वसुभूई। वयस्स, कहिं सा हिययाणन्दयारिणी, दंसेहि मे, अलं तीए अच्चाहिए [4]जीविएण। वसुभूइणा भणियं-देव, वत्तं खु एवं, कहारमाणं पि ताव हियया-

तत्प्रभृत्येव परित्यक्तनिजकव्यापारा तथा कृता मन्मथेन यथाऽपेक्षितुमपि न पार्यते (शक्यते)। विज्ञातश्चैष वृत्तान्तो मया चर्चरिका(चेटी) सकाशात्, पुना राजदुहितुरिति। समाश्वासिता सा मया-स्वामिनि! अलं विषादेन, संवादयामि स्वामिनीं हृदयवल्लभेन। न खण्ड्यते कौमुदी मृगलाञ्छनेनेति भणित्वा प्रणिधिलोचनैर्निरूपितः सः, न पुनरुपलब्ध इति। ततश्च सा अद्य मदनविकारत पवासंपादितप्रयोजनां मामवगत्य निर्भरोत्कण्ठा पराधीनहृदया संक्रान्तदुःसहशरीरसंतापं परित्यज्य शयनीयमवलम्ब्य सखीजनमुपरितलमारूढा। दक्षिणानिलेन च सविशेषप्रज्वाल्यमानमदनानला उष्णं च दीर्घं च निःश्वस्य तमेव राजमार्गोद्देशं द्रष्टुं प्रवृत्ता। छादिता च तस्या अधिकतरं बाष्पसलिलेन दृष्टिः। ततः सहसैव झणझणारवमुखरमणिवलयं विधूय करपल्लवमपहस्तयित्वाऽङ्गसंधारकं सखीजनं मोहमुपगतेति॥ ततः ससंभ्रान्त उत्थितोऽहम्, भणितश्च वसुभूतिः। वयस्य! कुत्र सा हृदयानन्दकारिणी? दर्शय मे, अलं तस्या अत्याहिते

१ सयणिज्जं। २ सहियणि ख। ३ नियकर० ख। ४ जीएण ख।

णन्दकारयं चेव, तं सुणउ देवो। तओ लज्जावणयवयणकमलं ईसि विहसिऊण णुवन्नो अहं। वसुभूइणा भणियं–तओ, देव, निमिया सहियाहिं उच्छङ्गमयणिज्जे, वीजिया मए बाहसलिलसित्तेण तालियण्टेण, दिन्नं च से सहावसीयलवच्छत्थलंमि चन्दणं, उवणीओ मुणालियावलयहारो, लद्धा कहवि तीए चेयणा, उम्मिल्लियं अलद्धनिद्दाक्खेयपाडलं लोयणजुयं। मए भणियं–सामिणि, किं ते बाहइ त्ति। तओ उक्कडयाए मयणवियारस्स अणवेक्खिऊण सहियणं अव्वत्तं चेव जंपियं तीए 'तस्स चेवादंसणं' ति। तओ मए तीए साहारणत्थं अलियं चेव जंपियं। सामिणि, धीरा होहि, उवलद्धा तस्स मए पउत्ती, विन्नविस्सं, सामिणि, तमन्तरेण। तओ विहसियं तीए, दिन्नं च मे कडिसुत्तयं॥ एत्थन्तरंमि समागया से जणणी, भणिया य तीए। जाय विलासवइ, सारेहि वीणं, जओ आणत्तं महाराएण 'अज्ज तए वीणाविणोओ कायव्वो' त्ति। तओ गुरुयणलज्जालुयाए जंपियं तीए। जइ एवं, ता लहुं वीणाधरिणिं सद्देहि। सद्दिया वीणाय-

(प्राणान्तकष्टे) जीवितेन। वसुभूतिना भणितम्–देव! धूर्तं खल्वेतत्, कथावसानमपि तावद् हृदयानन्दकारकमेव, तच्छृणोतु देवः। ततो लज्जावनतवदनकमलमीषद् विहस्य निपन्नो(सुप्तोऽ)हम्। वसुभूतिना भणितम्–ततो देव! न्यस्ता सखीभिरुत्संगशयनीये, वीजिता मया वाष्पसलिलसिक्तेन तालवृन्तेन, दत्तं च तस्य स्वभावशीतलवक्षःस्थले चन्दनम्, उपनीतो मृणालिकावलयहारः, लब्धा कथमपि तया चेतना, उन्मिलितमलब्धनिद्राखेदपाटलं लोचनयुगम्। मया भणितम्–स्वामिनि! किं ते बाधते इति?। तत उत्कटतया मदनविकारस्यानपेक्ष्य सखीजनमव्यक्तमेव जल्पितं तया 'तस्यैवादर्शनम्' इति। ततो मया तस्याः संधारणार्थमलीकमेव जल्पितम्–स्वामिनि! धीरा भव, उपलब्धा तस्य मया प्रवृत्तिः, विज्ञपयिष्यामि स्वामिनि! तमन्तरेण (अवसरेण)। ततो विहसितं तया, दत्तं च मे कटिसूत्रकम्। अत्रान्तरे समागता तस्या जननी। भणिता च तया–जाते विलासवति! सारय वीणाम्, अत आज्ञप्तं महाराजेन 'अद्य त्वया

१ गुणाउ ख

रिणी। एत्थन्तरंमि किंकायव्वमूढा अनिसज्जिया चेव रायधूयाए निग्गया रायगेहाओ, आगया सभवणं, निरूविओ विसेसेण, न लद्धा य तस्स पउत्ती। ता किं पुण अहं सामिणीए विन्नविस्सं ति समद्धासिया चिन्तापिसाइयाए। ता एयं मे उव्वेयकारणं ति॥ मए भणियं—परिचय चिन्तापिसाइयं, जाणामि अहयं तं जुवाणयं। ता तहा करिस्सं, जहा ते सामिणी निव्वुया भविस्सइ त्ति। अणङ्गसुन्दरीए भणियं—साहेहि ताव, कहं तुमं जाणासि, को वा सो जुवाणओ। मए भणियं—अप्पाणनिव्विसेसो वयंसओ, अहवा सामिसालो, अओ वियाणामि। सो पुण सेयवियाहिवस्स महारायजसवम्मणो पुत्तो सणंकुमारो नाम। तस्स कीलानिमित्तं अणङ्गनन्दणं पत्थियस्स पेसिया तीए बउलमालिया, बहुमन्निया य तेणं। अणङ्गसुन्दरीए भणियं—जइ एवं, ता अलं ते सामिसालेण, जो एवं पि सामिणीहियवं वियाणिय निरुज्जमो चिट्ठइ। मए भणियं। न निरुज्जमो, किं तु उवायं विचिन्तेइ 'कहं पुण अणिन्दिएण विहिणा एमा

वीणाविनोदः कर्तव्य' इति। ततो गुरुजनलज्जालुतया जल्पितं तया—यद्येवं ततो लघु वीणाचार्यो गवेष्यः। गवेषितो वीणाचार्यः। अत्रान्तरे किंकर्तव्यमूढा अविसर्जितैव राजदुहित्रा निर्गता राजगेहात्, आगता स्वभवनम्, निरूपितो विशेषेण, न लब्धा च तस्य प्रवृत्तिः। ततः 'किं पुनरहं स्वामिन्यै विज्ञपयिष्यामि' इति समाध्यासिता चिन्तापिशाचिकया। तत एतन्मे उद्वेगकारणमिति॥ मया भणितम्—परित्यज चिन्तापिशाचिकाम्, जानाम्यहं तं युवानम्। ततस्तथा करिष्यामि यथा ते स्वामिनी निर्वृता भविष्यतीति। अनङ्गसुन्दर्या भणितम्—कथय तावत्, कथं त्वं जानासि, को वा स युवा?। मया भणितम्—आत्मनिर्विशेषो वयस्य, अथवा स्वामी, अतो विजानामि। स पुनः श्वेतविकाधिपस्य महाराजयशोवर्मणः पुत्रः सनत्कुमारो नाम। तस्य क्रीडानिमित्तमनङ्गनन्दनं प्रस्थितस्य प्रेषिता तया बकुलमालिका, बहुमता च तेन। अनङ्गसुन्दर्या भणितम्—यद्येवं ततोऽलं ते स्वामिना, य एवमपि स्वामिनीहृदयं विज्ञाय निरुद्यमस्तिष्ठति।

१ तहा एवा न स

पि अणिन्दिओ चेव विही। मए भणिय। अत्थि एवं, किं तु
पावियव्व' त्ति। अणङ्गसुन्दरीए भणियं–समाणरूवाणुरायकुलकन्नयाहरणं पि अणिन्दिओ चेव विही। मए भणियं। अत्थि एवं, किं तु
अच्चन्तसिणेहवन्तो महाराओ सणंकुमारस्स, जओ अपडिहओ सव्वत्थामेसु गइपसरो, उवन्नत्थं च तस्स सबहुमाणं महाराएण जीवणं।
ता कयाइ पत्थिओ चेव देइस्सइ त्ति। ता किं एइणा। निवेएहि ताव एयं वुत्तन्तं सामिणीए, चिन्तेहि य उवायं, कहं पुण एयाणं
दंसणं संजाइस्सइ त्ति। अणङ्गसुन्दरीए भणियं–निवेएमि एयं। दंसणोवाओ पुण, नेइस्सं अहं सामिणिं मन्दिरुज्जाणं, तुमं पि य
कुमारं घेत्तूण तहिं चेव सन्निहिओ हवेज्जासि त्ति। पडिस्सुयं च तं मए। संपयं तुमं पमाणं ति ॥

तओ एयं सोऊण मोहदोसेणाहं सव्वसोक्खाणं पिव गओ पारं, पीईए विय पाविओ पीइं, धिईए व अवलम्बिओ धिइं, ऊसवेण
विय कओ मे ऊसवो। दिन्नं वसुभूइणो कडयजुयलं। भणिओ य एसो। वयंस, न खु अहं भवन्तमप्पमाणीकरेमि त्ति। गया अम्हे

मया भणितम्–न निरुद्यमः, किन्तूपायं विचिन्तयति 'कथं पुनरनिन्दितेन विधिनैषा प्राप्तव्या' इति। अनङ्गसुन्दर्या भणितम्–समानरूपा-
नुरागकुलकन्यकाहरणमपि अनिन्दित एव विधिः। मया भणितम्–अस्त्येतत्, किन्तु अत्यन्तस्नेहवान् महाराजः सनत्कुमारस्य, यतोऽ-
प्रतिहतः सर्वस्थानेषु गतिप्रसरः, उपन्यस्तं च तस्य सबहुमानं महाराजेन जीवनम्। ततः कदाचित् प्रार्थित एव दास्यतीति। ततः
किमेतेन। निवेदय तावदेतं वृत्तान्तं स्वामिन्यै, चिन्तय चोपायम्, कथं पुनरेतयोर्दर्शनं संजनिष्यते इति?। अनङ्गसुन्दर्या भणितम्–
निवेदयाम्येताम्। दर्शनोपायः पुनर्नेष्येऽहं स्वामिनीं मन्दिरोद्यानम्। त्वमपि च कुमारं गृहीत्वा तत्रैव सन्निहितो भवेरिति। प्रतिश्रुतं च
तन्मया। साम्प्रतं त्वं प्रमाणमिति

तत एतच्छ्रुत्वा मोहदोषेणाहं सर्वसौख्यानामिव गतो पारम्, प्रीत्येव प्राप्तः प्रीतिम्, धृत्येवावलम्बितो धृतिम्, उत्सवेनेव कृतो

१ जायइ ति र। २ महामोह° र।

तमुज्जाणं। दिट्ठा य तत्थ रुक्खसत्थविकोवियपुरिससंपाइयाकालडोहलपसूयवियारोवलक्खिज्जमाणसरूवा मन्ने उऊ। पढमं चेव कुसुमियतिलयासोयसिन्दुवारमञ्जरीमणहरो वसन्तो, तओ वि य वियसियसुरहिमल्लियाकुसुमसोहिओ गिम्हो, तओ कयम्बकुसुमगन्धाणुवासिओ घणसमओ, तओ गइन्दमयगन्धाणुवासियसत्तच्छयकुसुमसमुग्गमो सरयकालो, तओ परिपिञ्जरपियङ्गुमञ्जरीकयावयंसो हेमन्तो, तओ वियम्भिउद्दामकुन्दकुसुमहरहासधवलो सिसिरसमओ त्ति। तओ तं दट्ठूण चिन्तियं मए। अहो मणुस्सलोयदुल्लहा इयं उज्जाणरिद्धी। तहिं च जाव थेवकालं चिट्ठामि, ताव सा आगया अणङ्गसुन्दरी। भणियं च तीए। कुमार, आसणपरिग्गहेण अलंकरेहि एयं चन्दणलयाहरयं। तओ मए पुलोइयं वसुभूइवयणं। भणियं च तेण 'जं एसा भणइ' त्ति। तओ अम्हे गया चन्दणलयाहरयं। दिट्ठा य तत्थ जलहरोयरविणिग्गयरयणियरपणइणि व्व तारायणपरिगुडा रायहंसि व्व कलहंसिपरिवारा समुद्दवेल व्व थूलमुत्ताहलकलियसलायण्णपओहरा, अणङ्गघरिणि व्व उउलच्छिपरिगया चित्ताणुकूलाणुरत्तनिउणसहियणमज्झगया लहुइयरत्तकमलसोहेहिं

मे उत्सवः। दत्तं वसुभूतये कटकयुगलम्। भणितश्चैषः—वयस्य! न खल्वहं भवन्तमप्रमाणीकरोमीति। गतावावां तदुद्यानम्। दृष्टाश्च तत्र वृक्षशास्त्रविकोविदपुरुषसंपादिताकालदोहदप्रसूतविकारोपलक्ष्यमाणस्वरूपाः सर्वे ऋतवः। प्रथममेव कुसुमिततिलकाशोकसिन्दुवारमञ्जरीमनोहरो वसन्तः, ततोऽपि च विकसितसुरभिमल्लिकाकुसुमशोभितो ग्रीष्मः, ततः कदम्बकुसुमगन्धानुवासितो घनसमयः, ततो गजेन्द्रमदगन्धानुवासितसप्तच्छदकुसुमसमुद्गमः शरत्कालः, ततः परिपिञ्जरप्रियङ्गुमञ्जरीकृतावतंसो हेमन्तः, ततो विजृम्भितोद्दामकुन्दकुसुमहरहासधवलः शिशिरसमय इति। ततस्तं दृष्ट्वा चिन्तितं मया—अहो मनुष्यलोकदुर्लभेयमुद्यानऋद्धिः। तत्र च यावत् स्तोककालं तिष्ठामि तावत्साऽऽगताऽनङ्गसुन्दरी। भणितं तया—कुमार! आसनपरिग्रहेण अलंकुरु एतच्चन्दनलतागृहम्। ततो मया दृष्टं वसुभूतिवदनम्। भणितं च तेन 'यदेषा भणति' इति। तत आवां गतौ चन्दनलतागृहम्। दृष्टा च तत्र जलधरोदरविनिर्गतरजनीकर-

कुम्मुन्नएहिं घणसरलकोमलङ्गुलिविहूसिएहिं अलक्खिज्जमाणसिराजालमणहरेहिं निम्मलनहमऊहोहपडिबद्धपरिएसमण्डलेहिं अलद्धहि-ययपवेसेणं पिव पुव्वसेवासंपायणोवायचउरेणं जावयराएणं पडिवन्नएहिं चलणेहिं, चलणाणुरूवाहि चेव पसन्नसुकुमालाहिं अकय-कुङ्कुमरायपिञ्जराहिं जङ्घियाहिं, मयणजमलतोणीरकरणिल्लेणं पयामथोरेणं च निरन्तरेणं च ऊरुजुयलेणं, उत्तत्तकणयनिम्मिएणे[3] व्व पीवरेणं घडियविमलमणिमेहलाहरणेणं अणङ्गभवणेणं पिव वित्थिण्णेणं नियम्बबिम्बेणं, सयलतेलोक्कलायण्णसलिलनिवाणेणं पिव सहावगम्भीरेणं नाहिमण्डलेणं, कुसुमाउहचावलेहाविब्भमाए तणुमज्झपसाहणाएँ रोमराईए, जोव्वणारुहणसोवाणभूयतिवलिसणा-हेणं मज्झेणं, ईसानडिएण लायण्णाइसयलम्पडेणं पिव मयणेण सह समालिङ्गिएहिं परिणाहुब्भिज्जन्तएहि अपओहरेहिं पओहरेहिं, सुपइट्ठियाहिं बाहुलयाहिं, असोयपल्लवविब्भमेहिं सुपसत्थलेहालंकिएहिं माणिक्कपज्जुत्तकणयकडयसणाहेहिं अणुचियकम्माकरेहिं

प्रणयिनीव तारागणपरिवृता, राजहंसीव कलहंसीपरिवारा, समुद्रवेलेव स्थूलमुक्ताफलकलितसलावण्यपयोधरा, अनङ्गगृहिणीव ऋतुलक्ष्मीप-रिगता, चित्तानुकूलानुरक्तसखीजनमध्यगता, लघूकृतरक्तकमलशोभाभ्यां कूर्मोन्नताभ्यां घनसरलकोमलाङ्गुलिविभूषिताभ्यां अलक्ष्यमाणशिरा-जालमनोहराभ्यां निर्मलनखमयूखौघप्रतिबद्धपरिवेशमण्डलाभ्यामलब्धहृदयप्रवेशेनेव पूर्वसेवासंपादनोपायचतुरेण यावकरागेण प्रतिपन्नाभ्यां चरणाभ्याम्, चरणानुरूपाभ्यामेव प्रसन्नसुकुमालाभ्यामकृतकुङ्कुमरागपिञ्जराभ्यां जङ्घाभ्याम्, मदनयमलतूणीर(करणिल्लेणं)सदृशेण (पयाम)अनुपूर्वस्थूलेन च निरन्तरेण च ऊरुयुगलेन, उत्तप्तकनकनिर्मितेनेव पीवरेण घटितविमलमणिमेखलाभरणेन अनङ्गभवनेनेव विस्ती-र्णेन नितम्बबिम्बेन, सकलत्रैलोक्यलावण्यसलिलनिपानेनेव स्वभावगम्भीरेण नाभिमण्डलेन, कुसुमायुधचापलेखाविभ्रमया तनुमध्य-प्रसाधनया रोमराज्या, यौवनारोहणसोपानभूतत्रिवलिसनाथेन मध्येन, ईषन्नर्तितेन(ईसानडिएण)व्याकुलितेन लावण्यातिशयलम्पटेनेव मदनेन सदा

१ घणमसण० ख। २ पयाममणुपुव्वं (देशी. २-६.) ३ ०कणयमयनि० क। ४ रोमराइयाए ख।

करेहिं, परिमण्डलाए महल्लमुत्ताहलमालापरिगयाए तिलेहालंकियाए सिरोहराए, बन्धूयकरणिल्लेणं[1] सहावारुणेण अहरेण, विणिज्जियकुन्दकुसुमसोहेहिं विणिन्तमऊहजालसोहिल्लेहिं दसणेहिं, उत्तुङ्गेणं सहावरमणिज्जेणं नासावंसएण, कन्तिपडिपूरिएहिं विणिज्जियचन्दबिम्बसोहेहिं असोयपल्लवावयंसपडियपडिमेहिं गण्डपासेहिं,[2] विउद्धनवकुवलयदलकन्तिसुकुमालेहिं सुपम्हलेहिं दंसणगोयरावडियजणमणाणन्दणेहिं नयणेहिं, गहकल्लोल[3]दरगहियमियङ्कमण्डलनिहेण सुसिणिद्धालयाउलेणं निडालवट्टेणं, वयणाणुरूवेहिं जच्चतवणिज्जतलवत्तिया[4]सणाहेहिं अप्पियवयणासवणेहिं सवणेहिं, जिणझाणाणलडज्झन्तमयणधूमुग्गारेणं पिव कसिणकुडिलेणं मालईकुसुमदामसुरहिगन्धायड्ढियभमन्तमुहलभमरोलिपरियएणं केसकलावेणं, तिहुयणेक्कसुन्दरपरमाणुविणिम्मियं[5] पिव अपडिरूवं रूवसोहं वहन्ती, ईसि-

समालिङ्गिताभ्यां परिणाहोद्भिद्यमानाभ्यामपयोधराभ्यां पयोधराभ्याम्, सुप्रतिष्ठिताभ्यां बाहुलताभ्याम्, अशोकपल्लवविभ्रमाभ्यां सुप्रशस्तरेखाऽलंकृताभ्यां माणिक्यपर्युक्तकनककटकसनाथाभ्यामनुचितकर्मकराभ्यां कराभ्याम्, परिमण्डलया महन्मुक्ताफलमालापरिगतया त्रिरेखालंकृतया शिरोधरया, बन्धूकसदृशेण स्वभावारुणेनाधरेण, विनिर्जितकुन्दकुसुमशोभैर्विनिर्गच्छन्मयूखजालशोभमानैर्दशनैः, उत्तुङ्गेन स्वभावरमणीयेन नासावंशेन, कान्तिप्रतिपूरिताभ्यां विनिर्जितचन्द्रबिम्बशोभाभ्यामशोकपल्लवावतंसकपतितप्रतिबिम्बाभ्यां गण्डपार्श्वाभ्याम्, विबुद्धनवकुवलयदलकान्तिसुकुमालाभ्यां सुपक्ष्मलाभ्यां दर्शनगोचरापतितजनमनआनन्दनाभ्यां नयनाभ्यां ग्रहकल्लोलदरगृहीतमृगाङ्कनिभेन सुस्निग्धालकाकुलेन ललाटपट्टेन, वदनानुरूपाभ्यां जात्यतपनीयतलवर्तिकासनाथाभ्यामप्रियवचनाश्रवणाभ्यां श्रवणाभ्याम्, जिनध्यानानलदह्यमानमदनधूमोद्गारेणेव कृष्णकुटिलेन मालतीकुसुमदामसुरभिगन्धाकर्षितभ्रमन्मुखरभ्रमरावलिपरिगतेन केशकलापेन, त्रिभुवनैकसुन्दरपरमाणुविनिर्मितामिवाप्रतिरूपां रूपशोभां वहन्ती, ईषद्विहसिताख्धसखीजनकथाप्रबन्धा विमलमाणिक्यप्रयुक्त(खचित)कनकासनो-

१ करणिल्ल (दे) सदृशम्। २ ०पडिमावएहिं गण्डहवासेहिं स्र। ३ कल्लोलो (दे) शत्रुः राहुरित्यर्थः। ४ तलवत्तिय (दे) कर्णाभरणम्। ५ ०विणिम्मिवियं स्र।

विहसियारद्धसहियणकहापबन्धा विमलमाणिक्कपज्जुत्तकणयासणोवविट्ठा विलासवइ त्ति । तओ तं दट्ठूण मोहतिमिरदोसेण अणिरूवि-
ऊण परमत्थं अक्खिप्पन्तहिययं फुरन्तबाहुजुयलो परिचिन्तिउं पयत्तो । किह

ओहामियसुरसुन्दरिरूवाइसयं विणिम्मियं दट्ठुं । विहिणो वि नूणमेयं बहुमाणो आसि अप्पाणे ॥

एसा चावायड्ढणवियलं मुणिऊण वम्महं विहिणा । जणहिययभेयणसहा विणिम्मिया हत्थभल्लि व्व ॥

एत्थन्तरंमि समागओ से अहं दंसणगोयरं, पुलइओ य तीए ससिणेहमारत्तकसणधवलेहिं चलन्ततारएहिं नयणेहिं ससज्झसा
विय अणाचिक्खणीयं अवत्थन्तरमणुहवन्ती समुट्ठिया एसा । तओ [[3]भणियं अणंगसुन्दरीए सुसागयं मयरद्धयस्स,] मए वि भणियं
सागयं वसन्तलच्छीए । सुन्दरि, अलं संभमेण । एत्थन्तरंमि तं चेवासणमुवदंसिऊण भणियं अणङ्गसुन्दरीए । उवविसउ कुमारो ।
विलासवइआसणं ति बहुमाणेण उवविट्ठो अहं । उवणीयं च मे कलधोयमयतलियाए तम्बोलं । तं च घेत्तूण भणियं मए । उवविसउ

सुन्दरि ! अलं संभ्रमेण । अत्रान्तरे तदेवासनमुपदर्श्य भणितमनङ्गसुन्दर्या—उपविशतु कुमारः । विलासवत्यासनमिति बहुमानेनोपविष्टो-
ऽ्येयमवस्थान्तरमनुभवन्ती समुत्थितैषा । ततो [भणितमनङ्गसुन्दर्या—सुस्वागतं मकरध्वजस्य] मयाऽपि भणितम्—स्वागतं वसन्तलक्ष्म्याः ।
अत्रान्तरे समागतस्तस्याहं दर्शनगोचरम्, दृष्टश्च तया सस्नेहमारक्तकृष्णधवलाभ्यां चलत्तारकाभ्यां नयनाभ्याम् ।ससाध्वसेव अना-
एषा चापाकर्षणविफलं ज्ञात्वा मन्मथं विधिना । जनहृदयभेदनसहा विनिर्मिता हस्तभल्लिरिव ॥
तुलितसुरसुन्दरीरूपातिशया विनिर्मितां दृष्ट्वा । विधेरपि नूनमेतां बहुमान आसीदात्मनि ॥
पविष्टा विलासवतीति । ततस्तां दृष्ट्वा मोहतिमिरदोषेणानिरूप्य परमार्थमाक्षिप्यमानहृदयं स्फुरद्बाहुयुगलः परिचिन्तितुं प्रवृत्तः । कथम् ?

1 [4]पज्जत्त० ख । २ अन्नाणमोहदो० ख । ३ अयं कोष्ठान्तर्गतः पाठः क-ग पुस्तके नास्ति । ४ मए, भ० क । ५ ०आसणे ति ख ।

दुवारदेसभाए अणङ्गवइनामाए रायपत्तीए। अकज्जायरणकुलहरत्तणेण मयणस्स समुप्पन्नो तीए वि ममोवरि अहिलासो। गया अम्हे सगिहं॥ वासरन्तंमि य घेत्तूण विज्जाहरबन्धगुत्थाइं सिन्दुवारकुसुमाइं विलेवणसणाहं च तम्बोलमागया अणङ्गसुन्दरी[2]। भणियं च तीए। कुमार, विन्नत्तं सामिणीए 'एयाइं सिन्दुवारकुसुमाइं अवस्सं अज्जउत्तेणं परिहियव्वाइं' ति। तओ 'संवाइयं[3] चेव इमिणा उवन्नासेण मे समीहियं' ति चिन्तिऊण, 'जं देवी आणवेइ' त्ति भणिऊण गहियं कुसुमदामं, विरइयं उत्तिमङ्गे; [4]विलित्तो वि पिययमाबहुमाणेण पुणो विलित्तो अप्पा; मोत्तूणमावीलं समाणियं तम्बोलं। एत्थन्तरंमि भणियं वसुभूइणा। अणङ्गसुन्दरि, दिट्ठं तए पियवयंसस्स विणीयत्तणं। तीए भणियं। न एवंविहेसु महापुरिसेसु विणओ अच्छेरयं ति। तओ कंचि वेलं गमेऊण पयट्टा अणङ्ग-

तदो वसुभूतिना भणितम्–वयस्य! एहि, गच्छावः, विना विलासवत्या किमिह स्थितेनेति। निर्गतावावाम्। दृष्टो च उद्यानदेशभागे अनङ्गवतीनामया राजपत्न्या। अकार्याचरणकुलगृहत्वेन मदनस्य समुत्पन्नस्तस्या अपि ममोपर्यभिलाषः। गतावावां स्वगृहम्। वासरान्ते च गृहीत्वा विद्याधरबन्धग्रथितानि सिन्दुवारकुसुमानि विलेपनसनाथं च ताम्बूलमागताऽनङ्गसुन्दरी। भणितं च तया–कुमार! विज्ञप्तं स्वामिन्या 'एतानि स्वहस्तग्रथितानि सिन्दुवारकुसुमानि अवश्यमार्यपुत्रेण परिधातव्यानि' इति। ततः 'संवादितं चैवानेनोपन्यासेन मे समीहितम्' इति चिन्तयित्वा 'यद् देवी आज्ञापयति' इति भणित्वा गृहीतं कुसुमदाम, विरचितमुत्तमाङ्गे, विलिप्तोऽपि (कृतविलेपनोऽपि) प्रियतमाबहुमानेन पुनर्विलिप्त आत्मा, मुक्त्वाऽऽवीलं (समाणिअं) भुक्तं ताम्बूलम्। अत्रान्तरे भणितं वसुभूतिना–अनङ्गसुन्दरि! दृष्टं त्वया प्रियवयस्यस्य विनीतत्वम्। तया भणितम्–नैवंविधेषु महापुरुषेषु विनय आश्चर्यमिति। ततः काञ्चिद् वेलां

१ तओ त वीण वायंतीमपेच्छिऊण [illegible]। २ नाम विलासवइसंतीया दासचेडिया चलणेसु निवडिऊण ग। ३ संपाइयं ख। ४ पुव्वविलित्तो सतो ख। ५ बहुमाणओ ग।

सुन्दरी। दिन्नो य से मए भुवणसारो कण्ठओ। तओ पहट्ठवयणकमला 'संपन्ना सामिणीए मणोरह' त्ति चिन्तयन्ती भणिया य एसा। सुन्दरि, सयं ते गेहमेयं, ता इहागमणेण खेओ न कायव्वो त्ति। तओ 'जं कुमारो आणवेइ' त्ति भणिऊण गया अणङ्गसुन्दरी। पवड्ढमाणाणुरायाण अइक्कन्ता कइवि दियहा॥

अन्नया य रायकुलाओ निग्गच्छमाणो भणिओ अहं चेडियाए। कुमार, महारायपत्ती अणङ्गवई[1] भणाइ 'जइ नाईव उवरोहो, ता इहागच्छउ कुमारो' त्ति। तओ वीसत्थयाए महारायस्स 'अम्बाए वि आणासंपायणे न उवरोहो' त्ति भणिऊण पयट्टो अणङ्गवई-समीवं। दुवारपवेसे य फुरियं मे वामलोयणेणं, उवरोहसीलयाए तहवि य पविट्ठो अहयं। दिट्ठा य सा मए वामकरयलपणामियं[3] परिमलियकवोलपत्तलेहं वयणकमलमुव्वहन्ती पणमिया सायरं। अपरिफुडक्खरं च 'कुमार सरणागया, परित्तायाहि[4]' त्ति जंपियं

गमयित्वा प्रवृत्ताऽनङ्गसुन्दरी। दत्तस्तस्यै मया भुवनसारः कण्ठकः। ततः प्रहृष्टवदनकमला 'संपन्नाः स्वामिन्या मनोरथाः' इति चिन्तयन्ती भणिता चैषा। सुन्दरि! स्वं ते गेहमेतद्, तत इहागमनेन खेदो न कर्तव्य इति। ततो 'यत्कुमार आज्ञापयति' इति भणित्वा गताऽनङ्गसुन्दरी। प्रवर्धमानानुरागयोरतिक्रान्ताः कत्यपि दिवसाः।

अन्यदा च राजकुलाद् निर्गच्छन् भणितोऽहं चेटिकया। कुमार! महाराजपत्नी अनङ्गवती भणति 'यदि नातीवोपरोधस्तत इहागच्छतु कुमार' इति। ततो विश्वस्ततया महाराजस्य 'अम्बाया अप्याज्ञासंपादने न उपरोधः' इति भणित्वा प्रवृत्तोऽनङ्गवतीसमीपम्। द्वारप्रवेशे च स्फुरितं मे वामलोचनेन, उपरोधशीलतया तथाऽपि च प्रविष्टोऽहम्। दृष्टा च सा मया वामकरतलार्पितं परिमर्दितकपोलपत्रलेखं वदनकमलमुद्वहन्ती प्रणता सादरम्। अपरिस्फुटाक्षरं च 'कुमार! शरणागता, परित्रायस्व' इति जल्पितं तया। मया भणितम्—

1 अणगमती ख। 2 ०मति० ख। 3 पणामिय—अर्पितम्। 4 परित्तायह त्ति ख।

तीए । मए भणियं । अम्ब, कुओ भयं । तओ मयणवियारनिब्भराए दिट्ठीए मं पुलोइऊण भणियं तीए । कुमार, अणंगाओ ! जयप्पभिइ दिट्ठो मए मन्दिरुज्जाणाओ निग्गच्छमाणो तुमं, तयप्पभिइ पञ्चवाणो वि मयणो ममं चित्तलक्खे दसबाणकोडी संवुत्तो । ता हियएण समप्पियं नियगुणेहिं संदामियं अणुराएण धारियं मयणबाणेहिं सल्लियं निव्ववेहि मे सरीरं अत्तणोवओगेण । ते य सत्तिमन्ता पुरिसा, जे अब्भत्थणावच्छला, समावडियकज्जा न गणेन्ति आयइं, अब्भुद्धरेन्ति दीणयं, पूरेन्ति परमणोरहे, रक्खन्ति सरणागयं । ता रक्खेहि मं इमाओ अणङ्गाओ त्ति । तओ एयमायण्णिऊण ताडिओ विय असणिवरिसेण भिन्नो विय सूलेणं समाहओ विय मम्मेसु मुच्चमाणो विय जीविएणं महन्तं दुक्खमणुपत्तो म्हि । तओ 'नत्थि अकरणिज्जं विसयाउराणं' ति चिन्तिऊण जंपियं मए । अम्ब, परिच्चय इमं उभयलोयविरुद्धं अणज्जसंकप्पं, आलोएहि अत्तणो महाकुलं, अवेक्खाहि महारायसन्तिए गुणे । संकप्पजोणी

अम्ब ! कुतो भयम् ? । ततो मदनविकारनिर्भरया दृष्ट्या मां दृष्ट्वा भणितं तया । कुमार ! अनङ्गात् । यत्प्रभृति दृष्टो मया मन्दिरोद्यानाद् निर्गच्छन् त्वम्, तत्प्रभृति पञ्चबाणोऽपि मदनो मम चित्तलक्षे दशबाणकोटिः संवृत्तः । ततो हृदयेन समर्पितं निजगुणैः संदामितं (बद्धं) अनुरागेण धारितं मदनबाणैः शल्यितं निर्वापय मे शरीरमात्मोपयोगेन । ते च शक्तिमन्तः पुरुषा येऽभ्यर्थनावत्सलाः, समापतितकार्या न गणयन्त्यायतिम् , अभ्युद्धरन्ति दीनम्, पूरयन्ति परमनोरथान्, रक्षन्ति शरणागतम् । ततो रक्ष मामस्मादनङ्गादिति । तत एवमाकर्ण्य ताडित इवाशनिवर्षेण, भिन्न [illegible] शूलेन, समाहत इव मर्मसु, मुच्यमान इव जीवितेन महान्तं दुःखमनुप्राप्तोऽस्मि । ततो 'नास्त्यकरणीयं विषयातुराणाम्' इति चिन्तयित्वा जल्पितं मया। अम्ब ! परित्यजेममुभयलोकविरुद्धमनार्यसंकल्पम्, आलोचयात्मनो महा-

१ पलोइऊण क । २ पणइमणोरहे क । ३ विव ख । ४ असणि० ख ।

य निरयगमणेक्कदेसिओ अणङ्गो, न यापरिच्चत्तेहिं इमेहिं एस उवरमइ। न य विहाय चलणवन्दणं तुह सरीरेण मे उवओगो। सत्ति-मन्ता वि य पुरिसा, जे न परिच्चयन्ति धम्मं, न खण्डेन्ति सीलं, न लङ्घेन्ति आयारं, न करेन्ति वयणिज्जं, न मुज्झन्ति उचिएसुं। अणङ्गपरिरक्खणं पि य न विवेयसन्नाहमन्तरेण। अन्नं च-वल्लहो अहं ते, ता कह खणियसुहं चेव बहु मन्निऊण पाडेहि मं अविज्झायहुयवहजालावलीभीसणे नरए। अओ परिच्चय इमं अविवेइजणबहुमयं कामाहिलासं। सामिसाली य तुमं ति। अओ एवं भणामि। भणियं च।

जो पावं कुणमाणं अणुयत्तइ सामियं व मित्तं वा। सो निरयपंत्थियस्स कहेइ कण्डुज्जुयं मग्गं॥

एत्थन्तरंमि लज्जावणयवयणाए भणियं अणङ्गवईए। साहु कुमार साहु, उचिओ ते विवेगो। मए वि रूवसीलाइं विरुद्धाइं ति

फुलम्, अपेक्षस्व महाराजसत्कान् गुणान्। संकल्पयोनिश्च निरयगमनैकदेशिकोऽनङ्गः, न चापरित्यक्तैरेभिरेष उपरमति। न च विहाय चरणवन्दनं तव शरीरेण मे उपयोगः। शक्तिमन्तोऽपि च (ते) पुरुषा ये न परित्यजन्ति धर्मम्, न खण्डयन्ति शीलम्, न लङ्घयन्त्याचारम्, न कुर्वन्ति वचनीयम्, न मुह्यन्त्युचितेषु। अनङ्गपरिरक्षणमपि च न विवेकसन्नाहमन्तरेण। अन्यच्च-वल्लभोऽहं ते, ततः कथं क्षणिकसुखमेव बहु मत्वा पातयसि मामविध्यातहुतवहज्वालावलिभीषणे नरके। अतः परित्यजेममविवेकिजनबहुमतं कामाभिलाषम्। स्वामिशाली च त्वमिति, अतः एवं भणामि। भणितं च—

यः पापं कुर्वन्तमनुवर्तते स्वामिकं वा मित्रं वा। स नरकप्रस्थितस्य कथयति काण्डर्जुक (काण्डवत्-बाणवद् ऋजु-सरलम्) मार्गम्॥

अत्रान्तरे लज्जावनतवदनया भणितमनङ्गवत्या। साधु कुमार! साधु, उचितस्ते विवेकः। मयाऽपि रूपशीले विरुद्धे इति लोक-

१ -पत्थियस्सा ख। २ कन्दुज्जुयं ख, कन्दुज्जयं पन्थं क।

लोगरायवि(जि)न्नासणत्थं इममणुचिट्ठियं, न उण परमत्थओ त्ति । ता गच्छउ कुमारो । तओ अहं पणमिऊण तीए चलणजुयलं निग्गओ, तओ गओ नियगेहं ॥

अइक्कन्ता काइ वेला । समागओ नरवइबीयहिययभूओ विणयंधरो नाम नयरारक्खिओ । भणियं च तेण । कुमार, वत्तुकामो अहं; ता विवित्तमप्पाणयं आणवेउ कुमारो त्ति । तओ पुलइया वसुभूइपमुहा वयंसया, अवगया य । भणियं च तेण । कुमार, अवहिओ सुण ।

अत्थि भवओ पिइरज्जंमि सत्थिमई नाम सन्निवेसो । तत्थ वीरसेणो नाम कुलउत्तओ । सो य

अच्चन्तदाणवसणी अहिमाणधणो दयालुओ सूरो । गम्भीरो सरणागयपरिरक्खणबद्धकच्छिल्लो ॥

यावज्जिज्ञासनार्थमिदमनुष्ठितं न पुनः परमार्थत इति । ततो गच्छतु कुमारः । ततोऽहं प्रणम्य तस्याश्चरणयुगलं निर्गतः । ततो गतो निजगेहम् ।

अतिक्रान्ता काचिद् वेला । समागतो नरपतिद्वितीयहृदयभूतो विनयंधरो नाम नगरारक्षकः । भणितं च तेन-कुमार ! वक्तुकामोऽहम्, ततो विविक्तमात्मानमाज्ञापयतु कुमार इति । ततो दृष्टा वसुभूतिप्रमुखा वयस्या अपगताश्च । भणितं च तेन-कुमार, अवहितः शृणु ।

अस्ति भवतः पितृराज्ये स्वस्तिमती नाम सन्निवेशः । तत्र वीरसेनो नाम कुलपुत्रकः । स च—

अत्यन्तदानव्यसनी अभिमानधनो दयालुकः शूरः । गम्भीरः शरणागतपरिरक्षणबद्धकक्षावान् ॥

तस्स य कप्पपायवस्स विय परत्थसंपायणेण सफलं जम्ममणुहवन्तस्स अइक्कन्तो कोइ कालो। जाया य से आवन्नसत्ता घरिणी। तओ सो तं गेण्हिऊण महया चडयरेण पयट्टो तीए कुलहरं जयत्थलं नाम नयरं। पत्तो सेयवियं, आवासिओ बाहिरियाए। एयन्तरंभि समागओ साससमाऊरियाणणो भयकायरचक्खू खीणगमणसत्ती कण्ठगयपाणो तुरियं तुरियं कोइ कुलउत्तओ। भणियं च तेण। अज्ज, परित्तायाहि परित्तायाहि, सरणागओ अज्जस्स। कुलउत्तएण भणियं। भद्द, अलं भएण, को मम पाणेसु धरन्तेसु भद्दस्स केसं पि उप्पाडेइ। घरिणीए भणियं-अज्जउत्त, मा एवं करेहि; कयाइ दोसयारी भवे। कुलउत्तएण भणियं। सुन्दरि, अदोसयारी किं सरणं पवज्जइ। ता किं एइणा। जो होउ, सो होउ; पडिवन्नो मए। भणिओ य एसो 'भद्द, उवविसाहि'त्ति। तेण भणियं। अज्ज, कयन्तहत्थिलङ्घियाणि विय मयकुलाणि सीयन्ति मे अङ्गाणि, भयाभिभूयइत्थियाहिययं विय थरहरन्ति मे ऊरू, परनिन्दाए विय सज्जणभारही

तस्य च कल्पपादपस्येव परार्थसंपादनेन सफलं जन्मानुभवतोऽतिक्रान्तः कोऽपि कालः। जाता च तस्यापन्नसत्त्वा गृहिणी। ततः स तां गृहीत्वा महता चडकरेण (परिकरेण।) प्रवृत्तस्तस्याः कुलगृहं जयस्थलं नाम नगरम्। प्राप्तः श्वेतविकाम्। आवासितो बाह्यायाम्। अत्रान्तरे समागतः श्वाससमापूरिताननो भयकातरचक्षुः क्षीणगमनशक्तिः कण्ठगतप्राणस्त्वरितं त्वरितं कोऽपि कुलपुत्रकः। भणितं तेन-आर्य! परित्रायस्व, परित्रायस्व, शरणागत आर्यस्य। कुलपुत्रकेन भणितम्-भद्र! अलं भयेन, को मम प्राणेषु धरत्सु भद्रस्य केशमपि उत्पाटयति। गृहिण्या भणितम्-आर्यपुत्र! मा एवं कुरु, कदाचिद् दोषचारी भवेत्। कुलपुत्रकेण भणितम्-सुन्दरि! अदोषचारी किं शरणं प्रपद्यते?। ततः किमेतेन। यो भवतु स भवतु, प्रतिपन्नो मया। भणितश्च भद्र! उपविशेति। तेन भणितम्-आर्य!

१ थणवरयपयाणएहिं य पत्तो सेयवियं भवओ पिउणो जसोधम्मुणो रायहाणिं क। २ दोसयारी सरणं पवज्जइ, न उण निद्दोसो सरणं पवज्जइ त्ति क। ३ थरहरायन्ते स्त।

न पसरइ मे गई, अत्थिजणुछाया विय पए पए खलन्ति चलणया, पेयनाहस्स विय देवस्स विजयवम्मणो आसन्नीहवन्ति निद्देस-यारिणो त्ति। कुलउत्तएण भणियं। भद्द, अलं भएण। को मम पाणेसु धरन्तेसु भद्दस्स अंगुलीए वि दसइस्सइ त्ति। ता परिच्चय विसायं, उवविससु आवासन्तरे॥ एत्थन्तरंमि समागया रायपुरिसा। भणियं च तेहिं। अरे रे पावकम्म, चण्डं देवसासणमइक्कमिऊण अज्ज वि पाणे धारेसि।

जइ वच्चसि पायालं सरणं वा सुरवइं पयत्तेणं। लङ्घेसि जलनिहिं वा तहावि जीयं न पावेसि॥

कुलउत्तएण भणियं-भद्द, किं कयमणेणं। तेहिं भणियं-परदव्वावहारेणं देवसासणाइक्कमो त्ति। कुलउत्तएण भणियं-भद्द,

---

कृतान्तहस्तिलङ्घितानीव मृगकुलानि सीदन्ति मेऽङ्गानि, भयाभिभूतस्त्रीहृदयमिव कम्पेते मे ऊरू, परनिन्दायामिव सज्जनभारती न प्रसरति मे गतिः, अर्थीजनोछाया इव पदे पदे स्खलतश्चरणौ, प्रेतनाथस्येव देवस्य विजयवर्मण आसन्नीभवन्ति निर्देशकारिण इति। कुलपुत्रकेण भणितम्-भद्र! अलं ते भयेन, को मम प्राणेषु धरत्सु भद्रस्य अङ्गुल्यापि दर्शयिष्यतीति। ततः परित्यज विषादम्, उपविश आवासान्तरे। अत्रान्तरे समागता राजपुरुषाः। भणितं च तैः-अरे रे पापकर्मन्! चण्डं देवशासनमतिक्रम्य अद्यापि प्राणान् धारयसि?।

यदि व्रजसि पातालं शरणं वा सुरपतिं प्रयत्नेन। लङ्घसे जलनिधिं वा तथापि जीवितं न प्राप्नोषि॥

कुलपुत्रकेन भणितम्-भद्र! किं कृतमनेन?। तैर्भणितम्-परद्रव्यापहारेण देवशासनातिक्रम इति। कुलपुत्रकेन भणितम्-भद्र!

---

१ केणवि उप्पाडिं ग। २ आवासन्तरं, उवविट्ठो य एसो दूसहरब्भन्तरे। एत्थ क। ३ जीवं क।

सरणागयपरिवज्जणं चोररक्खणं च दुवे वि हु विरुद्धाणि; तहावि अमुणिऊण परमत्थं पडिवन्नं मए इमस्स सरणं। एवं च ठिए समाणे भद्दा पमाणं ति। तेहि भणियं–भो कुलउत्तय, जइ अम्हे पमाणं, ता समप्पेहि एयं पावकम्मं, मा पवज्जेहि देवकोवाणलजालावलीए पयङ्गत्तणं। कुलउत्तएण भणियं–न ईइसो सप्पुरिसाण मग्गो, जं सरणागओ समप्पिज्जइ। तेहिं भणियं। जइ एवं, परिरक्खेहि एयं; बला गेण्हामो त्ति। तेण भणियं। को मम पाणेसु धरन्तेसु एयं गेण्हइ त्ति। भणिऊण मग्गियं मण्डलग्गं कुलउत्तएण, सन्नद्धो य से परिवारो। तओ रायपुरिसेहिं 'मा णे अवराहियं भविस्सइ' त्ति चिन्तिऊण निवेइयं महारायस्स। भणियं च तेण। सासणाइक्कन्तं पि 'मे सरणागयं'ति रक्खइ; ता लहुं वावाएह त्ति। तओ समागयं अहियतरं नरिन्दसाहणं, वेढिया कुलउत्तयस्सावासभूमी, पयट्ट-माओहणं॥ एत्थन्तरंमि समागओ वाहियालीओ महारायपुत्तो महया आससाहणेण जसोहम्मदेवो। पुच्छावियं तेण 'अरे किमेयं'

शरणागतपरिवर्जनं चौररक्षणं च द्वे अपि खलु विरुद्धे, तथाऽप्यज्ञात्वा परमार्थं प्रतिपन्नं मयाऽस्य शरणम्। एवं च स्थिते सति भद्राः प्रमाणमिति। तैर्भणितम्–भो कुलपुत्रक! यदि वयं प्रमाणं ततः समर्पय एतं पापकर्माणम्, मा प्रपद्यस्व देवकोपानलज्वालावल्यां पतङ्गत्वम्। कुलपुत्रकेण भणितम्–न ईदृशः सत्पुरुषाणां मार्गो यच्छरणागतः समर्प्यते। तैर्भणितम्–यद्येवं परिरक्ष एतम्, बलाद् गृह्णीम इति। तेन भणितम्–को मम प्राणेषु धरत्सु एतं गृह्णातीति भणित्वा मार्गितं मण्डलाग्रं कुलपुत्रकेण, सन्नद्धश्च तस्य परिवारः। ततो राजपुरुषैः 'माऽस्माकं अपराद्धं भविष्यति' इति चिन्तयित्वा निवेदितं महाराजाय। भणितं च तेन–शासनातिक्रान्तमपि मे शरण्यागतमिति रक्षति ततो लघु व्यापादयतेति। ततः समागतमधिकतरं नरेन्द्रसाधनम्, वेष्टिता कुलपुत्रस्यावासभूमिः, प्रवृत्तमायोधनम्। अत्रान्तरे समागतो वाह्यालीतो महाराजपुत्रो महताऽश्वसाधनेन यशोधर्मदेवः। प्रच्छितं तेन–अरे किमेतदिति। कथितं च तस्य राजपुरुषैः।

१ समप्पिअइ क। २ निग्गया रायपुरिसा निवेइय ख। ३ अय पाठ खपुस्तके नास्ति।

ति। साहियं च से रायपुरिसेहिं। भणियं च तेण। अरे मए अवावाइयंमि को सरणागयवच्छलं वावाएइ त्ति निवेएह तायस्स। तओ उवसन्तमाओहणं, निवेइयं राइणो, अवहीरियं च तेण। भद्द, वीसत्थो गच्छाहि त्ति बहु माणिऊण कुलउत्तयं गओ कुमारो। कुलउत्तओ य तक्करं पूइऊण अणुमासिऊण य तं पत्तो दुमासमेत्तेण कालेण जयत्थलं। पसूया से घेरिणी। जाओ से दारओ; सो उण कुमार, अहं चेव। ता एवं सयलसत्तोवगारगो वि विसेसओ उवयारी ते पिया तायस्स अम्बाए ममं च त्ति। [3]निवेइयं कुमारस्स, कारणं पुण इमं। अज्ज खलु समागयमेत्तो चेव ईसाणचन्दो महाराओ वाहियालीओ पविट्ठो अणङ्गवइगेहं। दिट्ठा य तेण करुरुहविलिहिया-णणा बाहजलधोयकवोलपत्तलेहा अणङ्गवई, भणिया य 'सुन्दरि, किमेयं' ति। तीए भणियं-सीलपरिरक्खणविवाओ। राइणा भणियं। साहेउ सुन्दरी, कस्स सुमरियं कयन्तेण। तीए भणियं। न विन्नत्तं चेव मए महारायस्स; 'किमणेण असंबद्धपलावेणं' ति। अन्नहा

भणितं च तेन-अरे मयि अव्यापादिते कः शरणागतवत्सलं व्यापादयतीति निवेदयत तातस्य। तत उपशान्तमायोधनम्, निवेदितं राज्ञः, अवधीरितं च तेन। भद्र! विश्वस्तो गच्छ इति बहु मानयित्वा कुलपुत्रकं गतो कुमारः। कुलपुत्रकश्च तस्करं पूजयित्वाऽनुशिष्य च तं प्राप्तो द्विमासमात्रेण कालेन जयस्थलम्। प्रसूता च तस्य गृहिणी। जातस्तस्या दारकः, स पुनः कुमार! अहमेव। तत एवं सकलसत्त्वोपकारकोऽपि विशेषत उपकारी ते पिता तातस्याम्बाया मम चेति। निवेदितं कुमाराय, कारणं पुनरिदम्-अद्य खलु समागत-मात्र एव ईशानचन्द्रो महाराजो वाह्यालितः प्रविष्टोऽनङ्गवतीगेहम्। दृष्टा च तेन करुरुहविलिखितानना बाष्पजलधौतकपोलपत्रलेखाऽ-नङ्गवती। भणिता च सुन्दरि! किमेतदिति। तया भणितम्-शीलपरिरक्षणविपाकः। राज्ञा भणितम्-कथयतु सुन्दरी, कस्य स्मृतं कृता-

१ वावाविवं महाराएण क। २ भारिया क। ३ सुय च मे जणणिजणयाण सयासाओ। जहा विजयधम्मणो पुत्तजम्मोधम्मसंतिओ णे जियलोओ। जस्स नामं पि सुमरिऊण हरिसवसुप्फुल्ललोयणो वासरंपि सयलं तस्स सब्भूयगुणकित्तणं करेत्ताण न तिप्पइ मत्तो चेव ईसाणचंदो क।

अगंता कइवि वासरा सणंकुमारस्स मं पत्थेमाणस्स। न पडिवन्नं च तं मए। अज्ज उण सयमेवागच्छिऊण अपडिवज्जमाणी से हियपइच्छियं एवं कयत्थिय म्हि। तओ कुविओ राया। भणियं च तेण। अरे विणयंधर, लहुं तं दुरायारं कुलफंसणं वावाएहि त्ति। मए भणियं। जं देवो आणवेइ। राइणा भणियं। तहा तए वावाइयव्वो, जहा न कोइ णं लक्खेइ त्ति। तओ मए चिन्तियं। अहो दारुणे निउत्तो म्हि। एवंफला नरिन्दपच्चासन्नया। धन्ना खु ते जणा, सेवन्ति जे निद्दुज्जणाइं तवोवणाइं। हा किमेत्थ कायव्वं ति। सोहणं होइ, जइ सो दीहाऊ न वावाइज्जइ। समद्धासिओ चिन्तापिसाइयाए 'तहावि य अलङ्घणीओ देवाएसो' त्ति पयट्टो एयवइयरेण। एत्थन्तरंमि छीयं केणावि तोरणपएसे। तमायण्णिऊण विलम्बमाणो भणिओ सिद्धाएसनेमित्तिएण। भद्द विणयंधर, मा विलम्बेहि; जओ सोम्मा नाम सत्तमी एसा छिक्का आरोग्गफला अणन्तरा अपुव्वअत्थलाभोत्तरा य। तहा य भणियमिणमिसीहिं—

म्लेन ?। तया भणितम्-न विज्ञप्तमेव मया महाराजाय 'किमनेनासंबद्धप्रलापेन' इति। अन्यथाऽतिक्रान्ताः कत्यपि वासराः सनत्कुमारस्य मां प्रार्थयमानस्य। न प्रतिपन्नं च तन्मया। अद्य पुनः स्वयमेवागत्याप्रतिपद्यमाना तस्य हृदयेप्सितमेवं कदर्थिताऽस्मि। ततः कुपितो राजा। भणितं च तेन-अरे विनयन्धर! लघु तं दुराचारं कुलपांसनं व्यापादयेति। मया भणितम्-यद् देव आज्ञापयति। राज्ञा भणितम्-तथा त्वया व्यापादयितव्यो यथा न कोऽपि तद् लक्षयतीति। ततो मया चिन्तितम्-अहो दारुणे नियुक्तोऽस्मि। एवंफला नरेन्द्रप्रत्यासन्नता। धन्याः खलु ते जनाः सेवन्ते ये निर्दुर्जनानि तपोवनानि। हा किमत्र कर्तव्यमिति। शोभनं भवति यदि स दीर्घायुर्न व्यापाद्यते। समध्यासितश्चिन्तापिशाचिकया, 'तथापि चालङ्घनीयो देवादेशः' इति प्रवृत्त एतद्व्यतिकरेण। अत्रान्तरे क्षुतं केनापि तोरणप्रदेशे। तमाकर्ण्य विलम्बमानो भणितः, सिद्धादेशनैमित्तिकेन। भद्र विनयन्धर! मा विलम्बस्व, अतः सौम्या नाम सप्तम्येषा क्षुत

---

१ सोमा ख।

पतिसेहमजत्तं वा हाणिं वुड्ढिं खयं असिद्धिं वा । आरोग्गमत्थलाभं छीयंमि पयाहिणदिसासु ॥

तं एस इमीए विवागो । निमित्तन्तरजोगओ य अवगच्छामि, निद्दोसवत्थुविसओ विइण्णो ते रन्ना विरुद्धाएसो, नाहिप्पेओ य भयओ । ता मा संतप्प । जहा तुमं चिन्तेसि, तहा एसो परिणमिस्सइ । किं तु सिग्घं पयट्टेहि, अन्नहा असोहणं परिणमइ ॥ तओ मए चिन्तियं । अणेयसंजणियपच्चओ सिद्धाएसो खु एसो, एयं च एवंविहं पओयणं, विन्नवणागोयरो य कोवो देवस्स, सव्वहा विसममेयं ति चिन्तयन्तो गओ निययगेहं । हा को उण इहोवाओ त्ति चिन्तयन्तो गहिओ उव्वेएण । पुच्छिओ य जणणीए । पुत्तय, किमेवमुव्विग्गो विय लक्खीयसि । तओ मए 'नत्थि जणणीओ वि अवरं वीसासथामं' ति साहियं तीए । भणियं च णाए । पुत्तय, न तए इममणुचिट्ठियव्वं, कुलोवयारिपुत्तो खु एसो पुत्तयस्स त्ति । साहिओ कहियवुत्तन्तो । ता एवं ववत्थिए कुमारो पमाणं ति ॥

(छिक्का) आरोग्यफलाऽनन्तराऽपूर्वार्थलाभोत्पत्ता च । तथा च भणितमिदमृषिभिः—

प्रतिषेधमयत्नं(यानं) वा हानिं वृद्धिं क्षयमसिद्धिं वा । आरोग्यमर्थलाभं क्षुते प्रदक्षिणदिक्षु ॥

तदेषोऽस्या विपाकः । निमित्तान्तरयोगतश्चावगच्छामि, निर्दोषवस्तुविषयो वितीर्णस्ते राज्ञा विरुद्धादेशः, नाभिप्रेतश्च भवतः । ततो मा संतप्यस्व । यथा त्वं चिन्तयसि तथैव परिणंस्यति । किन्तु शीघ्रं प्रवर्तस्व, अन्यथाऽशोभनं परिणमति ततो मया चिन्तितम्–अनेक संजनितप्रत्ययः सिद्धादेशः खल्वेषः, एतच्च एवंविधं प्रयोजनम्, विज्ञापनागोचरश्च कोपो देवस्य, सर्वथा विषममेतदिति चिन्तयन् गतो निजकगेहम् । हा कः पुनरिहोपाय इति चिन्तयन् गृहीत उद्वेगेन । पृष्टश्च जनन्या । पुत्र ! किमेवमुद्विग्न इव लक्ष्यसे ? । ततो मया 'नास्ति जननीतोऽप्यपरं विश्वासस्थानम्' इति कथितं तस्यै । भणितं चानया–पुत्र ! न त्वयेदमनुष्ठातव्यम्, कुलोपकारिपुत्रः खल्वेष पुत्रस्येति कथितः कथितवृत्तान्तः । तत एवं व्यवस्थिते कुमारः प्रमाणमिति ॥

ठिओ तुण्हिक्को विणयंधरो। तओ मए चिन्तियं। अहो मायासीलया इत्थिवग्गस्स। अहवा महिलिया नाम भुयङ्गमगई विय कुडिलहियया, विज्जू विय दिट्ठनट्ठपेम्मा, सरिया विय उभयकुलुच्छायणी[1],ससङ्गपव्वज्जा विय अपुट्ठधम्मा, हिंसा विय जीवलोयगरहिय त्ति। अहवा किं इमीए चिन्ताए। अविवेयबहुला विसयविसलालसा ईइसी चेव महिलिया होइ। अह कह पुण महाराएण तीए वयणओ एयमेवं चेय पडिवन्नं ति। अहवा ईदिसी मे अवत्था, जेण संभवइ एयं पि। अविमिस्सगारीणि किल जोव्वणाणि हवन्ति। इट्ठा य सा महारायस्स। ता किमेत्थ जुत्तं ति। किं साहेमि जहट्ठियं महारायस्स। अहवा वावाइज्जइ सा तवस्सिणी अवस्सं महाराएण। न कयं च [2]से समीहियं। ता कहमन्नं पि अणत्थं से संपाडेमि। असाहिज्जमाणे य मइलणा मे कुलहरस्स। तहावि वरं मइलणा, न उण परपीड त्ति। चिन्तयन्तो भणिओ विणयंधरेण। ता आइसउ कुमारो, किं मए एत्थ कायव्वं ति। मए भणियं। भद्द, आएसयारी

स्थितस्तूष्णिको विनयन्धरः। ततो मया चिन्तितम्-अहो मायाशीलता स्त्रीवर्गस्य। अथवा महिलिका नाम भुजंगमगतिरिव कुटिलहृदया, विद्युदिव दृष्टनष्टप्रेमा, सरिदिव उभयकुलोच्छादनी, ससंगप्रव्रज्येव अस्पृष्टधर्मा, हिंसेव जीवलोकगर्हितेति। अथवा किमनया चिन्तया। अविवेकबहुला विषयविषलालसा ईदृश्येव महिलिका भवति। अथ कथं पुनर्महाराजेन तस्या वचनत एतदेवमेव प्रतिपन्नमिति?। अथवा ईदृशी मेऽवस्था, येन संभवत्येतदपि। अविमृश्यकारीणि किल यौवनानि भवन्ति। इष्टा च सा महाराजस्य। ततः किमत्र युक्तमिति। किं कथयामि यथास्थितं महाराजाय। अथवा व्यापाद्यते सा तपस्विनी अवश्यं महाराजेन। न कृतं च तस्याः समीहितम्। ततः कथमन्यमप्यनर्थं तस्य संपादयामि। अकथ्यमाने च मलिनता मे कुलगृहस्य। तथापि वरं मलिनता, न पुनः परपीडेति चिन्तयन् भणितो विनयन्धरेण। तत आदिशतु कुमारः, किं मया कर्तव्यमिति। मया भणितम्-भद्र! आदेशकारी त्वम्, ततः

[1] कुलघायणी क। [2] मे ग।

तुम, ता संपाडेहि रायसासणं; किं वा मए दुरायारेण कुलफंसणेण जीवमाणेणं ति। अद्धभणिए छिक्किय सिरिहराभिहाणेण रायमग्गचारिणा नरेणं ति। नियवहापडिबद्धं च रायमग्गगामिएहिं महया सद्देणं जंपियं बम्भणेहिं 'भो किं बहुणा, न एस दोसयारी, एत्थ अम्हे कोसविसएहिं पच्चाएमो'। एयमायण्णिऊण भणियं विणयंधरेण। कुमार, न तुमं दुरायारो, जओ जंपियं सिद्धाएसेण 'निद्दोसवत्थुविसओ विइण्णो ते रन्ना चिरद्धाएसो' त्ति। अवितहाएसो य सो भयवं, न सहिओ य भवओ दुरायाराइसद्दो अवितहसूयगेहिं छिक्कादिनिमित्तेहिं। ता किं इइणा पलावप्पाएण। साहेहि, कहं पुण इमं ववत्थियं; जेण विन्नवेमि महारायस्स। मए भणियं। भद्द, किमहं साहेमि; अम्हा एत्थ पमाणं। तेण भणियं। कुमार, न तुज्झ एत्थ दोसो, दुट्ठा य सा पाव त्ति सामन्नओ निच्छियमिणं, विसेसं नावगच्छामि। ता किं ममेइणा। एवं चेव एयं विन्नवेमि महारायस्स; तओ सो चेव एत्थ अन्तं लहिस्सइ त्ति। भणिऊण उट्ठिओ

संपादय राजशासनम्, किं वा मया दुराचारेण कुलपांसनेन जीवतेति अर्धभणिते क्षुतं श्रीधराभिधानेन राजमार्गचारिणा नरेणेति। निजवधप्रतिबद्धं च राजमार्गगामिकैर्महता शब्देन जल्पितं ब्राह्मणैः 'भो! किं बहुना, न एष दोषकारी, अत्र वयं +कोशविषयैः प्रत्यायगामः। एतदाकर्ण्य भणितं विनयन्धरेण। कुमार! न त्वं दुराचारः, यतो जल्पितं सिद्धादेशेन 'निर्दोषवस्तुविषयो वितीर्णस्ते राज्ञा चिरादेशः' इति। अवितथादेशश्च स भगवान्, न सोढश्च भवतो दुराचारादिशब्दोऽवितथसूचकैः क्षुतादिनिमित्तैः। ततः किमेतेन प्रलापप्रायेण। कथय कथं पुनरिदं व्यवस्थितम्, येन विज्ञपयामि महाराजाय। मया भणितम्-भद्र! किमहं कथयामि, अस्माऽत्र प्रमाणम्। तेन भणितम्-कुमार! न तवात्र दोषः, दुष्टा च सा पापेति सामान्यतो निश्चितमिदम्, विशेषं नावगच्छामि। ततः किं ममैतेन। एवमेवैतद् विज्ञपयामि महाराजाय, ततः स एवात्र अन्तं लप्स्यते इति भणित्वोत्थितो विनयन्धरः, धृतो मया भुजादण्डे भणितश्च। भद्र!

१ पीपगारेहिं पा। + श्रोत्र.-शपथरूपार्थं तप्तलोहादिस्पर्शप्रमुखदिव्यविशेषः।

निणयंधरो, धरिओ मए भुयादण्डे, भणिओ य। भद्द, अलं अम्बाए उवरि संरम्भेण। चञ्चलं जीवियं। न खलु एयं बहु मन्निऊण गुरुयणसंकिलेसकरणं जुज्जइ। विणयंधरेण भणियं। कुमार, पुत्तो तुमं महारायजसवम्मणो, किमेत्थ अवरं भणीयइ। अओ चेव मे तीए पावाए उवरि कोवो। ता करेहि पसायं; मुञ्च मं, जेण विन्नवेमि एयं वइयरं देवस्स। मए भणियं। अलमिमिणा निब्बन्धेण। तेण भणियं। कुमार, अवस्समिणं मए देवस्स विन्नवियव्वं ति। मए भणियं। भद्द, जइ एवं, ता अवस्सं मए वि अप्पा वावाइयव्वो त्ति। एयमायण्णिऊण बाहुल्ललोयणो विसण्णो विणयंधरो। भणियं च णेण। अहो देवस्स असमिक्खियकारिया, जं ईइसं पुरिसरयणमेवं संभावीयइ। धिरत्थु एयस्स देवसद्दो। मए भणियं। भद्द, मा तायं अहिक्खिवाहि; को एत्थ दोसो तायस्स, मम चेव पुव्वकम्मपरिणई एस त्ति। तओ महासोयाभिभूएण भणियं विणयंधरेण। कुमार, जइ एवं, ता आइसउ कुमारो, किं मए पावकम्मेण कायव्वं ति। मए भणियं। भद्द, आएसयारी तुमं, पावकम्मो अहं; ता संपाडेहि रायसासणं। किं मए दुट्ठसीलेण जीवन्तएण। तेण भणियं।

अलमम्बाया उपरि संरम्भेण, चञ्चलं जीवितम्, न खल्वेतद् बहु मत्वा गुरुजनसंक्लेशकरणं युज्यते। विनयन्धरेण भणितम्–कुमार! पुत्रस्त्वं महाराजयशोवर्मणः, किमत्र अपरं भण्यते। अत एव मे तस्याः पापाया उपरि कोपः। ततः कुरु प्रसादम्, मुञ्च माम्, येन विज्ञपयाम्येतं व्यतिकरं देवस्य। मया भणितम्–अलमनेन निर्बन्धेन। तेन भणितम्–कुमार! अवश्यमिदं मया देवस्य विज्ञपितव्यमिति। मया भणितम्–भद्र! यद्येवं ततोऽवश्यं मयाऽप्यात्मा व्यापादयितव्य इति। एतदाकर्ण्य बाष्पार्द्रलोचनो विषण्णो विनयन्धरः। भणितं च तेन–अहो देवस्यासमीक्षितकारिता, यदीदृशं पुरुषरत्नमेवं संभाव्यते। धिगस्तु एतस्य देवशब्दः। मया भणितम्–भद्र! मा तातमधिक्षिप, कोऽत्र दोषस्तातस्य, ममैव पूर्वकर्मपरिणतिरेषेति। ततो महाशोकाभिभूतेन भणितं विनयन्धरेण। कुमार! यद्येवं तत आदिशतु

१ –मायण्णिय। २ अहिक्खिव ख।

मा एवमाइसउ कुमारो, किं इमिणा असंबद्धपलावेण वयणविण्णासेण, जहाऽहं दुट्ठसीलो पावकम्मो; धन्नो तुमं, भायणं सयलकल्लाणाणं आलओ सयलगुणरयणाणं, कप्पतरुभूओ सयलसत्ताणं। किं बहुणा, निव्वुइदाणकप्पो तेलोक्कस्स त्ति। ता जइ न विनिवेयव्वमेयं देवस्स, रक्खियव्वा सा रायदुट्ठपत्ती, ता चिन्तेहि एत्थुवायं, जहा भवओ पाणधारणाणन्दियमणो देवस्स अणवराही हवामि त्ति। तओ मए चिन्तियं। न वावाएइ एसो; अवावाएन्तो य एवमवराहियं न पावेइ, जइ अलक्खिओ परियणेणं वसुभूइबिइओ विप्पगिट्ठ-देसन्तरमुवगच्छामि त्ति। चिन्तिऊण इमं चेव भणिओ विणयंधरो। भणियं च तेण। कुमार, को अन्नो उवायन्तु त्ति, ता अणुचिट्ठउ इणमेव कुमारो। अन्नं च-पयट्टं चेव वहणं सुवण्णभूमिं, अज्जेव रयणीए मुचिस्सइ त्ति। तेणेव सुवण्णभूमिगमणेण अणुग्गहेउ मं कुमारो। मए भणियं। जं वो रोयइ त्ति॥

कुमारः, किं मया पापकर्मणा कर्तव्यमिति। मया भणितम्-भद्र! आदेशकारी त्वम्, पापकर्माऽहम्, ततः संपादय राजशासनम्। किं मया दुष्टशीलेन जीवता। तेन भणितम्-मैवमाज्ञापयतु कुमारः, किमनेनासंबद्धप्रलापेन वचनविन्यासेन, यथाऽहं दुष्टशीलः पापकर्मा, धन्यस्त्वम्, भाजनं सकलकल्याणानाम्, आलयः सकलगुणरत्नानाम्, कल्पतरुभूतः सकलसत्त्वानाम्, किं बहुना? निर्वृतिदानकल्पस्त्रै-लोक्यस्यापि। ततो यदि न विज्ञपयितव्यमेतत् देवस्य, रक्षितव्या सा राजदुष्टपत्नी, तच्चिन्तयात्रोपायम्, यथा भवतः प्राणधारणान-न्दितमना देवस्यानपराधी भवामीति। ततो मया चिन्तितम्-न व्यापादयत्येषः, अव्यापादयंश्च एवमपराधितां न प्राप्नोति, यदि अलक्षितः परिजनेन वसुभूतिद्वितीयो विप्रकृष्टदेशान्तरमुपगच्छामीति। चिन्तयित्वा इदमेव भणितो विनयन्धरः। भणितं च तेन-कुमार! कोऽन्य उपायस्त इति, ततोऽनुतिष्ठत्विदमेव कुमारः। अन्यच्च-प्रवृत्तमेव वहनं सुवर्णभूमिम्, अद्यैव रजन्यां मोक्ष्यते इति। तेनैव सुवर्णभूमि-

१ -पणरण्णो ख। २ पवहण क।

एत्थन्तरंमि समागओ संझासमओ। निग्गओ अहं वसुभूइविणयंधरसमेओ तामलित्तीओ, गओ वेलाउलं। समप्पिया अम्हे विणयंधरेण सबहुमाणं वहणसामिणो समुद्ददत्तस्स, पडिच्छिया तेण। अइक्कन्ता थेववेला। समुग्गओ कामिणीगण्डपण्डुरो चन्दो, समागया संखुद्धजलयरनिनायगब्भिणा समुद्दवेला। समारूढो य अहयं वसुभूइदुईओ जाणवत्तं। चलणेसु निवडिऊण 'कुमार, न मे कुप्पियव्वं' ति भणिऊण बाहोल्ललोयणो 'नियत्तो विणयंधरो। कयाइं मङ्गलाइं, उवउत्तो कण्णहारो, आपूरियं जाणवत्तं, पयट्टं पवणवेगेण। एत्थन्तरंमि वसुभूइणा भणियं। भो वयंस, किमेयं ति। तओ मए साहिओ अणङ्गवइवुत्तन्तो। तेण भणियं। अह किं पुण जहट्ठियं चेव न निवेइयं महारायस्स। मए भणियं। वयंस, अणङ्गवईपीडाभएणं ति।

पत्ता अम्हे दुमासमेत्तेण कालेण सुवण्णभूमिं, ओइण्णा पवहणाओ। गया सिरिउरं नाम नयरं। दिट्ठो य तत्थ सेयवियावत्थ-

---

गमनेनानुगृह्णातु मां कुमारः। मया भणितम्-यद् वो रोचते इति॥

अत्रान्तरे समागतः सन्ध्यासमयः। निर्गतोऽहं वसुभूतिविनयन्धरसमेतः ताम्रलिप्तीत, गतो वेलाकुलम्। समर्पितावावां विनयन्धरेण सबहुमानं वहनस्वामिनः समुद्रदत्तस्य। प्रतीष्टौ तेन। अतिक्रान्ता स्तोकवेला। समुद्गतः कामिनीगण्डपाण्डुरश्चन्द्रः, समागता संक्षुब्धजलधरनिनादगर्भिता समुद्रवेला। समारूढश्चाहं वसुभूतिद्वितीयो यानपात्रम्। चरणयोर्निपत्य 'कुमार! न मे कुपितव्यम्' इति भणित्वा बाष्पार्द्रलोचनो निवृत्तो विनयन्धरः। कृतानि मङ्गलानि, उपयुक्तः कर्णधारः, आपूरितं यानपात्रम्, प्रवृत्तं पवनवेगेन। अत्रान्तरे वसुभूतिना भणितम्-भो वयस्य! किमेतदिति। ततो मया कथितोऽनङ्गवतीवृत्तान्तः। तेन भणितम्-अथ किं पुनर्यथास्थितमेव न निवेदितं महाराजाय। मया भणितम्-वयस्य! अनङ्गवतीपीडाभयेनेति।

---

१ विणियत्तो ख। २ कण्णधारो ख।

व्वओ समिद्धिदत्तसेट्ठिपुत्तो वाणिज्जसमागओ मणोरहदत्तो नाम बालवयंसओ त्ति, तेण वि य अम्हे। तओ असंभावणीयागमणसंकेण निरूविया कंचि कालं, विहसियं च अम्हेहिं। तओ पच्चभिन्नाया अम्हे। पणमिऊण हरिसविसायगब्भिणं जपियं तेण। कुमार, अवि कुसलं महारायस्स। मए भणियं 'कुसलं'। नीया तेण सगिहं। कओ णे विभवपीइसरिसो उवयारो। भुत्तुत्तरकालंमि पुच्छिओ आगमणपओयणं। तायनिव्वेएण विणिग्गओ, सीहलेसरनियमाउलसमीवं गमिस्सामि' त्ति साहिऊण सबहुमाणं भणिओ य एसो। सीहलदीवगामिवहणोवलम्भे अवहिएण होयव्वं' त्ति। मणोरहदत्तेण भणियं। जं कुमारो आणवेइ॥ अइक्कन्तो कोइ कालो। पीइलङ्घिओ विओयभीरुत्तणेण न साहेइ णे उवलद्धं पि सीहलदीवगामियं वहणं। अन्नया य मुणिऊण अम्हाणमूसुयत्तणं भणियमणेण। कुमार, किमवस्समासन्नमेव गन्तव्वं कुमारेण। मए भणियं। वयंस, पओयणं मे अत्थि त्ति। तेण भणियं। जइ एवं, ता खमियव्वं कुमारेण,

प्राप्तावां द्विमासमात्रेण कालेन सुवर्णभूमिम्। अवतीर्णौ प्रवहणात्। गतौ श्रीपुरं नाम नगरम्। दृष्टश्च तत्र श्वेतविकावास्तव्यः समृद्धिदत्तश्रेष्ठिपुत्रो वाणिज्यसमागतो मनोरथदत्तो नाम बालवयस्य इति, तेनापि चावाम्। ततोऽसंभावनीयागमनशङ्केन निरूपितौ कञ्चित्कालम्, विहसितं चावाभ्याम्। ततः प्रत्यभिज्ञातावावाम्। प्रणम्य हर्षविषादगर्भितं जल्पितं तेन। कुमार! अपि कुशलं महाराजस्य। मया भणितं-कुशलम्। नीतौ तेन स्वगृहम्। कृतो नौ विभवप्रीतिसदृश उपचारः। भुक्तोत्तरकाले पृष्ट आगमनप्रयोजनम्। 'तातनिर्वेदेन विनिर्गतः', सिंहलेश्वरनिजमातुलसमीपं गमिष्यामि' इति कथयित्वा सबहुमानं भणितश्चैषः। 'सिंहलद्वीपगामिवहनोपलम्भेऽवहितेन भवितव्यम्' इति। मनोरथदत्तेन भणितम्-यत्कुमार आज्ञापयति॥ अतिक्रान्तः कोऽपि कालः। प्रीतिलङ्घितो वियोगभीरुत्वेन न कथयति नौ उपलब्धमपि सिंहलद्वीपगामिकं वहनम्। अन्यदा च ज्ञात्वाऽऽवयोरुत्सुकत्वं भणितमनेन। कुमार! किमवश्यमासन्नमेव

१ -गमणसङ्किएण पा।

जं मए विओयभीरुत्तणेण एद्दहमेत्तं कालं कओ पओयणविघाओ त्ति; जओ पाएणमिओ पइदिणमेव वहणाइं सीहलदीवं गच्छन्ति। मए भणियं। वयंस, जइ एवं, ता अज्जेव गच्छम्ह। तेण भणियं, 'अविग्घं कुमारस्स'। उवलद्धं जाणवत्तं, पसाहियं करणिज्जं। उवणीओ य मे फुरन्तभासुरच्छाओ महापमाणो अच्चन्तसहिणरूवो पडओ। भणियं च तेण। कुमार, सकोउयं ति करिऊण गेण्हाहि एयं नयणमोहणाभिहाणं पडरयणं त्ति। मए भणियं 'कीइसं कोउगं' ति। तेण भणियं। इमेण पच्छाइयसरीरो न दीसइ नयणेहिं पुरिसो त्ति। मए वि(जि)न्नासियं जाव तहेव त्ति। समुप्पन्नं च मे कोउयं। भणिओ मणोरहदत्तो। वयंस, कहं पुण तए एस पाविओ त्ति। तेण भणियं। सुण–

इहेवागयस्स समुप्पन्ना मे पीई आणन्दउरनिवासिणा सिद्धविज्जापओएण सिद्धसेणाभिहाणेणं सिद्धउत्तेग। भणिओ य सो मए। वयंस, को उण इह विज्जासाहणंमि परमत्थो, किं हवइ सच्चमेवेह दिव्वसंवाओ न व त्ति। तेण भणियं। जहुत्तयारिणो हवइ त्ति।

गन्तव्यं कुमारेण। मया भणितम्–वयस्य! प्रयोजनं मेऽस्तीति। तेन भणितम्–यद्येवं ततः क्षन्तव्यं कुमारेण, यन्मया वियोगभीरुत्वेन एतावन्मात्रं कालं कृतः प्रयोजनविघात इति, यतः प्रायेण इतः प्रतिदिवसमेव वहनानि सिंहलद्वीपं गच्छन्ति। मया भणितम्–वयस्य! यद्येवं ततोऽद्यैव गच्छावः। तेन भणितम्–'अविघ्नं कुमारस्य'। उपलब्धं यानपात्रम्, प्रसाधितं करणीयम्। उपनीतश्च मह्यं स्फुरद्भासुरच्छायो महाप्रमाणोऽत्यन्तश्लक्ष्णरूपः पटः। भणितं च तेन–कुमार! सकौतुकमिति कृत्वा गृहाणैतद् नयनमोहनाभिधानं पटरत्नमिति। मया भणितं–कीदृशं कौतुकमिति?। तेन भणितम्–अनेन प्रच्छादितशरीरो न दृश्यते नयनाभ्यां पुरुष इति। मया विन्यासितं (जिज्ञासितं) यावत्तथैवेति। समुत्पन्नं च मे कौतुकम्। भणितो मनोरथदत्तः। वयस्य! कथं पुनस्त्वया एष प्राप्त इति?। तेन भणितम्–शृणु।

इहैवागतस्य समुत्पन्ना मे प्रीतिरानन्दपुरवासिना सिद्धविद्याप्रयोगेण सिद्धसेनाभिधानेन सिद्धपुत्रेण। भणितश्च स मया। वयस्य!

मए भणियं। वयंस, महन्तं मे कोउयं; ता दंसेहि मे दिव्वविलसियं ति। तेण भणियं थेवमियं, किं तु कायव्वं मण्डलं। मए भणियं 'करेउ वयंसो'। तेण भणियं। जइ एवं, ता संजत्तीकरेह सिद्धत्थमाइयं मण्डलोवगरणं। संपाइयं मए। तओ अत्थमिए दिणयरे वियम्भिए अन्धयारे रडन्तेसु निसायरेसु घेत्तूण मण्डलोवगरणं विणिग्गया अम्हे दुवे वि नयराओ त्ति। पत्ता य पेयवणं। आलिहियमणेण तत्थेगदेसम्मि मण्डलं, समप्पियं च मे मण्डलग्गं, जालिओ जलणो। भणियं च तेण। वयंस, अप्पमत्तेण होयव्वं ति। पडिस्सुयं मए। पारद्धो तेण मन्तजावो। तओ थेववेलाए चेव दिट्ठा मए गरुयनियम्बवहणायासझीणमज्झा अहिणवुब्भिन्नकढिणथणविरायन्तवच्छत्थला संपुण्णमयलञ्छणमुही वियसियकन्दोट्टनयणसोहा सुरतरुकुसुममालाविहूसियं धम्मेल्लमुव्वहन्ती परिणयमहुयकुसुमवण्णा पवणधुयवसणपयडं ऊरुजुयलं ठएन्ती गयणयलाओ समोवयमाणा जक्खकन्नय त्ति। तओ मए चिन्तियं। अहो महापहावया मन्तस्स।

कः पुनरिह विद्यासाधने परमार्थः, किं भवति सत्यमेवेह दिव्यसंवादो नवेति। तेन भणितम्-यथोक्तकारिणो भवतीति। मया भणितम्-वयस्य! महद् मे कौतुकम्, ततो दर्शय मे दिव्यविलसितमिति। तेन भणितम्-स्तोकमिदम्, किन्तु कर्तव्यं मण्डलम्। मया भणितम्-'करोतु वयस्यः'। तेन भणितम्-यद्येव ततः संयात्रीकुरु सिद्धार्थादिकं (सर्षपादि)मण्डलोपकरणम्। संपादितं मया। ततोऽस्तमिते दिनकरे विजृम्भितेऽन्धकारे रटत्सु निशाचरेषु (घूकादिषु) गृहीत्वा मण्डलोपकरणं विनिर्गतावावां द्वावपि नगरादिति। प्राप्तौ च प्रेतवनम्। आलिखितमनेन तत्रैकदेशे मण्डलम्, समर्पितं च मे मण्डलाग्रम्, ज्वालितो ज्वलनः। भणितं च तेन-वयस्य! अप्रमत्तेन भवितव्यमिति। प्रतिश्रुतं मया। प्रारब्धस्तेन मन्त्रजापः। ततः स्तोकवेलायामेव दृष्टा मया गुरुनितम्बवहनायासक्षीणमध्या अभिनवोद्भिन्नकठिनस्तनविराजद्वक्षःस्थला संपूर्णमृगलाञ्छनमुखी विकसित(कन्दोट्ट)नीलोत्पलनयनशोभा सुरतरुकुसुममालाविभूषितं धम्मि-

१ विउणं क।

तीए पणमिओ सिद्धसेणो, भणिओ य सबहुमाणं। भयवं, किं पुण मे सुमरणपओयणं ति। तेण भणियं। न किंचि अन्नं, अत्थि य दिव्वदंसणाणुराई मे पियवयंसो। तओ तीए मं पुलोइऊण भणियं। भद्द, परितुट्ठा ते अहं इमेण दिव्वदंसणाणुराएण; ता किं ते पियं करेमि त्ति। मए भणियं। तुह दंसणाओ वि अवरं पियं ति। तीए भणियं। तहावि अमोहदंसणाओ देवयाओ; गेण्हाहि एयं नयण मोहणं पडरयणं ति। तओ मए ससंभमसंभासणजणिओवरोहेण पणमिऊण तीसे चलणजुयलं सबहुमाणं चेव गहियं इमं। गया जक्ख-कन्नया। पविट्ठा अम्हे पभायाए रयणीए नयरं। ता एवं पाविओ त्ति॥

मए भणियं। सुन्दरा संपत्ती। गहिओ पडो। तओ आउच्छिऊण मणोरहदत्तपरियणं अहिणन्दिया तेण, सह मणोरहदत्तेण गया वेलाउलं। दिट्ठं च सुरविमाणागारमणुगरेन्तं विचित्तधयमालोवसोहियं जाणवत्तं। अब्भुट्ठिया जाणवत्तसामिणा ईसरदत्तेण। कओ

लमुद्वहन्ती परिणतमधूककुसुमवर्णा पवनधूतवसनप्रकटमूरुयुगलं स्थगयन्ती गगनतलात्समवपतन्ती यक्षकन्येति। ततो मया चिन्तितम्-अहो महाप्रभावता मन्त्रस्य। तया प्रणतः सिद्धसेनः, भणितश्च सबहुमानम्। भगवन्! किं पुनर्मे स्मरणप्रयोजनमिति ?। तेन भणितम्-न किञ्चिदन्यत्, अपि च दिव्यदर्शनानुरागी मे प्रियवयस्यः। ततस्तया मां दृष्ट्वा भणितम्-भद्र! परितुष्टा तेऽहं दिव्यदर्शनानुरागेण, ततः किं ते प्रियं करोमीति। मया भणितम्-तव दर्शनादपि अपरं प्रियमिति ?। तया भणितम्-तथाप्यमोघदर्शना देवताः, गृहाणैतद् नयनमोहनं पटरत्नमिति। ततो मया ससंभ्रमसंभाषणजनितोपरोधेन प्रणम्य तस्याश्चरणयुगलं सबहुमानमेव गृहीतमिदम्। गता यक्षकन्यका। प्रविष्टावावां प्रभातायां रजन्यां नगरम्। ततः एवं प्राप्त इति। मया भणितम्-सुन्दरा संप्राप्तिः। गृहीतः पटः। तत आपृच्छय मनोरथदत्तपरिजनमभिनन्दितौ तेन, सह मनोरथदत्तेन गतौ वेलाकुलम्। दृष्टं च सुरविमानाकारमनुकुर्वद् विचित्रध्वजमालोपशोभित यान-

णेण पणामो। उवणीयाइं आसणाइं। समप्पिया मणोरहदत्तेण। भणियं च तेण। सत्थवाहपुत्त, एए खु मम सामिणो वयस्सा बन्धवा जीवियं, न केइ ते जे न हवन्ति त्ति; ता सुन्दरं दट्ठव्वा। तेण भणियं। वयंस, किमणेणं पुणरुत्तविण्णासेण; मज्झ वि इमे ईइसा चेव त्ति। तओ उवारूढा जाणवत्तं, खित्तो बली समुद्दस्स, ऊसिओ सियवडो, दिन्नं दिसिसंमुहं निज्जामएण पवहणं ति। पणमिऊण अम्हे ठिओ मणोरहदत्तो। पयट्टं जाणवत्तं। गम्मए सीहलदीवाहिमुहं ति। एवं गच्छमाणाण तेरसमे दियहे उन्नओ अम्हाणमुवरि कालो व्व कालमेहो, जीवियासा विय फुरिया विज्जुलेहा, उम्मूलियगिरिकाणणो य आगम्पयन्तो जलनिहिं उक्खिवन्तो महन्तकल्लोले वियम्भिओ विसममारुओ, निवडियं असणिवरिसं, उम्मेण्ठमत्तहत्थी विय अणियमियगमणेणं अवसीहूयं जाणवत्तं, विसण्णा निज्जामया। तओ मए अवट्ठम्भं काऊण छिन्नाओ सियवडनिबन्धणाओ रज्जूओ, मउलिओ सियवडो, विमुक्का नङ्गरा। तहावि य गेरुययाए भण्डस्स

पात्रम्। अभ्युत्थिता वालवायस्वामिनेश्वरदत्तेन। कृतस्तेन प्रणामः। उपनीतान्यासनानि। समर्पितौ मनोरथदत्तेन। भणितं च तेन-सार्थवाहपुत्र! एतौ खलु मम स्वामिनो वयस्यौ बान्धवौ जीवितं, न कावपि तौ यौ न भवत इति, ततः सुन्दरं द्रष्टव्यौ। तेन भणितम्-वयस्य! किमनेन पुनरुक्तविन्यासेन, ममापीमौ ईदृशावेवेति। तत उपारूढौ यानपात्रम्, क्षिप्तो बलिः समुद्रस्य। उच्छ्रितः सितपटः। दत्तं दिक्संमुखं निर्यामकेन प्रवहणमिति। प्रणम्यावां स्थितो मनोरथदत्तः। प्रवृत्तं यानपात्रम्। गम्यते सिंहलद्वीपाभिमुखमिति। एवं गच्छतां त्रयोदशे दिवसे उन्नतोऽस्माकमुपरि काल इव कालमेघः, जीविताशेव स्फुरिता विद्युल्लेखा, उन्मूलितगिरिकाननश्चाकम्पयन् जलनिधिमुत्क्षिपन् महतः कल्लोलान् विजृम्भितो विषममारुतः, निपतितमशनिवर्षम्, उन्मिण्ठ(हस्तिपकोत्क्रान्त)मत्तहस्तीवानियमितगमनेनावशीभूतं यानपात्रम्। विषण्णा निर्यामकाः। ततो मयाऽवष्टम्भं कृत्वा छिन्नाः सितपटनिबन्धना रज्जवः, मुकुलितः सितपटः। विमुक्ता ना-

१ णे क। २ दिसि क। ३ सीयवडो क। ४ गरुयाए ख।

संखुद्धयाए जलनिहिणो उक्कडयाए असणिवरिसस्स विसण्णयाए निज्जामयाणं विचित्तयाए कम्मपरिणामस्स विवन्नं जाणवत्तं। बन्धवा वि य कालपरियाएणं विउत्ता सव्वपाणिणो। समासाइयं मए फलयं। तओ अहं आउयसेसयाए गमिऊण तिण्णि अहोरत्ते फलयदुइओ पत्तो तडसमीवं। अन्धयारलेहा विय दिट्ठा वणराई। समूससियं मे हियएण। उत्तिण्णो जलनिहीओ, निप्पीलियाइं पोत्ताइं। न तिन्तं च निवसणगण्ठिसंठियं पडरयणं। अहो एयस्स सामत्थं ति जाओ मे विम्हओ। तओ गन्तूण थेवं भूमिभागं उवविट्ठो जम्बुपायवसमीवे। चिन्तियं च मए। एयाणि ताणि विहिणो जहिच्छियाविलसियाणि, एसा य सा कम्मुणो अचिन्तणीया सत्ती, जमेवमवि असद्दहणिज्जं अवत्थन्तरमणुहविऊण पाणे धारेमि। किं वा एगुदरनिवासिणा विय वसुभूइणा विउत्तस्स पाणेहिं। अहवा विचित्ता कम्मपरिणई, न विसाइणा होयव्वं ति। दिवसनिसिसमा संजोयविओया; कयाइ सो वि एवं चेव कहंचि पाणे धारेइ त्ति। तओ

क्रराः। तथाऽपि च गुरुकतया भाण्डस्य संक्षुब्धतया जलनिधेरुत्कटतयाऽशनिवर्षस्य विपण्णतया निर्यामकानां विचित्रतया कर्मपरिणामस्य विपन्नं यानपात्रम्। बान्धवा इव कालपर्यायेण वियुक्ताः सर्वप्राणिनः। समासादितं मया फलकम्। ततोऽहमायुःशेषतया गमयित्वा त्रीन् अहोरात्रान् फलकद्वितीयः प्राप्तः तटसमीपम्। अन्धकारलेखेव दृष्टा वनराजिः। समुच्छ्वसितं मे हृदयेन। उत्तीर्णो जलनिधितः, निष्पीडितानि पोतानि (वस्त्राणि)। न तिमितं (आर्द्रं) च निवसनग्रन्थिसंस्थितं पटरत्नम्। अहो एतस्य सामर्थ्यमिति जातो मे विस्मयः। ततो गत्वा स्तोकं भूमिभागमुपविष्टो जम्बूपादपसमीपे। चिन्तितं च मया–एतानि तानि विधेर्यथेच्छाविलसितानि, एषा च सा कर्मणोऽचिन्तनीया शक्तिः, यदेवमपि अश्रद्धानीयमवस्थान्तरमनुभूय प्राणान् धारयामि। किं वा एकोदरनिवासिनेव वसुभूतिना वियुक्तस्य प्राणैः। अथवा विचित्रा कर्मपरिणतिः, न विषादिना भवितव्यमिति। दिवसनिशासमौ संयोगवियोगौ, कदाचित् सोऽपि एवमेव कथञ्चित्प्राणान् धार-

१ फलइय क। २ तिम्मियं क। ३ –वासिणो क।

खुहापिवासाभिभूओ उययफलनिमित्तं पयट्टो उत्तराहिमुहं। गओ थेवं भूमिं। दिट्ठा य फणसकयलयसहयारसंछन्नकूला तीरतरुकुसुमरयरंजियजला गिरिनई। कया पाणवित्ती। चिट्ठमाणेण य सहयारपायवसमीवे गिरिनईपुलिणम्मि दिट्ठो पियाए चाडुयं करेमाणो सारसजुवाणओ। सुमरियं विलासवईए। जाया मे चिन्ता। अहो णु खलु एए अदिट्ठबन्धुविरहदुक्खा साहीणाहारपयारा अविन्नायजायणादीणभावा पासट्ठियपणइणीपसङ्गदुल्ललिया असञ्जायमहावसणभया सुहं जीवन्ति मियपक्खिणो। एवं चिन्तयन्तस्स अत्थगिरिसिहरमुवगओ सहस्सरस्सी, रयणुज्जोवो विय सीयलीहूओ आयवो। कयं मए विमलसिलायलम्मि पल्लवसयणिज्जं। सम्पाडियं सञ्झावस्सयं। उचियसमए कओ देवयागुरुपणामो। णुवन्नो वामपासेणं। अहिणन्दिओ कुसुमसुरहिणा मारुएणं। बहुदिवसखेयओ समागया मे निद्दा। अइक्कन्ता रयणी। विउद्धो नाणाविहविहंगमविरुयपाहाउएण। कओ देवयागुरुपणामो। पयट्टो काणणन्तराइं पुलोयतोति।

ततः क्षुत्पिपासाभिभूत उदकफलनिमित्तं प्रवृत्त उत्तराभिमुखम्। गतः स्तोकां भूमिम्। दृष्टा च पनसकदलसहकारसछन्नकूला तीरतरुकुसुमरजोरञ्जितजला गिरिनदी। कृता प्राणवृत्तिः। तिष्ठता च सहकारपादपसमीपे गिरिनदीपुलिने दृष्टः प्रियायाश्चाटुकं कुर्वन् सारसयुवा। स्मृतं च विलासवत्याः। जाता मे चिन्ता। अहो नु खल्वेते अदृष्टबन्धुविरहदुःखाः स्वाधीनाहारप्रचारा अविज्ञातयाचनादीनभावाः पार्श्वस्थितप्रणयिनीप्रसङ्गदुर्ललिता असंजातमहाव्यसनभयाः सुखं जीवन्ति मृगपक्षिणः। एवं चिन्तयतोऽस्तगिरिशिखरमुपगतः सहस्ररश्मिः, रत्नोद्द्योत इव शीतलीभूत आतपः। कृतं मया विमलशिलातले पल्लवशयनीयम्। संपादितं सन्ध्यावश्यकम्। उचितसमये कृतो देवतागुरुप्रणामः। निपन्नो (शयितः) वामपार्श्वेण। अभिनन्दितः कुसुमसुरभिना मारुतेन। बहुदिवसखेदतः समागता मे निद्रा। अतिक्रान्ता रजनी। विबुद्धो नानाविधविहङ्गमविरुतप्राभातिकेन। कृतो देवतागुरुप्रणामः। प्रवृत्तः काननान्तराणि द्रष्टुम्। पश्यंश्च

1 कयलिय ख, कयल फ।

इउं। पेच्छमाणो य विचित्त काणणभाए पत्तो सुकुमारवालुयं अच्चन्तसोमदंसणं गिरिसरियापुलिणं। दिट्ठा य तत्थ सुपइट्ठियङ्गुलितला पसत्थलेहालङ्किया तक्खणुट्ठिया चेव पयपन्ती। निरूविया हरिसियमणेणं, विन्नाया य लहुयसुकुमारभावओ इत्थियाए इयं न उण पुरिसस्स। लग्गो पयमग्गओ। दिट्ठा य नाइदूरंमि चेव सहिणवक्कलनिवसणा तवियकणयावदायदेहा हिययनिब्भच्छिएण विय चलणतललग्गेण राएण अविभाविपसिराघुण्फमग्घाहेण मयणभवणतोरणेण विय जाणुजुयलेण रसणाकलावजोग्गेण विउलेणं नियम्बभाएणं बहुदिवसोववासखिन्नेण विय किसयरेणं मज्झेणं सज्जणचित्तगम्भीराए विय मयणरसकूवियाए नाहीए तवविणिज्जिएण विय मोहन्धयारेण पुणो हिययप्पवेसकामेणं रोमलयामग्गेण सुकयपरिणामेहि विय समुन्नएहिं पओहरेहिं अहिणवुग्गयरत्तासोयलयाविब्भमाहिं बाहाहिं कम्बुपरिमण्डलाए सिरोहराए पाडलकुसुमसन्निहेणं अहरेणं अच्चन्तसच्छविमलाहिं कवोलवालीहिं हरिणवहूकयसंविभा-

---

विचित्रान् काननभागान् प्राप्तः सुकुमारवालुकमत्यन्तसौम्यदर्शनं गिरिसरित्पुलिनम्। दृष्टा च तत्र सुप्रतिष्ठिताङ्गुलितला प्रशस्तरेखाऽलंकृता तत्क्षणोत्थितैव पदपंक्तिः। निरूपिता हर्षितमनसा, विज्ञाता च लघुकसुकुमारभावतः स्त्रिया इयं न पुनः पुरुषस्य। लग्नः पदमार्गतः। दृष्टा च नातिदूर एव श्लक्ष्णवल्कलनिवसना, तप्तकनकावदातदेहा हृदयनिर्भर्त्सितेनेव चरणतललग्नेन रागेण, अविभावितशिरागुल्फसंघातेन मदनभवनतोरणेनेव जानुयुगलेन, रसनाकलापयोग्येन विपुलेन नितम्बभागेन, बहुदिवसोपवासखिन्नेनेव कृशतरेण मध्येन, सज्जनचित्तगम्भीरयेव मदनरसकूपिकया नाभ्या, तपोविनिर्जितेनेव मोहान्धकारेण पुनर्हृदयप्रवेशकामेन रोमलतामार्गेण सुकृतपरिणामाभ्यामिव समुन्नताभ्यां पयोधराभ्याम्, अभिनवोद्गतरक्ताशोकलताविभ्रमाभ्यां बाहुभ्याम्, कम्बुपरिमण्डलया शिरोधरया, पाट-

१ इय क। २ कट्ठियाहिं क।

एहि निय लोयणेहिं पमाणजुत्तेणं नासियावंसेणं दीहपम्हलाहिं आयड्ढियकोडण्डसन्निभाहिं भमुहाहिं सुसिणिद्धदंसणेणं चन्दसन्निभेण निडालवट्टेणं पट्ठिदेसमंठिएणं नियम्बसुरूयरक्खणेण निय चक्खुस्सवाणुयारिणा कुडिलकेसकलावेण वामहत्थगहियछज्जिया दाहिणहत्थेण कुसुमावचयं करेन्ती तावसकन्नय त्ति। तं च दट्ठूण चिन्तियं मए। अहो वणवासदुक्खमणुहवन्तीए वि लायण्णं। उवगन्तूणं च थेवभूमिभागं सविसेसं पुलइया लयाजालयन्तरेणं जाव मोत्तूण वणवासवेसं सव्वं चेव विलासवईए अणुगरेइ त्ति। तओ सुमरणपवणसंधुक्किओ पज्जलिओ मे मणम्मि मयणाणलो। भरिया य तीए कुसुमाण छज्जिया। पयट्टा ताव वणाहिमुहं। तओ अहं निगूहिऊण मयणवियारं निग्गओ लयाजालयाओ, गओ तीए समीवं। पणमिऊण भणिया एसा। भयवइ, वड्ढउ ते तवोकम्मं। अहं खु पुरिसो सेयवियाए वत्थव्वओ तामलित्तीओ सीहलदीवं पयट्टो। अन्तराले विवन्नं मे जाणवत्तं। अओ एगा-

लघुसुमसन्निभेन अधरेण, अत्यन्तस्वच्छविमलाभ्यां कपोलपालीभ्याम्, हरिणवधूकृतसंविभागाभ्यामिव लोचनाभ्याम्, प्रमाणयुक्तेन नासिकावंशेन, दीर्घपक्ष्मलाभ्यामाकृष्टकोदण्डसन्निभाभ्यां भ्रूभ्याम्, सुस्निग्धदर्शनेन चन्द्रसन्निभेन ललाटपट्टेन, पृष्ठदेशसंस्थितेन नितम्बयुगलरक्षणेनेव चक्षुश्रवानुकारिणा कुटिलकेशकलापेन, वामहस्तगृहीतछज्जिका(पुष्पकरण्डिका) दक्षिणहस्तेन कुसुमावचयं कुर्वती तापसकन्यकेति। तां च दृष्ट्वा चिन्तितं मया। अहो! वनवासदुःखमनुभवन्त्या अपि लावण्यम्। उपगत्य च स्तोकभूमिभागं सविशेषं दृष्टा लताजालकान्तरेण यावन्मुक्त्वा वनवासवेशं सर्वमेव विलासवत्या अनुकरोतीति। ततः स्मरणपवनसंधुक्षितः प्रज्वलितो मे मनसि मदनानलः। भृता च तया कुसुमैः करण्डिका। प्रवृत्ता तावद् वनाभिमुखम्। ततोऽहं निगुह्य मदनविकारं निर्गतो लताजालकात्, गतस्तस्याः समीपम्। प्रणम्य भणितैषा। भगवति! वर्धतां ते तपःकर्म। अहं खलु पुरुषः श्वेतविकाया वास्तव्यः ताम

१ दुहयानन्द-क। २ छज्जिया (दे०) पुष्पभाजनम्, पछेरीति भाषायाम्। ३ लायण्ण ऽहुरया क। ४ निगूहेऊण क। ५ लयाओ तामलित्त ख।

गी संवुत्तो। ता कहेउ भयवई, को पुण इमो पएसो, किं ताव जलनिहितडं, किं वा कोइ दीवो, कहिं वा तुम्हाणमासमपयं ति। तओ सा मं दट्ठूण निउञ्चियदिट्ठिपसरा दिसामण्डलं पुलोएमाणी मन्दवलियवितिरिच्छलोयणायामं ससज्झसा विय खणमेत्तं अहोमुही ठिया अदिन्नपडिवयणा पयट्टा तवोवणाहिमुहं। तओ 'जुवई तावसी एगागिणी य, ता किं इह इमीए[1]? अन्नं कंचि पुच्छिस्सामि' त्ति चिन्तिऊण नियत्तो अहं। पविट्ठो तं चेव सहावसुन्दरं लयागहणं। चिन्तियं च मए। पेच्छामि ताव, कहिं पुण एसा वचइ त्ति। पुलोइउं पयत्तो। दिट्ठा य सविसेसमन्थराए गईए वच्चमाणी। गया य थेवं भूमिभायं। मग्गओ पुलोइयं तीए। न दिट्ठो कोइ सत्तो। तओ मो[त्तू]ण कुसुमछज्जियं परिहियं पि पुणो परिहियं वक्कलं, परामुट्ठो केसकलावो, मोडियाइं अङ्गाइं, उव्वेल्लियाओ बाहुलयाओ, पयट्टं वियम्भणं ति। तओ मए चिन्तियं। अह किं पुण इमं, अहवा किमणेण विरुद्धवत्थुविसएणं आलोचिएणं। गओ

लितीतः सिंहलद्वीपं प्रवृत्तः। अन्तराले विपन्नं मे यानपात्रम्, जात एकाकी संवृत्तः। ततः कथयतु भगवती, कः पुनरयं प्रदेशः, किं तावज्जलनिधितटं किंवा कोऽपि द्वीपः, कुत्र वा युष्माकमाश्रमपदमिति ?। ततः सा मां दृष्ट्वा निकुञ्चितदृष्टिप्रसरा दिग्मण्डलं पश्यन्ती मन्दवलितवितिर्यग्लोचनायामं ससाध्वसेव क्षणमात्रमधोमुखी स्थिताऽदत्तप्रतिवचना प्रवृत्ता तपोवनाभिमुखम्। ततो 'युवतिः तापसी एकाकिनी च ततः किमिह अनया, अन्यं कंचित् प्रक्ष्यामि' इति चिन्तयित्वा निवृत्तोऽहम्। प्रविष्टस्तदेव स्वभावसुन्दरं लतागहनम्। चिन्तितं च मया-पश्यामि तावत्, कुत्र पुनरेषा व्रजतीति। द्रष्टुं प्रवृत्तः। दृष्टा च सविशेषमन्थरया गत्या व्रजन्ती। गता च स्तोकं भूमिभागम्। मार्गतः प्रलोकितं तया। न दृष्टः कोऽपि सत्त्वः। ततो मुक्त्वा कुसुमकरण्डकां परिहितमपि पुनः परिहितं वल्कलम्, परामृष्टः केशकलापः, मोटितान्यङ्गानि, उद्वेल्लिते बाहुलते, प्रवृत्तं विजृम्भणमिति। ततो मया चिन्तितम्-अथ किं पुनरिदम्, अथवा

[1] किं इमीए य।

गिरिनई। कया पाणवित्ती। परिब्भमन्तस्स काणणन्तरे अइक्कन्तो वासरो। पसुत्तो य पुव्वविहिणा। दिट्ठो य जाममेत्तावसेसाए विहावरीए सुमिणओ। उवणीया मे कञ्चणपायवासन्नसंठियस्स दिव्वइत्थियाए सव्विन्दियमणोहराए कुसुममाला। भणियं च तीए। कुमार, एसा खु दिव्वकुसुममाला पुव्वनिव्वत्तिया चेव मए कुमारस्स उवणीया; ता गेण्हउ कुमारो। गहिया य सा मए, विइण्णा कण्ठदेसे। एत्थन्तरंमि वियम्भिओ सारसरवो, विउद्धो अहयं परितुट्ठो चित्तेण। चिन्तियं मए। आसन्नकन्नयालाहफलसूयएणं ति होयव्वमणेणं, अणुकूलो खु सउणसंघाओ, अचिरफलदायगो खु एस सुमिणओ, अरण्णं च एयं; ता न याणामो कहं भविस्सइ त्ति। एत्थन्तरंमि फुरियं मे दाहिणभुयाए लोयणेण य। तओ मए चिन्तियं। न अन्नहा रिसिवयणं ति होयव्वमणेण। अणुकूलो सउण-संघाओ। न य मे विलासरायहाणिं विलासवइं वज्जिय अन्नकन्नालाहे वि बहुमाणो। भणियं च सुमिणयदेवयाए 'कुमार, एसा खु

किमनेन विकल्पविषयेणालोचितेन। गतो गिरिनदीम्। कृता प्राणवृत्तिः। परिभ्रमतः काननान्तरेऽतिक्रान्तो वासरः। प्रसुप्तश्च पूर्वविधिना। दृष्टश्च याममात्रावशेषायां विभावर्यां स्वप्नः। उपनीता मे काञ्चनपादपासन्नसंस्थितस्य दिव्यस्त्रिया सर्वेन्द्रियमनोहरया कुसुममाला। भणितं च तया-कुमार! एषा खलु दिव्यकुसुममाला पूर्वनिर्वर्तिता एव मया कुमारस्योपनीता, ततो गृह्णातु कुमारः। गृहीता च सा मया, वितीर्णा कण्ठदेशे। अत्रान्तरे विजृम्भितः सारसरवः, विबुद्धोऽहं परितुष्टश्चित्तेन। चिन्तितं मया-आसन्नकन्यकालाभफलसूचकेन [इति] भवितव्यमनेन, अनुकूलः खलु शकुनसंघातः, अचिरफलदायकः खल्वेष स्वप्नः। अरण्यं चैतत्, ततो न जानीमो कथं भविष्यतीति। अत्रान्तरे स्फुरितं मे दक्षिणभुजया लोचनेन च। ततो मया चिन्तितम्-नान्यथा ऋषिवचनमिति भवितव्यमनेन। अनुकूलः शकुनसंघातः। न च मे विलासराजधानीं विलासवतीं वर्जित्वाऽन्यकन्यालाभेऽपि बहुमानः। भणितं च स्वप्नदेवतया-'कुमार! एषा खलु दिव्यकुसुम-

1 वाणवंतरेसु त्र।

दिव्वकुसुममाला पुव्वनिव्वत्तिया चेव[1]। तो न अन्ना दिव्वकुसुममालाए उवमाणसंगया, न अन्नाए पुव्वपरिचओ त्ति विलासवइलाहेग चेव होयव्वं ति। अणुहरइ य सा तावसी विलासवईए। विचित्ताणि य विहिणो विलसियाइं। कयाइ मं चेव होज्ज त्ति। अन्नहा कहं तावसी, कहं मयणवियारो। किं च—जइ वि सा विलासवई, तहावि पडिवन्नवयाए विरुद्धो विसयसङ्गो। अहवा संपत्तदंसणसुहस्स पिययमामग्गमणुगच्छमाणस्स वयधारणं पि मे सुन्दरं चेव। एवं च चिन्तयन्तस्स अइक्कन्ता रयणी, उग्गओ अंसुमाली, घडियाइं रयणिविरहपीडियाइं चक्कवायाइं। तओ अहं उक्कडयाए रायस्स रम्मयाए काणणाणं विलोहणिज्जयाए सुमिणयस्स गहिओ कामजरएण पयत्तो तं तावसिं गवेसिउं। वग्गभट्ठस्स विय हरिणयस्स जूहभट्ठस्स विय गइन्दस्स तंमि चेव काणणन्तरे भमन्तस्स महया परिकिलेसेणं अइक्कन्ता कइवि दियहा। दिट्ठो माहवीलयालिङ्गिओ सहयारो। उवविट्ठो तस्स समीवे। तं चेव मुद्धहरिणलोयणं चिन्तयन्तो चिट्ठामि जाव, सुओ मए सुक्कपत्ताणं मरमरारवो। वालिया सिरोहरा, वियारिया दिट्ठी। दिट्ठा य भूइनिम्मिएणं निडालपुण्ड-

माला पूर्वनिर्वर्तिता एव। ततो नान्या दिव्यकुसुममालाया उपमानसंगता, न अन्यायाः पूर्वपरिचय इति विलासवतीलाभेनैव भवितव्यमिति। अनुहरति च सा तापसी विलासवत्याः। विचित्राणि च विधेर्विलसितानि, कदाचित् सैव भवेदिति। अन्यथा कथं तापसी, कथं मदनविकारः ?। किंच यद्यपि सा विलासवती तथापि प्रतिपन्नव्रतया विरुद्धो विषयसंगः। अथवा संप्राप्तदर्शनसुखस्य प्रियतमामार्गमनुगच्छतो व्रतधारणमपि मे सुन्दरमेव। एवं च चिन्तयतोऽतिक्रान्ता रजनी, उद्गतोंऽशुमाली, घटिता रजनीविरहपीडिताश्चक्रवाकाः। ततोऽहमुत्कटतया रागस्य, रम्यतया काननानां विलोभनीयतया स्वप्नस्य गृहीतो कामज्वरेण प्रवृत्तस्तां तापसीं गवेषयितुम्। वर्गभ्रष्टस्येव हरिणस्य यूथभ्रष्टस्येव गजेन्द्रस्य तस्मिन्नेव काननान्तरे भ्रमतो महता परिक्लेशेनातिक्रान्ताः कत्यपि दिवसाः। दृष्टो माधवीलताऽऽ-

[1] सा चेव क।

एणं उद्धबद्धेण जडाकलावेण पुत्तंजीवयमालालंकिएणं दाहिणकरेण वामहत्थगहियकमण्डलू मइन्दवक्कलनिवसणा बहुदिवससंचियत-
वायासेण अट्ठिचम्मावसेसेणं सरीरएणं अइक्कन्तमज्झिमवयसा तावसि त्ति। तओ तं दट्ठूण गूहिओ मए मयणवियारो। पणमिया
य सा। तओ विसेसेण मं पुलोइऊण ईसिवाहोल्ललोयणाए भणियं तीए 'रायपुत्त, चिरं जीवसु' त्ति। तओ मए चिन्तियं। कहं पुण
एसा मं वियाणइ त्ति। अहवा विमलनाणनयणो चेव तवस्सियणो होइ; ता किं न याणइ त्ति। एत्थन्तरंमि पुणो भणियमिमीए।
कुमार, उवविसम्ह; अत्थि किंचि भणियव्वं तए सह। तओ मए 'जं भयवई आणवेइ' त्ति भणिऊण पमज्जियं धरणिवट्ठं। उवविट्ठा
तावसी अहयं च। भणियं च तीए। कुमार, सुण।

अत्थि इहेव भारहे वासे वेयड्ढो नाम पव्वओ। तत्थ गन्धसमिद्धं नाम विज्जाहरपुरं। तत्थ सहस्सबलाभिहाणो राया होत्था,

लिङ्गितः सहकारः। उपविष्टस्तस्य समीपे। तामेव मुग्धहरिणलोचनां चिन्तयन् तिष्ठामि यावत्, श्रुतो मया शुष्कपत्राणां मर्मरारवः।
वालिता शिरोधरा, वितारिता दृष्टिः। दृष्टा च भूतिनिर्मितेन ललाटपुण्ड्रेन ऊर्ध्वबद्धेन जटाकलापेन पुत्रंजीवकमालाऽलंकृतेन दक्षिणक-
रेण वामहस्तगृहीतकमण्डलुर्मृगेन्द्रवल्कलनियमना बहुदिवससंचिततपआयासेन अस्थिचर्मावशेषेण शरीरकेन अतिक्रान्तमध्यमवयाः ताप-
सीति। तस्यां दृष्ट्वा गूढो मया मदनविकारः। प्रणता च सा। ततो विशेषेण मां दृष्ट्वा ईषद्बाष्पार्द्रलोचनया भणितं तया 'राजपुत्र!
चिरं जीव' इति। ततो मया चिन्तितं-कथं पुनरेषा मां विजानातीति। अथवा विमलज्ञाननयन एव तपस्विजनो भवति, ततः किं न
जानातीति। अत्रान्तरे पुनर्भणितमनया-कुमार! उपविशावः, अस्ति किंचिद् भणितव्यं त्वया सह। ततो मया 'यद् भगवत्याज्ञापयति'
इति भणित्वा प्रमार्जितं धरणीपृष्ठम्। उपविष्टा तापसी अहं च। भणितं तया-कुमार! शृणु।

१ उवविसु क।

सुप्पभा से भारिया, ताणं सुया अहं मयणमञ्जरी नाम। संपत्तजोव्वणा परिणीया विलासउरनयरसामिणो विज्जाहरनरिन्दस्स पुत्तेणं पवणगइणा। अइक्कन्तो य कोइ कालो विसयसुहमणुहवन्ताण। अन्नया य आगासजाणेगं गयाइं नन्दणवणं, पवत्ताइं कीलिउं विचित्तकीलाहिं, जाव अयण्डंमि चेव निवडिओ कणयसिलासणाओ पवणगई, अणाचिक्खियपओयणं च संमिल्लियं तेण विणिज्जियकन्दोट्टदलसोहं लोयणजुयं, पकम्पिया सिरोहरा, पव्वायं वयणकमलं। तओ असारयाए जीवलोयस्स पेच्छमाणीए चेव सो पञ्चत्तमुवगओ त्ति। तओ अहं अणाहा विय गहिया महासोएण, सोगाइरेयओ य सारसी विय अणिवारियं परिब्भमन्ती सहसा चेव निवडिया धरणिवट्टे, लद्धचेयणा य उप्पइउमारद्धा जाव न पसरइ मे गई। तओ सुमरिया नहङ्गणगामिणी विज्जा, तहावि न पसरई त्ति। तओ मए चिन्तियं 'हा किमेयमवरं' ति जाव थेववेलाए समागओ तायविइयहिययभूओ पडिवन्नतावसवओ देवाणन्दो नाम विज्जाहरो। भणियं

अस्ति इहैव भारते वर्षे वैताढ्यो नाम पर्वतः। तत्र गन्धसमृद्धं नाम विद्याधरपुरम्। तत्र सहस्रबलाभिधानो राजाऽभवत्। सुप्रभा तस्य भार्या। तयोः सुताऽहं मदनमञ्जरी नाम। संप्राप्तयौवना परिणीता विलासपुरनगरस्वामिनो विद्याधरनरेन्द्रस्य पुत्रेण पवनगतिना। अतिक्रान्तश्च कोऽपि कालो विषयसुखमनुभवतोः। अन्यदा चाकाशयानेन गतौ नन्दनवनम्। प्रवृत्तौ क्रीडितुं विचित्रक्रीडाभिः, यावदकाण्डे एव निपतितः कनकशिलाऽऽसनात् पवनगतिः। अनाख्यातप्रयोजनं च संमिलितं तेन विनिर्जितकमलदलशोभं लोचनयुगम्, प्रकम्पिता शिरोधरा, म्लानं वदनकमलम्। ततोऽसारतया जीवलोकस्य प्रेक्षमाणायामेव स पञ्चत्वमुपगत इति। ततोऽहमनाथेव गृहीता महाशोकेन। शोकातिरेकतश्च सारसीव अनिवारितं परिभ्रमन्ती सहसैव निपतिता धरणीपृष्ठे। लब्धचेतना च उत्पतितुमारब्धा यावद् न प्रसरति मे गतिः। ततः स्मृता नभोऽङ्गणगामिनी विद्या, 'तथाऽपि न प्रसरतीति। ततो मया चिन्तितम्-'हा किमेतदपरम्' इति यावत् स्तोकवेलायां समागतः तातद्वितीयहृदयभूतः प्रतिपन्नतापसव्रतो देवानन्दो नाम विद्याधरः। भणितं च तेन-वत्से

च तेण । वच्छे मयणमञ्जरि, किमेयं ति । मए भणियं । भयवं, कयन्तविलसियं । तेण भणियं 'कहं विय' । मए भणियं । विवन्नो मे अज्जउत्तो, न पहवइ य नहगामिणी विज्जा । तओ बाहोल्ललोयणेण भणियं भयवया । वच्छे, अलं परिदेविएणं, ईइसो चेव एस संसारो । एयं च असारयं संसारस्स अद्धुवयं जीवलोयस्स खणभंगुरयं संगमाणं चञ्चलयं इन्दियाणं परिचिन्तिऊण पवज्जन्ति पाणिणो सयल-तेलोक्कपरमत्थबन्धवं धम्मं । तओ मए 'एयमेयं'ति चिन्तिऊण भणिओ भयवं । करेहि मे अणुग्गहं वयपयाणेण । भयवया भणियं । वच्छे, जुत्तमेयं, अह किं पुण ते नहगमणविज्जाभंसकारणं । मए भणियं । भयवं, न याणामि । तओ नाणावलोएण निरूवियं भयवया, भणियं च तेण । वच्छे, सोयाभिभूयाए लङ्घियं सिद्धाययणकूडं, निवडियं च ते एयस्स चेव सिहरभाए कुसुमदामं, तन्निमित्तो ते विज्जाभंसो त्ति । मए भणियं । भयवं, अलमिहलोयमेत्तोवयारिणीहिं विज्जाहिं, करेहि मे अणुग्गहं वयपयाणेणं ति । तओ भयवया

मदनमञ्जरि ! किमेतदिति । मया भणितम्-भगवन् ! कृतान्तविलसितम् । तेन भणितम्-'कथमिव' । मया भणितम्-विपन्नो मे आर्यपुत्रः, न प्रभवति च नभोगामिनी विद्या । ततो बाष्पार्द्रलोचनेन भणितं भगवता । वत्से ! अलं परिदेवितेन, ईदृश एवैष संसारः । एतां चासारतां संसारस्य अध्रुवतां जीवलोकस्य, क्षणभङ्गुरतां संगमानां चञ्चलतामिन्द्रियाणां परिचिन्त्य प्रपद्यन्ते प्राणिनः सकलत्रैलोक्य परमार्थबान्धवं धर्मम् । ततो मया 'एवमेतद्' इति चिन्तयित्वा भणितो भगवान् । कुरु मेऽनुग्रहं व्रतप्रदानेन । भगवता भणितम्-वत्से युक्तमेतद् , अथ किं पुनस्ते नभोगमनविद्याभ्रंशकारणम् ? । मया भणितम्-भगवन् ! न जानामि । ततो ज्ञानावलोकेन निरूपितं भगवता, भणितं च तेन । वत्से ! शोकाभिभूतया लङ्घितं सिद्धायतनकूटम् , निपतितं च ते एतस्यैव शिखरभागे कुसुमदाम, तन्निमित्तस्ते विद्याभ्रंश इति । मया भणितम्-भगवन् ! अलमिहलोकमात्रोपकारिणीभिर्विद्याभिः, कुरु मेऽनुग्रहं व्रतप्रदानेनेति । ततो भगवता

पुच्छिऊण तायं संसिऊण नियममायारं तवप्पभावेण आणिऊण तावसीणमुचियमुवगरणं एत्थ चेव दीवंमि दिक्खिय म्हि भयवया। अइक्कन्तो कोइ कालो। अन्नया य कुसुमसामिहेयनिमित्त गया समुद्दतीरं। दिट्ठा य तत्थ जलहिजलकल्लोलनोल्लिया मियङ्कलेहा विय देहप्पहाए समुज्जोयन्ती तमुद्देसं फलहयदुइया कन्नय त्ति॥ एयं सोऊण, भो कुमार, वियम्भिओ मे पमोओ। चिन्तियं च मए। दीसइ मणोरहपायवस्स कुसुमुग्गमो॥ तावसीए भणियं। तओ अहं गया तमुद्देसं, दिट्ठा य लायण्णसब्भावाओ 'जीवइ' त्ति गम्ममाणा कन्नय त्ति। अब्भुक्खिया कमण्डलुपाणिएणं, उम्मिल्लियं तीए लोयणजुयं, भणिया य सा मए। वच्छे धीरा होहि। तावसी खु अहं। तओ बाहजलभरियलोयणं पणमिया तीए। ससंभमं च उवविसिऊण खिज्जियं चित्तेणं, लक्खिओ से भावो। तओ मए चिन्तियं। अहो से महाणुभावया; भवियव्वमिमीए महाकुलपसूयाए त्ति। उवणीयाइं च से फलाइं। अणिच्छमाणी वि य कराविया

पृष्ट्वा तातं शंसित्वा निजमाचारं तपःप्रभावेण आनीय तापसीनामुचितमुपकरणमत्रैव द्वीपे दीक्षिताऽस्मि भगवता। अतिक्रान्तः कोऽपि कालः। अन्यदा च कुसुमसामिधेयनिमित्तं गता समुद्रतीरम्। दृष्टा च तत्र जलधिजलकल्लोलनोदिता(प्रेरिता) मृगाङ्कलेखेव देहप्रभया समुद्द्योतयन्ती तमुद्देशं फलकद्वितीया कन्यकेति। एतच्छ्रुत्वा भोः कुमार! विजृम्भितो मे प्रमोदः। चिन्तितं च मया-दृश्यते मनोरथपादपस्य कुसुमोद्गमः॥ तापस्या भणितम्-ततोऽहं गता तमुद्देशम्, दृष्टा च लावण्यसद्भावाद् 'जीवति' इति गम्यमाना कन्यकेति। अभ्युक्षिता कमण्डलुपानीयेन, उन्मीलितं तया लोचनयुगम्, भणिता च सा मया। वत्से! धीरा भव, तापसी खल्वहम्। ततो बाष्पजलभृतलोचनं प्रणता तया। ससंभ्रमं चोपविश्य खिन्नं चित्तेन, लक्षितस्तस्या भावः। ततो मया चिन्तितम्-अहो तस्या महानुभावता,

१ सामिधेय-समिधां-काष्ठानां समूहः। २ एयं से य दीवोवगठ या

कयं आवस्सयं, पुच्छिया य सा पाणवित्तिं। नीया आसमपदं, दंसिया कुलवइणो, पणमिओ तीए भयवं, अहिणन्दिया य भगवया। कयं आवस्सयं, पुच्छिया य सा मए। वच्छे,कुओ तुमं। तीए भणियं। भयवइ, तामलित्तीओ। मए भणियं। का उण तुमं,कहिं वा पट्ठिय त्ति। तओ दीहदीहं नीससिय न जंपियमिमीए। तओ मए चिन्तियं। महाकुलपसूया खु एसा; ता कहमेवमत्ताणं पयासेइ; ता किं एइणा;कुलवइं पुच्छिस्सामि त्ति। अइक्कन्तो वासरो। कयं सञ्झासमओचियमणुट्ठाणं। गयाहं कुलवइसयासं। पणमिऊण पुच्छिओ भयवं कुलवई। भयवं, का उण एसा कन्नया, कहं वा इमं ईइसमवत्थन्तरं पत्ता, कीइसो वा 'से विवाओ भविस्सइ त्ति। तओ दाऊणमुवओगं वियाणिऊण तवप्पहावेणं भणियं भयवया। सुण। तामलित्तीसामिणो ईसाणचन्दस्स धूया खु एसा भत्तारसिणेहपराहीणयाए इमं ईइसं अवत्थन्तरं पत्त त्ति। मए भणियं 'कहं विय'। भय-मए भणियं। भयवं, किन्न एसा कन्नय त्ति। भयवया भणियं। कन्नया दव्वओ, न उण भावओ त्ति।

भवितव्यमनया महाकुलप्रसूतयेति। उपनीतानि तस्याः फलानि। अनीच्छन्त्यपि च कारिता प्राणवृत्तिम्। नीताऽऽश्रमपदम्, दर्शिता कुलपतये, प्रणतस्तया भगवान्, अभिनन्दिता च भगवता। कृतमावश्यकम्, पृष्टा च सा मया। वत्से! कुतस्त्वम्?। तया भणि-तम्-भगवति! तामलिप्तीतः। मया भणितम्-का पुनस्त्वम्, कुत्र वा प्रस्थितेति?। ततो दीर्घदीर्घं निःश्वस्य न जल्पितमनया। ततो मया चिन्तितम्-महाकुलप्रसूता खल्वेषा, तत- कथमेवमात्मानं प्रकाशयति? ▪▪ किमेतेन, कुलपतिं प्रक्ष्यामीति। अतिक्रान्तो वासरः। कृत सन्ध्यासमयोचितमनुष्ठानम्। गताऽहं कुलपतिसकाशम्। प्रणम्य पृष्टो भगवान् कुलपतिः। भगवन्! का पुनरेषा कन्यका, कथं वेदमीदृशमवस्थान्तरं प्राप्ता, कीदृशो वा तस्या विपाको भविष्यतीति। ततो दत्त्वोपयोगं विज्ञाय तपःप्रभावेण भणितं भगवता। शृणु-तामलिप्तीस्वामिन ईशानचन्द्रस्य दुहिता खल्वेषा भर्तृस्नेहपराधीनतया इदमीदृशमवस्थान्तरं प्राप्तेति। मया भणितम्-भगवन्! किन्न

---

१ एयाए क। २ परायत्तयाए ▪▪।

वया भणियं। सुण। दिट्ठो इमीए मयणमहूसवम्मि तीए चेव नयरीए सेयवियाहिवस्स जसवम्मणो पुत्तो सणंकुमारो नाम। [*मोयाविया णेण तक्करा। ते य कहञ्चि दिट्ठिं वञ्चाविऊण वावाइया से ताएणमायण्णियं वयणमणेण। तओ निग्गच्छिऊण तायज्जाओ कोवेणमागओ तामलित्तिं। पडिच्छिओ सबहुमाणं ईसाणचन्देण। तओ वसन्तसमए] कीलानिमित्तं अणङ्गणन्दणं उज्जाणं गच्छमाणो दिट्ठो इमीए, समुप्पन्नो य से तम्मि अणुराओ। पडिवन्नो तीए एस भत्ता मणोरहेहिं न उण परिणीय त्ति। अइक्कन्तेसु कइवयदिणेसु जणरवाओ वियाणियमिमीए, जहा सो वावाइओ त्ति। तओ तन्नेहमोहियमणा 'अहं पि खु तम्मि चेव पिउवणे पञ्चत्तमुवगयं पि तं पेच्छिऊण पाणे परिच्चयामि' त्ति चिन्तिऊण अड्ढरत्तसमए पसुत्ते परियणे एगागिणी चेव निग्गया रायगेहाओ। ओइण्णा रायमग्गं, गहिया तक्करेहिं, गेण्हिऊण आहरणयं विक्कीया वव्वरकूलगामिणो अयलसत्थवाहस्स हत्थे। पयट्टाविया तेण निययकूलं। धिवन्नं च

एषा कन्यकेति? भगवता भणितम्–कन्यका द्रव्यतो न पुनर्भावत इति। मया भणितम्–'कथमिव'?। भगवता भणितम्–शृणु। दृष्टोऽनया मदनमधूत्सवे तस्यामेव नगर्यां श्वेतविकाधिपस्य यशोवर्मणः पुत्रः सनत्कुमारो नाम। [मोचिता अनेन तस्कराः। ते च कथञ्चिद् दृष्टिं वञ्चयित्वा व्यापादितास्तस्य तातेन, आकर्णितं वचनमनेन। ततो निर्गत्य तातार्यात् कोपेनागतो तामलितीम्। प्रतीष्टः सबहुमानमीशानचन्द्रेण। ततो वसन्तसमये] क्रीडानिमित्तमनङ्गनन्दनमुद्यानं गच्छन् दृष्टोऽनया, समुत्पन्नश्च तस्यास्तस्मिन्ननुरागः। प्रतिपन्नश्च तया एष भर्ता मनोरथैर्न पुनः परिणीतेति। अतिक्रान्तेषु कतिपयदिनेषु जनरवाद् विज्ञातमनया, यथा स व्यापादित इति। ततः तत्स्नेहमोहितमनाः 'अहमपि खलु तस्मिन्नेव पितृवने पञ्चत्वमुपगतमपि तं (भर्तारं) प्रेक्ष्य प्राणान् परित्यजामि' इति चिन्तयित्वाऽर्धरात्रसमये प्रसुप्ते परिजने एकाकिन्येव निर्गता राजगेहात्। अवतीर्णा राजमार्गम्। गृहीता तस्करैः। गृहीत्वाऽऽभरणं विक्रीता वर्वरकुलगामिनो-

---

* अयं कोष्ठान्तर्गत. पाठः क पुस्तकप्रान्तभागे एव।

तं जाणवत्तं, समासाइयं च इमीए फलहयं। तओ तिरत्तेण पत्ता इमं कूलं अवत्थं च। चिन्ताओ उण, पाविऊण भत्तारं भुञ्जिऊण भोए परलोयसाहणेणं सफलं चेव माणुसत्तणं करिस्सइ त्ति ॥ मए भणियं। भयवं, किन्न वावाइओ से हिययवल्लहो। भयवया भणियं आम त्ति। मए चिन्तियं 'सोहणं संजायं' ति। अइक्कन्ता सा रयणी। बिइयदियहंमि य भणिया मए सा। रायपुत्ति, परिचय विसायं अवलम्बेहि धिइं ईइसो एस संसारो। एत्थ खलु सुमिणयसंपत्तितुल्लाओ रिद्धीओ, अमिलाणकुसुममिव खणमेत्तरमणीयं जोव्वणं, विज्जुविलसियं पिव दिट्ठनट्ठाइं सुहाइं, अणिच्चा पिययजणसमागम त्ति। तीए भणियं। भयवइ, एवमेयं; ता करेहि मे पसायं वयप्पयाणेणं। मए भणियं। रायपुत्ति, अलं तेन वयगहणेणं। दुन्निवारणीओ पढमजोव्वणत्थस्स पाणिणो मयणबाणपसरो। पुच्छिओ य मए दिव्वनाणधरो तुज्झ वुत्तन्तं सव्वं चेव भयवं कुलवई। साहिओ य तेण सेयवियाहिवसुयदंसणाइओ। ता मा संतप्प, भविस्सइ

उपलसार्थवाहस्य हस्ते। प्रवर्तिता तेन निजकूलम्। विपन्नं च तद् यानपात्रम्। समासादितं चानया फलकम्। ततस्त्रिरात्रेण प्राप्तेदं कूलमवस्थां च। चिन्तातः पुनः प्राप्य भर्तारं भुक्त्वा भोगान् परलोकसाधनेन सफलमेव मानुषत्वं करिष्यतीति। मया भणितम्-भगवन्! किं न व्यापादितस्तस्या वल्लभः?। भगवता भणितम्-आममिति। मया चिन्तितम्-'शोभनं संजातम्' इति। अतिक्रान्ता सा रजनी। द्वितीयदिवसे च भणिता मया सा। राजपुत्रि! परित्यज विषादम्, अवलम्बस्व धृतिम्, ईदृश एष संसारः। अत्र खलु स्वप्नसंपत्तितुल्या ऋद्धयः, अम्लानकुसुममिव क्षणमात्ररमणीयं यौवनम्, विद्युद्विलसितमिव दृष्टनष्टानि सुखानि, अनित्याः प्रियजनसमागमा इति। तया भणितम्-भगवति! एवमेतद्, ततः कुरु मे प्रसादं व्रतप्रदानेन। मया भणितम्-राजपुत्रि! अलं तव व्रतग्रहणेन। दुर्निवारणीयः प्रथमयौवनस्थस्य प्राणिनो मदनबाणप्रसरः। पृष्टश्च मया दिव्यज्ञानधरस्तव वृत्तान्तं सर्वमेव भगवान् कुलपतिः। कथितश्च

१ निमीए क। २ दूउ ईइस (ईदिसि) अव-क। ३ -विलसियाइ पिव क। ४ नाव क।

तुह तेण समागमो, जीवइ खु सो दीहाउओ त्ति । तओ परिओसविम्हयसणाहं अच्चन्तसोहणमणाचिक्खणीयं अवत्थन्तरमुवगच्छिऊण संकप्पओ असन्तं पि ओयारिऊण दिन्नं मम कडयजुयलं, पणामिओ य हारलयानिमित्तं सिरोहराए हत्थो, असंपत्तीए य तस्स समागयं से चित्तं, विलिया य एसा । तओ मए भणियं । रायपुत्ति, अलं संभमेणं, उचिया खु तुमं ईइसस्स तुट्ठिदाणस्स । ता अलं तेन वयगहणेणं ति । तओ 'जं तुमं आणवेसि'त्ति पडिस्सुयं तीए । तावसकन्नओचिएणं च विहिणा अइक्कन्तो कोइ कालो । अन्नया गओ य णे भयवं कुलवई धम्मभाउयदंसणत्थं सिद्धपव्वयं ति । जाव इओ अईयकइवयदिणम्मि गन्तूण एसा कुसुमसामिहेयस्स अइक्कन्ताए उचियवेलाए मग्गओ पुलोएमाणी अणुफुसियकवोलतललग्गबाहजललवा सेयसलिलधोयगत्ता खीरोयमहणतक्खणुट्ठिया विय सिरी अरइपरिगया आगया आसमपयं । तओ मए पुच्छिया 'रायपुत्ति, किमेयं' ति । तीए भणियं । अज्ज मए धन्नवाणं सुमरियं ।

तेन श्वेतविकाधिपसुतदर्शनादिकः । ततो मा संतप्यस्व, भविष्यति तव तेन समागमः, जीवति खलु स दीर्घायुष्क इति । ततः परितोषविस्मयसनाथमत्यन्तशोभनमनाख्येयमवस्थान्तरमुपगत्य संकल्पतोऽसदपि अवतार्य दत्तं मह्यं कटकयुगलम्, अर्पितश्च हारलतानिमित्तं शिरोधरायां हस्तः । असंप्राप्त्या च तस्य समागतं तस्याश्चित्तम्, व्यलीका चैषा । ततो मया भणितम्-राजपुत्रि ! अलं संभ्रमेण, उचिता खलु त्वमीदृशस्य तुष्टिदानस्य । ततोऽलं तव व्रतग्रहणेनेति । ततो 'यत् त्वमाज्ञापयसि' इति प्रतिश्रुतं तया । तापसकन्योचितेन च विधिनाऽतिक्रान्तः कोऽपि कालः । अन्यदा गतश्च अस्माकं भगवान् कुलपतिर्धर्मभ्रातृदर्शनार्थं सिद्धपर्वतमिति । यावदितोऽतीतकतिपयदिने गत्वैषा कुसुमसामिधेयाय (कुसुम-काष्ठसमूहाय) अतिक्रान्तायामुचितवेलायां मार्गतः पश्यन्ती अनुप्रोञ्छित-कपोलतललग्नबाष्पजललवा स्वेदसलिलधौतगात्रा क्षीरोदमथनतत्क्षणादुत्थितेव श्रीररतिपरिगताऽऽगताऽऽश्रमपदम् । ततो मया पृष्टा

१ ताव क । २ -गंडा ख ।

मए भणियं। परिचय विसायं, जाव कुलवई आगच्छइ; तओ सो बन्धवाणं नेईस्सइ त्ति। पडिस्सुयं तीए। जाव तओ चेव दिवसाओ आरब्भ मन्दायरा देवयापूयाए अणुज्जुत्ता अतिहिबहुमाणे न करेइ कुसुमोच्चयं, न पणमइ हुयासणं, आलिहइ विज्जाहरमिहुणाइं, पुलोएइ सारसजुयलाइं, करेइ मणोहवस्स वि मणोरहे जोव्वणवियारे, नियभत्तारगयइत्थियाणुरायपहाणपोराणियकहासु च उव्वहइ परिओसं। तओ मए चिन्तियं। अहो से वयविसेसेण उवागयं जोव्वणं, जोव्वणेणं मओ, मएण मयणो, मयणेणं विलासा, विलासेहिं सव्वहा न सुलहं निव्वियारं जोव्वणं ति। अवि य

न य अत्थि नेव य होही पाएणं तिहुयणंमि सो जीवो। जो जोव्वणमणुपत्तो वियाररहिओ सया होइ॥

बिइयदियहंमि य नागवल्लीलयालिङ्गियं पूयपायवमवलोइऊण तयासन्नं च सहयरिचडुयम्मकारयं रायहंसं विहुणियकरपल्लवं

'राजपुत्रि ! किमेतद्' इति। तया भणितम्–अद्य मया बान्धवानां स्मृतम्। मया भणितम्–परित्यज विषादम्, यावत्कुलपतिरागच्छति, ततः स बान्धवान् नेष्यतीति। प्रतिश्रुतं तया। यावत् तत एव दिवसादारभ्य मन्दादरा देवतापूजायामनुद्युक्ताऽतिथिबहुमाने न करोति कुसुमोच्चयम्, न प्रणमति हुताशनम्, आलिखति विद्याधरमिथुनानि, पश्यति सारसयुगलानि, करोति मनोभवस्यापि मनोरथान् यौवनविकारान्, निजभर्तृगतस्त्र्यनुरागप्रधानपौराणिककथासु च उद्वहति परितोषम्। ततो मया चिन्तितम्–अहो अस्या वयोविशेषेणोपागतं यौवनम्, यौवनेन मदः, मदेन मदनः, मदनेन विलासाः, विलासैः सर्वथा न सुलभं निर्विकारं यौवनमिति। अपि च

न चास्ति नापि च भविष्यति प्रायेण त्रिभुवने स जीवः। यो यौवनमनुप्राप्तो विकाररहितः सदा भवति॥

द्वितीयदिवसे च नागवल्लीलताऽऽलिङ्गितं पूगपादपमवलोक्य तदासन्नं च सहचरीचाटुकर्मकारकं राजहंसं विधूतकरपल्लवं बाष्पा-

---

१ नइस्सइ क। २ -जुयल ख। ३ उवगय क। ४ न इव क। ५ चूयपायव- ख, असोयपायव- क। ६ चाडुयम्मगारय क।

वाहोल्ललोयणा [1]नीससिऊण दीहदीहं निग्गया तवोवणाओ। तओ मए चिन्तियं। न सोहणो से आगारो। ता पेच्छामि ताव कहिं एसा वचइ त्ति। जाव य गेण्हिऊण छज्जियं गया कुसुमोच्चयभूमिं, तरलतारयं च पयत्ता पुलोइउं। तओ मए चिन्तियं। किं पुण एसा पुलोएइ त्ति। जाव पुलोएमाणी य गया असोयवीहियं। कयलिवणन्तरिया य ठिया से अहं मग्गओ। परुण्णा य सा। भणियं च तीए। भयवईओ वणदेवयाओ, एसो खु सो पएसो, जहिं अज्जउत्तेण तावसि त्ति कलिऊण सविणयं पणमिय म्हि, भणिया य। भयवइ, वड्ढउ ते तवोकम्मं. अहं खु पुरिसो सेयवियावत्थव्वओ तामलित्तीओ सीहलदीवं पयट्टो। अन्तराले विवन्नं जाणवत्तं, अओ एगाई संवुत्तो। ता कहेउ भयवई, को पुण इमो पएसो; किं ताव जलनिहितडं, किं वा कोइ दीवो; कहिं वा तुम्हाणमासमपयं ति। मए पुण सलज्जसहिययाए न दिन्नं पडिवयणं [2]वामयाए सहावेण उक्कडयाए मयणस्स न तिण्णं मए जंपिउं। गया थेवं भूमिभायं। का- ऊण धीरयं पुलोएमाणीए न उवलद्धो य पिट्ठओ। ता न याणामि, [3]किं उप्पेक्खेमि तं दीहाउयं, आउ हिययाओ मे विणिग्गओ, आउ

ह्रीलोचना निःश्वस्य दीर्घदीर्घं निर्गता तपोवनात्। ततो मया चिन्तितम्-न शोभनस्तस्या आकारः। ततः पश्यामि तावत् कुत्रैषा व्रजतीति। यावच्च गृहीत्वा पुष्पकरण्डिकां गता कुसुमोच्चयभूमिम्, तरलतारकं च प्रवृत्ता द्रष्टुम्। ततो मया चिन्तितम्-किं पुनरेषा पश्यतीति? यावत् पश्यन्ती च गताऽशोकवीथिकाम्। कदलीवनान्तरिता च स्थिता तस्या अहं मार्गतः। प्ररुदिता च सा। भणितं च तया-भगवत्यो वनदेवताः! एष खलु स प्रदेशः, यत्र आर्यपुत्रेण तापसीति कलयित्वा सविनयं प्रणताऽस्मि, भणिता च। भगवति! वर्धतां ते तपःकर्म, अहं खलु पुरुषः श्वेतविकावास्तव्यः तामलिप्तीतः सिंहलद्वीपं प्रवृत्तः। अन्तराले विपन्नं यानपात्रम्, अत एकाकी संवृत्तः। ततः कथयतु भगवती, कः पुनरयं प्रदेशः, किं तावज्जलनिधितटम्, किं वा कोऽपि द्वीपः, कुत्र वा युष्माकमाश्रमपदमिति। मया पुनः ससा-

१ नीससिय क। २ वामयास- क ३ किं मए उप्पक्खियमेत्र, ।

पलोहेइ मं अज्जउत्तवेसेण कोइ अमाणुसो, आउ सच्चयं चेव अज्जउत्तो, त्ति । सव्वहा जं होउ तं होउ । न सक्कुणोमि पुणो पज्ज-लियमयणाणला अज्जउत्तविरहदुक्खं विसहिउं । ता एयाए अइमुत्तयलयाए उव्वन्धिऊण वावाएमि अत्ताणयं । अप्पमत्ता होज्जह सरीरे अज्जउत्तस्स, साहेज्जह य एयं वुत्तन्तं जणणिनिव्विसेसाए अयारणवच्छलाए भयवईए । अहं पुण लज्जापराहीणयाए न सक्कुणोमि आ-चिक्खिउं ति । भणिऊणमारूढा वम्मीयसीहरं, निबद्धो लयापासओ । तओ मए चिन्तियं । नत्थि दुक्करं मयणस्स । कओ तीए गुरुदेवयाणं पणामो, दिन्नो पासओ सिरोहराए, पवत्ता मेल्लिउं अप्पाणयं । एत्थन्तरंमि परित्तायह त्ति भणन्ती गया अहं तीए पासं । अवणीओ से पासओ, भणिया य सा । रायउत्ति, जुत्तं णु इमं लोयन्तरपयट्टाए वि अणापुच्छणं जणणितुल्लाए य मे पओयणाकहणं ति । तओ हद्धी सव्वं चेव एयाए आयण्णियं ति लज्जावणयवयणाए जंपियं तीए । भयवइ, न तए कुप्पियव्वं; लज्जा य मे अवरज्झइ ।

ध्यलज्जदयया न दत्तं प्रतिवचनम्, वामतया स्वभावेन उत्कटतया मदनस्य न शक्तं मया जल्पितुम् । गता स्तोकं भूमिभागम् । कृत्वा ग्रीवां पश्यन्त्या च नोपलब्धश्च पृष्ठतः । ततो न जानामि-किमुपेक्षे तं दीर्घायुष्कम्, अथवा हृदयान्मे विनिर्गतः, अथवा प्रलोभयति मामा-र्यपुत्रवेषेण कोऽप्यमानुषः, अथवा सत्यमेवार्यपुत्र इति । सर्वथा यद् भवतु तद् भवतु । न शक्नोमि पुनः प्रज्वलितमदनानलाऽऽर्यपुत्रविरह-दुःखं विसोढुम् । तत एतयाऽतिमुक्तलतया उद्बध्य व्यापादयाम्यात्मानम् । अप्रमत्ता भवेः शरीरे आर्यपुत्रस्य, कथयतं चैतं वृत्तान्तं जननीनि-र्विशेषाया अकारणवत्सलाया भगवत्याः । अहं पुनर्लज्जापराधीनतया न शक्नोम्याख्यातुमिति । भणित्वाऽऽरूढा वल्मीकशिखरम्, निबद्धो लतापाशः । ततो मया चिन्तितम्-नास्ति दुष्करं मदनस्य । कृतस्तया गुरुदेवताभ्यः प्रणामः, दत्तः पाशः शिरोधरायाम्, प्रवृत्ता क्षेप्तुमात्मा-नम् । अत्रान्तरे परित्रायध्वमिति भणन्ती गताऽहं तस्याः पार्श्वम् । अपनीतस्तस्याः पाशः । भणिता च सा-राजपुत्रि ! युक्तं न्विदं लोका-

[1] पुणो वि ख । [2] -सिहरंमि ख । [3] जुत्तमिम क, जुत्तमिण ख । [4] अहद्धी क । [5] लज्जा मे ख ।

तओ मए भणियं । रायउत्ति, अलं कोवासंकाए, न कोवणो तवस्सिजणो होइ । साहेहि ताव, किं तए एत्थ अउव्वो कोइ अइही दिट्ठो त्ति । तीए भणियं । सुयं चेव भयवईए । मए भणियं । रायउत्ति, धीरा होहि; अमोहवयणो खु भयवं कुलवई । ता अवस्समासन्नं ते पियं भविस्सइ । ता एहि ताव, गच्छम्ह आसमपयं । तओ 'जं भयवई आणवेइ'त्ति पडिसुयं तीए । गयाओ अम्हे आसमपयं । पेसिया य मए तुज्झ अण्णेसणानिमित्तं मुणिकुमारया । अप्पमत्ता य पोराणियकहाविणोएण ठिया अहं रायउत्तिसमीवे । निवेइयं च मे मुणिकुमारएहिं 'न अम्हेहिं दिट्ठो' त्ति । तओ अहं रायउत्तिसमीवे निउञ्जिय सयलपरियणं 'न अन्नो से जीवियोवाओ' त्ति विचिन्तिऊण एगागिणी चेव तुज्झ अन्नेसणनिमित्तं इह आगय म्हि । दंसिओ य मे तुमं अवस्सकज्जविणिओगदक्खाए भवियव्वयाए । ता एहि, गच्छम्ह आसमपयं; जीवावेहि तं कण्ठगयपाणं अवन्धवं कन्नयं ति ।

न्तरप्रवृत्तयाऽपि अनाप्रच्छनं जननीतुल्यायाश्च मे प्रयोजनाकथनमिति । ततो हा धिक्, सर्वमेव एतयाऽऽकर्णितमिति लज्जावनतवदनया जल्पितं तया । भगवति ! न त्वया कुपितव्यम्, लज्जा अत्र मेऽपराध्यति । ततो मया भणितम्–राजपुत्रि ! अलं कोपाशङ्कया, न कोपनः तपस्विजनो भवति । कथय तावत् किं त्वयाऽत्र अपूर्वः कोऽपि अतिथिर्दृष्ट इति ? । तया भणितम्–श्रुतमेव भगवत्या । मया भणितम्–राजपुत्रि ! धीरा भव, अमोघवचनः खलु भगवान् कुलपतिः । ततोऽवश्यमासन्नं ते प्रियं भविष्यति । तत एहि तावत्, गच्छाव आश्रमपदम् । ततो 'यद् भगवती आज्ञापयति' इति प्रतिश्रुतं तया । गते आवामाश्रमपदम् । प्रेषिताश्च मया तवान्वेषणनिमित्तं मुनिकुमारकाः । अप्रमत्ता च पौराणिककथाविनोदेन स्थिताऽहं राजपुत्रीसमीपे । निवेदितं च मे मुनिकुमारकैः 'नास्माभिर्दृष्टः' इति । ततोऽहं राजपुत्रीसमीपे नियुज्य सकलपरिजनं 'नान्यस्तस्या जीवितोपायः' इति विचिन्त्य एकाकिन्येव तवान्वेषणनिमित्तमिहागताऽस्मि । दर्शितश्च मे त्वमवश्यकार्यविनियोगदक्षया भवितव्यतया । तत एहि, गच्छाव आश्रमपदम्, जीवय तां कण्ठगतप्राणामबान्धवां कन्यकामिति ।

तओ मए भणियं 'जं भयवई आणवेइ' त्ति। गयाइं तवोवणं। पविट्ठा पढमं चेव तावसी, पच्छा य मुणिकुमारयाहूओ अहय ति। उवणीयं मे आसणं। दिट्ठा य मुणालियावलयहारमुव्वहन्ती नलिणिदलसत्थरगया विलासवई। सा य मं दट्ठूण [1]विलिया मोत्तूण सत्थरं अब्भन्तरं गया। उवविट्ठो य अहयं, संपाइओ अग्घो तीए वयंसियाहिं तावसकुमारियाहिं। तावसीसमाएसेणं च घेत्तूण चलणसोयं संठवेन्ती उत्तरिज्जं पुलोएमाणी वलियकन्धरं दिसामुहाइं समागया विलासवई। सोचिया चलणा॥ एत्थन्तरंमि ठिओ गगणमज्झयारी दिणयरो, जाओ य सनिओयतप्परो मुणिजणो, उवणीयाइं फणसमाइयाइं फलाइं, कया पाणवित्ती। आगया य तावसी। भणियं च तीए। रायपुत्त, [2]तएजारिसाणं आसमपयमागयाणं कन्दफलमेत्ता[3]हाराण पाणवित्ती। वक्कलनिवसणो य तावसजणो, ता किं करेउ अतिहिसक्कारं। तं एसा विलासवई मम जीवियाओ वि वल्लहयरा पुव्वसंपाडिया चेव विहिणा पुणो मे संपाडिय

ततो मया भणितम्–'यद् भगवत्याज्ञापयति' इति। गतो तपोवनम्। प्रविष्टा प्रथममेव तापसी, पश्चाच्च मुनिकुमारकाहूतोऽहमिति। उपनीतं च मे आसनम्। दृष्टा च मृणालिकावलयहारमुद्वहन्ती नलिनीदलस्रस्तरगता विलासवती। सा च मां दृष्ट्वा व्यलीका मुक्त्वा स्रस्तरमभ्यन्तरं गता। उपविष्टश्चाहम्, संपादितोऽर्घस्तस्या वयस्याभिः तापसकुमारिकाभिः। तापसीसमादेशेन च गृहीत्वा चरणशौचं संस्थापयन्ती उत्तरीयं पश्यन्ती वलितकन्धरं दिङ्मुखानि समागता विलासवती। शौचितौ चरणौ। अत्रान्तरे स्थितो गगनमध्यचारी दिनकर, जातश्च स्वनियोगतत्परो मुनिजनः। उपनीतानि पनसादिकानि फलानि, कृता प्राणवृत्तिः। आगता च तापसी। भणितं च तया –राजपुत्र! त्वत्सदृशानामाश्रमपदमागतानां कन्दफलमात्राहाराणां प्राणवृत्तिः, वल्कलनिवसनश्च तापसजनः, ततः किं करोत्वतिथिसत्कारम्। तदेषा विलासवती मम जीवितादपि वल्लभतरा पूर्वसंपादितेव विधिना पुनर्मया संपादितेति। भणित्वा वल्कलान्तर्हिताननना रोदितुं प्र-

१ –विलियविलिया क। २ तएरिसाण क। ३ –हारपाण–ख।

त्ति । भणिऊण वक्कलन्तपिहियाणणा रोविउं पयत्ता । तओ मए भणियं । भयवइ, विइयसंसारसहावा चेव तुमं; ता किमेयं ति[2] । उवणीयं च से तावसकुमारियाए सविणयं वयणसोयणसलिलं । सोचियं तीए वयणं, वक्कलन्तेणमवमज्जिऊण[3] उट्ठिया आसणाओ । सयमेव होममण्डवे होमकुण्डंमि चेव मङ्गलं ति कलिय पज्जालिओ हुयवहो । निययाहरणभूसिया समप्पिया मे विलासवई । गहिया य सा मए पढमं हियएणं पच्छा करयलेणं । भमियाइं मण्डलाइं । पणमिया भयवई । तस्समाएसेणं च गयाइं अम्हे तवोवणासन्नं चेव सुन्दरवणं नाम उज्जाणं । तं पुण समवाओ विय उऊणं निवासो विय गन्धरिद्धीए कुलहरं विय वणस्सईणं आययणं विय मयरद्धयस्स । तत्थ वि य कप्पूररससिच्चमाणमालईगुम्मवेढियं पविट्ठाइं एलालयापिणद्धं हरिचन्दणगहणं । तत्थ य महुयररुयगीयमणाहं मन्दमलयाणिलनच्चिरीओ पियङ्गुमञ्जरीओ अन्ने य अउव्वविब्भमे लोयणसुहए तरुगणे पेच्छमाणाणमइक्कन्तो वासरो । विरइयं पल्लवसयणिज्जं ।

वृत्ता । ततो मया भणितम्-भगवति ! विदितसंसारस्वभावा एव त्वम्, ततः किमेतदिति । उपनीतं च तस्यै तापसकुमारिकया सविनयं वदनशोचन(शुचिकरण)सलिलम् । शोचितं (शुचीकृतं) तया वदनम्, वल्कलान्तेनावमार्ज्य उत्थिताऽऽसनात् । स्वयमेव होममण्डपे होमकुण्डे एव मङ्गलमिति कलयित्वा प्रज्वालितो हुतवहः । निजकाभरणभूषिता समर्पिता मे विलासवती । गृहीता च सा मया प्रथमं हृदयेन पश्चात् करतलेन । भ्रमितानि मण्डलानि । प्रणता भगवती । तत्समादेशेन च गतावावां तपोवनासन्नमेव सुन्दरवनं नामोद्यानम् । तत् पुनः समवाय इव ऋतूनां निवास इव गन्धऋद्ध्याः कुलगृहमिव वनस्पतीनामायतनमिव मकरध्वजस्य । तत्रापि च कर्पूररससिच्यमानमालतीगुल्मवेष्टितं प्रविष्टौ एलालतापिनद्धं हरिचन्दनगहनम् । तत्र च मधुकररुतगीतसनाथं मन्दमलयानिलवशनृत्यन्तीः प्रियङ्गुमञ्जरीरन्यां-

१ पत्ता ख । २ उवणीय ति क । ३ मुह म । ४ वण उज्जाणं क । ५ अणेय- ग ।

पसुत्ताइं च अम्हे। समुप्पन्नो वीसम्भो। अइक्कन्ता रयणी। एवमणुदियहं चिट्ठन्ताणं अइक्कन्तेसु य कइवयदिणेसु उवगयाइं अम्हे कुसुमसामिहेयस्स। गहियाइं मए फलाइं। विलासवई पुण पवणवसपकम्पियाहिं सोउमल्ललोहेण विय परामुसिज्जमाणी वणलयाहिं उब्भिन्नकलियानियरेहिं च रोमञ्चिएहिं विय पुलोइज्जमाणी तरुवरेहिं कुसुमगन्धलोहिल्लियाए य उवरि निवडमाणेणं भमरजालेण समप्पओयणा वि अक्खित्तहियया 'एहि गच्छामो' त्ति मए भणिया वि न विरमए कुसुमोच्चयस्स। तओ मए चिन्तियं 'नयणमोहणपडपाउरणेण विप्पलम्भेमि एयं' ति समीवसंठिएणं चेव अपेच्छमाणीए पाउओ पडो। पुलोइयं च तीए, न दिट्ठो अहं। तओ असंभवेण गमणवियप्पस्स 'हा अज्जउत्त' त्ति भणमाणी निवडिया धरणिवट्ठे। तओ मए 'हा किमेयमणुचिट्ठियं' ति चिन्तिऊण मोत्तूण तं पडं कुमुयालयाभिहाणाओ विहङ्गगणकुलहराओ घेत्तूण भिसिणीपत्तं सीविऊण निच्छिद्दं पुडयं तं सलिलपुण्णं करिय समागओ

अपूर्वविभ्रमान् लोचनसुखदान् तरुगणान् प्रेक्षमाणयोरतिक्रान्तो वासरः। विरचितं पल्लवशयनीयम्। प्रसुप्तौ चावाम्। समुत्पन्नो विश्रम्भः। अतिक्रान्ता रजनी। एवमनुदिवसं तिष्ठतोरतिक्रान्तेषु च कतिपयदिवसेषु उपगतावावां कुसुमसामिधेयाय (कुसुम-काष्ठसमूहाय)। गृहीतानि मया फलानि। विलासवती पुनः पवनवशप्रकम्पिताभिः सौकुमार्यलोभेनेव परामृश्यमाना वनलताभिरुद्भिन्नकलिकानिकरैश्च रोमाञ्चितैरिव प्रलोक्यमाना तरुवरैः कुसुमगन्धलोभितया चोपरि निपतता भ्रमरजालेन समाप्तप्रयोजनाऽप्याक्षिप्तहृदया 'एहि गच्छावः' इति मया भणिताऽपि न विरमति कुसुमोच्चयात्। ततो मया चिन्तितम्—'नयनमोहनपटप्रावरणेन विप्रलम्भयामि एताम्' इति समीपस्थितेनैव अप्रेक्षमाणायां प्रावृतः पटः। प्रलोकितं च तया, न दृष्टोऽहम्। ततोऽसम्भवेन गमनविकल्पस्य 'हा आर्यपुत्र'! इति भणन्ती निपतिता धरणीपृष्ठे। ततो मया 'हा किमेतदनुष्ठितम्' इति चिन्तयित्वा मुक्त्वा तं पटं कुमुदालयाभिधानाद् विहंगगणकुलगृहाद् (सरसः) गृहीत्वा

१ वुण क। २ तओ य संभमेण क। ३ -विहंगगमण-ख। ४ सलिल पुण घेत्तूणमागओ ख।

दुलियं। परिसित्ता य जलेण समासासिया एसा। भणियं च तीए 'अज्जउत्त, किमेयं' ति। मए भणियं 'किं तयं'। तीए भणियं। एण्हिं चेव न दिट्ठो मए तुमं ति, एण्हिं चेव दिट्ठो, ता किमेयं ति। मए भणियं 'न याणामो' ति। तीए भणियं। हा कहं न याणासि। समुप्पन्नं मे सज्झसं, ता साहेहि परमत्थं ति। तओ मए 'कायराणि इत्थियाहिययाणि, ||| अन्नहा संभावइस्सइ'त्ति चिंतिऊण साहिओ पडरयणवुत्तन्तो। निव्वासिओ य तीए, उवलद्धपच्चयाए य गहिओ पडो॥

एवं च वड्ढमाणाणुरायाण अइक्कन्तो कोइ कालो। जाया य मे चिन्ता 'गच्छामो सदेसं'। साहियं विलासवईए। भणियं च तीए। अज्जउत्त, जं वो रोयइ त्ति। पुच्छिया तावसी। अणुमयं तीए। कओ भिन्नपोयद्धओ। गया कइवि दियहा। एत्थन्तरंमि समागया गालनाहियाए निज्जामया। दिट्ठा य ते मए। भणियं च तेहिं। भो महापुरिस, महाकडाहवासिणा साणुदेवसत्थवाहेण मलयविसयप-

विस्तीर्णपर्णं स्यूत्वा निश्छिद्रपुटकं तं सलिलपूर्णं कृत्वा समागतः शीघ्रम्। परिषिक्ता च जलेन समाश्वासितैषा। भणितं च तया 'आर्यपुत्र! किमेतद्' इति। मया भणितम्–'किं तद्'। तया भणितम्–इदानीमेव न दृष्टो मया त्वमिति, इदानीमेव दृष्टः, ततः किमेतदिति। मया भणितम्–'न जानीमः' इति। तया भणितम्–हा कथं न जानासि? समुत्पन्नं मे साध्वसम्, ततः कथय परमार्थमिति। ततो मया 'कातराणि स्त्रीहृदयानि, माऽन्यथा संभावयिष्यति' इति चिन्तयित्वा कथितः पटरत्नवृत्तान्तः। विन्यासितश्च तया, उपलब्धप्रत्ययया च गृहीतः पटः।

एवं च वर्धमानानुरागयोरतिक्रान्तः कोऽपि कालः। जाता च मे चिन्ता 'गच्छावः स्वदेशम्'। कथितं विलासवत्यै। भणितं च तया–आर्यपुत्र! यद् वो रोचते इति। पृष्टा तापसी। अनुमतं तया। कृतः भिन्नपोतध्वजः। गताः कत्यपि दिवसाः। अत्रान्तरे समागता लघु-

१ छिन्नः पत्तिएण स। २ एण्हिं दिट्ठो तुम स। ३ कडय– स।

रिथएणं दट्ठूण भिन्नपोयद्धयं पेसिया अम्हे। ता एहि गच्छम्ह। तओ मए भणियं। भद्दा, जायादुइओ अहं। तेहिं भणियं। न दोसो सो, सा वि पयट्टउ त्ति। तओ आपुच्छिऊण तावसजणं अणुगम्ममाणो य तेण गओ जलनिहितडं। पणमिऊण तावसे जायादुइओ आरूढो गालवाहियं। पत्तो य जाणवत्तं बहुमन्निओ य सत्थवाहपुत्तेण। तओ मए 'इत्थियासहावओ घोरयाए महोयहिस्स पढमभिलियाए विब्भमेण मा से पमाओ पडरयणम्मि भविस्सइ' त्ति चिन्तिऊण गहियं पडरयणमप्पणा। अइक्कन्ता कइवि वासरा। अन्नया य जामावसेसाए रयणीए पासवणनिमित्तं उट्ठिओ अहं सत्थवाहपुत्तो य। एत्थन्तरंमि चिन्तियं सत्थवाहपुत्तेण। इमं ईइसं इत्थियारयणं, सव्वावराहच्छाइणी य सव्वरी; दुल्लहो य ईइसो अवसरो। ता घत्तिऊण महोयहिंमि एयं अङ्गीकरेमि मयणमञ्जूसं इत्थीरयणं ति संपाडेमि जहासमीहियं। हियए ववत्थाविय भणियं च तेण 'ठायसु तुमं' ति। ठिओ अहं जाणवत्तणिज्जूहए, पेल्लिओ य तेण

नौकाया निर्यामकाः। दृष्टाश्च ते मया। भणितं च तैः। भो महापुरुष! महाकटाहवासिना सानुदेवसार्थवाहेन मलयविषयप्रस्थितेन दृष्ट्वा भिन्नपोतध्वजं प्रेषिता वयम्। तत एहि, गच्छामः। ततो मया भणितम्-भद्रा! जायाद्वितीयोऽहम्। तैर्भणितम्-न दोषः सः, साऽपि प्रवर्ततामिति। तत आपृच्छ्य तापसजनमनुगम्यमानश्च तेन गतो जलनिधितटम्। प्रणम्य तापसान् जायाद्वितीय आरूढो लघुनावम्। प्राप्तश्च यानपात्रं बहुमानितश्च सार्थवाहपुत्रेण। ततो मया 'स्त्रीस्वभावतो घोरतया महोदधेः प्रथममिलितायाः विभ्रमेण मा तस्याः प्रमादः पटरत्ने भविष्यति' इति चिन्तयित्वा गृहीतं पटरत्नमात्मना। अतिक्रान्ताः कत्यपि वासराः। अन्यदा च यामावशेषायां रजन्यां प्रस्रवणनिमित्तमुत्थितोऽहं सार्थवाहपुत्रश्च। अत्रान्तरे चिन्तितं सार्थवाहपुत्रेण। इदमीदृशं स्त्रीरत्नम्, सर्वापराधच्छादनी च शर्वरी, दुर्लभश्च ईदृशोऽवसरः। ततः क्षिप्त्वा महोदधावेतमङ्गीकरोमि मदनमञ्जूषां स्त्रीरत्नमिति संपादयामि यथासमीहितम्। हृदये व्यवस्थाप्य

१ जायादुतीओ ख। २ पढमगुणियाइ ख। ३ मा से विब्भमेण न पडरयणं भविस्सइ क। ४ समीहिय ति। सपहारिऊण हियए भणियं तेण क।

निवडिओ संसारविसाले सायरे। समासाइयं च पुव्वभिन्नबोहित्थसन्तियं फलहयं। लङ्घिओ जीवियसेसयाए पञ्चरत्तेणं जलनिही। पत्तो मलयकूलं, उत्तिण्णो जलनिहीओ। चिन्तियं मएं। अह किं पुण सत्थवाहपुत्तस्स मम वावायणपओयणं। नूणं विलासवइलोहो। ता मूढो खु सो वाणियओ अणभिन्नो विलासवइचित्तस्स। न खलु सा मम विओए पाणे धारेइ, विन्नायं पडयसंभमेण। विणा य तीए किं कज्जं मे निप्फलेण पाणसंधारणेणं। ता वावाएमि अत्ताणयं ति। चिन्तिऊण निज्झाइयाओ दिसाओ, दिट्ठो य नाइदूरंमि चेव थलसंठिओ नीवपायवो। तओ निव्वावेमि पिययमाविरहसंताविय एत्थ उक्कलंबणेण अप्पाणयं ति चिन्तिऊण पयट्टो नीवपायवसमीवं। दिट्ठं च नाइदूरंमि चेव तीरतरुसण्डमण्डियं वियसियकमलसङ्घायसंछाइयमज्झभायं हसन्तं विय कुमुयगणेहिं पुलोयन्तं विय कसणुप्पलविलासेहिं रुयन्तं विय चक्कवायकूइएहिं गायन्तं विय मुइयमहुयररुएहिं नच्चमाणं विय हल्लन्तवीइहत्थेहिं कमलरयपिञ्जरजलं महासरं।

भणितं च तेन 'तिष्ठ त्वम्' इति। स्थितोऽहं यानपात्रनिर्यूहके, प्रेरितश्च तेन, निपतितः संसारविशाले सागरे। समासादितं च पूर्वभिन्नबोहित्थसत्कं फलकम्। लङ्घितो जीवितशेषतया पञ्चरात्रेण जलनिधिः। प्राप्तो मलयकूलम्, उत्तीर्णो जलनिधितः। चिन्तितं मया। अथ किं पुनः सार्थवाहपुत्रस्य मम व्यापादनप्रयोजनम्?। नूनं विलासवतीलोभः। ततो मूढः खलु स वाणिजकोऽनभिज्ञो विलासवतीचित्तस्य। न खलु सा मम वियोगे प्राणान् धारयति। विज्ञातं पटसंभ्रमेण। विना च तया किं कार्यं मे निष्फलेन प्राणसंधारणेन। ततो व्यापादयाम्यात्मानमिति। चिन्तयित्वा निध्याता (अवलोकिता) दिशः। दृष्टश्च नातिदूरे एव स्थलसंस्थितो नीपपादपः। ततो निर्वापयामि प्रियतमाविरहसंतापितमत्रोत्कलम्बनेनात्मानमिति चिन्तयित्वा प्रवृत्तो नीपपादपसमीपम्। दृष्टं च नातिदूरे एव तीरतरुषण्डमण्डितं विकसितकमलसंघातसंछादितमध्यभागं हसदिव कुमुदगणैः, विलोकयदिव कृष्णोत्पलविलासैरुदिव चक्रवाककूजितैर्गायदिव मुदि-

---

१ फलयं फ। २ वावाएमि पिययमाविरहमताविय अप्पाणयं ख।

दिट्ठो य तत्थ एक्को कलहंसो कहवि पियपमारहिओ। पियदइयारहिओ पुण इमेहि लिंगेहि विन्नाओ ॥
अवलोएइ दसदिसि एगागी तरलतारयं खिन्नो। कलुणं च कूजिऊणं खणमेत्तं निचलो ठाइ ॥
पिययमसरिसं हंसिं दट्ठूणं हरिसिओ समल्लियइ। मुणिऊण य अन्नं तं नियत्तए नवर सविसायं ॥
मरणावेसियचित्तो पज्जलियं हुयवहं व कमलवणं। पइसइ मुणालखण्डं विसं व सो पेच्छए पुरओ ॥
विहुणइ पवणायम्पियकमलरउक्खुडियपिञ्जरच्छायं। विरहाणलपज्जलियं व मणहरं पेहुणकलावं ॥
मिउपवणपहल्लावियसलिलतरंगुच्छलन्तसिसिरेहिं। सिचन्तो मुच्छिज्जइ विवसो जलसीयरेहिं पि ॥
वीइज्जन्तो य पुणो नलिणीपत्तेहि चेयणं लहइ। दट्ठूण नियं छायं जलम्मि परिओसमुव्वहइ ॥

मधुकरवर्तैर्नृत्यदिव कम्पमानवीचिहस्तैः कमलरजःपिञ्जरजलं महासरः।
दृष्टश्च तत्रैकः कलहंसः कथमपि प्रियतमाविरहितः। प्रियदयितारहितः पुनरेभिर्लिङ्गैर्विज्ञातः ॥
अवलोकयति दश दिश एकाकी तरलतारकं खिन्नः। करुणं च कूजित्वा क्षणमात्रं निश्चलस्तिष्ठति ॥
प्रियतमासदृशीं हंसीं दृष्ट्वा हृषितः समालीयते। ज्ञात्वा चान्यां तां निवर्तते नवरं सविषादम् ॥
मरणाविष्टचित्तः प्रज्वलितं हुतवहमिव कमलवनम्। प्रविशति मृणालखण्डं विषमिव स प्रेक्षते पुरतः ॥
विधुनाति पवनाकम्पितकमलरजोमिश्रितपिञ्जरच्छायम्। विरहानलप्रज्वलितमिव मनोहरं पिच्छकलापम् ॥
मृदुपवनप्रचालितचपलतरङ्गोच्छलच्छिशिरैः। सिच्यमानो मूर्च्छति विवशो जलसीकरैरपि ॥

१ कोमलमु- क। २ नवर ख। ३ नियय- क।

तं पेच्छिऊण मज्झं जाया चिन्ता कहण्णु एसो वि। पियविप्पओयदुहिओ विहिणा विणडिज्जइ वराओ ॥
तेणेय पण्डिया परिहरंति पेम्मं अहिं विलग्गयं व। जाणन्ति जेण पियविप्पओयविसवेयमाहप्पं ॥
इय जा चिन्तेमि अहं ताव य कलहंसओ विहिवसेण। पत्तो परिब्भमन्तो सरम्मि एक्कं सरुद्देसं ॥
असणिभयविप्पणट्ठा वियडं भमिऊण सरवरं तत्थ। कुवलयछायाए ठिया दिट्ठा कलहंसिया तेण ॥
विरहपरिदुब्बलङ्गी असमत्था कूइउं पि सोएण। दट्ठूण य तं हंसो धणियं परिओसमावन्नो ॥
दट्ठूणं पियजायाघडियं कलहंसयं विहिवसेण। मज्झं पि सावय तओ मणम्मि चिन्ता समुप्पन्ना ॥
एवं जीवन्ताणं कालेण कयाइ होइ सम्पत्ती। जीवाण मयाणं पुण कत्तो दीहम्मि संसारे ॥

वीज्यमानश्च पुनर्नलिनीपत्रैश्चेतनां लभते। दृष्ट्वा निजां छायां जले परितोषमुद्वहति ॥
तं प्रेक्ष्य मम जाता चिन्ता कथं नु एषोऽपि। प्रियविप्रयोगदुःखितो विधिना विडम्ब्यते (व्याकुलीक्रियते) वराकः ॥
तेनैव पण्डिताः परिहरन्ति प्रेम अहिं विलग्नमिव। जानन्ति येन प्रियविप्रयोगविषवेगमाहात्म्यम् ॥
इति यावच्चिन्तयामि अहं तावच्च कलहंसको विधिवशेन। प्राप्तः परिभ्रमन् सरस्येकं शरोद्देशम् ॥
अशनिभयविप्रनष्टा विकटं भ्रान्त्वा सरोवरं तत्र। कुवलयच्छायायां स्थिता दृष्टा कलहंसिका तेन ॥
विरहपरिदुर्बलाङ्गी असमर्था कूजितुमपि शोकेन। दृष्ट्वा च तां हंसो गाढं परितोषमापन्नः ॥
दृष्ट्वा च प्रियजायाघटितं कलहंसकं विधिवशेन। ममापि श्रावक! ततो मनसि चिन्ता समुत्पन्ना ॥
एवं जीवतां कालेन कदाचिद् भवति संप्राप्तिः। जीवानां मृतानां पुनः कुतः दीर्घे संसारे ॥

पाणेसु धरन्तेसु य नियमा उच्छाहसत्तिममुयन्तो। पावेइ फलं पुरिसो नियववसायाणुरूवं तु ॥

अन्नं च। विलासवईए वि साहिओ कुलवइणा विवाओ, जहा पाविऊण भत्तारं भुञ्जिऊण भोए परलोयसाहणेण सफलं चेव माणुसत्तणं करिस्सइ त्ति। ता न वावाएइ सा अत्ताणयं। विचित्ताणि य विहिणो विलसियाइं। ता इमं ताव पत्तकालं, जं तीए गवेसणं ति। चिन्तिऊण नारङ्गोवओएण कया पाणवित्ती। पयट्टो जलनिहितडेणं, गओ अद्धजोयणमेत्तं भूमिभागं। दिट्ठं च वीईपणोल्लिज्जमाणं समुद्दतीरंमि फलहयं। पयट्टो तस्स समीवं। पत्तं च तीरं। दिट्ठा य तत्थलग्गा कण्ठगयपाणा विलासवई। हरिसिओ चित्तेणं, पच्चभिन्नाओ य अहं तीए। रोविउं पयत्ता, समासासिया मए पुच्छिया य 'देवि, किमेयं' ति। तीए भणियं। अज्जउत्त, सुण। मम मन्दभागधेयाए अपुण्णेहिं निवडिए तुमम्मि अज्जउत्तसोएणं च अत्ताणयं समुद्दपवाहणुज्जए सत्थवाहे तन्निवारणत्थं च सह मए

प्राणेषु धरत्सु (विद्यमानेषु) च नियमादुत्साहशक्तिममुञ्चन्। प्राप्नोति फलं पुरुषो निजव्यवसायानुरूपं तु ॥

अन्यच्च—विलासवत्या अपि कथितः कुलपतिना विपाकः, यथा प्राप्य भर्तारं भुक्त्वा भोगान् परलोकसाधनेन सफलमेव मानुषत्वं करिष्यतीति। ततो न व्यापादयति साऽऽत्मानम्। विचित्राणि च विधेर्विलसितानि। तत इदं तावत्प्राप्तकालं यत्तस्या गवेषणमिति। चिन्तयित्वा नारङ्गोपयोगेन कृता प्राणवृत्तिः। प्रवृत्तो जलनिधितटेन, गतोऽर्धयोजनमात्रं भूमिभागम्। दृष्टं च वीचिभिर्नुद्यमानं समुद्रतीरे फलकम्। प्रवृत्तस्तस्य समीपम्। प्राप्तं च तीरम्। दृष्टा च तत्रलग्ना कण्ठगतप्राणा विलासवती। हृष्टश्चित्तेन, प्रत्यभिज्ञातश्चाहं तया। रोदितुं प्रवृत्ता, समाश्वासिता मया, पृष्टा च देवि! 'किमेतद्' इति। तया भणितम्—आर्यपुत्र! शृणु। मम मन्दभागधेयाया

---

१ 'ममम्मि सत्थवाहपुत्ते य 'मम पत्ती होहि' त्ति भणन्ते तओ अणिच्छन्ती अह" इति पाठ कपुस्तकप्रान्तभागे एव लिखितः, स च प्रक्षिप्त आभाति। पूर्वापरसन्दर्भविरोधात्।

आउलीहूए परियणे पहायाए रयणीए 'अवट्ट अवट्ट' त्ति वाहरन्ते कण्णहारे रज्जुपरिवत्तणुज्जएसुं निज्जामएसुं अयण्डम्मि चेव गिरिसिहरनिवडियं पिव त्रिवन्नं जाणवत्तं। विहडिओ जणो। अज्जउत्तअणुभावेण मम पुण्णोदएणं च समासाइयं मए फलहयं। लङ्घिओ जलनिही, दिट्ठो य तुमं ति॥ तओ मए चिन्तियं। अहो मायासीलया अहो अकज्जसङ्कप्पपरिणामो सत्थवाहस्स। अहवा किमेत्थ अच्छरियं। न खलु अणुवायओ कज्जसिद्धी, अणुवायओ पावायरणं सुहाणं, जेण तत्थ पढमं चेव अत्तणो संकिलेसो पुणो य परपीडा। ता कहमेवंविहब्भासओ सुहपरिणामो। तहात्रि अविइयसुहसाहणोवाया पयट्टन्ति एत्थ पाणिणो विप्पलद्धा मीण व्व गलसम्पत्तितुल्लाए विवागदारुणाए सुहसम्पत्तीए॥ एत्थन्तरंमि भणियं विलासवईए। अज्जउत्त, तुमं पुण कहं निवडिओ, कहं वा उत्तिण्णो त्ति। तओ 'न जुत्तं परदोसपयडणं' ति चिन्तिऊण जम्पियं मए। देवि, पमायओ फेल्लुसिऊण[1] निवडिओ तद्देमसमासाइयपुव्वभिन्नवहण-

---

अपुण्यैर्निपतिते त्वयि आर्यपुत्रशोकेन चात्मानं समुद्रप्रवाहणोद्यते सार्थवाहे च तन्निवारणार्थं सह मया आकुलीभूते परिजने प्रभातायां रजन्यां 'अपवर्तय अपवर्तय' इति व्याहरति कर्णधारे रज्जुपरिवर्तनोद्यतेषु निर्यामकेषु अकाण्डे एव गिरिशिखरनिपतितमिव विपन्नं यानपात्रम्। विघटितो जनः। आर्यपुत्रानुभावेन मम पुण्योदयेन च समासादितं मया फलकम्। लङ्घितो जलनिधिः, दृष्टश्च त्वमिति॥ ततो मया चिन्तितम्-अहो मायाशीलता, अहो अकार्यसंकल्पपरिणामः सार्थवाहस्य। अथवा किमत्राश्चर्यमिति। न खल्वनुपायतः कार्यसिद्धिः, अनुपायतः पापाचरणं सुखानाम्, येन तत्र प्रथममेव आत्मनः संक्लेशः पुनश्च परपीडा। ततः कथमेवंविधाभ्यासतः शुभपरिणामः, तथाप्यविदितसुखसाधनोपायाः प्रवर्तन्तेऽत्र प्राणिनो विप्रलब्धा मीना इव गलसंप्राप्तितुल्यायां विपाकदारुणायां सुखसंप्राप्तौ। अत्रान्तरे भणितं विलासवत्या। आर्यपुत्र! त्वं पुनः कथं निपतितः, कथं चोत्तीर्ण इति। ततो 'न युक्तं परदोषप्रकटनम्' इति चिन्तयित्वा

[1] फेल्लिसिऊण क, फेल्लसिऊण ख।

फलहपणं च उत्तिण्णो म्हि ॥

अइक्कन्ता काइ वेला। तीए भणियं। अज्जउत्त, तिमाभिभूय म्हि। मए भणियं। देवि, इओ नाइदूरंमि चेव महन्तं सरवरं। ता एहि गच्छम्ह। पयट्टा विलासवई। समागया थेवं भूमिभागं। तओ गरुययाए नियम्बस्स खीणयाए समुद्दतरणेणं सोमालयाए देहस्स वीसत्थाए मम सन्निहाणेणं न सक्केइ चंकमिउं। तओ मए भणियं। देवि, चिट्ठाहि ताव तुमं नग्गोहपायवसमीवे, जाव संपाडेमि देवीए नलिणिपत्तणमुदयं ति। तीए भणियं। न मे तुह वयणदंसणतण्हाओ बाहए सलिलतण्हा। मए भणियं। देवि, धीरा होहि; आगओ चेव अहयं ति। कयं च से पल्लवसयणिज्जं। समप्पिओ नयणमोहणो पडो। भणिया य एसा। देवि, बहुपच्चवायं अरण्णं, अओ एयपच्छाइयसरीराए चिट्ठियव्वं, जाव अहमागच्छामि त्ति। अबहुमयं पि हियएण अपडिकूलयाए पडिस्सुयं तीए। अहं गओ सरवरं।

उल्लिपतं मया। देवि! प्रमादतः (फेल्लुसिऊण दे.) स्त्वया निपतितस्तद्देशासमासादितपूर्वभिन्नवहनफलकेन चोत्तीर्णोऽस्मि ॥

अतिक्रान्ता काऽपि वेला। तया भणितम्–आर्यपुत्र! तृषाऽभिभूताऽस्मि। मया भणितम्–इतो नातिदूरे एव महत् सरोवरम्। तत एहि गच्छावः। प्रवृत्ता विलासवती। समागता स्तोकं भूमिभागम्। ततो गुरुतया नितम्बस्य क्षीणतया समुद्रतरणेन सुकुमारतया देहस्य विश्वस्तया मम सन्निधानेन न शक्नोति चंक्रमितुम्। ततो मया भणितम्–देवि! तिष्ठ तावत्त्वं न्यग्रोधपादपसमीपे यावत् संपादयामि देव्या नलिनीपत्रेणोदकमिति। तया भणितम्–न मे तव वदनदर्शनतृष्णाया बाधते सलिलतृष्णा। मया भणितम्–देवि! धीरा भव, आगत एवाहमिति। कृतं च तस्याः पल्लवशयनीयम्। समर्पितो नयनमोहनो पटः। भणिता चैषा, देवि! बहुप्रत्यवायमरण्यम्, अत एतत्प्रच्छादितशरीरया स्थातव्यम्, यावदहमागच्छामीति। अबहुमतमपि हृदयेन अप्रतिकूलतया प्रतिश्रुतं तया।

---

१ निपयाए क। २ भणिय च णाए 'न सक्कुणामि चंकमिउ' क। ३ चिट्ठ क.।

गहियमुदगं नारङ्गफलाणि य। पयट्टो पडिचहेणं, समागओ तमुद्देसं। भणिया य एसा। देवि, मुञ्च नयणमोहणं पडयं, गेण्हाहि उदगं ति। जाव न वाहरइ त्ति, तओ मए भणियं। देवि, अलं परिहासेणं, मुञ्च नयणमोहणं पडयं। तहावि न वाहरइ। तओ मए चिन्तियं। नूणं नत्थि चेय इह देवी। अन्नहा दट्ठूण मं कहं न अब्भुट्ठेइ, कहं वा न वाहरइ त्ति। तओ परामुट्ठो सत्थरो, नोवलद्धा य देवी। तओ आसङ्कियं मे हियएणं, फुरियं वामलोयणेणं, निवडियं च मे हत्थाओ पयत्तगहियं पि सोययं नलिणिवत्तं। विसाय-पराहीणो विय भुण्णवयणतरलच्छं 'देवि देवि' त्ति जंपमाणो पवत्तो गवेसिउं। वालुयाथलीए य उवलद्धा अयगरघसणी। वेवमाणहियओ पयट्टो तयणुसारेणं। दिट्ठो य तरुवरगहणे अइकस देहच्छवी विणिन्तनयणविससिहाजालभासुरो नयणमोहणपडगसणवावडो महाकाओ अयगरो त्ति। तं च दट्ठूण चिन्तियं मए। हद्धी वावाइया देवी। तओ न जाणियं मए, किं दिवसो किं रत्ती किं उण्हं किं

अहं गतः सरोवरम्। गृहीतमुदकं नारङ्गफलानि च। प्रवृत्तः प्रतिपथेन, समागतस्तमुद्देशम्। भणिता चैषा। देवि! मुञ्च नयनमोहनं पटम्, गृहाणोदकमिति। यावन्न व्याहरतीति, ततो मया भणितम्-देवि! अलं परिहासेन, मुञ्च नयनमोहनं पटम्। तथापि न व्याहरति। ततो मया चिन्तितम्-नूनं नास्त्येव इह देवी, अन्यथा दृष्ट्वा मां कथं नाभ्युत्तिष्ठति, कथं वा न व्याहरतीति। ततः परामृष्टः स्रस्तरः, नोपलब्धा च देवी। तत आशङ्कितं मे हृदयेन, स्फुरितं वामलोचनेन, निपतितं च मे हस्तात्प्रयत्नगृहीतमपि सोदकं नलिनी-पत्रम्। विषादपराधीन इव भीतवदनतरलाक्षं 'देवि देवि' इति जल्पन् प्रवृत्तो गवेषयितुम्। वालुकास्थल्यां चोपलब्धाऽजगरघर्षणी। वेपमानहृदयः प्रवृत्तस्तदनुसारेण। दृष्टश्च तरुवरगहनेऽतिकृष्णदेहच्छविर्विनिर्यन्नयनविषशिखाज्वालाभासुरो नयनमोहनपटग्रसनव्यापृतो महाकायोऽजगर इति। तं च दृष्ट्वा चिन्तितं मया। हा धिग्, व्यापादिता देवी। ततो न ज्ञातं मया, किं दिवसः किं रात्रिः,

१ -वेहणी क, -घसरणी ख। २ गहयतरुवर- ख।

सीयं किं सुहं किं दुक्खं किं ऊसवो किं वसणं किं जीवियं किं मरणं किं गओ किं ठिओ त्ति; केवलमणाचिक्खणीयं अवत्थन्तरं पाविऊण मुच्छानिमीलियनयणो निवडिओ धरणिवट्ठे, विउत्तासवो विय ठिओ कंचि कालं। जलहिमारुयसमागमेणं च लद्धा चेयणा। चिन्तियं मए। जाव एस अयगरो न देसन्तरमुवगच्छइ, ताव चेव इमिणा अत्ताणयं खवावेमि। मयस्स वि बहुमओ चेव मे देवीसमागमो त्ति। गओ अयगरसमीवं। सो य मं दट्ठूण कयावराहो विय कुपुरिसो संकुडिओ अयगरो। चिन्तियं मए। मयस्स वि पिययमासमागमो दुल्लहो त्ति। तओ कहं अकुविओ ममं गहेऊणं एसो गसिस्सइ' त्ति आहओ उत्तिमङ्गभाए अयगरो। भयकायरेणं च तेण निग्गिलिओ नयणमोहणो पडो, आवद्धा मण्डली, निसामिओ फणाभोओ। तओ पिययमागत्तसङ्गबहुमाणेण गहिओ पडो, विइण्णो वच्छत्थले। चिन्तियं च मए। एयं चेव नयणमोहणं हियए दाऊण उक्कलम्बणेण वावाएमि अत्ताणयं ति। गओ नग्गोहसमीवं, जत्थ पिययमा पसुत्ता आसि। निबद्धो पासओ, साहागएणं च निमिया सिरोहरा, विमुक्को अप्पा, निरुद्धो कण्ठदेसो। तओ

किमुष्णं किं शीतम्, किं सुखं किं दुःखम्, किमुत्सवः किं व्यसनम्, किं जीवितं किं मरणम्, किं गतः किं स्थित इति। केवलमनाख्येयमवस्थान्तरं प्राप्य मूर्च्छानिमिलितनयनो निपतितो धरणीपृष्ठे, वियुक्तासुरिव स्थितः कञ्चित्कालम्। जलधिमारुतसमागमेन च लब्धा चेतना। चिन्तितं मया। यावदेषोऽजगरो न देशान्तरमुपसर्पति तावदेवानेनात्मानं खादयामि। मृतस्यापि बहुमत एव मे देवीसमागम इति। गतोऽजगरसमीपम्। स च मां दृष्ट्वा कृतापराध इव कुपुरुषः संकुचितोऽजगरः। चिन्तितं मया–मृतस्यापि प्रियतमासमागमो दुर्लभ इति। ततः 'कथमकुपितो मां गृहीत्वा ग्रसिष्यति' इति आहत उत्तमाङ्गभागेऽजगरः। भयकातरेण च तेन निर्गिलितो नयनमोहनः पटः, आरब्धा मण्डली, निशामितः फणाभोगः। ततः प्रियतमागात्रसङ्गबहुमानेन गृहीतः पटः, वितीर्णो वक्षः

१ गिलावेमि क। २ तओ कुविएण विय कहं णामाकुविओ गसिस्सइ त्ति ख।

भमियं विय काणणेहिं, निवडियं विय नहङ्गणेणं, विणिग्गयाइं नयणाइं, अवसीहूयं सरीरयं। अओ परमणाचिक्खणीयं अणणुभूयपुव्वं संमोहमणुपत्तो म्हि। थेववेलाए य सुमिणए विय दिट्ठो मए कमण्डलुपाणिएण ममं चेव गत्तसिञ्चणवावडो रिसी। समागया चेयणा। चिन्तियं च। हन्त, धरणिगओ अहं, न विवन्नो चेव मन्दपुण्णो त्ति। तओ परामुट्ठं मे अङ्गमिसिणा। भणिओ य सो मए। भयवं, किं तए ववसिय त्ति। तेण भणियं। सुण। दिट्ठो तु अत्तवावायणुज्जओ मए दूरदेसवत्तिणा कुसुमसामिहेयागएणं। तओ 'हा को पुण एसो सप्पुरिसनिन्दियं मग्गं पवज्जइ, किंवा से ववसायकारणं पुच्छिऊण निवारेमि एयं' ति चिन्तिऊण पयट्टो तुरियतुरियं, जाव मुक्को तए अप्पा। तओ 'मा साहसं मा साहसं'ति भणमाणो तुरियपरं धाविओ पत्तो य नग्गोहसमीवं। एत्थन्तरंमि तुट्टो ते पासओ। निवडिओ धरणिवट्टे। तओ य सित्तो मए कमण्डलुपाणिएण, लद्धचेयणं मुणिऊण परामुट्ठं च ते अङ्गं। एय मे ववसियं

स्थले। चिन्तितं च मया-एतमेव नयनमोहनं हृदये दत्त्वा उल्लम्बनेन व्यापादयाम्यात्मानमिति। गतो न्यग्रोधसमीपम्, यत्र प्रियतमा प्रसुप्ताऽऽसीत्। निबद्धः पाशकः, छायागतेन च न्यस्ता शिरोधरा, विमुक्त आत्मा, निबद्धः कण्ठदेशः। ततः भ्रान्तमिव काननैः, निपतितमिव नभोऽङ्गणेन, विनिर्गते नयने, अवशीभूतं शरीरम्। अतः परमनाख्येयमननुभूतपूर्वं संमोहमनुप्राप्तोऽस्मि। स्तोकवेलायां च स्वप्ने इव दृष्टो मया कमण्डलुपानीयेन ममैव गात्रसेचनव्यापृत ऋषिः। समागता चेतना, चिन्तितं च। हन्त, धरणीगतोऽहम्, न विपन्न एव मन्दपुण्य इति। ततः परामृष्टं मेऽङ्गमृषिणा। भणितश्च स मया। भगवन्! किं त्वया व्यवसितमिति। तेन भणितम्-शृणु। दृष्टस्त्वमात्मव्यापादनोद्यतो मया दूरदेशवर्तिना कुसुम-सामिधेया(काष्ठा)गतेन। ततो हा कः पुनरेष सत्पुरुषनिन्दितं मार्गं प्रपद्यते, किंवा तस्य व्यवसायकारणं पृष्ट्वा निवारयाम्येतम्' इति चिन्तयित्वा प्रवृत्तस्त्वरितत्वरितम्, यावन्मुक्तस्त्वयाऽऽत्मा। ततो 'मा साहसं मा साहसं' इति भणन् त्वरिततरं धावितः प्राप्तश्च न्यग्रोधसमीपम्। अत्रान्तरे त्रुटितस्ते पाशः। निपतितो धरणीपृष्ठे।

ति। ता आचिक्ख धम्मसील, किं पुण इमस्स ववसायस्स कारणं। तओ सविलिएणं जंपियं मए। भयवं, अलं मे ववसायकारणेणं।
तेण भणियं। वच्छ, अलं ते लज्जाए। सव्वस्स जणणिभूओ तवस्सिजणो होइ। अमुणियवुत्तन्तो य किमहं भणामि त्ति। ता आचि
क्खउ भवं। तओ मए 'अकारणवच्छलो माणणीओ गिहिणो जइजणो' त्ति चिन्तिऊण साहिओ सेयवियानिग्गमणाइओ उक्कलम्बणा-
वसाणो निययवुत्तन्तो। भणियं च तेण। वच्छ, ईइसो एस संसारो। एत्थ खलु सरयजलहरसमं जीवियं, कुसुमियतरुसमाओ रिद्धीओ,
सुमिणओवभोयसरिसा विसयभोगा, विओयावसाणाइं पियजणसमागमाइं। ता परिच्चय इमं ववसायं ति। न परिचत्तपाणो वि जीवो
अकाऊण कुसलसंचयं समीहियं संपावेइ त्ति। मए भणियं। भयवं, एवमेयं; तहावि न सक्कुणोमि पिययमाविरहजलणजालावलीपे-
रियरिओ खणे खणे मरणाइरित्तं दुक्खमणुहविउं। ता अवस्सं मरणुज्जयस्स आचिक्ख भयवं, केण उण उवाएण इयाणिं चेव मे लोय-

ततश्च सिक्तो मया कमण्डलुपानीयेन। लब्धचेतनं ज्ञात्वा परामृष्टं च तेऽङ्गम्। एतन्मे व्यवसितमिति। तत आचक्ष्व धर्मशील!
किं पुनरस्य व्यवसायस्य कारणम्। ततः सव्यलीकेन जल्पितं मया-भगवन्! अलं मे व्यवसायकारणेन। तेन भणितम्-वत्स!
अलं ते लज्जया, सर्वस्य जननीभूतः तपस्विजनो भवति, अज्ञातवृत्तान्तश्च किमहं भणामि इति। तत आचष्टां भवान्। ततो
मया 'अकारणवत्सलो माननीयो गृहिणो यतिजनः' इति चिन्तयित्वा कथितः श्वेतविकानिर्गमनादिक उत्कलम्बनावसानो निजवृत्तान्तः।
भणितं च तेन-वत्स ईदृश एष संसारः। अत्र खलु शरज्जलधरसमं जीवितम्, कुसुमिततरुसमा ऋद्धयः, स्वप्नोपभोगसदृशा
विषयभोगाः, वियोगावसानाः प्रियजनसमागमाः। ततः परित्यजेमं व्यवसायमिति। न परित्यक्तप्राणोऽपि जीवोऽकृत्वा कुशलसंचयं
समीहितं संप्राप्नोतीति। मया भणितम्-भगवन्! एवमेतद्, तथाऽपि न शक्नोमि प्रियतमाविरहज्वलनज्वालावलिपरिवृतः क्षणे क्षणे

१ धम्मसीलया क। २ परियओ क।

न्तरगयाए वि पियथमाए संजोगो हवेज्ज त्ति। तेण भणियं। जइ एवं, ता सुण। अत्थि इहेव मलयपव्वए मणोरहापूरयं नाम सिहरं। तं च किल कामियं पडणं। ता एयमारुहिय काऊण जहोचियं पणिहाणं पाविहिसि समीहियं ति। तओ मए पणमिऊण चलणजुयलं पुच्छिओ इसी। भयवं, कहिं पुण तमुद्देसं मणोरहापूरयं ति। दंसियमणेण। पयट्टो अहयं, पत्तो तइयदियहे। आरूढो सप्पुरिसाहिमाणं व तुङ्गं सिहरं। 'जम्मन्तरे वि तीए समागमो हवेज्ज' त्ति भणिय कओ पणिही, विमुक्को अप्पा। 'अहो पमाओ' त्ति भणमाणेण गयणयलचारिणा धुव्वन्तचीणंसुएणं वामपासनिमियासिणा संभमोवयणवियलियमुण्डमालेण चन्दाणुगारिणा अच्चन्तसोमदंसणेण पडिच्छिओ विज्जाहरेण, नीओ सहावसीयलं चन्दकन्तमणिसणाहं चन्दणलयाहरयं। समासासिऊण भणिओ य तेण। भो महासत्त, किं पुण ते अणन्नमरिमागिइपिसुणियमहापुरिसभावस्स इमं ईइसं इयरपुरिसाणुरूवं चेट्ठियं, किं वा एत्थ कारणं; साहेहि ताव, जइ

मरणातिरिक्तं दुःखमनुभवितुम्। ततोऽवश्यं मरणोद्यतस्याचक्ष्व भगवन्! केन पुनरुपायेन इदानीमेव मे लोकान्तरगताया अपि प्रियतमायाः संयोगो भवेदिति। तेन भणितम्-यद्येवं ततः शृणु। अस्ति इहैव मलयपर्वते मनोरथापूरकं नाम शिखरम्। तच्च किल कामितं पतनम्। तत एतदारुह्य कृत्वा यथोचितं प्रणिधानं प्राप्स्यसि समीहितमिति। ततो मया प्रणम्य चरणयुगलं पृष्ट ऋषिः। भगवन्! कुत्र पुनस्तदुद्देशं मनोरथापूरकमिति। दर्शितमनेन। प्रवृत्तोऽहम्, प्राप्तस्तृतीयदिवसे। आरूढः सत्पुरुषाभिमानमिव तुङ्गं शिखरम्। 'जन्मान्तरेऽपि तया समागमो भवेद्' इति भणित्वा कृतः प्रणिधिः, विमुक्त आत्मा। 'अहो प्रमादः' इति भणता गगनतलचारिणा धूयमानचीनांशुकेन वामपार्श्वन्यस्तासिना संभ्रमावपतनविचलितमुण्डमालेन चन्द्रानुकारिणाऽत्यन्तसौम्यदर्शनेन प्रतीष्टो विद्याधरेण, नीतः स्वभावशीतलं चन्द्रकान्तमणिसनाथं चन्दनलतागृहम्। समाश्वास्य भणितश्च तेन। भो महासत्त्व! किं पुनस्तेऽनन्य-

---

१ तमुद्देस-क। २ -माणमिवोतुङ्ग ख।

अकहणीयं न होइ । मए भणियं । किं नाम परोवयारनिरयस्स दोसवज्जिणो विइयपाणिधम्मस्स सज्जणस्सावि अकहणीयं । ता सुणउ भद्दो । पिययमाविओयवावायणुज्जयस्स साहियं मे रिसिणा इमं मणोरहाऊरयं कामियं पडणं । तओ 'जम्मन्तरंमि वि पिययमाजोओ हवेज्ज' त्ति काऊण पणिहाणं विमुक्को अप्पा । एयं मे एत्थ कारणं ति । तओ ईसि विहसिऊण भणियं विज्जाहरेण । अहो णु खलु नत्थि दुक्करं सिणेहस्स । सिणेहो हि नाम मूलं सव्वदुक्खाणं निवासो अविवेयस्स अग्गला निव्वुईए बन्धवो कुगइवासस्स पडिवक्खो कुसलजोयाणं देसओ संसाराडवीए वच्छलो असच्चववसायस्स । एएण अभिभूया पाणिणो न गणन्ति आयइं, न जोयन्ति कालोचियं, न सेवन्ति धम्मं, न पेच्छन्ति परमत्थं, महालोहपञ्जरगया विय केसरिणो समत्था वि सीयन्ति त्ति । सविसओ वि एस एवं पावो, किमङ्ग पुण अविसओ । ता परिच्चय इमं अविसयसिणेहं । आलोएहि विवेयदीवालोएण निव्वासिऊण मोहतिमिरं, कहं विचित्तकम्मपरिणा-

---

महदाकृतिपिशुनितमहापुरुषभावस्य इयमीदृशमितरपुरुषानुरूपं चेष्टितम्, किंवाऽत्र कारणम्, कथय तावद् यद्यकथनीयं न भवति । मया भणितम्, किं नाम परोपकारनिरतस्य दोषवर्जिनो विदितप्राणिधर्मस्य सज्जनस्याप्यकथनीयम् । ततः शृणोतु भद्रः । प्रियतमा-वियोगव्यापादनोद्यतस्य कथितं मे ऋषिणा इदं मनोरथापूरकं कामितं पतनम् । ततो 'जन्मान्तरेऽपि प्रियतमायोगो भवेद्' इति कृत्वा प्रणिधानं विमुक्त आत्मा । एतन्मेऽत्र कारणमिति । तत ईषद् विहस्य भणितं विद्याधरेण । अहो नु खलु नास्ति दुष्करं स्नेहस्य । स्नेहो नाम मूलं सर्वदुःखानां निवासोऽविवेकस्य अर्गला निर्वृतेः बान्धवः कुगतिवासस्य प्रतिपक्षः कुशलयोगानां देशकः संसाराटव्या वत्सलोऽसत्यव्यवसायस्य । एतेनाभिभूताः प्राणिनो न गणयन्त्यायतिम्, न पश्यन्ति कालोचितम्, न सेवन्ते धर्मम्, न प्रेक्षन्ते पर-मार्थम्, महालोहपञ्जरगता इव केसरिणः समर्था अपि सीदन्तीति । सविषयोऽपि एष एवं पापः, किमङ्ग पुनरविषय इति । ततः परित्य-जेममविषयस्नेहम् । आलोचय विवेकदीपालोकेन निर्नाश्य मोहतिमिरम्, कथं विचित्रकर्मपरिणामवशगानां जीवानां पतनानुभावत एका

मवसयाणं जीवाणं पडणाणुद्दावओ एगा गई संगमो वा । तहाकम्मपरिणइभावे य किं इमिणा संरम्भेणं । अहिलसियसाहगोवाओ वि य न दाणसीलत्तवे मोत्तूण एत्थ दिट्ठो परमत्थपेच्छएहिं ति ।

अन्नं साहेमि अहं पच्चयजणयं तु सव्वसत्ताणं । जं वित्तं वणियाणं अच्चन्तविरुद्धयं सोम ॥

नेहेण पओसेण य भिन्नं काऊण एत्थ पणिहाणं । जह तं मंज्जुपईयं निहणगयं तं निसामेहि ॥

अत्थि इह मलयविसए कण्णियारसिवं नाम सन्निवेसो । तत्थ सँम्मिलओ नाम गाहावई । तस्स नामओ वि अमणुन्ना सीहा नाम भारिया । सो पुण इमीसे जीवियाओ वि इट्ठयरो । ताणं च परोप्परं विओयदंसणे बहु मन्नन्ताणमइक्कन्तो कोइ कालो । अन्नया य आयण्णियं तेणं मणोहरापूरयं कामियं पडणं । जायानिव्वेयओ आगन्तूणं ■■ मम जम्मन्तरंमि वि एसा भारिया हवेज'त्ति काऊण

गतिः समागमो वा । तथाकर्मपरिणतिमात्रे च किमनेन संरम्भेण । अभिलषितसाधकोपायोऽपि च न दानशीलतपांसि मुक्त्वाऽत्र दृष्टः परमार्थप्रेक्षकैरिति ।

अन्यत्कथयाम्यहं प्रत्ययजनकं तु सर्वसत्त्वानाम् । यद् वृत्तं वणिजोरत्यन्तविरुद्धकं सौम्य ! ॥

स्नेहेन प्रद्वेषेण च भिन्नं कृत्वाऽत्र प्रणिधानम् । यथा तद् भार्यापत्योर्निधनगतं तद् निशामय ॥

अस्तीह मलयविषये कर्णिकारशिवं नाम सन्निवेशः । तत्र सम्मिलको नाम गृहपतिः । तस्य नामतोऽपि अमनोज्ञा सिंहा नाम भार्या । स पुनरस्या जीवितादपीष्टतरः । तयोश्च परस्परं वियोगदर्शने बहु मन्यतोरतिक्रान्तः कोऽपि कालः । अन्यदा चाकर्णितं तेन मनोरथा-

१ समारंभेण क ■ । २ भज्जपईय ख, मञ्जूपईय ■ । ३ सन्निओ ग, समिलओ क । ४ जायानिव्वेएण

पणिहाण विमुक्को अप्पा, मओ य सो। मुणिओ य एस वुत्तन्तो भारियाए। गहिया सोएणं। आगया इमं पडणं। भत्तारसिणेहओ कओ तीए पणिही 'जम्मन्तरंमि वि सो चेव मे भत्ता भवेज्ज' त्ति। विमुक्को अप्पा, मया य सा। परोप्परविरोहओ य तक्केमि, न संपन्ना तेसिं मणोरहा॥ ता किं एइणा जुत्तिविरहियविसएण अणुट्ठाणेणं। कहं कया वा पिययमाए विओओ संजाओ त्ति ता आचिक्खउ एयं। तओ मए 'सुन्दरं भणइ' त्ति चिन्तिऊण साहिओ अयगरवुत्तन्तो। तइयदियहो य इमस्स वत्तस्स। विज्जाहरेण भणियं। केद्दूरे वत्तं त्ति। मए भणियं। अत्थि इओ दसहिं जोयणेहिं। विज्जाहरेण भणियं। जइ एवं, ता अलं विसाएण; न विवन्ना ते पिययमा। मए भणियं। कहं विय। तेण भणियं। सुण। अत्थि अणेयविज्जाहरनरिन्दमउलिमणिप्पभाविसरविच्छुरियपायपीढो चक्कसेणो नाम विज्जाहरवई। पारद्धं च तेण अपडिहयचक्काए महाविज्जाए साहणं। दुवालसमासिया से कया पुव्वसेवा। तओ अडयालीसं जोयणं

पूरकं कामित पतनम्। जायानिर्वेदतश्चागत्य 'मा मम जन्मान्तरेऽप्येषा भार्या भवेद्' इति कृत्वा प्रणिधानं विमुक्त आत्मा, मृतश्च सः। ज्ञातश्चैष वृत्तान्तो भार्यया। गृहीता शोकेन। आगतेदं पतनम्। भर्तृस्नेहतः कृतस्तया प्रणिधिः 'जन्मान्तरेऽपि स एव मे भर्ता भवेद्' इति। विमुक्त आत्मा, मृता च सा। परस्परविरोधतश्च तर्कयामि, न संपन्ना तयोर्मनोरथाः। ततः किमेतेन युक्तिविरहितविषयेणानुष्ठानेन। कथं कदा वा प्रियतमाया वियोगः संजात इति तावद् आचक्ष्व एतद्। ततो 'सुन्दरं भणति' इति चिन्तयित्वा कथितोऽजगरवृत्तान्तः। तृतीयदिवसश्चास्य वृत्तस्य। विद्याधरेण भणितम्-कियद्दूरे वृत्तमिति। मया भणितम्-अस्तीतो दशभिर्योजनैः। विद्याधरेण भणितम्-यद्येवं ततोऽलं विषादेन, न विपन्ना ते प्रियतमा। मया भणितम्-कथमिव। तेन भणितम्-शृणु। अस्ति अनेकविद्याधरनरेन्द्रमौलिमणिप्रभाविसरविच्छुरितपादपीठश्चक्रसेनो नाम विद्याधरपतिः। प्रारब्धं च तेनाप्रतिहतचक्राया महाविद्यायाः

१ च्चेव क। २ -लीस ख।

काऊण खेत्तसुद्धिं सव्वसत्ताणं दाऊणमभयदाणं 'सत्तरत्तं जाव रक्खियव्वा इह महापयत्तेणं हिंस' त्ति निरूविऊण नियसरीरभूए विज्जाहरे पहाणसिद्धिनिमित्तं एगागी चेव गेण्हिऊण फलिहमणिवलयं पविट्ठो सिद्धिनिलयाभिहाणं मलयगिरिगुहं ति। पारद्धो तेण सत्तलक्खिओ मन्तजावो। पूराणि य से समं पणइमणोरहेहिं अज्जेव सत्त राइंदियाइं, भविस्सइ य सुए सामिणो विज्जासिद्धी। अओ अवगच्छामि, एद्दहमेत्तखेत्तमज्झगया न विवन्ना ते पिययमा; जओ उज्जुत्ता सामिकज्जे विज्जाहरा॥ तओ मए चिन्तियं। एवमेयं जुत्तिसंगयं च। अन्नहा कहं पडरयणपाउयाए केवलपडरयणगसणं, कहं वा तक्खणोवभुत्ताए तहा मण्डलिकरणं अयगरस्स त्ति। चिन्तिऊण भणिओ विज्जाहरो। भो महापुरिस, जइ एवं, ता पुज्जन्तु ते मणोरहा। आसासिओ अहं भयवया, नियत्तिओ अकुसलववसायाओ। ता चिट्ठ तुमं, अहं पुण गच्छामि पिययमं अन्नेसिउं। विज्जाहरेण भणियं। अलं किलेसेण। अहमेव फलं संपाडियदेवसासणो

साधनम्। द्वादशमासिकी तस्याः कृता पूर्वसेवा। ततोऽष्टचत्वारिंशद्योजनां कृत्वा क्षेत्रशुद्धिं सर्वसत्त्वेभ्यो दत्वाऽभयदानं 'सप्तरात्रं यावद् रक्षितव्येह महाप्रयत्नेन हिंसा' इति निरूप्य निजशरीरभूतान् विद्याधरान् प्रधानसिद्धिनिमित्तं एकाक्येव गृहीत्वा स्फटिकमणिवलयं प्रविष्टः सिद्धिनिलयाभिधानां मलयगिरिगुहामिति। प्रारब्धस्तेन सप्तलक्षिको मन्त्रजापः। पूर्णानि च तस्य समं प्रणयिमनोरथैरद्यैव सप्त रात्रिंदिवानि, भविष्यति च श्वः स्वामिनो विद्यासिद्धिः। अतोऽवगच्छामि एतावन्मात्रक्षेत्रमध्यगता न विपन्ना ते प्रियतमा, यत उद्युक्ताः स्वामिकार्ये विद्याधराः। ततो मया चिन्तितम्—एवमेतद् युक्तिसंगतं च। अन्यथा कथं पटरत्नप्रावृताया: केवलपटरत्नग्रसनम्, कथं वा तत्क्षणोपभुक्तायां तथा मण्डलीकरणमजगरस्येति। चिन्तयित्वा भणितो विद्याधरः। भो महापुरुष! यद्येवं ततः पूर्यन्तां ते मनोरथाः। आश्वासितोऽहं भगवता. निवर्तितोऽकुशलव्यवसायात्। ततस्तिष्ठ त्वम्, अहं पुनर्गच्छामि प्रियतमा-

१ नियय- ख। २ मे ते क।

पडिपुण्णमणोरहो सेसविज्जाहरेहिंतो उवलहिऊण[2] जहट्ठियं वुत्तन्तं पिययमं ते घडिस्सामि[3]। तओ मए 'अलङ्घणीयवयणो सुहि'[4] त्ति चिन्तिऊण 'जं तुमं भणासि' त्ति बहुमन्निओ विज्जाहरो।

अइक्कन्तो वासरो। अद्धजामावसेसाए रयणीए अयण्डम्मि चेव उज्जोवियं(य)नहङ्गणं, संखुहिय[5]जलनिहिं पयम्पियमहियल[6] गिज्ज न्तमङ्गलं च समागयं सुरविमाणागारमणुगरेन्तं विज्जाहरविमाणं। तओ [7]संभन्तो उट्ठिओ विज्जाहरो। भणियं च तेण। भो भो पेक्ख पेक्ख संसिद्धमहाविज्जस्स सामिणो चक्कसेणस्स रिद्धिं। पेच्छमाणाण य वोलियं चडगरेणं, पभाया रयणी, उग्गओ अंसुमाली। तओ य मं घेत्तूण गओ चक्कसेणसमीवं निव्वुइकरं नाम मलयसिहरं। पणमिओ तेण विज्जाहरीसरो। विइण्णाइं आसणाइं। उवविट्ठा अम्हे। साहिओ तेण मदीयवुत्तन्तो चक्कसेणस्स। भणियं च तेण। भो महापुरिस, मा संतप्प। अज्जेव ते पिययमं घडिस्सामि त्ति॥ एत्थ-

मन्वेषयितुम्। विद्याधरेण भणितम्—अलं क्लेशेन। अहमेव कल्ये संपाश्रितदेवशासनः प्रतिपूर्णमनोरथः शेषविद्याधरेभ्य उपलभ्य यथास्थितं वृत्तान्तं ते प्रियतमां घटयिष्यामि। ततो मया 'अलङ्घनीयवचनः सुहृद्' इति चिन्तयित्वा 'यत्त्वं भणसि' इति बहुमानितो विद्याधरः।

अतिक्रान्तो वासरः। अर्धयामावशेषायां रजन्यामकाण्डे एवोद्द्योतितनभोऽङ्गणम्, संक्षोभितजलनिधि, प्रकम्पितमहीतलम्, गीयमानमङ्गलं च समागतं सुरविमानाकारमनुकुर्वद् विद्याधरविमानम्। ततः संभ्रान्त उत्थितो विद्याधरः, भणितं च तेन। भो भोः! प्रेक्षस्व प्रेक्षस्व संसिद्धमहाविद्यस्य स्वामिनश्चक्रसेनस्य ऋद्धिम्। प्रेक्षमाणयोश्चातिक्रान्तं चटकरेण (समूहेन)। प्रभाता रजनी, उद्गतोऽशुमाली। ततश्च मां गृहीत्वा गतश्चक्रसेनसमीपं निर्वृतिकरं नाम मलयशिखरम्। प्रणतस्तेन विद्याधरेश्वरः। वितीर्णे आसने। उपविष्टावावाम्।

१ परिपुण्ण–क। २ उवलभिऊण ख। ३ –मि त्ति क। ४ सुणहि ख। ५ सखुहिओ जलनिही क–ग। ६ पयम्पिय महियल क–ग। ७ नास्ति ख पुस्तके। ८ ससभतो क। ९ मतीय–ख।

न्तरंमि समागया दुवे विज्जाहरा। पणमिओ तेहिं चक्कसेणो। भणियं च एगेण। महाराय, देवसमाएसेणेव सयलजीवोवघायपरिरक्खणनिमित्तं ममन्तेहिं काणणन्तराइं एगम्मि उद्देसे दिट्ठा महाकायअयगरभएण मोत्तूण उत्तरीयं 'हा अज्जउत्त, हा अज्जउत्त'त्ति भणमाणी [उट्ठिया पल्लवसयणीयाओ] पलायमाणा इत्थिया। निवडिऊण वावत्तिभीएहिं गहिया य अम्हेहिं, उवणीया मलयसिहरं, विमुक्का य पल्लवसयणिज्जे। मुच्छिया विय ठिया कञ्चि कालं। तओ भयवेविरङ्गी 'हा अज्जउत्त हा अज्जउत्त' त्ति भणमाणी उट्ठिया पल्लवसयणीयाओ। भणिया य अम्हेहिं। सुन्दरि, अलं ते भएण; साहेहि ताव, कहिं ते अज्जउत्तो। तीए भणियं। उदयस्स सरवरं गओ त्ति। तओ गविट्ठो तत्थ अम्हेहिं, न उण उवलद्धो त्ति। सा उण तओ चेव दिवसाओ आरब्भ अकयपाणवित्ती 'हा अज्जउत्त हा अज्जउत्त'त्ति-परायणा चिट्ठइ। एयं सोऊण देवो पमाणं ति। तओ मं पुलोइऊण भणियं चक्कसेणेण। भद्द, निरूवेहि ताव, किं सा भवओ पिययमा

कथितस्तेन मदीयवृत्तान्तश्चक्रसेनाय। भणितं च तेन-भो महापुरुष! मा संतप्यस्व, अद्यैव ते प्रियतमां घटयिष्यामीति। अत्रान्तरे समागतौ द्वौ विद्याधरौ। प्रणतस्ताभ्यां चक्रसेनः। भणितं चैकेन-महाराज! देवसमादेशेनैव सकलजीवोपघातपरिरक्षणनिमित्तं भ्रमद्भ्यां काननान्तराणि एकस्मिन्नुद्देशे दृष्टा महाकायाजगरभयेन मुक्त्वोत्तरीयं 'हा आर्यपुत्र! हा आर्यपुत्र!' इति भणन्ती [उत्थिता पल्लवशयनीयात्] पलायमाना स्त्री। निपत्य व्यापत्तिभीताभ्यां गृहीता चावाभ्याम्, उपनीता मलयशिखरम्। विमुक्ता च पल्लवशयनीये॥ मूर्च्छितेव स्थिता कञ्चित्कालम्। ततो भयवेपमानाङ्गी 'हा आर्यपुत्र! हा आर्यपुत्र'! इति भणन्ती उत्थिता पल्लवशयनीयात्। भणिता चावाभ्याम्-सुन्दरि! अलं ते भयेन, कथय तावत् कुत्र ते आर्यपुत्रः। तया भणितम्-उदकाय सरोवरं गत इति। ततो गवेषितस्तत्रावाभ्याम्, न पुनरुपलब्ध इति। सा पुनस्तत एव दिवसादारभ्य अकृतप्राणवृत्तिः 'हा आर्यपुत्र! हा आर्यपुत्र'! इति परायणा तिष्ठति।

१ अ. पाठः कपुस्तकप्रान्तभागे। २ उण क। ३ कहिं गओ कहिं गओ त्ति क। ४ ताव त्ति परायणा ख। ५ पलोइऊण क।

न व त्ति। तओ विज्जाहरदुइओ गओ चन्दणवणाभिरामं मलयसाणुं। दिट्ठा य सयलकलोववेया वि बीयचन्दलेहागारमणुगारेन्ती कण्ठगयजीविया विलासवई। ऊससियं मे हियएण। समासासिया एसा, कारिया विज्जाहरोवणीएणं सयलिन्दिओवयारिणा दिव्वाहारेण पाणवित्ति। साहियं चक्कसेणस्स, जहा स चेव मे पिययम त्ति। चक्कसेणेण भणियं। सुन्दरं जायं। भद्द भण, किं ते अवरं करणिज्जं करेमि त्ति। मए भणियं। नत्थि अओ वि अवरं करणिज्जं ति। तेण भणियं। भद्द, देहलक्खणेहिंतो चेयावगच्छामि, भवियव्वं तए विज्जाहरनरिन्देण। ता गेण्हाहि एयं महापुरिसववसायमेत्तसाहणं अजियबलं नाम महाविज्जं ति। पाएणमविग्घसाहणा एसा परिणामफलदा य। तओ मए सुमरिऊण बालभावसाहियं संवच्छरियवयणं 'माणणीया महापुरिस'त्ति चिन्तिऊण जंपियं 'जं तुमं भणासि' त्ति। तओ तेण दिइण्णा विज्जा, साहिओ साहणोवाओ। तओ गएसु विज्जाहरेसु समुप्पन्ना मे चिन्ता। [1]सिद्धिखेत्तमेयं, एयाई य अहं।

एतच्छ्रुत्वा देवः प्रमाणमिति। ततो मां प्रलोक्य भणितं चक्रसेनेन। भद्र! निरूपय तावत् किं सा भवतः प्रियतमा नवेति। ततो विद्याधरद्वितीयो गतश्चन्दनवनाभिरामं मलयसानु। दृष्टा च सकलकलोपेताऽपि द्वितीयाचन्द्रलेखाकारमनुकुर्वती कण्ठगतजीविता विलासवती। उच्छ्वसितं मे हृदयेन। समाश्वासितैषा, कारिता विद्याधरोपनीतेन सकलेन्द्रियोपकारिणा दिव्याहारेण प्राणवृत्तिम्। कथितं चक्रसेनाय यथा सैव मे प्रियतमेति। चक्रसेनेन भणितम्–सुन्दरं जातम्। भद्र! भण, किं तेऽपरं करणीयं करोमीति। मया भणितम्–नास्त्यतोऽपि अवरं करणीयमिति। तेन भणितम्–भद्र! देहलक्षणेभ्य एवावगच्छामि भवितव्यं त्वया विद्याधरनरेन्द्रेण। ततो गृहाणैतां महापुरुषव्यवसायमात्रसाधनामजितबलां नाम महाविद्यामिति। प्रायेणाविघ्नसाधनैषा परिणामफलदा च। ततो मया स्मृत्वा बालभावकथितं सांवत्सरिकवचनं 'माननीया महापुरुषाः' इति चिन्तयित्वा जल्पितं 'यत्त्वं भणसि' इति। ततस्तेन वितीर्णा विद्या, कथितः साधनोपायः। ततो

---

१ चन्द– क। २ सिद्ध–ख।

ता कहं पुण विणा उत्तरसाहएण एयं पसाहेमि त्ति। सुमरियं च वसुभूइणो। एत्थन्तरंमि भवियव्वयानिओएण सूययन्तो विय महाविज्ञासिद्धिं तावसवेसधारी समागओ वसुभूई। बाहोल्ललोयणं च सगग्गयक्खरं 'अहो देव्वपरिणामो' त्ति जंपमाणेण आलिङ्गिओ अहमणेण। किमेयं ति सवियक्केण पणमिओ सो मए देवीए य। 'वयस्स चिरं जीवसु, तुमं पि अविहवा होहि' त्ति जंपियमणेण। वसुभूइ त्ति पच्चभिन्नाओ मए सद्देणं। संपत्तो अहमणाचिक्खणीयं परिओसं। आणन्दबाहजलभरियलोयणं दिन्नं से मए पल्लवासणं। संपाडियं देवीए चलणसोयं। काराविओ पाणवित्तिं, पुच्छिओ वुत्तन्तं। वयस्स, कहं पुण तुमं नित्थिण्णो समुद्दं; किं वा पावियं तए; कुओ वा संपयं ति। वसुभूइणा भणियं। सुण।

विवन्ने जाणवत्ते संपत्ते तहाविहे फलए तओ फलहगदुइओ भवियव्वयानिओएण पञ्चहिं दिणेहिं लङ्घिऊण जलनिहिं लग्गो मल-

गतेषु विद्याधरेषु समुत्पन्ना मे चिन्ता-सिद्धिक्षेत्रमेतद्, एकाकी चाहम्, ततः कथं पुनर्विना उत्तरसाधकेनैतां प्रसाधयामीति। स्मृतं च वसुभूतेः। अत्रान्तरे भवितव्यतानियोगेन सूचयन्निव महाविद्यासिद्धिं तापसवेषधारी समागतो वसुभूतिः। बाष्पार्द्रलोचनं च सगद्गदाक्षरं 'अहो दैवपरिणामः' इति जल्पताऽऽलिङ्गितोऽहमनेन। किमेतदिति सवितर्केण प्रणतः स मया देव्या च। 'वयस्य! चिरं जीव, त्वमपि अविधवा भव' इति जल्पितमनेन। वसुभूतिरिति प्रत्यभिज्ञातो मया शब्देन। संप्राप्तोऽनाख्यानीयं परितोषम्। आनन्दबाष्पजलभृतलोचनं दत्तं तस्मै मया पल्लवासनम्। संपादितं देव्या चरणशौचम्। कारितः प्राणवृत्तिम्। पृष्टो वृत्तान्तम्। वयस्य! कथं पुनस्त्वं निस्तीर्णः समुद्रम्, किं वा प्राप्तं त्वया, कुतो वा साम्प्रतमिति। वसुभूतिना भणितम्-शृणु।

विपन्ने यानपात्रे संप्राप्ते तथाविधे फलके ततः फलकद्वितीयो भवितव्यतानियोगेन पञ्चभिर्दिनैर्लङ्घित्वा जलनिधिं लग्नो मलयकूले,

१ फलग- क।

यकूले, दिट्ठो य समुद्दतडावलोयणगएणं तावसेणं। समासासिओ तेण भणिओ य। वच्छ, तवोवणं गच्छम्ह। गओ तवोवणं। दिट्ठो कुलवई, वन्दिओ सबहुमाणं। काराविओ य तेणाहं पाणविचिं। पुच्छिओ पच्छा 'वच्छ, कुओ भवं' ति। साहिओ से सयलवुत्तन्तो। 'ईइसो एस संसारो' त्ति अणुसासिओ तेणं। तओ मए चिन्तियं। वयस्सविउत्तस्स तवोवणं चेव रमणीयं। अलमन्नहिं गएण, अलं च सुविणयसमागमविब्भमे सुयणसंगमंमि इमिणा संसारपरिकिलेसेणं ति। चिन्तिऊण निवेइओ कुलवइणो निययाहिप्पाओ। भणियं च तेण। वच्छ, उचियमिणं; किं तु अइरोद्दा कम्मपरिणई, दुप्परिचया सिणेहतन्तवो, विसमाइं इन्दियाइं, अब्भत्था विसया, दुप्परिचओ संसारपरिकिलेसो, विसमं मुणिजणचरियं, अब्भुवगयापालणं च अणत्थसङ्गयं परलोए लज्जावणिज्जयं इहलोयम्मि। ता नाऊणमुचियमागमत्थं तुलिऊणमप्पाणय जुज्जए संसारपरिकिलेसचाओ न उण अन्नह त्ति। अवं च। नाणओ अवगच्छामि, धरइ ते पियव-

दृष्टश्च समुद्रतटावलोकनगतेन तापसेन। समाश्वासितस्तेन भणितश्च। वत्स! तपोवनं गच्छावः। गतो तपोवनम्। दृष्टः कुलपतिः, वन्दितः सबहुमानम्। कारितश्च तेनाहं प्राणवृत्तिम्। पृष्टः पश्चाद् 'वत्स! कुतो भवान्' इति। कथितस्तस्मै सकलवृत्तान्तः। 'ईदृश एष संसारः' इति अनुशिष्टस्तेन। ततो मया चिन्तितम्-वयस्यवियुक्तस्य तपोवनमेव रमणीयम्। अलमन्यत्र गतेन, अलं च स्वप्नसमागमविभ्रमे सुजनसङ्गमेऽनेन संसारपरिक्लेशेनेति। चिन्तयित्वा निवेदितः कुलपतये निजाभिप्रायः। भणितं च तेन-वत्स! उचितमिदम्, किन्तु अतिरौद्रा कर्मपरिणतिः, दुष्परित्यजाः स्नेहतन्तवः, विषमाणीन्द्रियाणि, अभ्यस्ता विषयाः, दुष्परित्यजः संसारपरिक्लेशः, विषमं मुनिजनचरितम्, अभ्युपगतापालनं चानर्थसंगतं परलोके लज्जनीयमिहलोके। ततो ज्ञात्वोचितागमार्थं तोलयित्वाऽऽत्मानं युज्यते

१ दंस- क। २ -परिसव-क। ३ न वाइ परिनिंहा कपुस्तकप्रान्तभागे। ४ अइरोद्दकम्म-क-ख।

पत्तो पाणे, " भविस्सइ तेण तुह सङ्गमो। ता इमं ताव एत्थ पत्तकालं, तवस्सिजणं चेव पज्जुवासमाणो कञ्चि कालं चिट्ठसु त्ति। तओ अहं मुणिवयणाओ तुह दंसणजायपच्चासो तवस्सिजणपज्जुवासणपरो ठिओ एत्तियं कालं। तइयदियहे य सुओ मए तावसेण कुलवइणो निवेइज्जमाणो तुज्झ वुत्तन्तो। कहावसाणे य 'सो चेव मे वयस्सओ' त्ति संसिऊण कुलवइणो अणुन्नविय कुलवइं पयट्टो मणोरहापूरयं सम्पत्तो य कल्लं। दिट्ठो य विज्जाहरो, पुच्छिओ ते पवुत्तिं। पुव्ववन्धवेण विय निरवसेसा साहिया य तेण। तओ अहं भवन्तमन्नेसमाणो इह आगओ। एस मे वुत्तन्तो त्ति॥

तओ मए चिन्तियं। भवियव्वं विज्जासंपयाए, अन्नहा कहमयण्डम्मि चेव वसुभूइणा सह समागमो। साहिओ से विज्जालम्भवुत्तन्तो। ईसि विहसिऊण भणियं च तेण। भो वयंस, न अन्नहा संवच्छरियवयणं। विलासवइविज्जासंपत्तीओ चेवावगच्छामि, भवि-

संसारपरिक्लेशत्यागो न पुनरन्यथेति। अन्यच्च ज्ञानतोऽवगच्छामि, धरति ते प्रियवयस्यः प्राणान्, भविष्यति तेन तव संगमः। तत इदं तावदत्र प्राप्तकालम्, तपस्विजनमेव पर्युपासमानः कञ्चित्कालं तिष्ठेति। ततोऽहं मुनिवचनात् तव दर्शनजातप्रत्याशः तपस्विजनपर्युपासनपरः स्थित एतावन्तं कालम्। तृतीयदिवसे च श्रुतो मया तापसेन कुलपतये निवेद्यमानस्तव वृत्तान्तः। कथावसाने च 'स एव मे वयस्यः' इति शंसित्वा कुलपतयेऽनुज्ञाप्य कुलपतिं प्रवृत्तो मनोरथापूरकं संप्राप्तश्च कल्ये। दृष्टश्च विद्याधरः, पृष्टश्च ते प्रवृत्तिम्। पूर्वबान्धवेनेव निरवशेषा(प्रवृत्तिः)कथिता च तेन। ततोऽहं भवन्तमन्वेषमाण इहागतः। एष मे वृत्तान्त इति।

ततो मया चिन्तितम्—भवितव्यं विद्यासंपदा, अन्यथा कथमकाण्डे एव वसुभूतिना सह समागमः। कथितस्तस्मै विद्यालाभवृत्तान्तः। ईषद् विहस्य भणितं च तेन। भो वयस्य! नान्यथा सांवत्सरिकवचनम्। विलासवती-विद्यासंपत्त्यैवावगच्छामि, भवितव्यं त्वया विद्या-

१ गुरु [illegible]।

यव्वं तए विज्जाहरनरिन्देण । ता करेहि समीहियं ॥ तओ तंमि चेव मलयसिहरे पारद्धा पुव्वसेवा । अइक्कन्ता मोणव्वयसेवणाए परिमियफलाहारस्स विसुद्धबम्भयारिणो छम्मासा । समत्तो पुव्वसेवाकप्पो । भणिया विलासवई । देवि, धीरा होहि । संपन्नं समीहियं, कय जमिह दुक्करं । संपयं अहोरत्तसज्झं फलं ति । तीए भणियं । पुज्जन्तु मणोरहा अज्जउत्तस्स । तओ मए सा 'कायरहियया इत्थिय' त्ति ठविया[1] नाइदूरदेसवत्तिणीए मलयगिरिगुहाए । पारद्धा पहाणसेवा । उवणीयाइं दसद्धवण्णाइं कुसुमाइं । ठविया देवया । [2]विहिओ वसुभूई दिसावालो । कओ पउमासणबन्धो । निविट्ठाइं मुद्दामण्डलाइं । पारद्धो सयसाहस्सिओ मन्तजावो । अइक्कन्ता काइ वेला । जाव हसियं [3]विय नहङ्गणेण, गज्जियं विय [4]अयालमेहेहिं. गुलुगुलियं विय समुद्देण, कम्पियं विय मेइणीए । तओ मए चिन्तियं । पाविस्सइ भयं पिययमा । सुमरियं चक्कसेणवयणं 'न अन्नो विहीसियं मोत्तूण उवद्दवो'त्ति । पयट्टो मन्तजावो । तओ थेववेलाए चेव दिट्ठो

धरणेन्द्रेण । ततः कुरु समीहितम् । ततस्तस्मिन्नेव मलयशिखरे प्रारब्धा पूर्वसेवा । अतिक्रान्ता मौनव्रतसेवनया परिमितफलाहारस्य विशुद्धब्रह्मचारिणः षण्मासाः । समाप्तः पूर्वसेवाकल्पः । भणिता विलासवती । देवि ! धीरा भव, संपन्नं समीहितम् । कृतं यदिह दुष्करम् । साम्प्रतमहोरात्रसाध्यं फलमिति । तया भणितम्-पूर्यन्तां मनोरथा आर्यपुत्रस्य । ततो मया सा 'कातरहृदया स्त्री' इति स्थापिता नातिदूरदेशवर्तिन्यां मलयगिरिगुहायाम् । प्रारब्धा प्रधानसेवा । उपनीतानि दशार्धवर्णानि कुसुमानि । स्थापिता देवता । विहितो वसुभूतिर्दिक्पालः । कृतः पद्मासनबन्धः । निविष्टानि मुद्रामण्डलानि । प्रारब्धः शतसाहस्रिको मन्त्रजापः । अतिक्रान्ता काऽपि वेला । यावद् हसितमिव नभोङ्गणेन गर्जितमिवाकालमेघैः, गुडगुडितमिव समुद्रेण, कम्पितमिव मेदिन्या । ततो मया चिन्तितम्-प्राप्स्यति भयं प्रियतमा ।

१ ठविया क । २ वसुभूई दिसावालो कओ ख । ३ पलय- क । ४ पिव क । ५ दानेइ ख ।

मए दन्तग्गविभिन्नलम्बमाणाहोरणो कण्णवालिलुढियङ्कुसो अमरिसावेसकुण्डलियकरो करविक्खित्तसिसिरसीयरासारो आसारपयट्टमयवारिपरिमलो परिमलोवयन्तमुहलमहुयरउलो उत्तरमेहो व्व गुंलुगुलेन्तो 'हा अज्जउत्त हा अज्जउत्त'त्ति विलवन्तिं विलासवइमइक्कमिऊण अत्तणो चेव समुवयन्तो मत्तवारणो। न खुद्धो य चित्तेण, अवगया विहीसिया। थेववेलाए य अइभीसणकसणवण्णा सोयामणिफुलिङ्गलोयणा गलोलम्बियकरचरणमाला रुहिरोल्लनरचम्मनिवसणा कवालचसएण रुहिरासवं पियन्ती अट्टहासाणलेण नहङ्गणमुज्जोवयन्ती वामहत्थेण भयसंभन्तलोयणं विलासवइं गेण्हिऊण 'अरे रे विज्जाहरसङ्गदुव्वियड्ढ काउरिस कहिं वच्चसि'त्ति जंपमाणी आगमणवेगाणिलनिवाडियसाहिजाला तुरियतुरियं अभिमुहमुवागच्छमाणी दिट्ठा मए दुट्ठपिसाइय त्ति। न खुद्धो हियएणं, उवसन्ता विहीसिया। थेववेलाए य अणब्भमेव गज्जियं मेहेहिं, वरिसियं रुहिरधाराहिं, फेक्कारियं सिवाहिं, धाहावियं[3] वेयालेहिं, नच्चियं कबन्धेहिं, पज्जलन्त-

स्मृतं चक्रसेनवचनं 'नान्यो विभीषिकां मुक्त्वा उपद्रवः' इति। प्रवृत्तो मन्त्रजापः। ततः स्तोकवेलायामेव दृष्टो मया दन्ताग्रविभिन्नलम्बमानाधोरणः कर्णपालिलुण्ठिताङ्कुशोऽमर्षावेशकुण्डलितकरः करविक्षिप्तशिशिरसीकरासार आसारप्रवृत्तमदवारिपरिमलः परिमलावपतन्मुखरमधुकरकुल उत्तरमेघ इव गुडगुडायमानो 'हा आर्यपुत्र! हा आर्यपुत्र! इति विलपन्तीं विलासवतीमतिक्रम्य आत्मन एव समुपयन् मत्तवारणः। न क्षुब्धश्च चित्तेन, अपगता विभीषिका। स्तोकवेलायां चातिभीषणकृष्णवर्णा सौदामिनिस्फुलिङ्गलोचना गलावलम्बितकरचरणमाला रुधिरार्द्रनरचर्मनिवसना कपालचषकेन रुधिरासवं पिबन्ती अट्टहासानलेन नभोऽङ्गणमुद्योतयन्ती वामहस्तेन भयसंभ्रान्तलोचनां विलासवतीं गृहीत्वा 'अरे रे विद्याधरसङ्गदुर्विदग्ध कापुरुष! कुत्र व्रजसि'इति जल्पन्ती आगमनवेगानिलनिपातितशाखिजाला त्वरितत्वरितमभिमुखमुपागच्छन्ती दृष्टा मया दुष्टपिशाचिकेति। न क्षुब्धो हृदयेन, उपशान्ता विभीषिका। स्तोकवेलायां चानभ्रमेव गर्जितं मेघैः, वृष्टं

१ -महुयराउलो क। २ गुलगुलेन्तो ख। ३ धाविय क।

नयणतारयाहिं च उद्धकेसियाहिं विमुक्कनिंवसणाहिं किलिकिलियं डाइणीहिं। न खुद्धो चित्तेणं, पणट्ठा विहीसिया। थेववेलाए य केणावि अमुणियं चेव पणट्ठचन्ददिवायरे निरयघोरन्धयारे पक्खित्तो महापायलभीसणे अयडे, दिट्ठाओ य तत्थ भयस्स वि य भयंकरीओ दाढाविरालभीसणेहिं वयणेहिं कवालमालापरिगयाहिं सिरोहराहिं नाहिमण्डलगएहिं थणेहिं पलम्बमाणमहोयरीओ खुणसविब्भमेहि ऊरुएहिं तुङ्गतालखन्धसंठाणाहिं जङ्घाहिं निसियकप्पणीहिं नरकलेवरे विगत्तमाणीओ[3] जलन्तनयणतारयं च अइभीसणमिओ तओ पुलोएमाणीओ दुट्ठरक्खसीओ 'हण हण छिन्द छिन्द भिन्द भिन्द' भणमाणीओ य धाविआओ अभिमुहं। न खुद्धो चित्तेणं, पसन्ता विहीसिया। तओ अद्धजामावसेसाए जामिणीए समत्तपाए मन्तजावे सुरहिकुसुमामोयगब्भिणो पवाइओ महुरमारुओ, निवडिया कुसुमवुट्ठी, जय जय त्ति उट्ठिओ कलयलरवो, गाइयं किन्नरीहिं। तओ थेववेलाए चेव उज्जोवयन्ती नहङ्गणं अणेयदेवयापरिगया

रुधिरधाराभिः, फेत्कारितं शिवाभिः, घाहावितं (चित्कारितं)वेतालैः, नर्तितं कबन्धैः, प्रज्वलन्नयनतारकाभिश्च ऊर्ध्वकेशिकाभिर्विमुक्तनिवसनाभिः किलिकिलितं डाकिनीभिः न क्षुब्धश्चित्तेन, प्रनष्टा विभीषिका। स्तोकवेलायां च केनाप्यज्ञातमेव प्रनष्टचन्द्रदिवाकरे निरयघोरान्धकारे प्रक्षिप्तो महापातालभीषणेऽवटे। दृष्टाश्च तत्र भयस्यापि भयंकर्यो दाढाविकरालभीषणैर्वदनैः कपालमालापरिगताभिः शिरोधराभिर्नाभिमण्डलगतैः स्तनैः प्रलम्बमानमहोदर्यः सूनाशवविभ्रमैरूरुभिः तुङ्गतालस्कन्धसंस्थानाभिर्जङ्घाभिर्निशितकर्तनीभिर्नरकलेवरान् विकर्तयन्त्यो ज्वलन्नयनतारकं चातिभीषणमितस्ततः प्रलोकयन्त्यो दुष्टराक्षस्यो 'हत हत छिन्त छिन्त भिन्त भिन्त' इति भणन्त्यश्च धाविता अभिमुखम्। न क्षुब्धश्चित्तेन, प्रशान्ता विभीषिका। ततोऽर्धयामावशेषायां यामिन्यां समाप्तप्राये मन्त्रजापे सुरभिकुसुमामोदगर्भितः प्रवातो मधुरमारुतः, निपतिता कुसुमवृष्टिः, जय जय इत्युत्थितः कलकलरवः, गीतं किन्नरीभिः। ततः स्तोकवेलायामेव

१ -निवसणं ख। २ किलिगिलियं क। ३ विकप्पमाणीओ क। ४ सूजलन्त-क।

आगया अजियवल त्ति[1]। दिट्ठा य सा मए

दित्ताणलस्स व सिहा पहासमिद्धि व्व सारयरविस्स । जोण्हा छणचन्दस्स व वसन्तकमलायरसिरि व्व ॥

भणियं च तीए। अहो ते ववसाओ, अहो ते पोरुसं, अहो ते निच्छओ, अहो ते उवओगो त्ति। ता सिद्धा ते अहं । उवरम इओ ववसायाओ त्ति। तओ मए असमत्तकइवयमन्तजावेण विहीसियासङ्काए अपणमिऊण भयवई समाणिओ मन्तजावो, पणमिया य पच्छा । एयन्तरंमि

पहाणकायसंगया सुयन्धगन्धगन्धिया । अवायमल्लमण्डिया पइण्णहारचन्दिमा ॥

लसन्तहेमसुत्तया फुरन्तआउहप्पहा । चलन्तकण्णकुण्डला जलन्तसीसभूसणा ॥

उद्द्योतयन्ती नभोऽङ्गणमनेकदेवतापरिगताऽऽगताऽजितबलेति । दृष्टा च सा मया ।

दीप्तानलस्येव शिखा प्रभासमृद्धिरिव शारदरवेः। ज्योत्स्ना क्षणचन्द्रस्येव वसन्तकमलाकरश्रीरिव ॥

भणितं च तया-अहो ते व्यवसायः, अहो ते पौरुषम् , अहो ते निश्चयः, अहो ते उपयोग इति। ततः सिद्धा तेऽहम् । उपरम इतो व्यवसायादिति। ततो मयाऽसमाप्तकतिपयमन्त्रजापेन विभीषिकाशङ्कयाऽप्रणम्य भगवतीं समाप्तो मन्त्रजापः। प्रणता च पश्चात् । अत्रान्तरे

प्रधानकायसंगताः सुगन्धगन्धगन्धिनाः। अम्लानमाल्यमण्डिताः प्रकीर्णहारचन्द्रिकाः ॥

लसद्धेमसूत्रकाः स्फुरदायुधप्रभाः। चलत्कर्णकुण्डला ज्वलच्छीर्षभूषणाः ॥

---

1 –मण्डना क ।

निबद्धजोव्वणुद्धरा गुरुत्थणग्गसंगया । मियङ्कसोहियाणणा नयारविन्दसच्छहा ॥
समल्लकसणङ्गिया विनिज्जियकामरूविणो । समुद्ददुन्दुहिस्सणा पणामसंठियञ्जली ॥

समागया विज्जाहर त्ति ।

भणियं च देवयाए । पुत्तय, महापुरिसवयणाणुगुणाणुरञ्जियं पडिवन्नभिच्चभावं पणमइ तुम्हमीहप्पमुहं सयलमेयं विज्जाहरउलं । तओ मए 'एस भयवईपसाओ' त्ति भणिऊण समाहूया विज्जाहरा । भणियं च देवयाए । पुत्तय, करेमि ते विज्जाहरनरिन्दाहिसेयं । मए भणियं । करेउ भयवई, किंतु देवीए वसुभूइणो य पच्चप्पणं ति । तओ सद्दाविओ वसुभूई, जाव न जंपइ त्ति; तओ निहालिओ, जाव न दीसइ त्ति । तओ आसङ्कियं मे हियएण । विज्जाहरसमेओ य नहङ्गणगमणेणं पयट्टो गवेसिउं । दिट्ठो य एगंमि निउञ्जे इओ

निबद्धयौवनोद्धुराः गुरुस्तनसंगताः । मृगाङ्कशोभिताननाः नयारविन्दसच्छायाः ॥
समल्लकसनाङ्किताः विनिर्जितकामरूपिणः । समुद्रदुन्दुभिस्वनाः प्रणामसंस्थिताञ्जलयः ॥

समागता विद्याधरा इति ।

भणितं च देवतया । पुत्रक ! महापुरुषवचनानुगुणानुरञ्जितं प्रतिपन्नभृत्यभावं प्रणमति त्वदीयप्रमुखं सकलमेतद् विद्याधरकुलम् । ततो मया 'एष भगवतीप्रसादः' इति भणित्वा समाहूता ([illegible]) विद्याधराः । भणितं च देवतया-पुत्रक ! करोमि ते विद्याधरनरेन्द्राभिषेकम् । मया भणितम्-करोतु भगवती, किन्तु देव्या वसुभूतेश्च प्रत्यर्पणमिति । ततः शब्दायितो वसुभूतिः, यावद् न जल्पति इति । ततो निभालितो यावद् न दृश्यते इति । तत आशङ्कितं मे हृदयेन । विद्याधरसमेतश्च नभोऽङ्गणगमनेन प्रवृत्तो गवेषयितुम् । दृष्टश्च

१ भयवई-स ।

तओ परिब्भमन्तो वसुभूई। सो य पेच्छिऊण अम्हे उभयकरगहियरुक्खसालो 'अरे रे दुट्ठविज्जाहरा, पियवयंसस्स जीवियाओ वि अब्भहियपरं देविं विलासवइं अवहरिऊण कहिं गच्छसि'त्ति भणमाणो धाविओ अहिमुहं ति। तओ मए चिन्तियं। अवहरिया देवी, अफलो मे परिस्समो। पुच्छिओ वसुभूई 'कहिं कहिं देवि'त्ति। तओ तेण विज्जाहरविप्पलद्धबुद्धिणा वाहिओ मे घाओ। वञ्चिओ सो मए अवहरिया य से साहा। तओ गेण्हिऊण हत्थे 'वयस्स, अलमन्नहावियप्पिएण; साहेहि ताव, कहिं देवि'त्ति पुणो पुणो पुच्छिओ। तओ विसेसेण पउत्तलोयणवावारं मं पुलोइऊण भणियमणेण। भो वयस्स, सुण। पउत्तविज्जासाहणारम्भे तुमंमि जाए अड्ढरत्तसमए समागयं विज्जाहरचन्द्रं, विहीसियासङ्काए य अवमन्नियं तं मए। तओ थेववेलाए चेव 'हा अज्जउत्त, हा अज्जउत्त'त्ति[1] आयण्णिओ देवीए सद्दो। आसङ्कियं मे हियएणं। दिट्ठा य विज्जाहरविमाणारूढा 'अज्ज वसुभूई परित्तायाहि परित्तायाहि'त्ति अक्कन्दमाणी देवी।

एकस्मिन् निकुञ्जे इतस्ततः परिभ्रमन् वसुभूतिः। स च प्रेक्ष्यास्मान् उभयकरगृहीतवृक्षशाखः 'अरे रे दुष्टविद्याधर! प्रियवयस्यस्य जीवितादप्यधिकतरां देवीं विलासवतीमपहृत्य कुत्र गच्छसि' इति भणन् धावितोऽभिमुखमिति। ततो मया चिन्तितम्-अपहृता देवी, अफलो मे परिश्रमः। पृष्टो वसुभूतिः 'कुत्र कुत्र देवी' इति। ततस्तेन विद्याधरविप्रलब्धबुद्धिना वाहितो मे घातः। वञ्चितः स मया, अपहृता च तस्य शाखा। ततो गृहीत्वा हस्ते 'वयस्य! अलमन्यथा विकल्पितेन, कथय तावत् कुत्र देवी' इति पुनः पुनः पृष्टः। ततो विशेषेण प्रयुक्तलोचनव्यापारं मां प्रलोक्य भणितमनेन। भो वयस्य! शृणु। प्रयुक्तविद्यासाधनारंभे त्वयि जातेऽर्धरात्रसमये समागतं विद्याधरचन्द्रम्। विभीषिकाशङ्कया चावमतं तन्मया। ततः स्तोकवेलायामेव 'हा आर्यपुत्र! हा आर्यपुत्र! इत्याकर्णितो देव्याः शब्दः। आशङ्कितं मे हृदयेन। दृष्टा च विद्याधरविमानारूढा 'आर्य वसुभूते! परित्रायस्व परित्रायस्व' इत्याक्रन्दमाना देवी। संभ्रमविशेषतः

---

१ त्ति भणंतीए स।

संभमविसेसओ संजायासंकेण निरूविया गुहाए जाव नत्थि । तओ विमाणाणुसारेणं धाविओ मग्गओ, न पावियं च विमाणं । अओ न याणामि; संपयं कहिं देवि त्ति । मए चिन्तियं । विज्जाहरेण हरिया देवी । अत्थि य मे गयणगमणसत्ती । ता कहिं सो गइस्सइ । भणिओ य वसुभूई । परिच्चय विसायं । सिद्धा मे अजियबला । ता थेवमेयं ति । एत्थन्तरंमि समागया विज्जा । भणियं च तीए । वच्छ, किमेयं ति । साहिओ से वुत्तन्तो । को पुण तुमं परिहवइ त्ति कुविया य एसा । पेसिया दिसो दिसं तीए अन्नेसणनिमित्तं पवणगइपमुहा विज्जाहरा । विज्जासमाएसेण य ठिया अम्हे तहिं चेव मलयसिहरे । तइयदियहंमि य समागओ पवणगई । भणियं च तेण । देव, उवलद्धा देवी । मए भणियं । कत्थ उवलद्ध त्ति । तेण भणियं । देव, सुण । अत्थि वेयड्ढपव्वए रहनेउरचक्कवालउरं नाम नयरं । तत्थ उवलद्ध त्ति । मए भणियं । कहं विय । तेण भणियं । देव, सुण । पत्थिओ देवसमाएसेणाहं परिब्भमन्तो गओ रहनेउरचक्कवालउरं नयरं । दिट्ठं च तं सव्वमेव उव्विग्गजणवयं सण्णाहयणसंपाडियपओयणारं भमन्तभडबलिसहस्ससंकुलं चच्चरसमारद्धविहलयसहोमं च । तओ मए तत्थ पुच्छिओ एगो विज्जाहरो 'भद्द, किमेयं' ति । तेण भणियं । सामिणो दुन्नयफलस्स कुसुमुग्गमो

संजाताशङ्केन निरूपिता गुहायां यावन्नास्ति । ततो विमानानुसारेण धावितो मार्गतः (पृष्ठतः), न प्राप्तं च विमानम् । अतो न जानामि साम्प्रतं कुत्र देवीति । मया चिन्तितम्-विद्याधरेण हृता देवी । अस्ति च मे गगनगमनशक्तिः, ततः कुत्र स[1] नेष्यति । भणितश्च वसुभूतिः । परित्यज विषादम्, सिद्धा मेऽजितबला, ततः स्तोकमेतदिति । अत्रान्तरे समागता विद्या । भणितं च तया-वत्स ! किमेतदिति । कथितस्तस्यै वृत्तान्तः । 'कः पुनस्त्वां परिभवति' इति कुपिता चैषा । प्रेषिता दिशि दिशि तयाऽन्वेषणनिमित्तं पवनगतिप्रमुखा विद्याधराः । विद्यासमादेशेन च स्थिता वयं तत्रैव मलयशिखरे । तृतीयदिवसे च समागतः पवनगतिः । भणितं च तेन-देव ! उप-

---

१ गै क ।

त्ति। मए भणियं। कहं विय। तेण भणियं। सुण। अत्थि एत्थ अणङ्गरई नाम विज्जाहरनयरसामी। तेण मयणवसवत्तिणा कस्सइ महापुरिसस्स विज्जासाहणुज्जयस्स अवहरिऊण पिययमा इहं आणीय त्ति। अणिच्छमाणि च तं बला ¹गेण्हिउं पयत्तो। एत्थन्तरंमि 'कहा एस' त्ति अणवेक्खिऊण अहयं पवड्ढमाणकोवाणलो 'अरे रे दुट्ठविज्जाहरा, कहं मए जीवमाणंमि मम जायं परिहवसि'त्ति 'को एत्थ चिट्ठइ; अरे खग्गं खग्गं' ति भणमाणो उट्ठिओ अमरिसेण पयट्टो अहिमुहं। तओ ²'पसीयउ देवो'त्ति जंपियं पवणगइणा। भणियं च तेण। देव, कहाणयमिणं; न उण केसरिकिसोरजायं पसज्झं सारमेओ अहिहवइ। ता कहावसाणं पि ताव निसामेउ देवो त्ति। तओ विलिऊण उवविट्ठो अहं पुणो। भणियं च तेण। बला गेण्हणपवत्तस्स य 'असमओ' त्ति काऊण उवट्ठिया महाकालि-

लब्धा देवी। मया भणितम्—कुत्रोपलब्धेति। तेन भणितम्—देव! शृणु। अस्ति वैताढ्यपर्वते रथनूपुरचक्रवालपुरं नाम नगरम्, तत्रोपलब्धेति। मया भणितं—कथमिव। तेन भणितम्—देव! शृणु। प्रस्थितो देवसमादेशेनाहं परिभ्रमन् गतो रथनूपुरचक्रवालपुरं नगरम्। दृष्टं च तत्सर्वमेवोद्विग्नजनव्रजं सर्वायतनसंपादितपूजोपचारं भ्रमच्छकटयष्टिसहस्रसंकुलं चत्वरसमारब्धविविधलक्षहोमं च। ततो मया तत्र पृष्ट एको विद्याधरो 'भद्र! किमेतद्' इति। तेन भणितम्—स्वामिनो दुर्नयफलस्य कुसुमोद्गम इति। मया भणितम्—कथमिव। तेन भणितम्—शृणु। अस्त्यत्र अनङ्गरतिर्नाम विद्याधरनगरस्वामी। तेन मदनवशवर्तिना कस्यचिद् महापुरुषस्य विद्यासाधनोद्यतस्य अपहृत्य प्रियतमेहानीतेति। अनिच्छन्तीं च तां बलाद् ग्रहीतुं प्रवृत्तः। अत्रान्तरे 'कथा एषा' इत्यनवेक्ष्याहं प्रवर्धमानकोपानलः 'अरे रे दुष्टविद्याधर! कथं मयि जीवति मम जायां परिभवसि' इति 'कोऽत्र तिष्ठति, अरे खड्गं खड्गमिति भणन्नुत्थितोऽमर्षेण प्रवृत्तोऽभिमुखम्। ततः 'प्रसीदतु देवः' इति जल्पितं पवनगतिना। भणितं च तेन—देव! कथानकमिदम्, न पुनः केसरिकिशोरजायां प्रसह्य सारमेयोऽभिभवति। ततः कथावसानमपि तावद्

१ गहिउ क। २ पसीयउ पसीयउ देवो त्ति ग।

विज्ञा। संजाओ भूमिकम्पो, निवडियाओ उक्काओ, समुब्भूओ निग्घाओ। भणिओ य तीए अणङ्गरई। भो भो न जुत्तं इमं संपत्तविज्ञाहरनरिन्दसद्दस्स काउरिसचेट्ठियं। तओ नियत्तो सो इमाओ ववसायाओ काएण, न उण चित्तेण। पंयलियाए य नयरदेवयाए पुणो नयरविणासो आसि त्ति संजायसंकेहि पत्थुयं सन्तिकम्मं नायरएहिं। तओ मए भणियं। कहिं पुण सा इत्थिया चिट्ठइ। तेण भणियं। नरिन्दभवणुज्जाणे सहयारपायवतले त्ति। तओ मए नाइदूरदेसवत्तिणा गयणयलसंठिएण निरूविया देवी। दिट्ठा य अणेयविज्ञाहरीचन्द्रमज्झगया वामकरयलपणामियवयणकमलमुव्वहन्ति त्ति। आरक्खिविज्ञाहरसंबाहभावओ अणाएसओ य देवस्स न गओ तीए समीवं। आगओ इहइं। एयं च सोऊण देवो पमाणं ति॥

तओ मए पुलइओ वसुभूई। भणियं च तेण। भो वयस्स, इमं ताव एत्थ पत्तकालं। नयरदेवओवएसेण लज्जिओ खु भो राया।

निशामयतु देव इति। ततो व्रीडित्वा उपविष्टोऽहं पुनः। भणितं तेन, बलाद्ग्रहणप्रवृत्तस्य च 'असमयः' इति कृत्वोपस्थिता महाकालीविद्या। संजातो भूमिकम्पः, निपतिता उल्काः, समुद्भूतो निर्घातः। भणितश्च तयाऽनङ्गरतिः। भो भो न युक्तमिदं संप्राप्तविद्याधरनरेन्द्रशब्दस्य कापुरुषचेष्टितम्। ततो निवृत्तः सोऽस्माद् व्यवसायात् कायेन न पुनश्चित्तेन। प्रचलितायां(प्रज्वलितायां ?) च नगरदेवतायां पुनर्नगरविनाश आसीदिति संजाताशङ्कैः प्रस्तुतं शान्तिकर्म नागरकैः। ततो मया भणितम्-कुत्र पुनः सा स्त्री तिष्ठति। तेन भणितम्-नरेन्द्रभवनोद्याने सहकारपादपतले इति। ततो मया नातिदूरदेशवर्तिना गगनतलसंस्थितेन निरूपिता देवी। दृष्टा चानेकविद्याधरीचन्द्रमध्यगता वामकरतलन्यस्तवदनकमलमुद्वहन्तीति। आरक्षकविद्याधरसंबाधभावतोऽनादेशतश्च देवस्य न गतस्तस्याः समीपम्। आगत इह। एतच्छ्रुत्वा देवः प्रमाणमिति॥

१ पलियवाए क। २ आगओ य क।

ता पेसेहि से सामपुव्वगमेव देवीजायणनिमित्तं कंचि दूयं ति। तओ बम्भयत्तेण भणियं। सदाराणयणे वि दूयसंपेसणमपुव्वो साम-मेओ। समरसेणेण उत्तं। तस्स वि दूयसंपेसणं ति महन्तो अणक्खो। वाउवेगेण भणियं। न संपन्नमहिलसियं। वाउमित्तेण भणियं। देवो जाणइ त्ति। विहसियं चण्डसीहेण, उन्नाडियं पिङ्गलगन्धारेण, पयम्पियं मयङ्गेण, नीससियं अमयप्पहेण, [1]पंचलियं देवोसहेण। तओ सुभडभावेण वीरेक्करसाणं अणभिमओ वि विज्जाहराणं 'एस ट्ठिइ'त्ति पडिबोहिऊण ते पवणगई चेव विसज्जिओ दूओ त्ति। भणिओ य एसो। भद्द, वत्तव्वो तए स विज्जाहरनरिन्दो। जं खलु अयसस्स [2]कारयं अत्तणो हारयं धिईए वारयं लोयस्स हासयं सत्तुणो आणन्दयं उभयलोयविरुद्धं च, तं कहं सप्पुरिसो समायरइ। विरुद्धं च [3]परदारहरणं। ता परिचय एवं असव्ववसायं, पेसेहि मे जायं ति। अपडिवज्जमाणे य वत्तव्वा तए देवी, जहा 'न कायव्वो तए खेओ, उवलद्धा तुमं ति; अवस्सं थोवदिणब्भन्तरे मोया-

ततो मया दृष्टो वसुभूतिः। भणितं च तेन–भो वयस्य! इदं तावदत्र प्राप्तकालम्। नगरदेवतोपदेशेन लज्जितः खलु स राजा। ततः प्रेषय तस्य सामपूर्वकमेव देवीयाचननिमित्तं कंचिद् दूतमिति। ततो ब्रह्मदत्तेन भणितम्–स्वदारानयनेऽपि दूतसंप्रेषणमपूर्वः सामभेदः। समरसेनेनोक्तम्–तस्यापि दूतसंप्रेषणमिति महान् (अणक्खो दे) अपवादः। वायुवेगेन भणितम्–न संपन्नमभिलषितम्। वायुमित्रेण भणितम्–देवो जानातीति। विहसितं चण्डसिंहेन, उन्नाटितं पिङ्गलगान्धारेण, प्रकम्पितं मतङ्गेन, निःश्वसितममृतप्रभेण, प्रचलितं देवर्षभेण। ततः सुभटभावेन वीरैकरसानामनभिमतोऽपि विद्याधराणाम् 'एषा स्थितिः' इति प्रतिबोध्य तान् पवनगतिरेव विसर्जितो दूत इति। भणितश्चैषः, भद्र! वक्तव्यस्त्वया स विद्याधरनरेन्द्रः। यत् खल्वयशसः कारकमात्मनो हारकं धृत्या वारकं लोकस्य हासकं शत्रोरानन्दकमुभयलोकविरुद्धं च, तत्कथं सत्पुरुषः समाचरति। विरुद्धं च परदारहरणम्। ततः परित्यजैतमसद्व्यवसायम्, प्रेषय मे

१ न चलियं क। २ वारण ख। ३ परदारगमणं किं पुण हरणं ति क।

वेमि'। तओ 'जं देवो आणवेइ'त्ति भणिऊण गओ पवणगई। बिइयदियहे य आगओ। भणियं च तेण। देव, भणिओ जहाइट्ठ देवेण सो विज्जाहराहमो। न पडिवन्नं च देवसासणं। भणियं च तेण। कहं धरणिगोयरो वि मे 'परिच्चय एयं असव्ववसायं' ति आणं पेसेइ। ता न पेसेमि से जायं। साहेउ जस्स साहियव्वं ति। देवीए य विन्नत्तं। अज्जउत्तस्स घरिणिसद्दं वहन्तीए को महं खेओ त्ति॥ तओ एयं सोऊण खुहिया विज्जाहरभडा। गरुयवियम्भमाणामरिसविसेसेण हुंकारियं बम्भयत्तेण, रणरसुच्छाहपुलइएण अप्फालिओ भुओ समरसेणेण, रोसरज्जन्तनयणतारया भिउडीविसेसभीसणा खग्गरयणंमि निवाइया दिट्ठी वाउवेगेण, रिउपहारविसमं उन्नामियं वच्छत्थलं वाउमित्तेण, कोवाणलजलिएणं पिव अन्धारियं मुहं चण्डसीहेणं, उव्वेल्लिउद्धबाहुजुयलं वियम्भियं पिङ्गलगन्धारेण, पय-म्पियमहिहरं समाहयं धरणियलं मयङ्गेण, आसन्नसमरपरिओसफुरियनयणमुहेण आससियं अमियप्पहेण, नीसेसभरियगिरिगुहाकन्दरं.

जायामिति। अप्रतिपद्यमाने च वक्तव्या त्वया देवी, 'यथा न कर्तव्यस्त्वया खेदः, उपलब्धा त्वमिति, अवश्यं स्तोकदिनाभ्यन्तरे मोच-यामि'॥ ततो 'यद् देव आज्ञापयति' इति भणित्वा गतः पवनगतिः। द्वितीयदिवसे चागतः। भणितं च तेन-देव! भणितो यथादिष्ट देवेन स विद्याधराधमः। न प्रतिपन्नं च देवशासनम्। भणितं च तेन, कथं धरणीगोचरोऽपि मे परित्यजैतमसद्व्यवसायम्' इति आज्ञां प्रेषयति। ततो न प्रेषयामि तस्य जायाम्। कथयतु यस्य कथयितव्यमिति। देव्या च विज्ञप्तम्-आर्यपुत्रस्य गृहिणीशब्दं वहन्त्याः को मम खेद इति॥ तत एतच्छ्रुत्वा क्षुब्धा विद्याधरभटाः। गुरुविजृम्भमाणामर्षविशेषेण हुंकारितं ब्रह्मदत्तेन, रणरसोत्साहपुलकितेनास्फा-लितो भुजः समरसेनेन, रोषरज्यमाननयनतारका भृकुटिविशेषभीषणा खड्गरत्ने निपातिता दृष्टिर्वायुवेगेन, रिपुप्रहारविषममुन्नामितं वक्षःस्थलं वायुमित्रेण, कोपानलज्वलितेनेवान्धकारितं मुखं चण्डसिंहेन, उद्वेल्लितोर्ध्वबाहुयुगलं विजृम्भितं पिङ्गलगान्धारेण, प्रकम्पितम-

---

१ रिउ- ख। २ उन्नाडियं ख।

हमियं देवोसहेणं ॥ तओ मए भणियं। आसन्नविणिवाओ पणट्ठबुद्धिविहवो य सो तवस्सी। ता अलं तंमि संरम्भेण। चिट्ठह तुब्भे। अहं पुण खग्गदुइओ[2] चेव इओ गच्छिऊण दंसेमि से भूमिगोयरपरक्कमं ति। विज्जाहरेहि भणियं। देव,[1] असमत्थो खु सो देवस्स भिच्चपरक्कमं पि पेक्खिउं,[3] किमङ्ग पुण देवपरक्कम ति।

एत्थन्तरंमि मिलियं विज्जाहरबलं। उवणीयं[4] मे विमाणं, अजियबलपवत्तिओ[6] उवारूढो वसुभूइसमेओ विमाणे। समाहयाइं[■] समरमङ्गलतूराइं। अणुगूलमारुयन्दोलिरविमाणधयवडं चलियं विज्जाहरबलं। समुग्घुट्ठो जयजयसद्दो, निवडिया कुसुमवुट्ठी, समुब्भूओ आणन्दो। आगासगमणेणं च पेच्छमाणो नाणाविहगामागरनगरसयसोहियं महिमण्डलं अजायपरिस्समो रणरसुच्छाहेण थेववेलाए चेव पत्तो वेयड्ढपव्वयं। अजियबलाएसओ य आवासिओ हेट्ठओ। कओ तिरत्तोववासो, सव्वविज्जाणं च संपाडियाओ पूयाओ।

हीवर समाहतं धरणीतलं मतङ्गेन, आसन्नसमरपरितोषस्फुरितनयनमुखेनाभ्वसितममृतप्रमेण, निःशेषभृतगिरिगुहाकन्दरं हसितं देवपेभेण ॥ ततो मया भणितम्–आसन्नविनिपात प्रनष्टबुद्धिविभवश्च स तपस्वी। ततोऽलं तस्मिन् संरम्भेण। तिष्ठत यूयम्। अहं पुनः खड्गद्वितीय एव इतो गत्वा दर्शयामि तस्मै भूमिगोचरपराक्रममिति। विद्याधरैर्भणितम्–देव! असमर्थः खलु स देवस्य भृत्यपराक्रममपि प्रेक्षितु किमङ्ग पुनर्देवपराक्रममिति ॥

अत्रान्तरे मिलितं विद्याधरबलम्। उपनीतं मे विमानम्, अजितबलाप्रवर्तित उपारूढो वसुभूतिसमेतो विमाने। समाहतानि समरमङ्गलतूर्याणि। अनुकूलमारुतान्दोलयद्विमानध्वजपट चलितं विद्याधरबलम्। समुद्घुष्टो जयजयशब्दः, निपतिता कुसुमवृष्टिः, समुद्भूत आनन्दः। आकाशगमनेन च प्रेक्षमाणो नानाविधग्रामाकरनगरशतशोभितं महीमण्डलमजातपरिश्रमो रणरसोत्साहेन स्तोकवेलायामेव प्राप्तो

१ वराओ फ। २ –दुतीओ ख। ३ पेच्छिउ ग। ४ किं पुण ग। ५ उवणय ख। ६ –पवत्तिय उ ख। ■ समाहय समरमगलतूर ख।

मेत्तिमुवगया मे सेसविज्जाहरा। सुणियं अणङ्गरइणा अवज्ञाविलसिएणं। पेसिओ तेण दुम्मुहो नाम सेणावई, समागओ महया विज्जाहरवलेणं। आगयं परवलं ति उंद्धाइओ अम्हाण सेन्नंमि कलयलो। आहया समरभेरी। पयत्ता संनज्झिउं विज्जाहरा। गहियं मे खग्गरयणं॥ एत्थन्तरंमि समागओ दूओ। भणियं च तेण। भो भो पवन्नभूमिगोयरभिच्चभावा विज्जाहरभडा, निसामेह सेणावइसासणं। पेसिओ अहं अणङ्गरइसेणावइणा दुम्मुहाभिहाणेणं। भणियं च तेण। अत्थि तुम्हाणं अइभूमिगयमोहाणं अपडिहयसासणेण देवेण अणङ्गरइणा सह समरसद्धा, पयट्टा य तुब्भे देवरायहाणिं। ता किं इमिणा किलेसेण। सज्जा होह। समाणेमि अहं देवस्स एगभिच्चो एत्थेव तुम्हाणं विग्गहं ति। एयं च सोऊण 'नाणङ्गरई आगओ' त्ति मुक्कं मए खग्गरयणं, मउलियं विज्जाहरवलं। सेणावई आगओ त्ति, अहं पि ईहइं सेणावइ त्ति उट्ठिओ चण्डसीहो। भणियं च तेण। देवँ, देहि आणत्तिं। पेक्खन्तु देवैस्स भिच्चविलसियं विज्जाहर-

वैताढ्यपर्वतम्। अजितवलादेशतश्चावासितोऽधः। कृतश्चिरात्रोपवासः, सर्वविद्यानां च संपादिताः पूजाः। मैत्रीमुपगता मे शेषविद्याधराः। ज्ञातमनङ्गरतिनाऽवज्ञाविलसितेन। प्रेषितस्तेन दुर्मुखो नाम सेनापतिः, समागतो महता विद्याधरबलेन। आगतं परबलमित्युद्धावितोऽस्माकं सैन्ये कलकलः। आहता समरभेरी। प्रवृत्ताः संनद्धुं विद्याधराः। गृहीतं मया खड्गरत्नम्। अत्रान्तरे समागतो दूतः। भणितं च तेन। भो भोः प्रपन्नभूमिगोचरभृत्यभावा विद्याधरभटाः! निशामयत सेनापतिशासनम्। प्रेषितोऽहमनङ्गरतिसेनापतिना दुर्मुखाभिधानेन। भणितं [illegible] तेन–अस्ति युष्माकमतिभूमिगतमोहानामप्रतिहतशासनेन देवेन अनङ्गरतिना सह समरश्रद्धा, प्रवृत्ताश्च यूयं देवराजधानीम्। ततः किमनेन क्लेशेन। सज्जा भवत। समापयाम्यहं देवस्यैकभृत्योऽत्रैव युष्माकं विग्रहमिति। एतच्च श्रुत्वा 'नानङ्गरतिरागतः' इति मुक्तं मया खड्गरत्नम्, मुकुलितं विद्याधरबलम्। सेनापतिरागत इति, अहमपीह सेनापतिरित्युत्थितश्चण्डसिंहः। भणितं

१ उद्धाइओ ग। २ ऐ_समा–_रा। ३ इह उ क। ४ देह आणत्ति क। ५ देवभिच्चस्स क।

भडा। तओ मए 'उचियमेयं' ति चिन्तिऊण दिन्नं कण्ठकुसुमदामं। पणामपुव्वयं गहियं च णेण, ठवियमुत्तिमङ्गे। धाविओ दुम्मुह-चलाभिमुहं। ठिओ अहं विमाणे, सह विज्जाहरेहिं। आगया समरपेक्खगा सुरसिद्धा अच्छराओ य। पयत्तमाओहणं। मेहजालेण विय ओत्थयं अम्बरयलं सरजालेण, निग्घाया विय पडन्ति खग्गप्पहारा, आहम्मन्ति विज्जाहरभडा, मिलिया य नायगा। तओ जंपियं चण्डसीहेण। अरे रे दुरायार, अग्गओ होहि। अहं चण्डसीहो, तुमं दुम्मुहो त्ति। समागओ एसो। लग्गं गयाजुद्धं। दिन्नो पहारो दुम्मुहेण, पडिच्छिओ चण्डसीहेण। तओ रोसायम्बलोयणेणं 'कीइसो तुह [वि दिन्नो हवइ] पहारो, सहसु मे संपयं' ति भणमाणेण दिन्नो से उत्तिमङ्गे, विदारियं च [से[3] उत्तिमङ्गं][4]। जाओ विहलंघलो य सो मुक्करुहिरुग्गारं निवडिओ धरणिवट्ठे। भग्गं दुम्मुहबलं। उग्घुट्ठो जयजयरवो। विमुक्कं सुरसिद्धेहि उवरि चण्डसीहस्स कुसुमवरिसं। तओ विणिज्जिए सेणावइंमि चडिओ अहं

से अहिप्पाओ। भणिओ य एसो। महाराय, अवगयं चेव तए एयं, जहा कम्मपरिणामफलं संसारियाण सत्ताणं सुहं दुक्खं च। सव्वे य सत्ता सुहं अहिलसन्ति, न दुक्खं। मूलं पुण इमस्स धम्मो। तस्स परिणामो सुरूवया पियसमागमसुहाइं सोहग्गं अरोगया[1] विउला य भोया। ता अवलम्बेहि सयलसोक्खनिहाणभूयं धम्मं, आयरसु मेत्तिं, वेट्टेहि[2] दाणं, करेहि सव्वसत्तेसु दयं ति। विजएण चिन्तियं। समुप्पन्नं इमस्स मरणभयं, अओ एवं भणाइ। ता कहिं वचइ त्ति। चिन्तिऊण भणियं च णेण। भयवं, जं तुमं आणवेसि। अन्नं च, जैयप्पभूइमेव[3] पडिवन्नो तुमं वीयरागभासियं धम्मं, तेंयप्पभूइमेव[4] आढत्तं मए इमं। भयवया भणियं। सोहणं कयं तए। तओ कंचि वेलं पज्जुवासिऊण पविट्ठो नयरिं। चिन्तियं च णेण। अज्जेव एयं दुरायारं वावाएमि। पसन्ते वि भयवन्ते पुव्वकयकिलिट्ठकम्मपरिणई चेवेत्थ कारणं विजयस्स। भणियं च

तस्य भगवता। कथितश्च तस्मै सर्वज्ञभाषितो धर्मः। न विरक्त एष संसारवासादिति ज्ञातस्तस्याभिप्रायः। भणितश्चैषः। महाराज! अवगतमेव त्वयैतद्, यथा कर्मपरिणामफलं सांसारिकाणां सत्त्वानां सुखं दुःखं च। सर्वे च सत्त्वा सुखमभिलषन्ति, न दुःखम्। मूलं पुनरस्य धर्मः। तस्य परिणामः सुरूपता प्रियसमागमसुखानि सौभाग्यमरोगता विपुलाश्च भोगाः। ततोऽवलम्बस्व सकलसौख्यनिधानभूतं धर्मम्, आचर मैत्रीम्, वर्तय दानम्, कुरु सर्वसत्त्वेषु दयामिति। विजयेन चिन्तितम्-समुत्पन्नमस्य मरणभयम्, अत एवं भणति। ततः कुत्र व्रजति? इति चिन्तयित्वा भणितं च तेन। भगवन्! यत्त्वमाज्ञापयसि। अन्यच्च यत्प्रभृत्येव प्रतिपन्नस्त्वं वीतरागभाषितं धर्मं तत्प्रभृत्येवारब्धं मयेदम्। भगवता भणितम्-शोभनं कृतं त्वया। ततः काञ्चिद् वेलां पर्युपास्य प्रविष्टो नगरीम्। चिन्तितं च तेन-अद्यैव एतं दुराचारं व्यापादयामि। प्रशान्तेऽपि भगवति पूर्वकृतक्लिष्टकर्मपरिणतिरेवात्र कारणं विजयस्य। भणितं च—

१ आरोगया ख। २ दवावेहि क। ३ जयप्पभिइमेव ख। ४ तयप्पभिइमेव क।

अइसंकिलिट्ठकम्माणुवेयणे जो उ होइ परिणामो। सो संकिलिट्ठकम्मस्स कारणं जमिह पाएण ॥

समागया रयणी। भणिया य राइणा पुव्वपेसिया वावायगपुरिसा। अरे अज्जं तं दुरायारं वात्राएमो त्ति। पडिस्सुयमणेहिं। अत्थमिओ मियङ्को। कइवयपुरिसपरियारिओ गओ जयाणगारसमीवं विजओ। दिट्ठो य णेण निवायसरणपईवो व्व सज्झाणसंगओ भयवं। तिव्वाणुहावकसाओदएणं च कड्ढियं मण्डलग्गं। अहिययरं गहिओ कसाएहिं। अवगया सुकयवासणा, पवत्तो महामोहो, आमगलिओ तिव्वकम्मपरिणईए। पवड्ढमाणकोवाणलेण पहओ सिरोहराए, एगपहारेणेव पाडियं उत्तिमङ्गं। 'विजयकुमारो चेव एसो' त्ति 'अहो विचित्तया जीवचरियाणं, अचिन्तणीया कम्मुणो गइ' त्ति चिन्तिऊण अवगया साहुणो ॥

भयवं पुण गम्भीरयाए आसयस्स विसुद्धयाए मेत्तीए अचलिययाए झाणस्स निम्ममयाए सरीरे भावियंयाए जिणवयणस्स खीण-

अतिसंक्लिष्टकर्मानुवेदने यस्तु भवति परिणामः। स संक्लिष्टकर्मणः कारणं भवित प्रायेण ॥

समागता रजनी। भणिताश्च राज्ञा पूर्वप्रेषिता व्यापादकपुरुषाः। अरे अद्य तं दुराचारं व्यापादयाम इति। प्रतिश्रुतमेभिः। अस्तमितो मृगाङ्कः। कतिपयपुरुषपरिवृतो गतो जयानगारसमीप विजयः। दृष्टस्तेन निवातशरणप्रदीप इव सद्ध्यानसंगतो भगवान्। तीव्रानुभावकषायोदयेन च कृष्टं मण्डलाग्रम्। अधिकतरं गृहीतः कषायैः। अपगता सुकृतवासना, प्रवृत्तो महामोहः, (आमगलिओ दे.) आक्रान्तः तीव्रकर्मपरिणत्या। प्रवर्धमानकोपानलेन प्रहतः शिरोधरायाम्। एकप्रहारेणैव पातितमुत्तमाङ्गम्। 'विजयकुमार एषः' इति अहो विचित्रता जीवचरितानाम्, अचिन्तनीया कर्मणो गतिः' इति चिन्तयित्वाऽपगताः साधवः ॥

भगवान् पुनर्गंभीरतयाऽऽशयस्य विशुद्धतया मैत्र्या अचलिततया ध्यानस्य निर्ममतया शरीरे भावितया जिनवचनस्य क्षीण

१ हरे क। २ निव्वायसरणपईवो क। ३ –सवा क। ४ जीवाणुवरि मेत्तीए क। ५ भाणाए।

से अहिप्पाओ। भणिओ य एसो। महाराय, अवगयं चेव तए एयं, जहा कम्मपरिणामफलं संसारियाण सत्ताणं सुहं दुक्खं च। सव्वे य सत्ता सुहं अहिलसन्ति, न दुक्खं। मूलं पुण इमस्स धम्मो। तस्स परिणामो सुरूवया पियसमागमसुहाइं सोहग्गं अरोगया[1] विउला य भोया। ता अवलम्बेहि सयलसोक्खनिहाणभूयं धम्मं, आयरसु मेत्तिं, वेट्टेहि[2] दाणं, करेहि सव्वसत्तेसु दयं ति। विजएण चिन्तियं। समुप्पन्नं इमस्स मरणभयं, अओ एवं भणाइ। ता कहिं वच्चइ त्ति। चिन्तिऊण भणियं च णेण। भयवं, जं तुमं आणवेसि। अन्नं च, जयप्पभूइमेव[3] पडिवन्नो तुमं वीयरागभासियं धम्मं, तयप्पभूइमेव[4] आढत्तं मए इमं। भयवया भणियं। सोहणं कयं तए। तओ कंचि वेलं पज्जुवासिऊण पविट्ठो नयरिं। चिन्तियं च णेण। अज्जेव एयं दुरायारं वावाएमि। पसन्ते वि भयवन्ते पुव्वकयकिलिट्ठकम्मपरिणई चेवेत्थ कारणं विजयस्स। भणियं च

तच्च भगवता। कथितश्च तस्मै सर्वज्ञभाषितो धर्मः। न विरक्त एष संसारवासादिति ज्ञातस्तस्याभिप्रायः। भणितश्चैषः। महाराज! अवगतमेव त्वयैतद्, यथा कर्मपरिणामफलं सांसारिकाणां सत्त्वानां सुखं दुःखं च। सर्वे च सत्त्वाः सुखमभिलषन्ति, न दुःखम्। मूलं पुनरस्य धर्मः। तस्य परिणामः सुरूपता प्रियसमागमसुखानि सौभाग्यमरोगता विपुलाश्च भोगाः। ततोऽवलम्बस्व सकलसौख्यनिधानभूतं धर्मम्, आचर मैत्रीम्, वर्तय दानम्, कुरु सर्वसत्त्वेषु दयामिति। विजयेन चिन्तितम्—समुत्पन्नमस्य मरणभयम्, अत एवं भणति। ततः कुत्र व्रजति? इति चिन्तयित्वा भणितं च तेन। भगवन्! यत्त्वमाज्ञापयसि। अन्यच्च यत्प्रभृत्येव प्रतिपन्नस्त्वं वीतरागभाषितं धर्मं तत्प्रभृत्येवारब्धं मयेदम्। भगवता भणितम्—शोभनं कृतं त्वया। ततः काञ्चिद् वेलां पर्युपास्य प्रविष्टो नगरीम्। चिन्तितं च तेन—अद्यैव एतं दुराचारं व्यापादयामि। प्रशान्तेऽपि भगवति पूर्वकृतक्लिष्टकर्मपरिणतिरेवात्र कारणं विजयस्य। भणितं च—

---

१ आरोगया ख। २ दवावेहि क। ३ जयप्पभिइमेव क। ४ तयप्पभिइमेव क।

अइसंकिलिट्ठकम्माणुवेयणे जो उ होइ परिणामो। सो संकिलिट्ठकम्मस्स कारणं जमिह पाएण ॥

समागया रयणी। भणिया य राइणा पुव्वपेसिया वावायगपुरिसा। अरे अज्जं तं दुरायारं वावाएमो त्ति। पडिस्सुयमणेहिं। अत्थ-
मिओ मियङ्को। कइवयपुरिसपरियारिओ गओ जयाणगारसमीवं विजओ। दिट्ठो य णेण निवायसरणपईवो व्व सज्झाणसंगओ भयवं।
तिव्वाणुहावकसाओदएणं च कड्ढियं मण्डलग्गं। अहिययरं गहिओ कसाएहिं। अवगया सुकयवासणा, पवत्तो महामोहो, आमगलिओ
तिव्वकम्मपरिणईए। पवड्ढमाणकोवाणलेण पहओ सिरोहराए, एगपहारेणेव पाडियं उत्तिमङ्गं। 'विजयकुमारो चेव एसो' त्ति 'अहो
विचित्तया जीवचरियाणं, अचिन्तणीया कम्मुणो गइ' त्ति चिन्तिऊण अवगया साहुणो ॥
भयवं पुण गम्भीरयाए आसयस्स विसुद्धयाए मेत्तीए अचलिययाए झाणस्स निम्ममयाए सरीरे भावियंयाए जिणवयणस्स खीण-

---

अतिसंक्लिष्टकर्मानुवेदने यस्तु भवति परिणामः। स संक्लिष्टकर्मणः कारणं यदिह प्रायेण ॥

समागता रजनी। भणिताश्च राज्ञा पूर्वप्रेषिता व्यापादकपुरुषाः। अरे अद्य तं दुराचारं व्यापादयाम इति। प्रतिश्रुतमेभिः। अस्तमितो
मृगाङ्कः। कतिपयपुरुषपरिवृतो गतो जयानगारसमीपं विजयः। दृष्टस्तेन निवातशरणप्रदीप इव सद्ध्यानसंगतो भगवान्। तीव्रानु
भावकषायोदयेन च कृष्टं मण्डलाग्रम्। अधिकतरं गृहीतः कषायैः। अपगता सुकृतवासना, प्रवृत्तो महामोहः, (आमगलिओ दे.)
आक्रान्तः तीव्रकर्मपरिणत्या। प्रवर्धमानकोपानलेन प्रहतः शिरोधरायाम्। एकप्रहारेणैव पातितमुत्तमाङ्गम्। 'विजयकुमार एषः' इति
अहो विचित्रता जीवचरितानाम्, अचिन्तनीया कर्मणो गतिः' इति चिन्तयित्वाऽपगताः साधवः ॥
भगवान् पुनर्गम्भीरतयाऽऽशयस्य विशुद्धतया मैत्र्या अचलिततया ध्यानस्य निर्ममतया शरीरे भाविततया जिनवचनस्य क्षीण

---

१ हरे क। २ निव्वायसरणपईवो क। ३ -सना क। ४ जीवाणमुवरि मेत्तीए क। ५ भावणाए।

प्पाययाए पावकम्मुणो विसुद्धयाए लेसाभावस्स थिरयाए संजयधिईए आसन्नयाए परमपयस्स अपरिवडियसुहपरिणामो चइऊण देहं समुप्पन्नो आणयाभिहाणे देवलोए सिरिप्पहे विमाणे अट्ठारससागरोवमाऊ वेमाणिओ त्ति। विजयओ वि य तं वावाइऊण महाणुभावं कयकिच्चं मन्नमाणो अप्पाणं पविट्ठो नयरिं। सेससाहुणो वि गोसे गया सणंकुमारायरियसमीवं। साहिओ सयलवुत्तन्तो आयरियस्स। सुसीसो त्ति काऊणमणन्नसरिसं कयं परिदेवणं गुरुणा। इयरो वि य विजयनरवई तयप्पभूइमेव महया पावोदएण समुप्पन्नमहावाहि-वेयणो 'जओ वावाइओ' त्ति एद्दहमेत्तेणमप्पाणं कयत्थं मन्नमाणो अहाउयं पालिऊण दुक्खमच्चुणा मओ समाणो उप्पन्नो पङ्कप्पहाए पुढवीए दससागरोवमाऊ महाघोरनारओ त्ति ॥

॥ पञ्चमं भवग्गहणं समत्तं ॥

प्रायतया पापकर्मणो विशुद्धतया लेश्याभावस्य स्थिरतया संयमधृत्या आसन्नतया परमपदस्य अपरिपतितशुभपरिणामश्च्युत्वा देहं समुत्पन्न आनताभिधाने देवलोके श्रीप्रभे विमाने अष्टादशसागरोपमायुष्को वैमानिक इति। विजयोऽपि च तं व्यापाद्य महानुभावं कृतकृत्यं मन्यमान आत्मानं प्रविष्टो नगरीम्। शेषसाधवोऽपि प्रातर्गताः सनत्कुमाराचार्यसमीपम्। कथितः सकलवृत्तान्त आचार्याय। सुशिष्य इति कृत्वाऽनन्यसदृशं कृतं परिदेवनं गुरुणा। इतरोऽपि [illegible] विजयनरपतिस्तत्प्रभृत्येव महता पापोदयेन समुत्पन्नमहाव्याधिवेदनो 'जयो व्यापादितः' इति एतावन्मात्रेणात्मानं कृतार्थं मन्यमानो यथायुष्कं पालयित्वा दुःखमृत्युना मृतः सन्नुत्पन्नः पङ्कप्रभायां पृथिव्यां दशसागरोपमायुष्को महाघोरनारक इति।

इति श्रीयाकिनीमहत्तरासूनु-परमगुणानुरागि-परमसत्यप्रियश्रीहरिभद्राचार्यविरचितायां
समरादित्यकथायां संस्कृतानुवादे पञ्चमभवग्रहणं समाप्तम्॥

॥ छट्ठो भवो ॥

जयविजया य सहोयर जं भणियमिहासि तं गयमियाणिं । वोच्छामि पुव्वविहियं धरणो लच्छी य पइभज्जा ॥

अत्थि इहेव जम्बुद्दीवे दीवे भारहे वासे परिहरिया अहम्मेणं वज्जिया कालदोसेण रहिया उवद्दवेण निवासो नयसिरीए मायन्दी नाम नयरी ।

जीए महुमत्तकामिणिलीलाचंकमणणेउररवेण । भवणवणदीहिआोयररया वि हंसा नडिज्जन्ति ॥

जीए सरलसहावो पियंवओ धम्मनिहियनियचित्तो । पढमाभासी नेहालुओ य पुरिमाण वग्गो त्ति ॥

तत्थ दरियारिमद्दणो सुकयधम्माधम्मववत्थो [कालो व्व रिवूणं] कालमेहो नाम नरवई । तस्स अईव बहुमओ सयलनयरिसेट्ठिचूडामणी-

---

जयविजयौ च सहोदरौ, यद् भणितं तं गतमिदानीम् । वक्ष्ये पूर्वविहितं धरणो लक्ष्मीश्च प्रतिभार्ये ॥

अस्तीहैव जम्बूद्वीपे द्वीपे भारते वर्षे परिहृताऽधर्मेण, वर्जिता कालदोषेण, रहिता उपद्रवेण, निवासो नयश्रियो माकन्दी नाम नगरी ।

यस्यां मधुमत्तकामिनीलीलाचंक्रमणनूपुररवेण । भवनदीर्घिकोदररता अपि हंसा गुप्यन्ते (व्याकुलीक्रियन्ते) ॥

यस्यां सरलस्वभावः प्रियंवदो धर्मनिहितनिजचित्तः । प्रथमाभाषी स्नेहालुश्च पुरुषाणां वर्ग इति ॥

तत्र दृप्तारिमर्दनः सुकृतधर्माधर्मव्यवस्थः काल इव रिपूणां कालमेघो नाम नरपतिः । तस्यातीव बहुमतः सकलनगरश्रेष्ठिचूडामणीभूतो

---

१ नास्ति सपुस्तके । २ चूडामणी य ।

भूओ वन्धुदत्तो नाम सेट्ठि त्ति। सो य परम्मुहो परकलत्ते न अब्भत्थणाए, अलुद्धो परविभवे न धम्मोवज्जणे, असंतुट्ठो परोवयारे न धणागमे, अहिगओ पीईए न मच्छरेणं, दरिद्दो दोसेहिं न विहवेणं। तेण सा नयरी मलयवणं पिव पारिजाएण वसन्तो विय कुसुमुग्गमेण पाउससिरी विय मेहावलीए संरयकालो विय चन्दमण्डलेणं अहियं विभूसिय त्ति। तस्स कमलायरस्स विय विलुप्पइ कोसो मित्तमण्डलेण, कप्पतरुवरस्स विय खन्धे पायं काऊण गहियाइं फलाइं अत्थिनिवहेण। तस्स समाणकुलरूवविहवसहावा हारप्पहा नाम भारिया। स इमीए सह धम्मत्थअभग्गपसरं विसयसुहमणुहवेंसु[1] त्ति॥ इओ य सो आणयकप्पवासी देवो तम्मि देवलोए अहाउयं[2] पालिऊण चुओ समाणो समुप्पन्नो हारप्पहाए कुच्छिसि। दिट्ठा य णाए तीए चेव रयणीए चरिमजामंमि सुमिणए दिव्वपउमासणोवविट्ठा धवलदुगुल्लनिवसणा विविहरयणरइयरसणाकलावा सुकुमालमिउफंसेण उत्तरीएण पच्छाइयपओहरा मुत्तावलीविहूसियाए सिरोहराए रुणरुणन्तमहुयररुप्फुल्लग-[3]

वन्धुदत्तो नाम श्रेष्ठीति। स च पराङ्मुखः परकलत्रे नाभ्यर्थनायाम्, अलुब्धः परविभवे न धर्मोपार्जने, असंतुष्टः परोपकारे न धनागमे, अधिगतः प्रीत्या न मत्सरेण, दरिद्रो दोषैर्न विभवेन। तेन सा नगरी मलयवनमिव पारिजातेन वसन्त इव कुसुमोद्गमेन प्रावृट्श्रीरिव मेघावल्या शरत्काल [इव] चन्द्रमण्डलेनाधिकं विभूषितेति। तस्य कमलाकरस्येव विलुप्यते कोशो मित्रमण्डलेन, कल्पतरुवरस्येव स्कन्धे पादं कृत्वा गृहीतानि फलान्यर्थिनिवहेन। तस्य समानकुल-रूप-विभव-स्वभावा हारप्रभा नाम भार्या। सोऽनया सह धर्मार्थाभग्नप्रसरं विषयसुखमन्वभवत्। इतश्च स आनतकल्पवासी देवो तस्मिन् देवलोके यथायुष्कं पालयित्वा च्युतः सन् समुत्पन्नो हारप्रभायाः कुक्षौ। दृष्टा चानया तस्यामेव रजन्यां चरमयामे स्वप्ने दिव्यपद्मासनोपविष्टा धवलदुकूलनिवसना विविधरत्नखचितरसनाकलापा सुकुमारमृदुस्पर्शेणोत्तरीयेण प्रच्छादितपयोधरा मुक्तावलिविभूषितशिरोधरया [विभ्राजमाना] रणन्मधुकरोत्फुल्लगृहीतकमला धवलकरिवराभ्यां दिव्य-

१ –मणुभविंसु क। २ अहाउयमणु–क। ३ –महुयरफुल्ल–ख।

हियकमला धवलकरियरेहिं दिव्वकञ्चणकलसेहिं अहिसिंचमाणा सिरी वयणेणमुयरं पविसमाणि त्ति। तओ तं दट्ठूण विउद्धा एसा। साहिओ तीए हरिसनिब्भराए दइयस्स। भणिया य णेणं। सुन्दरि, सिरिनिवासो ते पुत्तो भविस्सइ। पडिस्सुयमिमीए। तओ विसेसेण तिवग्गसंपायणरयाए अइक्कन्तो कोइ कालो। पत्तो पसूइसमओ। पसूया य एसा, जाओ से दारओ, निवेइओ परितोसनामाए चेडियाए बन्धुदत्तस्स। परितुट्ठो एसो। दिन्नं तीए पारिओसियं। कयं उचियं करणिज्जं। अइक्कन्तो मासो दारयस्स। पइट्ठावियं च से नामं पियामहस्स सन्तियं धरणो त्ति। पत्तो कुमारभावं, गाहिओ कलाकलावं। निम्माओ य तत्थ पयाणुसारी संवुत्तो॥

एत्थन्तरंमि सो विजयजीवनारओ तओ नरयाओ उव्वट्टिऊण पुणो संसारमाहिण्डिय अणन्तरभवे तहाविहमणुट्ठाणं काऊण तीए चेव नयरीए कत्तियस्स सेट्ठिस्स जयाए भारियाए कुच्छिसि इत्थियत्ताए उववन्नो त्ति। जाया कालक्कमेण। पइट्ठावियं च से नामं

काञ्चनकलशाभ्यामभिषिच्यमाना श्रीर्वदनेनोदरं प्रविशन्तीति। ततस्तां दृष्ट्वा विबुद्धेषा। कथितस्तया हर्षनिर्भरया दयिताय। भणिता च तेन-सुन्दरि! श्रीनिवासस्ते पुत्रो भविष्यति। प्रतिश्रुतमनया। ततो विशेषेण त्रिवर्गसंपादनरतायाः अतिक्रान्तः कोऽपि कालः। प्राप्तः प्रसूतिसमयः। प्रसूता चैषा, जातस्तस्य दारकः, निवेदितः परितोषनाम्न्या चेटिकया बन्धुदत्ताय। परितुष्ट एषः। दत्तं तस्यै पारितोषिकम्। कृतमुचितं करणीयम्। अतिक्रान्तो मासो दारकस्य। प्रतिष्ठापितं च तस्य नाम पितामहस्य सत्कं धरण इति। प्राप्तः कुमारभावम्, ग्राहितः कलाकलापम्। निर्मापितश्च तत्र पदानुसारी संवृत्तः॥

अत्रान्तरे स विजयजीवनारकः ततो नरकादुद्वृत्य पुनः संसारमाहिण्डय अनन्तरभवे तथाविधमनुष्ठानं कृत्वा तस्यामेव नगर्यां कार्तिकस्य श्रेष्ठिनो जयाया भार्यायाः कुक्षौ स्त्रीतयोपपन्न इति। जाता कालक्रमेण। प्रतिष्ठापितं च तस्या नाम लक्ष्मीरिति। प्राप्ता च

१ परिहरिस- क। २ तेण क। ३ पियामहसंतियं क।

लच्छि त्ति। पत्ता य जोव्वणं। अचिन्तणीययाए कम्मपरिणामस्स भवियव्वयाए निओएण महाविभूईए परिणीया य णेणं। अत्थि पीई धरणस्स लच्छीए, न उण तीए धरणंमि। चिन्तेइ एसा। अलं मे जीवलोएण, जत्थ धरणो पइदिणं दीसइ त्ति। एवं च विडम्बणापायं विसयसुहमणुहवन्ताणं अइक्कन्तो कोइ कालो॥

अन्नया य पयत्ते मयणमहूसवे कीलानिमित्तं पयट्टो रहवरेण धरणो मलयसुन्दरं उज्जाणं। पत्तो नयरिदुवारदेसं। एत्थन्तरंमि तओ चेव उज्जाणाओ कीलिऊणागओ रहवरेण नयरिदुवारदेसभायं पञ्चनन्दिसेट्ठिपुत्तो देवनन्दि त्ति। मिलिया रहवरा दुवारदेसभाए। विवित्थिण्णयाए रहवराणं न दोण्हं पि निग्गमणपवेसभूमी। [1]भणियं च देवनन्दिणा। भो भो धरण, ओसारेहि ताव रहवरं, जाव मे पविसइ रहो त्ति। धरणेण भणियं। अइगओ मे रहो, न तीरए चालेउं। ता तुमं चेव ओसारेहि, जाव मे नीसरइ त्ति। देवनन्दिणा

यौवनम्। अचिन्तनीयतया कर्मपरिणामस्य भवितव्यताया नियोगेन महाविभूत्या परिणीता च तेन। अस्ति प्रीतिर्धरणस्य लक्ष्म्यां न पुनस्तस्या धरणे। चिन्तयत्येषा-अलं मे जीवलोकेन, यत्र धरणः प्रतिदिनं दृश्यते इति। एवं च विडम्बनाप्रायं विषयसुखमनुभवतोरतिक्रान्तः कोऽपि कालः॥

अन्यदा च प्रवृत्ते मदनमहोत्सवे क्रीडानिमित्तं प्रवृत्तो रथवरेण धरणो मलयसुन्दरमुद्यानम्। प्राप्तो नगरीद्वारदेशम्। अत्रान्तरे तत एवोद्यानात् क्रीडित्वा गतो रथवरेण नगरीद्वारदेशभागं पञ्चनन्दिश्रेष्ठिपुत्रो देवनन्दीति। मिलितौ रथवरौ द्वारदेशभागे। विस्तीर्णतया रथवरयोर्न द्वयोरपि निर्गमनप्रवेशभूमिः। भणितं च देवनन्दिना-भो भो धरण! अपसारय तावद् रथवरम्, यावन्मे प्रविशति रथ इति। धरणेन भणितम्-अतिगतो मे रथः, न शक्यते चालयितुम्। ततस्त्वमेवापसारय, यावन्मे निःसरतीति। देवनन्दिना भणितम्-

[1] देवनंदिणा भणियं क। २ रहवरं ताव ख।

भणियं। भो भो धरण, अह केण उण अहं भवओ ऊणओ, जेण रहवरं ओसारेमि। धरणेण भणियं। भो भो देवनन्दि, तुल्लमेवेयं। एयं च वित्थक्का दुवे वि सेट्ठिपुत्ता। रुद्धो निग्गमपवेसमग्गो नायरयाणं। पवित्थिण्णो जणवाओ। विन्नाओ एस वुत्तन्तो नयरिमहन्तएहिं। आलोचियं च णेहिं। दुवे वि खु महापुरिसपुत्ता, न खलु एत्थ एगस्स वि निरागरणं जुज्जइ त्ति। ता इमं एत्थ पत्तयालं; निम्मच्छिज्जन्ति एए। जहा 'कीस तुब्भे पुव्वपुरिसज्जिएणं विहवेणं गव्वमुव्वहह। केण तुम्हाण नियभुओवज्जिएणं दविणजाएणं दिन्नं महादाणं। केण वा काराविओ धम्माहिगारो। केण वा अब्भुद्धरिओ विहलवग्गो। केण वा परिओसिया जणणिजणया। ता किमेइणा निरत्थएण बुहजणोवहसणिज्जेण अहोपुरिसियापाएण चेट्ठिएणं। अओ उवसंहरह एयं, ओसारेह नियनियथामाओ चेव पिट्ठओ रहवरे' त्ति। एवमालोचिऊण 'इणमेव तुब्भेहिं ते वत्तव्व' त्ति भणिऊण विसज्जिया वयणविन्नासकुसला धम्मत्थविसारया परिणया वओवत्थाए निवासो उवसमस्स इहपरलोयावायदंसगा सुट्ठिया धम्मपक्खे सयलनयरिजणबहुमया चत्तारि चारिया। गया ते तेसिं समीवं।

भो भो धरण! अथ केन पुनरहं भवत ऊनः, येन रथवरमपसारयामि। धरणेन भणितम्-भो भो देवनन्दिन्! तुल्यमेवैतत्। एवं च विरोधितौ द्वावपि श्रेष्ठिपुत्रौ। रुद्धो निर्गमप्रवेशमार्गो नागरिकानाम्। प्रविस्तीर्णो जनवादः। विज्ञात एष वृत्तान्तो नगरीमहद्भिः। आलोचितं च तैः। द्वावपि खलु महापुरुषपुत्रौ, न खल्वत्र एकस्यापि निराकरणं युज्यते इति। तत इदमत्र प्राप्तकालम्, निर्भर्त्स्येते एतौ, यथा कस्माद् युवां पूर्वपुरुषार्जितेन विभवेन गर्वमुद्वहथः। केन युवयोर्निजभुजोपार्जितेन द्रविणजातेन दत्तं महादानम्, केन वा कारितो धर्माधिकारः, केन वाऽभ्युद्धृतो विहलवर्गः, केन वा परितोषितौ जननीजनकौ। ततः किमेतेन निरर्थकेन बुधजनोपहसनीयेनाहोपुरुषिकाप्रायेण चेष्टितेन। अत उपसंहरतैतद्, अपसारयतं निजनिजस्थानादेव पृष्ठतो रथवरौ, किमन्येनेति। एवमालोच्य 'इदमेव युष्माभिस्तौ

1 धम्मस्स क।

अब्भुट्ठिया य णेहिं। अणुसासिया चारिएहिं। साहिओ पउराहिप्पाओ। 'अहो सोहणं ति' परितुट्ठो देवनन्दी। असोहणं ति लज्जिओ धरणो। भणियं च तेण। भो भो महन्तया, जं तुब्भे आणवेह, तमवस्सं मए कायव्वं। किं तु पडिबोहिओ अहं तुब्भेहिं, लज्जिओ य अत्तणो चेट्ठिएणं, महई मे ओहावणा, आसगब्भपायं च मन्नेमि अत्ताणयं। ता एवं मे अणुग्गहं करेह। ओसारिज्जन्तु एए रहवरा। गच्छामो य अम्हे इओ अन्नेव देसन्तरं। तओ संवच्छरेण जो चेव णे[1]पहूयं दविणजायं विढविऊण इहागच्छिय अहियं सप्पुरिसचेट्ठियं करेस्सइ, तस्सेव सन्तिओ रहो इमीए चेव तेरसीए पविसिस्सइ वा निक्खमिस्सइ वा। चारिएहिं भणियं। अलमेइणा अभिनिवेसेण। धरणेण भणियं। न अन्नहा मे निव्वुई होइ। चारिएहिं भणियं। पउरामेत्थ[3] पमाणं। धरणेण भणियं। निवेएह पउराणं। देवनन्दिणा

'वक्तव्यौ' इति भणित्वा विसर्जिता वचनविन्यासकुशला धर्मार्थविशारदाः परिणता वयोऽवस्थया निवास उपशमस्य इहपरलोकापायदर्शकाः सुस्थिताः धर्मपक्षे सकलनगरीजनबहुमताश्चत्वारश्चारिकाः (प्रधानपुरुषाः)। गतास्ते तयोः समीपम्। अभ्युत्थिताश्च ताभ्याम्। अनुशासितौ च चारिकैः। कथितः पौराभिप्रायः। अहो शोभनमिति परितुष्टो देवनन्दी। अशोभनमिति लज्जितो धरणः। भणितं च तेन-भो भो महान्तः! यद् यूयमाज्ञापयत तदवश्यं मया कर्तव्यम्। किंतु प्रतिबोधितोऽहं युष्माभिः, लज्जितश्चात्मनश्चेष्टितेन, महती मेऽपभावना, आसगर्भप्रायं च मन्ये आत्मानम्। तत एवं मेऽनुग्रहं कुरुत। अपसार्येतामेतौ रथवरौ। गच्छावश्चावामितोऽन्यत्रैव देशान्तरम्। ततः संवत्सरेण य आवयोः प्रभूतं द्रविणजातमुपार्ज्य इहागत्याधिकं सत्पुरुषचेष्टितं करिष्यति तस्यैव सत्को रथोऽस्यामेव त्रयोदश्यां प्रवेक्ष्यति वा निष्क्रमिष्यते वा। चारिकैर्भणितम्-अलमेतेनाभिनिवेशेन। धरणेन भणितम्-नान्यथा मे निर्वृतिर्भवति। चारिकैर्भणितम्-पौरा अत्र

१ मे क। २ बहुयं क। ३ पउरमेत्थ क।

भणियं। जुत्तमेयं, को एत्थ दोसो। तओ निवेइयं पउराणं। वहुमयं च तेसिं। सद्दाविया य तेसिं जणणिजणया। साहिओ वुत्तन्तो, वहुमओ य तेसिं पि। तओ काराविया सवहं 'न तुब्मेहिं एएसिं संवाहणा कायव्वा'। सद्दाविया धरणदेवनन्दी। समप्पियं पत्तेयं तेसिं पञ्चदीणारलक्खपमाणं भण्डमोल्लं। कयं ववत्थापत्तयं 'जो चेव एएसिं संवच्छरब्भन्तरे अहियपरदविणजाएण पोरुसं पयडइस्सइ, तस्सेव सन्तिएण रहवरेण गन्तव्वं, न इयरस्स'। दिन्ना य णेहिं सहत्था। मुद्दियं पत्तयं। छूढं पउरभण्डारे। निग्गया नियपरिवारपरियरिया महया चडयरेण धरणदेवनन्दी; गेण्हिऊण जहोचियं भण्डं पयट्टा देसन्तरं, एगो उत्तरावहं, अवरो पुव्वदेसं।

एत्थन्तरंमि चिन्तियं लच्छीए। दीहाणि देसन्तराणि, सुहेण विओओ, दुक्खेण समागमो; ता न याणामो, अन्तराले किमहं पाविस्सं ति। अवावाइओ चेव विउत्तो खु एसो। गया य सत्थवाहपुत्ता एगं पयाणयं। पेसियाओ य एएसिं वन्धुदत्तपञ्चनन्दीहिं

प्रमाणम्। धरणेन भणितम्-निवेदयत पौरेभ्यः। देवनन्दिना भणितम्-युक्तमेतत्, कोऽत्र दोषः। ततो निवेदितं पौरेभ्यः। वहुमतं च तेषाम्। शब्दायितौ च तयोर्जननीजनकौ। कथितो वृत्तान्तः, वहुमतश्च तयोरपि। ततः कारितौ शपथं 'न युष्माभिरेतयोः संवाहना (सहायता) कर्तव्या'। शब्दायितौ धरणदेवनन्दिनौ। समर्पितं प्रत्येकं तयोः पञ्चदीनारलक्षप्रमाणं भाण्डमौल्यम्। कृतं व्यवस्थापत्रम् 'य एवैतयोः संवत्सराभ्यन्तरेऽधिकपरद्रविणजातेन पौरुषं प्रकटयिष्यते तस्यैव सत्केन रथवरेण गन्तव्यम्, नेतरस्य'। दत्तौ चाभ्यां स्वहस्तौ। मुद्रितं पत्रम्। क्षिप्तं पौरभाण्डागारे। निर्गतौ निजपरिवारपरिवृतौ महताऽऽडम्बरेण धरणदेवनन्दिनौ, गृहीत्वा यथोचितं भाण्डं प्रवृत्तौ देशान्तरम्। एक उत्तरापथम्, अपरः पूर्वदेशम्।

अत्रान्तरे चिन्तितं लक्ष्म्या-दीर्घाणि देशान्तराणि, सुखेन वियोगः, दुःखेन समागमः, ततो न जानामि, अन्तराले किमहं प्राप्स्यामि

---

१ आगन्तूण उवविट्ठा पणामपुव्वयं' इत्यधिकः पाठः कपुस्तके। २ किमेत्थ मंविस्सइ त्ति क।

अब्भुट्ठिआ य णेहिं। अणुमासिया चारिएहिं। साहिओ पउराहिप्पाओ। 'अहो सोहणं ति' परितुट्ठो देवनन्दी। असोहणं ति लज्जिओ धरणो। भणियं च तेण। भो भो महन्तया, जं तुब्भे आणवेह, तमवस्सं मए कायव्वं। किं तु पडिबोहिओ अहं तुब्भेहिं, लज्जिओ य अत्तणो चेट्ठिएणं, महई मे ओहावणा, आमगब्भपायं च मन्नेमि अत्ताणयं। ता एवं मे अणुग्गहं करेह। ओसारिज्जन्तु एए रहवरा। गच्छामो य अम्हे इओ अज्जेव देसन्तरं। तओ संवच्छरेण जो चेव णे पहूयं दविणजायं विढविऊण इहागच्छिय अहियं सप्पुरिसचेट्ठियं करेस्सइ, तस्सेव सत्तिओ रहो इमीए चेव तेरसीए पविसिस्सइ वा निक्खमिस्सइ वा। चारिएहिं भणियं। अलमेइणा अभिनिवेसेण। धरणेण भणियं। न अन्नहा मे निव्वुई होइ। चारिएहिं भणियं। पउरामेत्थ पमाणं। धरणेण भणियं। निवेएह पउराणं। देवनन्दिणा

यच्च्वी' इति भणित्वा विसर्जिता वचनविन्यासकुशला धर्मार्थविशारदाः परिणता वयोऽवस्थया निवास उपशमस्य इहपरलोकापायदर्शकाः सुस्थिताः धर्मपक्षे सकलनगरीजनबहुमताश्चत्वारश्चारिकाः (प्रधानपुरुषाः)। गतास्ते तयोः समीपम्। अभ्युत्थिताश्च ताभ्याम्। अनुज्ञापितौ च चारिकैः। कथित पौराभिप्रायः। अहो शोभनमिति परितुष्टो देवनन्दी। अशोभनमिति लज्जितो धरणः। भणित च तेन-भो भो महान्तः! यद् यूयमाज्ञापयत तदवश्यं मया कर्तव्यम्। किंतु प्रतिबोधितोऽहं युष्माभिः, लज्जितश्चात्मनश्चेष्टितेन, महती मेऽपभावना, आमगर्भपातं च मन्ये आत्मानम्। तत एवं मेऽनुग्रहं कुरुत। अपसार्यंतामेतौ रथवरौ। गच्छावश्चावामितोऽद्यैव देशान्तरम्। तत संवत्सरेण य आवयोः प्रभूतं द्रविणजातमुपार्ज्य इहागत्याधिकं सत्पुरुषचेष्टितं करिष्यति तस्यैव सत्को रथोऽस्यामेव त्रयोदश्यां प्रवेक्ष्यति वा निष्क्रमिष्यते वा। चारिकैर्भणितम्-अलमेतेनाभिनिवेशेन। धरणेन भणितम्-नान्यथा मे निर्वृतिर्भवति। चारिकैर्भणितम्-पौरा अत्र

---

१ ने क। २ बहुय क। ३ पउरमेत्थ क।

भणियं। जुत्तमेयं, को एत्थ दोसो। तओ निवेइयं पउराणं। वहुमयं च तेसिं। सद्दाविया य तेसिं जणणिजणया। साहिओ वुत्तन्तो, वहुमओ य तेसिं पि। तओ काराविया सवहं 'न तुम्भेहिं एएसिं संवाहणा कायव्वा'। सद्दाविया धरणदेवनन्दी। समप्पियं पत्तेयं तेसिं पञ्चदीणारलक्खपमाणं भण्डमोल्लं। कयं ववत्थापत्तयं 'जो चेव एएसिं संवच्छरब्भन्तरे अहिययरदविणजाएण पोरुसं पयडइस्सइ, तस्सेव सन्तिएण रहवरेण गन्तव्वं, न इयरस्स'। दिन्ना य णेहिं मद्दत्था। मुद्दियं पत्तयं। छूढं पउरभण्डारे। निग्गया नियपरिवारप-रियरिया महया चडयरेण धरणदेवनन्दी; गेण्हिऊण जहोचियं भण्डं पयट्टा देसन्तरं, एगो उत्तरावहं, अवरो पुव्वदेसं।

एत्थन्तरंमि चिन्तियं लच्छीए। दीहाणि देसन्तराणि, सुहेण विओओ, दुक्खेण समागमो; ता न याणामो, अन्तराले किंमहं पाविस्सं ति। अवाणाइओ चेव विउत्तो खु एसो। गया य सत्थवाहपुत्ता एगं पयाणयं। पेसियाओ य एएसिं बन्धुदत्तपञ्चनन्दीहिं

प्रमाणम्। धरणेन भणितम्-निवेदयत पौरेभ्यः। देवनन्दिना भणितम्-युक्तमेतत्, कोऽत्र दोषः। ततो निवेदितं पौरेभ्यः। बहुमतं च तेषाम्। शब्दायितौ च तयोर्जननीजनकौ। कथितो वृत्तान्तः, बहुमतश्च तयोरपि। ततः कारितो शपथ 'न युष्माभिरेतयोः संधाहना (सहायता) कर्तव्या'। शब्दायितौ धरणदेवनन्दिनौ। समर्पितं प्रत्येकं तयोः पञ्चदीनारलक्षप्रमाणं भाण्डमौल्यम्। कृतं व्यवस्थापत्रम् 'य एवैतयोः संवत्सराभ्यन्तरेऽधिकतरद्रविणजातेन पौरुषं प्रकटयिष्यते तस्यैव सत्केन रथवरेण गन्तव्यम्, नेतरस्य'। दत्तौ चाभ्यां स्वहस्तौ। मुद्रितं पत्रम्। क्षिप्तं पौरभाण्डागारे। निर्गतौ निजपरिवारपरिवृतौ महताऽऽडम्बरेण धरणदेवनन्दिनौ, गृहीत्वा यथोचितं भाण्डं प्रवृत्तौ देशान्तरम्। एक उत्तरापथम्, अपरः पूर्वदेशम्।

अत्रान्तरे चिन्तितं लक्ष्म्या-दीर्घाणि देशान्तराणि, सुखेन वियोगः, दुःखेन समागमः, ततो न जानामि, अन्तराले किमहं प्राप्स्यामि

१ आगतूण उवविट्ठा पणामपुव्वय' इत्यधिकः पाठः कपुस्तके। २ किमेत्थं भविस्सइ त्ति क।

सरीरट्ठिइनिमित्तमालोचिय आउच्छिऊण नयरिमहन्तए सपरिवाराओ वहूओ, मिलियाओ य एएसिं। पइदिणपयाणएहिं च गच्छमाणाणं अइक्कन्ता कइवि दियहा॥

अन्नया य परिवहन्ते सत्थे दिट्ठो धरणेण एगंमि वणनिउञ्जे अच्चन्तसोमरूवो उप्पायनिवाए करेमाणो विज्जाहरकुमारओ। गओ तस्स समीवं। पुच्छिओ य एसो। भो किंनिमित्तं पुण तुमं असंजायपक्खो विय गरुडपोयओ मुहवियारोवलक्खिज्जमाणनहङ्गणगमणूसुओ विय उप्पायनिवाए करेमि। आचिक्ख, जइ अकहणिज्जं न होइ। तओ अहो से भावन्नुयया, अहो आगई, अहो वयणविन्नासो' त्ति चिन्तिऊण भणियं विज्जाहरेण। भो, सुण। अहं खु वेयड्ढपव्वए अमरपुरनिवासी हेमकुण्डलो नाम विज्जाहरकुमारो अणब्भत्थविज्जो सयनिओयपरो तत्थेव चिट्ठामि, जाव समागओ तायस्स परममित्तो विज्जुमाली नाम विज्जाहरो। भणिओ य ताएण। कुओ

-इति। धन्यापादित एव वियुक्तः स्नेहः। गतौ च सार्थवाहपुत्रौ एकं प्रयाणकम्। प्रेषिते चैतयोर्बन्धुदत्तपञ्चनन्दिभ्यां शरीरस्थितिनिमित्तमालोच्य आपृच्छ्य नगरीमहत्तः सपरिवारे वध्वौ, मिलिते चैतयोः। प्रतिदिनप्रयाणकैश्च गच्छतोरतिक्रान्ताः कत्यपि दिवसाः॥

अन्यदा च परिवहति सार्थे दृष्टो धरणेन एकस्मिन् वननिकुञ्जेऽत्यन्तसौम्यरूप उत्पातनिपातान् कुर्वन् विद्याधरकुमारः। गतस्तस्य समीपम्। पृष्टश्चैषः। भोः किंनिमित्तं पुनस्त्वमसंजातपक्ष इव गरुडपोतको मुखविकारोपलक्ष्यमाणनभोङ्गणगमनोत्सुक इव उत्पातनिपातान् करोषि। आचक्ष्व यद्यकथनीयं न भवति। 'ततोऽहो तस्य भावज्ञता, अहो आकृतिः, अहो वचनविन्यासः' इति चिन्तयित्वा भणितं विद्याधरेण। भोः। शृणु। अहं खलु वैताढ्यपर्वतेऽमरपुरनिवासी हेमकुण्डलो नाम विद्याधरकुमारोऽनभ्यस्तविद्यः स्वनियोगपरस्तत्रैव तिष्ठामि, यावत् समागतस्तातस्य परममित्रं विद्युन्माली नाम विद्याधरः। भणितश्च तातेन। कुतस्त्वम्, कस्माद् वा विमनस्कदुर्मनस्को

१ -मालोचिऊण पुच्छिऊण क।

तुमं, कीस वा विमणदुम्मणो दीससि। तेण भणियं। विञ्झाओ अहं। विमणदुम्मणत्त पुण इमं कारण। दिट्ठं मए विञ्झाओ इहा-गच्छमाणेण उज्जेणीए निव्वेयकारणं। ताएण भणियं। कीइसं निव्वेयकारणं। विज्जुमालिणा भणियं। सुण।

अत्थि उज्जेणीए सिरिप्पहो नाम राया। तस्स रुविणि व्व कुसुमाउहवेजयन्ती जयसिरी नाम धूया। सा य पत्थेमाणस्स वि न दिन्ना कोङ्कणरायपुत्तस्स सिसुवालस्स, दिन्ना य इमेण वच्छेसरसुयस्स परोवयारकरणेक्कलालसस्स सिरिविजयस्स। कुविओ सिसुवालो। आयाओ जयसिरिविवाहनिमित्तं सिरिविजओ। तओ पारद्धे महाविभूईए विवाहमहूसवे निग्गया मयणवन्दणनिमित्तं समालोचिय वि-हायणमवक्खन्दं दाऊणं अवहरिया सिसुवालेण जयसिरी। उट्ठाइओ कलयलो। मुणिओ वुत्तन्तो सिरविजएणं। लग्गो मग्गओ। समा-साइओ सिसुवालो। आवडियमाओहणं। गाढपहारीकएणं च जेऊणं सिसुवालं नियत्तिया जयसिरी। पहारगरुययाए य सो महाणु-

हदयसे। तेन भणितम्-विन्ध्यादहम्, विमनोदुर्मनस्त्वे पुनरिदं कारणम्। दृष्टं मया विन्ध्यादिहागच्छता उज्जयिन्यां निर्वेदकारणम्। तातेन भणितम्-कीदृशं निर्वेदकारणम्। विद्युन्मालिना भणितम्-शृणु।

अस्त्युज्जयिन्यां श्रीप्रभो नाम राजा। तस्य रूपिणीव कुसुमायुधवैजयन्ती जयश्रीर्नाम दुहिता। सा च प्रार्थयमानस्यापि न दत्ता कोङ्कणराजपुत्रस्य शिशुपालस्य, दत्ताऽनेन वत्सेश्वरसुतस्य परोपकारकरणैकलालसस्य श्रीविजयस्य। कुपितः शिशुपालः। आगतो जयश्रीविवाहनिमित्तं श्रीविजयः। ततः प्रारब्धे महाविभूत्या विवाहमहोत्सवे निर्गता मदनवन्दननिमित्तं समालोच्य विहायसाऽवस्कन्दं दत्त्वाऽपहृता शिशुपालेन जयश्रीः। उत्थितः कलकलः। ज्ञातो वृत्तान्तः श्रीविजयेन। लग्नो मार्गतः। समासादितः शिशुपालः। आपतितमायोधनम्।

१ संवुत्तो क। २ महानिव्वेय- ख। ३ रूविव्व क-ख। ४ सिसुपालस्स ख। ५ इमेण सिरिप्पहनराइणा क। ६ मयणपूयानिमित्तं। ७ उद्धाइओ ख। ८ जिणिऊण ख।

भावो पाणसंसए वट्टए । सा वि रायधूया 'न अहमेयंमि अकयपाणभोयणे पाणवित्तिं करेमि' त्ति वामकरयलपणामियवयणपङ्कया अणाचिक्खणीयं अवत्थन्तरमणुहवन्ती दुक्खेण चिट्ठइ ॥ एयं मे एत्थ कारणं । ताएण भणियं । ईइसो एस संसारो । खेल्लणयभूया खु एत्थ कम्मपरिणईए पाणिणो । ता अलं निव्वेएण ॥ तओ मए चिन्तियं । साहियं मे कल्लं चेव हिमवन्तपव्वयगयस्स दरिहरुग्गयं महोसहिमवलोइऊण गन्धव्वरइनामेण गन्धव्वकुमारेण मम वयंसएण । जहा भो हेमकुण्डल, सच्चो खु एस लोयवाओ, जं अचिन्तो हि मणिमन्तोसहीणं पभावो त्ति, जओ एयाए ओसहीए एसो पहावो, जेण विदारियट्ठी वि खग्गाइपहारो इमीए पक्खालणोयएणं पि पणट्ठवेयणं तक्खणा चेव रुज्झइ त्ति । दिट्ठपच्चया य मेए सा । ता गच्छामि अहयं हिमवन्तं गेण्हिऊण तयं ओसहिं उवणेमि सिरिविजयस्स । तओ सुमरिऊण कहंचि गयणगामिणिं विज्जं गओ हिमवन्तपव्वयं । गहिया ओसही । ओइण्णो हिमवन्ताओ । 'मा सि-

गाढप्रहारीकृतेन च जित्वा शिशुपालं निर्वर्तिता जयश्रीः । प्रहारगुरुकतया च स महानुभावः प्राणसंशये वर्तते । साऽपि राजदुहिता 'नाहमेतस्मिन्नकृतपानभोजने प्राणवृत्तिं करोमि' इति वामकरतलार्पितवदनपङ्कजाऽनाख्यानीयमवस्थान्तरमनुभवन्ती दुःखेन तिष्ठति । एतन्मेऽत्र कारणम् । तातेन भणितम्–ईदृश एष संसारः । खेलनकभूताः खल्वत्र कर्मपरिणत्याः प्राणिनः । ततोऽलं निर्वेदेन । ततो मया चिन्तितम्–कथितं मे कल्ये एव हिमवत्पर्वतगतस्य दरीगृहोद्गतां महौषधिमवलोक्य गान्धर्वरतिनाम्ना गान्धर्वकुमारेण मम वयस्येन । यथा भो हेमकुण्डल ! सत्यः खल्वेष लोकवादः, यदचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति । यत एतस्या ओषध्या एष प्रभावः, येन विदारितास्थिरपि खड्गादिप्रहारोऽस्याः प्रक्षालनोदकेनापि प्रनष्टवेदनं तत्क्षणादेव रुह्यते इति । दृष्टप्रत्यया च मया सा । ततो गच्छाम्यहं हिमवन्तं गृहीत्वा तामोषधिमुपनयामि श्रीविजयाय । ततः स्मृत्वा कथंचिद् गगनगामिनीं विद्यां गतो हिमवत्पर्वतम् । गृहीतौषधिः । अवतीर्णो

१ नाहमेयमि क । २ खेलणय– क । ३ खग्गाइपहारेण क । ४ मम एसा ख ।

रिविजयस्स अचाहियं भविस्सइ' त्ति पडिनियत्तो वेएण । पत्तो एयं निउञ्जं, खीणयाए वेयागमणेण वीसमणनिमित्तं ओइण्णो इहइं, कयं चलणसोयं उवविट्ठो कुरवयपायवसमीवे, ठिओ मुहुत्तमेत्तं, उच्चलिओ य उज्जेणिं । सुमरिया गयणगामिणी विज्जा, जाव अहिणव-गिहीयत्तणेण गमणसंभमेण य विसुमरियं मे पयं। तओ सा न वहइ त्ति उप्पायनिवाए करेमि । धरणेण भणियं । भो एवं ववत्थिए को इह उवाओ । हेमकुण्डलेण भणियं । नत्थि उवाओ । अओ चेव रायउत्तविणाससङ्काए उत्तम्मइ मे हिययं, पणस्सइ मे मई । सव्वहा न अप्पपुण्णाणं समीहियं संपज्जइ त्ति दढं विसण्णो म्हि । धरणेण भणियं । भो अत्थि एस कप्पो, जं सा अन्नस्स समक्खं पढिज्जइ । हेमकुण्डलेण भणियं 'अत्थि' । धरणेण भणियं । जइ एवं, [illegible] पढः कयाइ अहं ते पयं लहामि । तओ हेमकुण्डलेण 'नत्थि अविसओ पुरिससामत्थस्स' त्ति चिन्तिय सामन्नसिद्धिं काऊण पढिया विज्जा । पयाणुसारित्तणेण लद्धं पयं धरणेण । साहियं हेमकु-

हिमवतः। 'मा श्रीविजयस्यात्याहितं भविष्यति' इति प्रतिनिवृत्तो वेगेन । प्राप्त एतद् निकुञ्जम् । क्षीणतया वेगागमनेन विश्रमणनिमित्तमवतीर्ण इह। कृतं चरणशौचम्, उपविष्टः कुरवकपादपसमीपे, स्थितः मुहूर्तमात्रम्, उच्चलितश्चोज्जयिनीम्। स्मृता गगनगामिनी विद्या, यावदभिनवगृहीतत्वेन गगनसंभ्रमेण च विस्मृतं मया पदम्। ततः सा न वहतीति उत्पातनिपातान् करोमि। धरणेन भणितम्-भो एवं व्यवस्थिते क इहोपायः। हेमकुण्डलेन भणितम्-नास्त्युपायः। अत एव राजपुत्रविनाशशङ्कया उत्ताम्यति मे हृदयम्, प्रणश्यति मे मतिः। सर्वथा नाल्पपुण्यानां समीहितं संपद्यते इति दृढं विषण्णोऽस्मि। धरणेन भणितम्-भो अस्त्येष कल्पः, यत्साऽन्यस्य समक्षं पठ्यते। हेमकुण्डलेन भणितम्-'अस्ति'। धरणेन भणितम्-यद्येवं ततः पठ, कदाचिदहं तव पदं लभे। ततो हेमकुण्डलेन 'नास्त्यविषयः पुरुषसामर्थ्यस्य' इति चिन्तयित्वा सामान्यसिद्धिं कृत्वा पठिता विद्या। पदानुसारित्वेन लब्धं पदं धरणेन। कथितं हेमकुण्डलाय। परि-

१ गहीयत्तणेण । २ अन्नाणं पि क । ३ चिन्तिऊण क ।

ण्डलस्स। परितुट्ठो एसो। भणियं च णेण। भो भो महापुरिस, दिन्नं तए जीवियं मम समीहियसंपायणेण रायउत्तस्स, ता किं ते करेमि। धरणेण भणियं। कयं ते करणिज्जं; गच्छ समीहियं संपाडेहि। तओ हेमकुण्डलेण 'अहो से महाणुभावय' त्ति चिन्तिय परत्थं करेज्जासि त्ति भणिऊण दिन्नं ओसहिवलयखण्डं। पणयभङ्गभीरुत्तणेण गहियं च णेण। गओ विज्जाहरो, आगओ य धरणो नियय-सत्थं। अइक्कन्ता कइवि दियहा॥

अन्नया य गिरिनइतीरंमि समावासिए सत्थे गवलजलयवण्णा वेल्लिनिबद्धुद्धकेसहारा वक्कलद्धनिवसणा कणियकोडण्डवावडग्ग-हत्था सुणयवन्द्रसंगया सदुक्खं रुयमाणा दिट्ठा धरणेण नाइदूरगामिणा सबरजुवाणय त्ति। सद्दाविया णेण पुच्छिया य। भो किंनि-मित्तं रुयह त्ति। तेहिं भणियं अज्ज, अत्थि अम्हाणं कालसेणो नाम पल्लीवई।

तुष्ट एषः। भणितं च तेन-भो भो महापुरुष! दत्तं त्वया जीवितं मम समीहितसंपादनेन राजपुत्राय, ततः किं ते करोमि। धरणेन भणितम्-कृतं त्वया करणीयम्, गच्छ समीहितं संपादय। ततो हेमकुण्डलेन 'अहो तस्य महानुभावता' इति चिन्तयित्वा 'परार्थं कुर्याः' इति भणित्वा दत्तमोषधिवलयखण्डम्। प्रणयभङ्गभीरुत्वेन गृहीतं च तेन। गतो विद्याधरः, आगतश्च धरणो निजसार्थम्। अति-क्रान्ताः कत्यपि दिवसाः।

अन्यदा च गिरिणदीतीरे समावासिते सार्थे गवलजलदवर्णा वल्लिनिबद्धोर्ध्वकेशहारा वल्कलार्धनिवसनाः कर्णिककोदण्डव्यापृताग्रहस्ताः शुनकवन्द्रसंगताः सदुःखं रुदन्तो दृष्टा धरणेन नातिदूरगामिना शबरयुवान इति। शब्दायितास्तेन पृष्टाश्च। भोः किंनिमित्तं रुदितेति। तैर्भणितम्-आर्य! अस्त्यस्माकं कालसेनो नाम पल्लिपतिः।

जस्स इह विम्हियाओ सत्तिनियाणाणि चिन्तयन्तीओ। न समल्लियन्ति दुग्गं परचक्कभए वि वाहीओ ॥
एक्कसरघायलद्धा जस्स य करिकुम्भदारणेक्करसा। न वि विहलन्तसरीरा गच्छन्ति पयं पि केसरिणो ॥

सो[1] खु केसरी आगओ त्ति आयण्णिय घेत्तूण कोदण्डं[2] कण्णियसरं च एगागी चेव निग्गओ पल्लीओ। न दिट्ठो य णेण नग्गोहपायवन्तरिओ केसरी। गओ तस्स समीवं। गहिओ य णेण पट्ठिदेसे। वावाइओ तेण वलिऊण कट्टारएण[3] केसरी। तेण वि य से[4] तोडियं उत्तिमङ्गखण्डं। तओ सो 'नत्थि मे जीवियं[5]' त्ति मन्नमाणो जलणपवेसं काउमारद्धो। मुणिओ से एस वुत्तन्तो गेहिणीए। तओ सा वि आवन्नसत्ता तं चेव काउं ववसिया[6], वारिया वि पल्लीवइणा[7] न विरमइ त्ति। तओ तेण पेसिया अम्हे तीए संधारणत्थं पिउणो से आणयणनिमित्तं। वीररसपहाणो खु सो[8] सयणवच्छलो य। ता न याणामो, किं पडिवज्जिस्सइ त्ति। महादुक्खपीडिया असमत्था

यस्येह विस्मिता शक्तिनिदानानि चिन्तयन्त्यः। न समालीयन्ते(समाश्रयन्ति)दुर्गं परचक्रभयेऽपि व्याध्यः (व्याधपत्न्यः)
एकशरघातलब्धा(प्राप्ता) यस्य च करिकुम्भदारणैकरसाः। नापि विह्वलच्छरीरा गच्छन्ति पदमपि केसरिणः ॥

स खलु केसरी आगत इत्याकर्ण्य गृहीत्वा कोदण्डं कर्णिकशरं च एकाक्येव निर्गतः पल्लितः। न दृष्टश्चानेन न्यग्रोधपादपान्तरितः केसरी। गतस्तस्य समीपम्। गृहीतश्च तेन पृष्ठदेशे। व्यापादितस्तेन वलित्वा कट्टारकेन केसरी। तेनापि च तस्य तोडितमुत्तमाङ्गखण्डम्। ततः स 'नास्ति मे जीवितम्' इति मन्यमानो ज्वलनप्रवेशं कर्तुमारब्धः। ज्ञातस्तस्यैष वृत्तान्तो गेहिन्या। ततः साऽपि आपन्नसत्त्वा तमेव कर्तुं व्यवसिता, वारिताऽपि पल्लिपतिना न विरमतीति। ततस्तेन प्रेषिता वयं तस्याः संधारणार्थं पितुस्तस्या आनयननिमित्तम्। वीररसप्रधानः खलु स स्वजनवत्सलश्च। ततो न जानीमः किं प्रतिपत्स्यत इति। महादुःखपीडिता असमर्थाश्च धर्तुमिमं

---

१ सो य केसरी क। २ कोडडं क। ३ छुरियाए क। ४ तोडियं से उत्तिमङ्ग–क। ५ जीय क। ६ ययस क। ७ पल्लि–क। ८ एसो क।

य घरिउं इमं सोयाइरेयं अविज्जमाणोवाया य पडिवज्जिऊण इत्थियाभावं केवलं रुयम्ह। धरणेण भणियं। भद्दा, अलं सोएण। दंसेहि मे तं पल्लीवइं। कयाइ जीवावेमि अहयं। तओ चलणेसु निवडिऊण हरिसवसुप्फुल्ललोयणेहिं जंपियं सवरेहिं। अज्ज, एवं तुमं देवाव- यारो चिय आगईए। ता तुमं चेव समत्थो सि देवं समासासेउं। अन्नं च। जइ अम्हेसु अणुग्गहबुद्धी अज्जस्स, ता तुरियं गच्छउ अज्जो; मा तस्स महाणुभावस्स अच्चाहियं भवे। तओ घेत्तूण विज्जाहरविइण्णं ओसहिवलयं आरुहिय वेसरं कइवयनियपुरिसपरियारिओ तुरियतुरियं गओ सत्थवाहपुत्तो। दिट्ठो य तेणं नग्गोहपायवतलम्मि चियगासन्नसंठिओ रुहिरधारापरिसित्तगत्तो सिणेहसारमसद्दं च रोवमाणीए जायाए संगओ कालसेणो। निवेइओ से वुत्तन्तो सवरजुवाणएण। अब्भुट्ठमाणो य मुच्छानिमीलियलोयणो निवडिओ धरणिवट्ठे। धरणेण भणियं। उदयमुदयं ति। तओ आणीयमुदयं नलिणिपत्तेणं। छूढमोसहिवलयं दारुणमुत्तिमज्झखण्डं। सित्तो य

शोकातिरेकम्, अविद्यमानोपायाश्च प्रतिपद्य स्त्रीभावं केवलं रुदिमः। धरणेन भणितम्-भद्राः! अलं शोकेन। दर्शय मे तं पल्लीपतिम्, कदाचिज्जीवयाम्यहम्। ततश्चरणयोर्निपत्य हर्षवशोत्फुल्ललोचनैर्जल्पितं शबरैः। आर्य! एवं त्वं देवावतार इवाकृत्या। ततस्त्वमेव सम र्थोऽसि देवं समाश्वासितुम्। अन्यच्च, यद्यस्मास्वनुग्रहबुद्धिरार्यस्य ततस्त्वरितं गच्छत्वार्यः, मा तस्य महानुभावस्यात्याहितं भवेत्। ततो गृहीत्वा विद्याधरवितीर्णमोषधिवलयमारुह्य वेसरं कतिपयनिजपुरुषपरिवृतस्त्वरितत्वरितं गतः सार्थवाहपुत्रः। दृष्टस्तेन न्यग्रोध- पादपतले चितासन्नसंस्थितो रुधिरधारापरिषिक्तगात्रः स्नेहसारमशब्दं च रुदत्या जायया संगतः कालसेनः। निवेदितस्तस्य वृत्तान्तः शबरयूना। अभ्युत्तिष्ठंश्च मूर्च्छानिमीलितलोचनो निपतितो धरणीपृष्ठे। धरणेन भणितम्-'उदकमुदकमिति। तत आनीतमुदकं

१ -लोयणं पयंपियं क। २ रोयमाणीए क। ३ पइ क। ४ पोइणिपत्तेहिं क। ५ छोढूणमो-क।

णेणं, जाव अचिन्तयाए ओसहिपहावस्स पुव्वरूवाओ वि अहिययरं दंसणीओ अलक्खिज्जमाणवणविभाओ उट्ठिओ कालसेणो। तुट्ठा य से घरिणी सह परियणेण। चलणेसु निवडिऊण भणियं च णेण। अज्ज, पिययमाजीयरक्खणेणं संपाडियमहापओयणा तुह सन्तिया पाणा; किमेत्थ अवरं भणीयइ। धरणेण भणियं। सव्वसाहारणा चेव महापुरिस,पाणा हवन्ति। किमेत्थ अहियं। कालसेणेण भणियं। ता आइसउ अज्जो, जं मए कायव्वं ति। धरणेण भणियं। महापुरिसो खु तुमं; ता किं अवरं भणीयइ; तहा वि सत्तेसु दया। कालसेणेण भणियं परिवज्जिया जावज्जीवमेव मए अज्जवयणेण पारद्धी। धरणेण भणियं। कयं मे करणिज्जं। तओ गओ सत्थवाहपुत्तो नियय सत्थं ॥

अइक्कन्ता कइवि दियहा अणवरयपयाणएणं। दिट्ठो य णेण पक्खसन्धीए उववासेट्ठिएणं आयामुहीसन्निवेसम्मि आवासिए सत्थे

नलिनीपत्रेण। क्षिप्तमोपधिवलयं दत्त्वोत्तमाङ्गखण्डम्। सिक्तस्तेन, यावदचिन्त्यतया ओषधिप्रभावस्य पूर्वरूपादप्यधिकतरं दर्शनीयोऽल-क्ष्यमाणव्रणविभाग उत्थितः कालसेनः। तुष्टा च तस्य गृहिणी सह परिजनेन। चरणयोर्निपत्य भणितं च तेन। आर्य! प्रियतमाजीवि-तरक्षणेन संपादितमहाप्रयोजनास्तव सत्काः प्राणाः, किमत्रापरं भण्यते। धरणेन भणितम्-सर्वसाधारणा एव महापुरुष! प्राणा भवन्ति, किमत्राधिकम्। कालसेनेन भणितम्-तत आदिशत्वार्यः, यन्मया कर्तव्यमिति। धरणेन भणितम्-महापुरुषः खलु त्वम्, ततः किमपरं भण्यते, तथापि सत्त्वेषु दया। कालसेनेन भणितम्-परिवर्जिता यावज्जीवमेव मयाऽऽर्यवचनेन पापर्द्धिः। धरणेन भणितम्-कृतं मे करणीयम्। ततो गतः सार्थवाहपुत्रो निजसार्थम्।

अतिक्रान्ता कत्यपि दिवसा अनवरतप्रयाणकेन। दृष्टस्तेन पक्षसन्धौ उपवासस्थितेन आयामुखीसन्निवेशे आवासिते सार्थे जरच्ची-

---

१ णेणमोसहिभोवउदएणं क। २ अउज्जं क। ३ पयाणएहिं वच्चमाणेण क। ४ उववाससठिएण क।

रत्तवीरनियमणो गेरुयविलित्तसव्वगत्तो खन्धदेसारोवियतिक्खसूलिओ अचोरो चेव चोरो त्ति करिय गहिओ वज्जन्तविरसडिण्डिमं वज्झत्थामं नीयमाणो चण्डालजुवाणओ त्ति। तेण वि य महन्तं सत्थमवलोइय सुद्धयाए आसयस्स वल्लहयाए जीवियस्स तस्स समीवम्मि चेव महया सद्देण जंपियं। भो भो सत्थिया, सुणेह तुब्भे। महासरनिवासी मोरिओ नाम चण्डालो अहं, कारणेण य कुसत्थलं पयट्टो, विप्पलद्धबुद्धीहि य दण्डवासिएहिं अपेच्छिऊण चोरे अदोसयारी चेव मन्दभागो गिहीओ म्हि। ता मोयावेह, भो मोयावेह; सरणागओ अहं अज्जाणं। अन्नं च, मरणदुक्खाओ वि मे इयमब्भहियं, जं तहाविहनिक्कलङ्कपुव्वपुरिसज्जियस्स जसस्स विणा वि दोसेणं मइलण त्ति। ता मोयावेह, भो मोयावेह। तओ सुद्धचित्तयाए चिन्तियं धरणेण। न खलु दोसयारी एवं जंपइ। करुणापवन्नेण भणिया णेण आरक्खिया। भो भो कुलउत्तया, मम कएण विईरह मुहुत्तयं, जाव एयमन्तरेण विन्नविऊण नरवइं दविणपयाणेणा वि मोया-

रक्तवीरनियमनो गैरिकविलिप्तसर्वगात्रः स्कन्धदेशारोपिततीक्ष्णशूलिकोऽचोर एव चोर इति कृत्वा गृहीतो वाद्यमानविरसडिण्डिमं वध्यस्थानं नीयमानश्चण्डालयुवेति। तेनापि च महान्तं सार्थमवलोक्य शुद्धतयाऽऽशयस्य वल्लभतया जीवितस्य तस्य समीप एव महता शब्देन जल्पितम्–भो भोः सार्थिकाः शृणुत यूयम्। महासरनिवासी मौर्यो नाम चण्डालोऽहम्, कारणेन च कुशस्थलं प्रवृत्तः, विप्रलब्धबुद्धिभिश्च दण्डपाशिकैरप्रेक्ष्य चौरान् अदोषकार्येव मन्दभाग्यो गृहीतोऽस्मि। ततो मोचयत भो मोचयत, शरणागतोऽहमार्याणाम्। अन्यच्च मरणदुःखादपि मे इदमभ्यधिकम्, यत्तथाविधनिष्कलङ्कपूर्वपुरुषार्जितस्य यशसो विनापि दोषेण मलिनतेति। ततो मोचयत भो मोचयत। ततः शुद्धचित्ततया चिन्तितं धरणेन। न खलु दोषकारी एवं जल्पति। करुणाप्रपन्नेन भणितास्तेन आरक्षकाः। भो भोः कुलपुत्रा! मम कृतेन प्रतीक्षध्वं मुहूर्तम्, यावदेतदन्तरेण (एतत्संबन्धेन) विज्ञप्य नरपतिं द्रविणप्रदानेनापि मोचयाम्येतम्। तैर्भणितम्–यद्येवं ततो लघु

१ सुणह क। २ मोरियओ क। ३ कुलजसस्स क। ४ –पयाणेण य क।

वेमि एयं। तेहिं भणियं। जइ एवं, ता लहुं होहि। तओ घेत्तूण नरिन्ददरिसणनिमित्तं दीणारसयसहस्समुल्लं मुत्ताहलमालं गओ नरवइसमीवं। दिट्ठो य तेण राया। साहिऊण वुत्तन्तं विन्नत्तो चण्डालमन्तरेण नरवई। कओ से पसाओ। दूयसहिओ य तस्स मोक्खणनिमित्तं आगओ तमुद्देसं। मोयाविओ एसो। 'तुब्भे इमस्स जीवियदायग' त्ति भणिऊण पूइया आरक्खिया। 'देवाविऊण पाहेयं भणिओ य चण्डालो। भद्द, संपाडेहि समीहियं। 'अज्ज, मा तुह सा अवत्था हवउ, जीए मए च्चिय पओयणं' ति भणिऊण [कैयञ्जलिउडो खिइनिमियजाणुकरयलमुत्तिमङ्गो पणमिऊण सत्थवाहपुत्तं] गओ चण्डालो॥

धरणो वि य कइवयपयाणएहिं पत्तो उत्तरावहतिलयभूयं अयलउरं नाम पट्टणं। दिट्ठो य राया। बहुमन्निओ तेणं। त्रिभागसंपत्तीए य विक्किणियमणेण भण्डं। समासाइओ अट्ठगुणो लाभो। ठिओ तत्थेव कयविक्कयनिमित्तं चत्तारि मासे। पुण्णोयएणं च विढत्तं

भय। ततो गृहीत्वा नरेन्द्रदर्शननिमित्तं दीनारशतसहस्रमूल्यां मुक्ताफलमालां गतो नरपतिसमीपम्। दृष्टश्च तेन राजा। कथयित्वा वृत्तान्तं विज्ञप्तश्चण्डालान्तरेण (चण्डालसंबन्धेन) नरपतिः। कृतस्तस्य प्रसादः। दूतसहितश्च तस्य मोक्षणनिमित्तमागतस्तमुद्देशम्। मोचित एषः। 'यूयमस्य जीवितदायकाः' इति भणित्वा पूजिता आरक्षकाः। दापयित्वा पाथेयं भणितश्च चण्डालः। भद्र! संपादय समीहितम्। 'आर्य! मा तव साऽवस्था भवतु यस्यां ममैव प्रयोजनम्' इति भणित्वा [कृताञ्जलिपुटः क्षितिन्यस्तजानुकरतलोत्तमाङ्गः प्रणम्य सार्थवाहपुत्रं गतश्चण्डालः॥

धरणोऽपि च कतिपयप्रयाणकैः प्राप्त उत्तरापथतिलकभूतमचलपुरं नाम पत्तनम्। दृष्टश्च राजा। बहु मानितस्तेन। त्रिभागसंपत्त्या

१ एहि क। २ 'परिहाविऊण जुअलं' इत्यधिकः कपुस्तके। ३ अयं पाठः कपुस्तके नास्ति। ४ "तस्स समोवाओ राएण न पुण चित्तेन" इत्यपरः पाठः कपुस्तके। ५ तओ धरणो वि क। ६ नयरं क। ७ इल्लाहो क।

पभूयं दविणजायं। संखाविय च णेण, जाव अत्थि कोडिमेत्तं ति। तओ गहियं मायन्दिसंववहारोचियं भण्डं। भराविओ सत्थो। पयट्टो नियदेसागमणनिमित्तं महया चडयरेण।

पइदियहपयाणेण य सवरवहूगेयसु(मु)द्धियमयजूहं। थेवदियहेहि सत्थो पत्तो कायम्बरिं अडविं ॥
वसहमयमहिससद्दूलकोलसयसंकुलं महाभीमं। माइन्दविन्दचन्दणनिरुद्धससिसूरकरपसरं ॥
फलपुप्फतरुवरट्ठियपरपुट्ठविमुक्कविसमहलबोलं। *तरुकणइकयन्दोलणवाणरवुक्काररमणिज्जं ॥
मयणाहदरियरुञ्जियसद्दमुत्तत्थफिडियगयजूहं। वणदवजालावेढियचलमयरायन्तगिरिनियरं ॥

च विक्रीतमनेन भाण्डम्। समासादितोऽष्टगुणो लाभः। स्थितस्तत्रैव क्रयविक्रयनिमित्तं चतुरो मासान्। पुण्योदयेन चार्जितं प्रभूतं द्रविणजातम्। संख्यापितं च तेन, यावदस्ति कोटिमात्रमिति। ततो गृहीतं माकन्दीसंव्यवहारोचितं भाण्डम्। भरितः सार्थः। प्रवृत्तो निजदेशागमननिमित्तं महताऽऽडम्बरेण।

प्रतिदिवसप्रयाणेन च शबरवधूगेयमुग्धमृगयूथाम्। स्तोकदिवसैः सार्थः प्राप्तः कादम्बरीमटवीम् ॥
वृषभ-मृग-महिष-शार्दूल-कोलशतसंकुलां महाभीमाम्। माकन्दवृन्द-चन्दननिरुद्धशशि-सूरकरप्रसराम् ॥
फलपुष्पतरुवरस्थितपरपुष्टविमुक्तविषमकोलाहलाम्। तरुलताकृतान्दोलनवानरबुत्काररमणीयाम् ॥
मृगनाथदर्पगुञ्जितशब्दसमुत्त्रस्तस्फेटितगजयूथाम्। वनदवज्वालावेष्टितचलन्मृगराजद्गिरिनिकराम् ॥

---

* कणई (दे) तरुलतेत्यर्थः। १ –कणय–क। २ –भिडिय–क।

निद्दयवराहघोणाहियायजज्जरियपल्ललोयन्तं । दप्पुद्धुरकरिनिउरुम्बदलियहिन्तालसंघायं ॥
तीए वहिऊण सत्थो तिण्णि पयाणाइ पल्ललसमीवे । आवासिओ य पल्ललजलयरसंजणियसंखोहं ॥
आवासिऊण तीरे सरस्स मज्झम्मि कीलिऊण सुहं । तो रयणीए सत्थो सुत्तो दाऊण थाणाइं ॥
[1]रयणीए चरिमजामंमि भीसण(य)सिङ्गसद्दगद्दभा । अह सवरभिल्लसेणा पडिया सत्थंमि वीसत्थे ॥
हण हण हण त्ति गद्दभसद्दसंजणियजुवइसंतासा । अन्नोन्नसम्भमालग्गदीहको[3]दण्डसंघाया ॥
तीसे ससद्दबोहियसत्थियपुरिसेहि सह महाभीमं । जुज्झमह संपलग्गं सरोहविच्छिन्नसरनियरं ॥
सत्थियपुरिसेहि दढं सेणा दप्पुद्धुरेकवीरेहिं । आवाए चिय खित्ता दिसो दिसं हरिणजूह व्व [2]॥

निर्दयवराहघोणाभिघातजर्जरितपल्वलोपान्ताम् । दर्पोद्धुरकरिनिकुरम्बदलितहिन्तालसंघाताम् ॥
तस्यामूढ्वा (वहनं कृत्वा) सार्थस्त्रीणि प्रयाणानि पल्वलसमीपे । आवासितश्च पल्वलजलचरसंजनितसंक्षोभम् ॥
आवास्य तीरे सरसो मध्ये क्रीडित्वा सुखम् । ततो रजन्यां सार्थः सुप्तो दत्वा (थाणाइं दे.) रक्षाः ॥
रजन्याश्चरमयामे भीषणशृङ्गशब्द(गद्दभा दे.)कठोरा । अथ शवरभिल्लसेना पतिता सार्थे विश्वस्ते ॥
जहि जहि जहीति कठोरशब्दसंजनितयुवतिसंत्रासा । अन्योन्यसंभ्रमाद् लग्नदीर्घकोदण्डसंघाता ॥
तस्याः स्वशब्दबोधितसार्थिकपुरुषैः सह महाभीमम् । युद्धमथ संप्रलग्नं शरौघविच्छिन्नशरनिकरम् ॥
सार्थिकपुरुषैर्दृढं सेना दर्पोद्धुरैकवीरैः । आपाते एव क्षिप्ता दिशि दिशि हरिणयूथवद् ॥

१ चिरं क। २ एत्थन्तरंमि । इत्यधिकः पाठः कपुस्तके । ३ –कोडंड–क।

तो वीरसेणपमुहा सवरा सव्वे पुणो वि मिलिऊण । अन्नोन्नतज्जणाजणियरोसपसरा समल्लीणा ॥
अह निज्जिओ स सत्थो थेवत्तणओ य सवरसेणाए । पयरो पिवीलियाणं भीमं पि भुयंगमं डसइ ॥
निज्झिणिऊण य सत्थं रित्थं घेत्तूण निरवसेसं पि । वन्दं पि किंपि सवरा उवट्ठिया कालसेणस्स ॥
भणियं च णेहिं । एयं रित्थं सत्थाओ देव आणीयं वन्दं च किंपि थेवं । संपइ देवो पमाणं ति । तओ कालसेणेण पुच्छिया वन्दयपुरिसा । भो कुओ एस सत्थो कस्स वा सन्तिओ त्ति । एत्थन्तरंमि सीहकयपहारसंरोहणनिमित्तं सत्थवाहपुत्तेण सहागओ उवलद्धो पच्चभिन्नाओ णेण संगमो नाम सत्थवाहपुत्तपुरिसो । भणियं च णेण । भद्द, कहिं तुमं मए दिट्ठो त्ति । तेण भणियं । न याणामो, तुमं चेव जाणसि त्ति । कालसेणेण भणियं । अवि आसि तुमं इओ उत्तरावहपयट्टस्स मम पाणपयाणहेउणो अविन्नायनामधे-

ततो वीरसेनप्रमुखाः शबराः सर्वे पुनरपि मिलित्वा । अन्योन्यतर्जनाजनितरोषप्रसराः समालीनाः ॥
अथ निर्जितः स सार्थः स्तोकत्वाच्च शबरसेनया । प्रकरः पिपीलिकानां भीममपि भुजङ्गमं दशति ॥
निर्जित्य च सार्थं रिक्थं गृहीत्वा निरवशेषमपि । वन्दिनमपि कमपि शबरा उपस्थिताः कालसेनस्य ॥
भणितं च तैः-एतद् रिक्थं सार्थाद् देव ! आनीतं वन्दी च कोऽपि स्तोकः । संप्रति देवः प्रमाणमिति । ततः कालसेनेन पृष्टा वन्दिपुरुषाः । भोः कुत एष सार्थः, कस्य वा सत्क इति । अत्रान्तरे सिंहकृतप्रहारसंरोहणनिमित्तं सार्थवाहपुत्रेण सहागत उपलब्धः प्रत्यभिज्ञातस्तेन संगमो नाम सार्थवाहपुत्रपुरुषः । भणितं तेन-भद्र ! कुत्र त्वं मया दृष्ट इति । तेन भणितं-न जानामि, त्वमेव जानासीति । कालसेनेन भणितम्-अपि आसीस्त्वमित उत्तरापथप्रवृत्तस्य मम प्राणप्रदानहेतोरविज्ञातनामधेयस्य सार्थवाहपुत्रस्य समीपे ।

१ अह निज्जिऊण सत्थं क। २ तु क। ३ सह समागओवलद्धो क।

यस्स सत्थवाहपुत्तस्स समीवे। संगमेण भणियं। को कहं वा तुह पाणपयाणहेऊ। कालसेणेण भणियं। अत्थि इओ अईयवरिसंमि कयन्तेणेव केसरिणा कहंचि कण्ठगयपाणो अहं कओ आसि। तओ इओ उत्तरावहं वच्चमाणेण केणावि सत्थवाहपुत्तेण न याणामो कहिंचि जीवाविओ म्हि। ता एवं मज्झ सो पाणपयाणहेउ त्ति। तओ सुमरिऊण वुत्तन्तं पच्चभियाणिऊण कालसेणं भणियं संगमेण। जइ एवं, ता आसि दिट्ठो तुमए। कालसेणेण सबहुमाणमवरुण्डिऊण पुच्छिओ संगमओ। भद्द, कहिं सो सत्थवाहपुत्तो। तओ बाह-जलभरियलोयणेण भणियं संगमएण। भो महापुरिस, देव्वो वियाणइ त्ति। कालसेणेण भणियं। कहं चिय। संगमएण भणियं। सुण, एसो खु तस्स सन्तिओ चेव सत्थो। आवडिए य सत्थघाए कोदण्डसरसहाओ दिट्ठो मए सबरसंमुहं धावमाणो। तओ न संपयं वियाणामि। तओ एयमायण्णिऊण दीहं च नीससिय 'हा कयमकज्जं' ति भणिऊण मोहमुवगओ कालसेणो, वक्कलाणिलेण वीइओ

संगमेन भणितम्–कः कथं वा तव प्राणप्रदानहेतुः। कालसेनेन भणितम्–अस्तीतोऽतीतवर्षे कृतान्तेनेव केसरिणा कथंचित् कण्ठगतप्राणोऽहं कृत आसम्। तत इत उत्तरापथं व्रजता केनापि सार्थवाहपुत्रेण न जानीमः कथंचिज्जीवितोऽस्मि। तत एवं मम स प्राणप्रदानहेतुरिति। ततः स्मृत्वा वृत्तान्तं प्रत्यभिज्ञाय कालसेनं भणितं संगमेन। यद्येवं तत आसं दृष्टस्त्वया। कालसेनेन सबहुमानमालिङ्ग्य पृष्टः संगमकः। भद्र! कुत्र स सार्थवाहपुत्रः। ततो बाष्पजलभृतलोचनेन भणितं संगमकेन–भो महापुरुष! दैवं विजानातीति। कालसेनेन भणितम्–कथमिव। संगमकेन भणितम्–शृणु, एष खलु तस्य सत्क एव सार्थः। आपतिते च सार्थघाते कोदण्डशरसहायो दृष्टो मया शबरसंमुखं धावन्। ततो न साम्प्रतं विजानामि। तत एतदाकर्ण्य दीर्घं च निःश्वस्य 'हा कृतमकार्यम्' इति

१ पच्चहियाणिऊण क। २ संगमो क। ३ संगमेण क। ४ –पुरिस क। ५ न सुण क।

सवरेहि, लद्धा चेयणा । भणियं च णेण । हरे, न एत्थ कोइ वावाइओ त्ति । सवरेहिं भणियं । न वावाइओ, केवलं पहारीकओ त्ति। तओ निरूविया पडिबद्धपुरिसा, न दिट्ठो य धरणो । तओ एगत्थ रित्थं करेऊण समासासिऊण सत्थं पडिबद्धपुरिसाण य वणकम्मं माइसिय धरणगवेसणनिमित्तं पयट्टाविया दिसो दिसं सवरपुरिसा । अप्पणा वि य 'हा दुट्ठु कयं' ति चिन्तयमाणो गओ तं गवेसिउं[3] । न दिट्ठो य तेण धरणो । समागओ सत्थं । मिलिया सव्वसवरा । निवेइयं च णेहिं । देव, न दिट्ठो त्ति। तओ परं सोगमुवगओ कालसेणो । भणियं च णेण ।

दुज्जणजणंमि सुकयं असुहफलं होइ सज्जणजणस्स । जह भुयगस्स विदिन्नं खीरं पि विसत्तणमुवेइ ॥
दिन्ना य णेण पाणा मज्झं जायाए तह य पुत्तस्स । एयस्स मए पुण सव्वमेव विवरीयमायरियं ॥

भणित्वा मोहमुपगतः कालसेनः, वल्कलानिलेन वीजितः शबरैः, लब्धा चेतना । भणितं च तेन-अरे नात्र कोऽपि व्यापादित इति । शबरैर्भणितम्-न व्यापादितः, केवलं प्रहारीकृत इति । ततो निरूपिताः प्रतिबद्धपुरुषाः । न दृष्टश्च धरणः । ततः एकत्र रिक्थं कृत्वा समाश्वास्य सार्थं प्रतिबद्धपुरुषाणां च व्रणकर्मादिश्य धरणगवेषणनिमित्तं प्रवर्तिता दिशि दिशि शबरपुरुषाः । आत्मनाऽपि च 'हा दुष्टु कृतम्' इति चिन्तयन् गतस्तं गवेषयितुम् । न दृष्टश्च तेन धरणः । समागतः सार्थम् । मिलिताः सर्वशबराः । निवेदितं च तैः-देव ! न दृष्ट इति । ततः परं शोकमुपगतः कालसेनः । भणितं च तेन—

दुर्जनजने सुकृतमशुभफलं भवति सज्जनजनस्य । यथा भुजगाय वितीर्णं क्षीरमपि विषत्वमुपैति ॥
दत्ताश्च तेन प्राणा मम जायायास्तथा च पुत्रस्य । एतस्य मया पुनः सर्वमेव विपरीतमाचरितम् ॥

---

१ य ग। २ चिन्तेमाणो क। ३ आरण्णभूमिं इत्यधिकः पाठः कपुस्तके। ४ वदिन्नं ख।

ता किं एइणा अयालकुसुमनिग्गमेण विय निप्फलेणं वायावित्थरेणं। भो भो सत्थिया, भो भो सबरा, एसा महं पइन्ना।

जइ तं न घडेमि अहं इमिणा विहवेण पञ्चहि दिणेहिं। पइसामि सुहुयहुयवहजालानिवहंमि किं बहुणा॥

एवं च पइन्नं काऊण कयं कुलदेवयाए कायम्बरिनिवासिणीए ओवाइयं।

जइ तं महाणुभावं जीवन्तं एत्थ कहवि पेच्छिस्सं। दसहि पुरिसेहि भयवइ तो तुज्झ बलिं करिस्सामि॥

एवं च ओवाइयं काऊण गहियाणेयदिवसपाहेया पट्ठविया धरणगवेसणनिमित्तं दिसो दिसं सबरा। अप्पणा वि य अच्चन्तविमणदुम्मणो गओ तं गवेसिउं॥

सो पुण धरणो विणिज्जिए सत्थे 'न एत्थ अन्नो उवाओ' त्ति चिन्तिऊण ओसहिवलयमेत्तरित्थो घेत्तूण लच्छिं पलाणो पिट्ठओ-

---

ततः किमेतेनाकालकुसुमनिर्गमेनेव निष्फलेन वाग्विस्तरेण। भो भोः सार्थिकाः! भो भोः शबराः! एषा मम प्रतिज्ञा।

यदि तं न घटयाम्यहमनेन विभवेन पञ्चभिर्दिनैः। प्रविशामि सुहुतहुतवहज्वालानिवहे किं बहुना॥

एवं च प्रतिज्ञां कृत्वा कृतं कुलदेवतायाः कादम्बरीनिवासिन्या औपयाचितम्।

यदि तं महानुभावं जीवन्तमत्र कथमपि प्रेक्षिष्ये। दशभिः पुरुषैर्भगवति! ततस्तव बलिं करिष्यामि॥

एवं चौपयाचितं कृत्वा गृहीतानेकदिवसपाथेयाः प्रस्थापिता धरणगवेषणनिमित्तं दिशि दिशि शबराः। आत्मनापि च अत्यन्तविमनोदुर्मना गतस्तं गवेषयितुम्।

स पुनर्धरणो विनिर्जिते सार्थे 'नात्रान्य उपायः' इति चिन्तयित्वा ओषधिवलयमात्ररिक्थो गृहीत्वा लक्ष्मीं पलायितः पृष्ठतोमुखः।

---

१ पेच्छिस्सं क। २ उवाइयं क। ३ -मणेदुम्मणो क-ख।

मुहो[1]। जायाए भएणं च मूढदिसामण्डलं तुरियतुरियं गच्छमाणो पत्तो मुहुत्तमेत्तसेसे वासरे

वहुविहरुक्खसाहासंघट्टसंभवन्तवणदवं। वणदवपलित्तकन्दरविणिन्तसीहं।
सीहहयपडिहयहत्थिकडेवरकयारविसमं। विसमखलणदुक्खहिण्डन्तभीयमुद्धमयं।
मयरुहिरपाणमुइयघोरन्तसुत्तवग्घं। वग्घभयपलायन्तमहिसउलं।
महिसउलचलण[2]ग्गलग्गगरुयअयगरं। अयगरवि[3]मुत्तनीसाससद्दभीमं।
भीमबहुविहभमन्तकव्वायलुत्तसत्तं। सत्तखयकालसच्छहं सिलिन्धनिलयं नाम पव्वयं ति।

तत्थ य अणुचियचलणपरिसक्कणेण खीणगमणसत्ति सेयजललवालिद्धवयणकमलं च पेच्छिऊण लंघिउं चिन्तियं धरणेण। अहो

जायाया भयेन च मूढदिग्मण्डलं त्वरितत्वरितं गच्छन् प्राप्तो मुहूर्तमात्रशेषे वासरे

बहुविधवृक्षशाखासंघट्टसंभवद्वनदवं, वनदवप्रदीप्तकन्दराविनिर्यत्सिंहम्।
सिंहहतप्रतिहतहस्तिकलेवरकचवरविषमं, विषमस्खलनदुःखहिण्डमानभीतमुग्धमृगम्।
मृगरुधिरपानमुदितघुरन्सुप्तव्याघ्रं, व्याघ्रभयपलायमानमहिषकुलम्॥
महिषकुलचलनाग्रलग्नगुरुकाजगरं, अजगरविमुक्तनिःश्वासशब्दभीमम्।
भीमबहुविधभ्रमत्क्रव्यादलुप्तसत्त्वं, सत्त्वक्षयकालसच्छायं शिलिन्ध्रनिलयं नाम पर्वतमिति।

---

१ –मुइ क, –मुहओ ख। २ चलणमग्गलग्गअयगरं ख, चलणयमग्गगरुय–ग। ३ –पमुत्त–क–ख। ४ णीलुत्त ख। ५ सिंगिंध–ख, पिलिंध–ग।

चेव एयस्स आवईए। गविट्ठं मे कम्मपरिणई, जेण पिययमाए वि ईइसी अवत्थ त्ति। लच्छीए चिन्तियं। किलेसो वि मे बहुमओ चेव एयस्स आवईए। गविट्ठं धरणेण लच्छीए पाणसंधारणनिमित्तं फलोययं, न उण लद्धं ति। अइक्कन्तो वासरो। पसुत्ताइं पल्लवसत्थरे। अइक्कन्ता रयणी। [उग्गओ अंसुमाली। तओ] बिइयदियहे य जाममेत्तसेसे वासरे खुहापिवासाहिभूया नग्गोहपायवच्छायाए निवडिया लच्छी। संमिल्लियमिमीए लोयणजुयं, विमूढा से चेयणा, निवडियं तालुयं, मिलाणं वयणकमलं। तओ धरणेण चिन्तियं। अहो दारुणो जीवलोगो, अचिन्ता कम्मपरिणई, न मे जीविएणावि एत्थ साहारो त्ति। तहावि बाहजलभरियलोयणेणं संवाहियं से अङ्गं। समागया चेयणा। तओ अव्वत्तसद्दं जंपियमिमीए। अज्जउत्त, दढं तिसाभिभूय म्हि। तओ सो 'सुन्दरि, धीरा होहि, आणेमि उदयं, तए ताव इहेव चिट्ठि-यव्वं' ति भणिऊण आरूढो तरुवरं। पलोइयं उदयं, न उण उवलद्धं। तओ 'उदयमन्तरेणं न एसा जीवइ' त्ति तुवरिट्ठियं पेच्छिऊण

तत्र चानुचितचरणपरिष्वक्नेन(परिचंक्रमणेन) क्षीणगमनशक्ति स्वेदजललवाम्लिष्टवदनकमलां च प्रेक्ष्य लक्ष्मीं चिन्तितं धरणेन। अहो मे कर्मपरिणतिः, येन प्रियतमाया अपीदृशी अवस्थेति। लक्ष्म्या चिन्तितम्-क्लेशोऽपि मे बहुमत एव एतस्यापदा। गवेषितं धरणेन लक्ष्म्याः प्राणसंधारणनिमित्तं फलोदकं न पुनर्लब्धमिति। अतिक्रान्तो वासरः। प्रसुप्तौ पल्लवस्रस्तरे। अतिक्रान्ता रजनी। उद्गतोऽंशुमाली। ततो द्वितीयदिवसे च याममात्रशेषे वासरे क्षुत्पिपासाभिभूता न्यग्रोधपादपच्छायायां निपतिता लक्ष्मीः। संमिलितमनया लोचनयुगम्, विमूढा तस्याश्चेतना, निपतितं तालु, म्लानं वदनकमलम्। ततो धरणेन चिन्तितम्-अहो दारुणो जीवलोकः, अचिन्त्या कर्मपरिणतिः, न मे जीवितेनाप्यत्र साधारः(उपकारः) इति। तथापि बाष्पजलभृतलोचनेन संवाहितं तस्या अङ्गम्। समागता चेतना। ततोऽव्यक्तशब्दं जल्पितमनया-आर्यपुत्र ! दृढं तृषाऽभिभूताऽस्मि। ततः स 'सुन्दरि ! धीरा भव, आनयाम्युदकम्, त्वया तावदिहैव स्थातव्यम्' इति

१ ईदिसी क। २ पहाया क। ३ अयं पाठो नास्ति ख-ग पुस्तके। ४ -हिट्टया क।

तीएं य किर रसेण संगयं सिलीभूयमवि सोणियं उदयसारिच्छं हवइ' त्ति ता एएण सुमरियपओएणं 'देमि से तुंवरिट्ठियारसेणं संपा-
डिओदयभावं बाहुसिरामोक्खणेण नियमेव रुहिरं, इमिणा य वणदवग्गिणा पइऊण छुहावणोयणनिमित्तं ऊरुमंसं ति; अन्नहा निस्सं-
सयं न होइ एसा, विवन्नाए य इमीए किं महं जीविएणं; अत्थि य मे वणसंरोहणं ओसहिवलयं, तेण रुहिरसंगएणेव अवणीयवणवेयणो
इमीए वि न दुक्खकारणं भविस्सइ' त्ति चिन्तिऊण नियच्छुरियाए पलासपत्तपुडयंमि संपाडियं समीहियं ति। गओ य तीसे
समीवं। भणिया य एसा। सुन्दरि, संपन्नमुदयं, ता पियउ सुन्दरी। पियं च णाए। समासत्था एसा। उवणीयं च से मंसं। भणियं
णेणं। सुन्दरि, एयं खु वणदवविवन्नससयमंसं, भुक्खिया य तुमं, ता आहारसु त्ति। आहारियमिमीए॥

तओ कंचि वेलं गमेऊण पयट्टाणि दिणयराणुसारेण उत्तरामुहं। पत्ताणि य महासरं नाम नयरं। अत्थमिओ सूरिओ त्ति न पइ-

---

तुम्बास्थिकां प्रेक्ष्य तस्याश्च किल भणित्वा आरूढस्तरुवरम्। प्रलोकितमुदकं न पुनरुपलब्धम्। तत्र 'उदकमन्तरेण नैषा जीवति' इति
रसेन संगतं शिलीभूतमपि शोणितमुदकसदृशं भवति' इति तत एतेन स्मृतप्रयोगेण 'ददामि तस्यै तुम्बास्थिकारसेन संपादितोदकभावं
बाहुशिरामोक्षणेन निजमेव रुधिरम्, अनेन च वनदवाग्निना पक्त्वा क्षुदपनोदनिमित्तमूरुमांसमिति, अन्यथा निःसंशयं न भवत्येषा,
विपन्नायां चास्यां किं मम जीवितेन, अस्ति च मे व्रणसंरोहणमोषधिवलयम्, तेन रुधिरसंगतेनैवापनीतव्रणवेदनोऽस्या अपि न दुःख-
कारणं भविष्यति' इति चिन्तयित्वा निजच्छुरिकया पलाशपत्रपुटे संपादितं समीहितमिति। गतश्च तस्याः समीपम्। भणिता
चैषा-सुन्दरि! संपन्नमुदकम्, ततः पिबतु सुन्दरी। पीतं चानया। समाश्वस्तैषा। उपनीतं च तस्य मांसम्। भणितं च तेन-
सुन्दरि! एतत्खलु वनदवविपन्नशशकमांसम्, बुभुक्षिता च त्वम्, तत आहरेति। आहृतमनया॥

---

१ जीए य क। २ तुंवरट्ठिया क। ३ नास्ति क-पुस्तके।

इाणि नयरं। ठियाणि जक्खालए। तओ अइक्कन्ते जाममेत्ते जंपियं लच्छीए। अज्जउत्त, तिसाभिभूय म्हि। धरणेण भणियं। सुन्दरि, चिट्ठ तुमं, आणेमि उदयं नईओ। गहिओ तत्थ वारओ, आणीयमुदयं। पीयं च णाए। पसुत्तो धरणो। चरिमजामंमि य विउद्धा लच्छी। चिन्तियं च णाए। अणुकूलो मे विही, जेण एसो ईइसं अवत्थं पाविओ त्ति। ता केण उवाएण इओ वि अहिययरं से हवेज्ज त्ति। एत्थन्तरंमि य आरक्खियपुरिसपेल्लिओ गहियरयणभण्डो खीणगमणसत्ती पविट्ठो चण्डरुद्दाभिहाणो तक्करो। रुद्धं च से वारं। भणियं चारक्खियनरेहिं। अरे, अप्पमत्ता हवेज्जह। गहिओ खु एसो, कहिं वच्चइ त्ति। सुयं च एयं लच्छीए, आयण्णिओ चण्डरुद्द-पयसद्दो। चिन्तियं च णाए। भवियव्वं एत्थ कारणेण। ता पुच्छामि एयं, किं पुण इमं ति। कयाइ पुज्जन्ति मे मणोरहा। तओ दीहसुंकारपिसुणियं गया चण्डरुद्दसमीवं। पुच्छिओ एसो। भद्द, को तुमं, किं वा एए दुवारदेसंमि इमं वाहरन्ति। तेण भणियं।

ततः काञ्चिद् वेलां गमयित्वा प्रवृत्तो दिनकरानुसारेणोत्तरामुखम्। प्राप्तौ च महाशरं नाम नगरम्। अस्तमितः सूर्य इति न प्रविष्टौ नगरम्। स्थितौ यक्षालये। ततोऽतिक्रान्ते याममात्रे जल्पितं लक्ष्म्या-आर्यपुत्र! तृषाऽभिभूताऽस्मि। धरणेन भणितम्-सुन्दरि! तिष्ठ त्वम्, 'आनयाम्युदकं नद्याः, गृहीतस्तत्र वारकः (पात्रम्), आनीतमुदकम्। पीतं चानया। प्रसुप्तो धरणः चरमयामे च विबुद्धा लक्ष्मीः। चिन्तितं चानया-अनुकूलो मे विधिः, येन एष इदानीमवस्थां प्रापित इति। तत केनोपायेन इतोऽप्यधिकतरं तस्य भवेदिति। अत्रान्तरे चारक्षकपुरुषपीडितो गृहीतरत्नभाण्डः क्षीणगमनशक्तिः प्रविष्टश्चण्डरुद्राभिधानस्तस्करः। रुद्धं च तस्य द्वारम्। भणितं चारक्षकनरैः-अरे अप्रमत्ता भवत। गृहीतः खल्वेषः, कुत्र व्रजतीति। श्रुतं चैतद् लक्ष्म्या, आकर्णितश्चण्डरुद्रपदशब्दः। चिन्तितं चानया-भवितव्यमत्र कारणेन। ततः पृच्छाम्येतम्, किं पुनरिदमिति। कदाचित् पूर्यन्ते मे मनोरथाः। ततो दीर्घसुत्कारपिशुनितं गता चण्डरुद्रसमीपम्। पृष्ट एषः-भद्र! कस्त्वम्, किंवा एते द्वारदेशे इदं व्याहरन्ति। तेन भणितम्-सुन्दरि! अलं मया (मे प्रश्नेन),

सुन्दरि, अलं मए । किं तु पुच्छामि सुन्दरिं 'अत्थि अत्थि कहिंचि थेवमुदयं' ति । तीए भणियं । अत्थि, जइ मे पओयणं साहेसि । तओ चिन्तियमणेणं । अहो धीरया इत्थियाए, अहो साहसं, अहो वयणविन्नासो; ता भवियव्वमिमीए पत्तभूयाए त्ति । चिन्तिऊण जंपियं चण्डरुद्देणं । सुन्दरि, महन्ती खु एसा कहा, न संखेवओ कहिउं पारीयइ । तहावि सुण । संपयं ताव तक्करो अहं, नरिन्दगेहाओ गहेऊण रयणभण्डं नीसरन्तो नयराओ उवलद्धो दण्डवासिएहिं । लग्गा मे मग्गओ बहुया दण्डवासिया, एगो य अहयं । खीणगमणसत्ती य एत्थ पविट्ठो त्ति । एए य अन्धारयाए रयणीए सावेक्खयाए जीवियस्स साहारणयाए पओयणस्स 'संपन्नं च णो अहिलसियं' ति मन्नमाणा दुवारदेसभायं निरुम्भिऊण दण्डवासिया एवं वाहरन्ति । तओ 'संपन्नं मे समीहियं, जइ विही अणुवत्तिस्सइ' त्ति चिन्तिऊणं जंपियं लच्छीए । भद्द, जइ एवं, ता अलं ते उव्वेएणं; अहं तुमं जीवावेमि, जइ मे वयणं सुणेसि । चण्डरुद्देण भणियं । आणवेउ सुन्दरी । लच्छीए भणियं । सुण । अहं खु मायन्दीनिवासिणो कत्तियसेट्ठिस्स धूया लच्छिमई नाम पुव्ववेरिएण विय परि-

---

किन्तु पृच्छामि सुन्दरीम्, 'अस्त्यस्ति अत्र कथञ्चित् स्तोकमुदकम्' इति । तया भणितम्-अस्ति, यदि मे प्रयोजनं कथयसि । ततश्चिन्तितमनेन-अहो धीरता स्त्रियाः, अहो साहसम्, अहो वचनविन्यासः, ततो भवितव्यमनया पात्रभूतयेति चिन्तयित्वा जल्पितं चण्डरुद्रेण । सुन्दरि ! महती खल्वेषा कथा, न संक्षेपतः कथयितुं पार्यते, तथापि शृणु । साम्प्रतं तावत्तस्करोऽहम्, नरेन्द्रगृहाद् गृहीत्वा रत्नभाण्डं निःसरन् नगरादुपलब्धो दण्डपाशिकैः । लग्ना मे मार्गतो (पृष्ठतः) बहवः दण्डपाशिकाः, एकश्चाहम्, क्षीणगमनशक्तिश्चात्र प्रविष्ट इति । एते चान्धकारतया रजन्याः सापेक्षतया जीवितस्य साधारणतया प्रयोजनस्य 'संपन्नं नोऽभिलषितम्' इति मन्यमाना, द्वारदेशभागं निरुध्य दण्डपाशिका एवं व्याहरन्ति । ततः 'संपन्नं मे समीहितं यदि विधिरनुवर्तिष्यते' इति चिन्तयित्वा जल्पितं लक्ष्म्या । भद्र ! यद्येवं ततोऽलं ते उद्वेगेन, अहं त्वां जीवयामि, यदि मे वचनं शृणोसि । चण्डरुद्रेण भणितम्-आज्ञापयतु

णीया धरणेण । अणिट्ठो मे भत्तारो, पसुत्तो य एसो एत्थ देवउले । ता अङ्गीकरेहि मं, परिच्चयसु मोसं, पावेउ एसो सकम्मसरिसं गतिं । पहायाए रयणीए गिहीएहिं तुम्भेहिं नरवइसमक्खं पि भणिस्सामि अहयं 'एसो महं भत्तारो, न उण एसो' त्ति । तओ सो चेयँ भयवओ कयन्तस्स पाहुडं भविस्सइ । चण्डरुद्देण भणियं । सुन्दरि, अत्थि एयं, किं तु अहमेत्थ वत्थव्वओ चउचरणपडिबद्धो। अओ वियाणइ मे [5]तं अगिहीयनामं मच्चलोओ चेव एत्थ महिलियं त्ति । लच्छीए भणियं । जइ एवं, ता को पुण इह उवाओ । चण्डरुद्देण भणियं । अत्थि एत्थ उवाओ, जइ थेवमुदयं हवइ । तीए भणियं 'कहं विय' । चण्डरुद्देण भणियं । सुण । अत्थि मे चिन्तामणिरयणभूया भयवया खन्दरुद्देण विइण्णा दिट्ठपच्चया परदिट्ठिमोहणी नाम चोरगुलिया । तीए य उदयसंजोएण अञ्जिएहिं नयणेहिं सहस्सलोयणो देवाहिवो वि न पेच्छइ पाणिणं, किमङ्ग पुण मच्चलोयवासी जणो । लच्छीए भणियं । जइ एवं, ता कहिं गुलिया ।

सुन्दरी । लक्ष्म्या भणितम्-शृणु । अहं खलु माकन्दीनिवासिनः कार्तिकश्रेष्ठिनो दुहिता लक्ष्मीवती नाम पूर्ववैरिकेनापि न परिणीता धरणेन । अनिष्टो मे भर्ता, प्रसुप्तश्च एषोऽत्र देवकुले । ततोऽङ्गीकुरु माम्, परित्यज मोषम् (मुषितम्), प्राप्नोत्वेष स्वकर्मसदृशीं गतिम्। प्रभातायां रजन्यां गृहीतयोर्युवयोर्नरपतिसमक्षमपि भणिष्याम्यहम् 'एष मम भर्ता, न पुनरेष' इति । ततः स एव भगवतः कृतान्तस्य प्राभृतं भविष्यति । चण्डरुद्रेण भणितम्-सुन्दरि ! अस्त्येतत्, किन्तु अहमत्र वास्तव्यश्चतुश्चरणप्रतिबद्धः (भार्यायुक्तः), अतो विजानाति मे तामगृहीतनाम्नीं सर्वलोक एवात्र महिलामिति । लक्ष्म्या भणितम्-यद्येवं ततः कः पुनरिहोपायः । चण्डरुद्रेण भणितम्-अस्त्यत्र उपायः, यदि स्तोकमुदकं भवति । तया भणितम्-'कथमिव' । चण्डरुद्रेण भणितम्-शृणु । अस्ति मे चिन्तामणिरत्नभूता भगवता स्कन्दरुद्रेण वितीर्णा दृष्टप्रत्यया परदृष्टिमोहनी नाम चौरगुटिका । तया चोदकसंयोगेन अञ्जितयोर्नयनयोः सहस्रलोचनो देवाधिपोऽपि

१ सो प। २ सो गपयमसरिस क। ३ च्चेव नरवई क। ४ पहविस्सइ क। ५ वियाणइ ख। ६ य क। ७ एत्थुवाओ क। ८ इह सो वि य उवाओ क।

चण्डरुद्देण भणियं 'नत्थि उदयं' ति । लच्छीए
चण्डरुद्देण भणियं 'उट्ठियाए' । लच्छीए भणियं । जइ एवं, ता किं न अक्खेसि । भणिया य एसा । सुन्दरि,
भणियं 'अहं देमि' । चण्डरुद्देण भणियं 'जीवाविओ मोईए'। दिन्नमुदयं । दुवेहिं पि अक्खियाइं लोयणाइं ।
अणीणिए सत्थवाहपुत्तंमि न तए गन्तव्वं ति । पडिस्सुयमिमीए । मुक्कं रयणभण्डं धरणसमीवे । ठियाइं एगदेसे ॥

पहाया रयणी । उट्ठिओ धरणो । गहिओ आरक्खिएहिं । निहालियं रयणभण्डं, उवलद्धं च तस्स समीवे । तओ नीणिओ देव-
उलाओ । बद्धो खु एसो । चिन्तियं च णेण । हन्त किमेयं ति । अहवा न किंचि अन्नं; अवि य पडिकूलस्स विहिणो वियम्भियं ति ।
पडिकूले य एयंमि अमयं पि हु विसं, रज्जू वि य किण्हसप्पो, गोप्पयं पि सायरो, अणू वि य गिरी, मूसयविवरं पि रसायलं, सुयणो
वि दुज्जणो, सुओ वि वेरी, जाया वि भुयङ्गी, पयासो वि अन्धयारं, खन्ती वि कोहो, मद्दवं पि माणो, अज्जवं पि माया, संतोसो वि

न प्रेक्षते प्राणिनम्, किमङ्ग पुनर्मर्त्यलोकवासो जनः । लक्ष्म्या भणितम्-यद्येवं ततः कुत्र गुटिका । चण्डरुद्रेण भणितम्-'उत्थिकायां'
(पात्रविशेषे) । लक्ष्म्या भणितम्-यद्येवं ततः किं नार्पयसि । चण्डरुद्रेण भणितम्-नास्त्युदकमिति । लक्ष्म्या भणितम्-'अहं ददामि' ।
चण्डरुद्रेण भणितम्-'जीवितो भवत्या' । दत्तमुदकम् । द्वाभ्यामपि अञ्जिते लोचने । भणिता चैषा । सुन्दरि ! अनीते सार्थवाहपुत्रे
न त्वया गन्तव्यमिति । प्रतिश्रुतमनया । मुक्तं रत्नभाण्डं धरणसमीपे । स्थिताचेकदेशे ॥

प्रभाता रजनी । उत्थितो धरणः । गृहीत आरक्षकैः । निभालितं रत्नभाण्डम्, उपलब्धं च तस्य समीपे । ततो नीतो देवकुलाद्,
बद्धः खल्वेषः । चिन्तितं च तेन-हन्त किमेतदिति । अथवा न किञ्चिदन्यत्, अपि च प्रतिकूलस्य विधेर्विजृम्भितमिति । प्रतिकूले चैत
स्मिन् अमृतमपि खलु विषम्, रज्जुरपि च कृष्णसर्पः, गोष्पदमपि सागरः, अणुरपि च गिरिः, मूषकविवरमपि रसातलम्, सुजनोऽपि

१ दिन्नं से उदयं लच्छीए क । २ पि संजोइऊण गुलियं क । ३ गोपयं पि ख । ४ वेरी ख । ५ माया ख ।

लोहो, सच्चं पि अलियं, पियं पि फरुसं, कलत्तं पि (मित्तं पि) वेरिओ त्ति। ता किं इमिणा वि चिन्तिएणं। एयस्स वसवत्तिणा न तीरए अन्नहा वट्टिउं। इमाओ वि य कयत्थणाओ इमं मे अहियं बाहइ, जं सा तवस्सिणी अदिट्ठबन्धुविरहा न दीसइ। अहवा वरं न दिट्ठा चेव। मा सा वि मे संसग्गिकलङ्कदूसिया इमं चेव पाविस्सइ त्ति। चिन्तयन्तो नीओ रायउलं। अप्पत्थावो नरिन्दस्स त्ति धरिओ रायमग्गे। अइक्कन्तो[3] वासरो। अवसरो त्ति कलिय निवेइओ नरिन्दस्स। देव, सलोत्तओ चेव मायापओयकुसलो वाणिययवेसधारी गहिओ महाभुयङ्गो। संपयं देवो पमाणं ति। तओ राइणा भणियं। किं तेण, वावाएह त्ति। नीओ णेहिं पाणवाडयं। समप्पिओ रायउलकमागयाणं वहनिओगकारीणं पच्चइयपाणाणं। भणिया य एए। हरे, देवो समाइसइ 'एस तक्करो वावाइयव्वो' त्ति। तेहिं भणियं। जं देवो आणवेइ त्ति। समप्पिऊण तेसिं गया डंडवासिया। भणियं चण्डालमयहरेण। हरे, कस्स वावायणमासवारओ। चण्डालेहिं

दुर्जनः, सुतोऽपि वैरी, जायाऽपि [माताऽपि] भुजङ्गी (व्यभिचारिणी), प्रकाशोऽपि अन्धकारम्, क्षान्तिरपि क्रोधः, मार्दवमपि मानः, आर्जवमपि माया, संतोषोऽपि लोभः, सत्यमपि अलीकम्, प्रियमपि परुषम्, कलत्रमपि (मित्रमपि) वैरिकमिति। ततः किमनेनापि चिन्तितेन। एतस्य वशवर्तिना न शक्यतेऽन्यथा वर्तितुम्। अस्या अपि च कदर्थनाया इदं मेऽधिकं बाधते, यत्सा तपस्विनी अदृष्टबन्धुविरहा न दृश्यते। अथवा वरं न दृष्टैव। मा साऽपि मे संसर्गकलङ्कदूषिता इमां (कदर्थनां) एव प्राप्स्यतीति। चिन्तयन् नीतो राजकुलम्। अप्रस्तावो नरेन्द्रस्येति धृतो राजमार्गे। अतिक्रान्तो वासरः। अवसर इति कलित्वा निवेदितो नरेन्द्रस्य। देव! सलोप्त्रक एव मायाप्रयोगकुशलो वाणिजकवेषधारी गृहीतो महाभुजङ्गः। साम्प्रतं देवः प्रमाणमिति। ततो राज्ञा भणितम्—किं तेन, व्यापादयतेति। नीतस्तैः प्राणवाटकम् (चण्डालवाटकम्)। समर्पितो राजकुलक्रमागतानां प्रत्ययितविश्वस्तप्राणानाम्। भणिता चैते। अरे देवः समादिशति 'एष तस्करो

१ अत्र 'पिया वि मियारी, अंधना विघा' इत्यधिकः पाठः क। २ धारिओ क। ३ अइक्कंता काइ वेला क। ४ 'भणियमारक्खिएहिं' इत्यधिकः पाठः क।

भणियं 'मोरियस्स'। तेण भणियं। लहुं सद्दावेह मोरियं। सद्दाविओ मोरिओ, आगओ य। भणिओ मयहरेण। हरे मोरिय, एस तक्करो देवेण पेसिओ वावाइयव्वो त्ति। ता नेऊण मसाणभूमिं लहुं वावाएहि। जाममेत्तावसेसो य वासरो, एण्हिं अवावाइए मा रयणीए पमाओ भविस्सइ। मोरियएण भणियं। जं तुमं भणसि त्ति समप्पिओ मोरिययस्स पच्चभिन्नाओ य णेणं। 'कहं सो चेव एसो जीवियदायओ मे सत्थवाहपुत्तो; अहो कट्ठं, इमस्स वि ईइसी अवत्थ' त्ति चिन्तिऊण विसण्णो मोरियओ। चिन्तियं च णेणं। अहवा पावेन्ति चन्ददिवायरा वि मुहुत्तमेत्तं गहकल्लोलाओ आवइं। बहुमओ य मे सामिमालसमाएसो एयस्स दंसणेणं। ता नेमि ताव एयं मसाणभूमिं। जाणामि य इमाओ जहट्ठियं वुत्तन्तं। नीओ मसाणभूमिं, छोडिया बन्धा, चलणेसु निवडिऊणं पुच्छिओ य णेणं। अज्ज, अवि सुमरेसि मं आयामुहीए विमोइयं। धरणेण भणियं। भद्द, न सुट्ठु सुमरेमि। मोरियएण भणियं। कहं न सुमरेसि,

व्यापादयितव्यः' इति। तैर्भणितम्-यद् देव आज्ञापयति इति। समर्प्य तेभ्यो गता दण्डपाशिकाः। भणितं +चण्डालमुख्येन-अरे कस्य व्यापादनमासवारकः। चण्डालैर्भणितं 'मौर्यस्य'। तेन भणितम्-लघु शब्दायत मौर्यम्। शब्दायितो मौर्य आगतश्च। भणितो मुख्यचण्डालेन-अरे मौर्य! एष तस्करो देवेन प्रेषितो व्यापादयितव्य इति। ततो नीत्वा श्मशानभूमिं लघु व्यापादय। याममात्रावशेषश्च वासरः, इदानीमव्यापादिते मा रजन्यां प्रमादो भविष्यति। मौर्येण भणितम्-यत्त्वं भणसीति। समर्पितो मौर्यस्य प्रत्यभिज्ञातश्च तेन। कथं स एष जीवितदायको मे सार्थवाहपुत्रः, अहो कष्टम्, अस्याऽपीदृशी अवस्थेति चिन्तयित्वा विषण्णो मौर्यः। चिन्तितं च तेन-अथवा प्राप्नुतश्चन्द्रदिवाकरावपि मुहूर्तमात्रं ग्रहकल्लोलाद् (राहोः) आपदम्। बहुमतश्च मे स्वामिसमादेशः एतस्य दर्शनेन। ततो नयामि तावदेतं श्मशानभूमिम्। जानामि चास्माद् यथास्थितं वृत्तान्तम्। नीतो श्मशानभूमिम्, छोटिता बन्धाः, चरणयोर्निपत्य पृष्टश्चानेन। आर्य! अपि

१ सद्दावेहि ख। २ पच्चहिन्नाओ क। ३ इदिसी क। ४ सुमरामि क। ५ मोरिएण क। + अत्र महयरशब्दो देश्यो मुख्यवाची।

हरिसवसुफुल्ललोयणेणं। पुच्छिया एसा। सुन्दरि, कुओ तुम ति। तओ सा रोविउं पयत्ता भणिया य णेणं। सुन्दरि, मा रोव, ईइसो एस संसारो। आवयाभायणं खु एत्थ पाणिणो। ता अलं विसाएण। धन्नो य अहयं, जेण तुमं संपत्त त्ति। तओ तीए भणियं। अज्जउत्त,पासवणनिमित्तमुट्ठिया गहिया तक्करेण, इत्थीसहावाओ अज्जउत्तसिणेहाइसएण य न किंपि वाहरियं। 'अणिच्छमाणी य इत्थिया न घेप्पइ' त्ति करिय मुसिऊण उज्झिया इहइं। अन्नं च। तक्करकयत्थणाओ वि मे एयं अहिययरं बाहइ, जं तुमं ईइसिं अवत्थमुवगओ दिट्ठो त्ति। तओ 'न अन्नहा मे वियप्पियं' ति चिन्तिऊण भणियं धरणेणं। सुन्दरि, थेवमियं कारणं। न मे उव्वेयकारिणी इयमवत्था तुह दंसणेणं। ता किं एइणा। एहि, गच्छम्ह। चिन्तियं च पाए। अहो मे पावपरिणई, जे कयन्तमुहाओ वि एस आगओ त्ति। पयट्टा एमा। समागयाइं वियारउरं नाम सन्निवेसं। कया पाणवित्ती। अत्थमिओ सूरिओ। अइवाहिया रयणी। चिन्तियं धरणेणं। एवं

लोचनेन। पृष्टैषा। सुन्दरि! कुतस्त्वमिति। ततः सा रोदितुं प्रवृत्ता भणिता च तेन। सुन्दरि! मा रुदिहि, ईदृश एव संसारः। आपद्भाजनं खल्वत्र प्राणिनः। ततोऽलं विषादेन। धन्यश्चाहं येन त्वं संप्राप्तेति। ततस्तया भणितम्–आर्यपुत्र! प्रस्रवणनिमित्तमुत्थिता गृहीता तस्करेण, स्त्रीस्वभावाद् आर्यपुत्रस्नेहातिशयेन च न किमपि व्याहृतम्। 'अनिच्छन्ती च स्त्री न गृह्यते' इति कृत्वा मुषित्वा उज्झितेह। अन्यच्च तस्करकदर्थनाया अपि मे एतदधिकतरं बाधते, यत्त्वमीदृशीमवस्थामुपगतो दृष्ट इति। ततो 'नान्यथा मे विकल्पितम्' इति चिन्तयित्वा भणितं धरणेन। सुन्दरि! स्तोकमिदं कारणम्। न मे उद्वेगकारिणीयमवस्था तव दर्शनेन। ततः किमेतेन। एहि गच्छावः। चिन्तितं चानया–अहो मे पापपरिणतिः, यत्कृतान्तमुखादपि एष आगत इति। प्रवृत्तैवा। समागतौ विचारपुरं नाम सन्निवेशम्। कृता प्राणवृत्तिः। अस्तमितः सूर्यः। अतिवाहिता रजनी। चिन्तितं धरणेन–एवं कृतान्ताभिभूतस्य न युक्तमिह

१ –त्तं समुट्ठिया क। २ –सहावओ क। ३ धरणेण भणिय क। ४ थेवमिद क। एमा अ–क। ५ एसो क। ६ –नामयस्स क।

अज्ञे अनस्समहमप्पाणं[1] वावाएमि। ता गच्छउ अज्जो। तओ 'नत्थि अविसओ सज्जणसिणेहस्स'त्ति चिन्तिऊण जंपियं धरणेणं। भद्द,[2] जइ एवं, ता अवक्कमामि। मोरिएण भणियं। अणुग्गहीओ म्हि। दंसिओ से पन्थो। पणमिऊण य नियत्तो मोरिओ। मित्तोवरो-[3]हेण पलाणो धरणो। चिन्तियं च णेण। अह कहिं पुण सा मुद्धमयलोयणा भविस्सइ। नूणमुवरोहसीलयाए[4] मं अणुट्ठविय पामवणनि-मित्तमुट्ठिया केणावि तक्करेणं समासाइया भवे, नीया य णेणं, मम विणासासङ्किणीए[5] न जंपियमिमीए; अन्नहा कहं न दिट्ठ त्ति। अदंसणेणं च तीसे[6] विहलमेव पाणलाहं मन्नामि त्ति। चिन्तयन्तो पयट्टो गवेसिउं। ण्हाओ उज्जुवालियाए[7]॥

इओ य सो चण्डरुद्दो तओ देवउलाओ अवक्कमिऊण गओ उज्जुवालियं[8] नइं। चिन्तियं च णेणं। अहो दारुणया इत्थिवग्गस्स,

---

प्राणव्यापत्तिं करोति। अगच्छति चार्ये अवश्यमहमात्मानं व्यापादयामि। ततो गच्छत्वार्यः। ततो 'नास्त्यविषयः सज्जनस्नेहस्य' इति चिन्तयित्वा जल्पितं धरणेन। भद्र! यद्येवं ततोऽपक्रामामि। मौर्येण भणितम्-अनुगृहीतोऽस्मि। दर्शितस्तस्य पन्थाः। प्रणम्य च निवृत्तो मौर्यः। मित्रोपरोधेन पलायितो धरणः। चिन्तितं च तेन-अथ कुत्र पुनः सा मुग्धमृगलोचना भविष्यति, नूनमुपरोधशीलतया मामनुत्थाप्य प्रस्रवणनिमित्तमुत्थिता केनापि तस्करेण समासादिता भवेत्, नीता च तेन, मम विनाशाशङ्किन्या न जल्पितमनया, अन्यथा कथं न दृष्टेति। अदर्शनेन च तस्या विफलमेव प्राणलाभं मन्ये इति। चिन्तयन् प्रवृत्तो गवेषयितुम्। स्नात ऋजुवालिकायाम्।

इतश्च स चण्डरुद्रस्ततो देवकुलादपक्रम्य गत ऋजुवालिकां नदीम्। चिन्तितं च तेन-अहो दारुणता स्त्रीवर्गस्य, यदेषा एकपदे एव मया-

---

१ अप्पाणय क। २ 'देव, महायसाओ' इत्यधिकं पाठः कपुस्तके। ३ तओ मोरिआरोहेण गओ धरणो क। ४ -मवरोहसीलयाए क-ख। ५ विणास-सङ्कियाए क। ६ तीए क। ७ उज्जुमालियाए क उज्जुयालियाए ख। ८ उउजामालिय क।

जमेसा एगपए चेव महावसणपायालंमि पक्खिविय भत्तारं अणवेक्खिऊण नियकुलं सिविणयंमि वि अदिट्ठपुव्वेण मए सह पयट्ट त्ति।

-हा किंह दूरेण जियं विसवग्घभुयङ्गसिङ्घसरहाणं। कलिकालरक्खसिकयन्तचरियं महिलियाहिं ॥

अमलिलपङ्कग्गाही होइ खणेणं अकन्दरा वग्घी। अणियत्ता जमभिउडी अणब्भवज्जासणी महिला ॥

महिला आलकुलघरं महिला लोयंमि दुच्चरियखेत्तं। महिला दुग्गइदारं महिला जोणी अणत्थाणं ॥

विज्जु व्व चञ्चलाओ महिलाउ विसं व पमुहमहुराओ। मच्चु व्व निग्घिणाओ पावं पिव वज्जणिज्जाओ ॥

ता अलं मे एयाए; मा मज्झं पि इणमेव संपाडइस्सइ त्ति चिन्तिऊण घेत्तूणमङ्गलग्गं सुवण्णयं परिचत्ता खु एसा।

चिन्तियं च तीए। तहावि सोहणं चेव एयं, जं सो वावाइओ त्ति। ता गच्छामि अन्नत्थ। पयट्टा नईतीराए। दिट्ठा धरणेण

व्यसनपाताले प्रक्षिप्य भर्तारमनपेक्ष्य निजकुलं स्वप्नेऽपि अदृष्टपूर्वेण मया सह प्रवृत्तेति।

हा कथं दूरेण जितं विष-व्याघ्र-भुजङ्ग-सिंह-शरभानाम्। कलिकालवहिराक्षसीकृतान्तचरितं महिलाभिः ॥

असलिलपंकग्राही+ भवति क्षणेनाकन्दरा व्याघ्री। अनिवृत्ता यमभ्रुकुटिरनभ्रवज्राशनिर्महिला ॥

महिला आल(असद्दोषारोप)कुलगृहं महिला लोके दुश्चरितक्षेत्रम्। महिला दुर्गतिद्वारं महिला योनिरनर्थानाम् ॥

विद्युदिव चञ्चला महिला विषमिव प्रमुखमधुराः। मृत्युरिव निर्घृणाः पापमिव वर्जनीयाः ॥

ततोऽलं मे एतया, मा ममापीदमेव संपादयिष्यति इति' चिन्तयित्वा गृहीत्वाङ्गलग्नं सुवर्णं परित्यक्ता खल्वेषा।

चिन्तितं च तया-तथापि शोभनमेवैतत्, यत्स व्यापादित इति। ततो गच्छाम्यन्यत्र। प्रवृत्ता नदीतीरे। दृष्टा धरणेन हर्षवशोत्फुल-

---

१ वहं क। २ कुलहरं क। + ग्राहो जलजन्तुविशेषः, तस्य स्त्री जातित्वात् ग्राही।

जो भवं विय अचोरो चेव 'चोरो'त्ति कलिय गहिओ अहं महया दविणजाएण पेच्छिऊण नरवइं तए विमोइओ त्ति। धरणेण भणियं। भद्द, थेवमेयं। मोरिएण भणियं। ता साहेउ अज्जो, कहं पुण अज्जस्स ईइसी अवत्थ त्ति। धरणेण भणियं। भद्द, देव्वं एत्थ पुच्छसु त्ति। मोरिएण चिन्तियं। न एत्थ कालक्खेवेण पओयणं, अहिमाणी य एसो कहं कहिस्सइ। किं वा कहिएणं। विचित्ताणि विहिणो विलसियाणि। ता किं मयेइणा निब्बन्धेण। अहवा कहियं चेवाणेण परमत्थओ 'देव्वं पुच्छसु'त्ति भणमाणेण। ता इमं ताव एत्थ पत्तयालं, जं एसो इओ लहुं विसज्जीयइ त्ति। चिन्तिऊण भणिओ खु एसो। अज्ज, किं बहुणा जंपिएण; मोत्तूण विसायं लहुं अवक्कमसु। धरणेण भणियं। भद्द, न खलु अहं परपाणेहिं अत्तणो पाणे रक्खेमि। ता वावाएहि मं, निद्देसकारी खु तुमं ति। मोरिएण भणियं। अज्ज, अलं मज्झ पाणविणाससङ्काए। सच्चपुरिसो खु एस राया, न अम्हाणं अवराहसए वि य पाणवावत्तिं करेइ। अगच्छमाणे य

स्मरसि मामायामुष्यां विमोचितम्। धरणेन भणितम्–न सुष्ठु स्मरामि। मौर्येण भणितम्–कथं न स्मरसि, यो भवानिव अचोर एव 'चोर' इति कलयित्वा गृहीतोऽहं महता द्रविणजातेन प्रेक्ष्य नरपतिं त्वया विमोचित इति। धरणेन भणितम्–भद्र! स्तोकमेतद्। मौर्येण भणितम्–ततः कथयत्वार्यः, कथं पुनरार्यस्य ईदृशी अवस्थेति। धरणेन भणितम्–भद्र! दैवमत्र पृच्छेति। मौर्येण चिन्तितम्–नात्र कालक्षेपेण प्रयोजनम्, अभिमानी चैष कथं कथयिष्यति, किं वा कथितेन। विचित्राणि विधेर्विलसितानि। ततः किं ममैतेन निर्बन्धेन। अथवा कथितमेवानेन परमार्थतो 'दैवं पृच्छ'इति भणता। तत इदं तावदत्र प्राप्तकालम्, यदेष इतो लघु विसर्ज्यते इति। चिन्तयित्वा भणितः खल्वेषः। आर्य! किं बहुना जल्पितेन, मुक्त्वा विषादं लघु अपक्राम। धरणेन भणितम्–भद्र! न खल्वहं परप्राणैरात्मनः प्राणान् रक्षामि। ततो व्यापादय माम्, निर्देशकारी खलु त्वमिति। मौर्येण भणितम्–आर्य! अलं मम प्राणविनाशशङ्कया। सत्पुरुषः खल्वेष राजा, नास्माकमपराधशतेऽपि च

---

१ पओयणं ति क। २ कहिस्सइ क। ३ विसज्जियइ ख। ४ अवक्कमाहि क। ५ आएसयारी क। ६ –विणासणासङ्काए क। ७ सत्तपुरिसो क। ८ विवित्ति क।

कयन्ताभिभूयस्स न जुत्तमिह चिट्ठिउं । ता पराणेमि ताव एयं दन्तउरनिवासिणो खन्ददेवमाउलस्स समीवं; पच्छा जहाजुत्तं करेस्सामि त्ति । साहियं लच्छीए । बहुमयं च तीए । पयट्टाणि दन्तउरं ॥

इओ य न लद्धो सत्थवाहपुत्तो त्ति संजायसोएण पच्चइयनिययपुरिसाण समप्पिओ सत्थो कालसेणेण । भणिया य एए । हरे, पाविय[1]व्वो तुम्हेहिं एस महाणुभावस्स गुरूणं ति । चिन्तियं च णेण । जइ वि न संपन्नमोवाइयं, तहावि कायम्बरीए जहा भणियमेव बलिविहाणं काऊण पइन्नं पि ताव सफलं करेमि त्ति । पेसिया बलिपुरिसनिमित्तं सवरपुरिसा । कराविया कायम्बरीए पूया, मज्जिओ गिरिनईए, परिहियाइं वक्कलाइं, कया कणवीरमुण्डमाला, रयाविया महामहल्लकट्ठेहिं चिया, पयट्टो चण्डियाययणं ॥

इओ य दन्तउरपत्थिओ बिइ[2]यदियहंमि अरुणुग्गमे चेव कायम्बरिं परिब्भमन्तेहिं समासाइओ सत्थवाहपुत्तो कालसेणसबरेहिं । बद्धो

स्थातुम् । ततः परानयामि तावदेतां दन्तपुरनिवासिनः स्कन्ददेवमातुलस्य समीपम्, पश्चाद् यथायुक्तं करिष्यामीति । कथितं लक्ष्म्यै । बहुमतं च तया । प्रवृत्तौ दन्तपुरम् ॥

इतश्च न लब्धः सार्थवाहपुत्र इति संजातशोकेन प्रत्ययितनिजपुरुषेभ्यः समर्पितः सार्थः कालसेनेन । भणिताश्चैते । अरे प्रापयितव्यो युष्माभिरेष महानुभावस्य गुरूणामिति । चिन्तितं च तेन–यद्यपि न संपन्नमौपयाचितं तथापि कादम्बर्यां यथाभणितमेव बलिविधानं कृत्वा प्रतिज्ञामपि तावत्सफलां करोमीति । प्रेषिता बलिपुरुषनिमित्तं शवरपुरुषाः । कारिता कादम्बर्याः पूजा, मज्जितो गिरिणद्याम्, परिहितानि वल्कलानि, कृता करवीरमुण्डमाला, रचिता महामहाकाष्ठैश्चिता, प्रवृत्तश्चण्डिकाऽऽयतनम् ॥

इतश्च दन्तपुरप्रस्थितो द्वितीयदिवसेऽरुणोद्गमे एव कादम्बरीं परिभ्रमद्भिः समासादितः सार्थवाहपुत्रः कालसेनशबरैः । बद्धो

---

१ –मामयस्स क । २ बीय–क । ३ महामुल ग ।

पल्लिरज्जूए । पयट्टाविओ समहिलिओ चेव चण्डियायणं । गओ थेवं भूमिभागं । दिट्ठं च णेण चण्डियायणपासमण्डलं । कीइसं । परिमडिय जिण्णरुक्खगोद्देहियरइयकट्ठसंघायसंकुलं भुयङ्गमिहुणसणाहवियडवम्मीयं परत्तमुहलसउणगणकयवमालं वियडतरुखन्धबहलरुहिरापङ्किपतिग्गलसंघायं पायवग्गाहावबद्धमहिसमेसमुहपुच्छखुरसिङ्गसिरोहराचीरनिवहं ति । अवि य

वायगलउन्तसंवलियगिद्धचन्द्रेहि विप्फुरन्तेहिं । पडिवद्धसूरकिरणं करङ्ककलियं मसाणं व ॥

गहभूयजक्खरक्खसपिसायसंजणियहियपरिओसं । रुहिरबलिखित्तपसमियनिस्सेसधरारउग्घायं ॥

तं च एवंगुणाहिरामं चण्डियायणपासमण्डलं सभयं वोलिऊण आययणं पेच्छिउं पयत्तो ।

धवलनरनरकलेवरचिरिथिणुत्तुङ्गपडियपायारं । उब्भडकबन्धविरइयतोरणपडिबद्धसिरमालं ॥

पल्लिरज्ज्वा । प्रवर्तितः समहिलिक एव चण्डिकायतनम् । गतः स्तोकं भूमिभागम् । दृष्टं च तेन चण्डिकायतनपार्श्वमण्डलम् । कीदृशम् । परिशटितजीर्णवृक्षगोद्देहिकाच्छादितकाष्ठसंघातसंकुलं भुजगमिथुनसनाथविकटवल्मीकं प्ररक्तमुखरशकुनगणकृत(वमाल दे॰)कोलाहलं विकटतरस्कन्धबहलरुधिरार्द्रप्रविगलसंघातं पादपशाखावबद्धमहिष-मेषमुखपुच्छखुरशृङ्गशिरोधराचीरनिवहमिति । अपि च-

वायगलत्कुन्तसंवलितगृध्रचन्द्रैर्विस्फुरद्भिः । प्रतिबद्धसूर्यकिरण करङ्ककलितं श्मशानमिव ॥

ग्रहभूतयक्षराक्षसपिशाचसंजनितहृदयपरितोषम् । रुधिरबलिक्षिप्तप्रशमितनिःशेषधरारजउद्घातम्(समूहम्) ॥

तं चैवंगुणाभिरामं चण्डिकायतनपार्श्वमण्डलं सभयं व्यतिक्रम्यायतनं प्रेक्षितुं प्रवृत्तः ।

धवलपरनरकलेवरविस्तीर्णोत्तुङ्गघटितप्राकारम् । उद्भटकबन्धविरचिततोरणप्रतिबद्धशिरोमालम् ॥

---

१ उ(हिग-क ।

मयणाहवयणभीसणविरइयपायारसिहरसंघायं । उत्तुङ्गवेणुलम्बियदीहरपोण्डरियकत्तिझयं ॥
दीणमुहपासपिण्डियवन्दयबीभच्छरुद्धओवासं । निसियकरवालवावडकरसबरजुवाणपरियरियं ॥
विममसमाहयपडुपडहसद्दवित्तत्थसउणसंघायं । अच्चंतरुयन्तसदुक्खसबरिविलयाजणाइण्णं ॥
वियडगयदन्तनिम्मियभित्तिसमुक्किन्नसूलसंघायं । तक्खणमेत्तुकत्तियचम्मसमोच्छइयगब्भहरं ॥
पुरिसवसापरिपूरियकवालपज्जलियमङ्गलपईवं । डज्झन्तबिल्लगुग्गुलुपवियम्भियधूमसंघायं ॥
सबरवहूरुहिरक्खयगयमोत्तियरइयसत्थियसणाहं । चन्दकरधवलदीहरपरिलम्बियचमरसंघायं ॥
रुहिरकसव्वालम्बियदीहरवणकोलवब्भनिउरम्बं । कङ्केल्लिपल्लवुप्पङ्कनिमियरेहेन्तधरणितलं ॥

मृगनाथवदनभीषणविरचितप्राकारशिखरसंघातम् । उत्तुङ्गवेणुलम्बितदीर्घपौण्डरीककृत्तिध्वजम् ॥
दीनमुखपाशपिण्डितवन्दिकबीभत्सरुद्धावकाशम् । निशितकरवालव्यापृतकरशबरयुवपरिकरितम् ॥
विषमसमाहतपटुपटहशब्दवित्रस्तशकुनसंघातम् । अत्यन्तरुदत्सदुःखशबरीवनिताजनाकीर्णम् ॥
विकटगजदन्तनिर्मितभित्तिसमुत्कीर्णशूलसंघातम् । तत्क्षणमात्रोत्कर्तितचर्मसमाच्छादितगर्भगृहम् ॥
पुरुषवसापरिपूरितकपालप्रज्वलितमङ्गलप्रदीपम् । दह्यमानबिल्वगुग्गुलुप्रविजृम्भितधूमसंघातम् ॥
शबरवधूरुधिराक्षतगजमौक्तिकरचितस्वस्तिकसनाथम् । चन्द्रकरधवलदीर्घपरिलम्बितचामरसंघातम् ॥
रुधिर-(कसव्व दे)व्यासालम्बितदीर्घवनकोलवभ्रनिकुरम्बम् । कंकेल्लि(अशोक)पल्लवोत्पंक(राशि)न्यस्तराजद्धरणीतलम् ॥

१ धूमनिउरंबं क । २ रायत–क ।

कोदण्डखग्गघण्टयमहिसासुरपुच्छवावडकराए । कच्चाइणिपडिमाए विहूसियं घोररूवाए ॥

तओ तं दट्ठूण चिन्तियं धरणेणं

सक्का सीहस्स वणे पलाइउं वारणस्स य तहेव । सुकयस्स दुक्कयस्स य भण कत्थ पलाइउं सक्का ॥

एयं च चिन्तयन्तो छूढो सबरेहि चन्द्रमज्झंमि । अह बन्धिऊण गाढं पुव्वविरुद्धेहिं व खलेहिं ॥

एत्थन्तरंमि समागओ चण्डियाययणं कालसेणो, पडिओ चण्डियाए चलणेसु, भणियं च सगग्गयक्खरं । भयवइ, जइ वि न कओ तए मंह पसाओ, तहावि जम्मन्तरे वि जहा न एवं दुक्खभायणं हवामि, तहा तए कायव्वं ति । 'सत्थवाहपुत्तावयारकरणेण जं महं दुक्खं, तं तुमं चेव जाणसि' त्ति भणिऊण भणिओ कुरङ्गओ । हरे, निवेएहि भयवईए बलिं । तेण 'जं देवो आणावेइ' त्ति भणिऊण

कोदण्डखड्गघण्टामहिषासुरपुच्छव्यापृतकरया । कात्यायनीप्रतिमया विभूषितं घोररूपया ॥

ततस्तं दृष्ट्वा चिन्तितं धरणेन ।

शक्याः सिंहाद् वने पलायितुं वारणात्तथैव । सुकृताद् दुष्कृताच्च भण कुत्र पलायितुं शक्याः ॥

एवं च चिन्तयन् क्षिप्तः शबरैर्वृन्दमध्ये । अथ बद्ध्वा गाढं पूर्वविरुद्धैरिव खलैः ॥

अत्रान्तरे समागतश्चण्डिकायतनं कालसेनः । पतितश्चण्डिकायाश्चरणयोः । भणितं च सगद्गदाक्षरम् । भगवति ! यद्यपि न कृत स्त्वया मम प्रसादः, तथापि जन्मान्तरेऽपि यथा नैवं दुःखभाजनं भवामि तथा त्वया कर्तव्यमिति । 'सार्थवाहपुत्रापकारकरणेन यन्मह दुःखं तत्त्वमेव जानासि' इति भणित्वा भणितः कुरङ्गकः । अरे निवेदय भगवत्यै बलिम् । तेन 'यद्देव आज्ञापयति' इति भणित्वा

---

१ हत्थिणो ठउ मत्तस्स । क । २ चिन्तिऊण ख ।

खित्तो धेण केसेसु[1] कड्ढिऊण भयपरायत्तसव्वगत्तो दुग्गिलओ नाम लेहवाहओ। ढोइयं[2] रत्तचन्दणमणाहं भायणं। विगयपाणो विव चच्चिओ दुग्गिलओ। कालसेणेण कड्ढियं विज्जुच्छडाडोवभासुरं मण्डलग्गं, वाहियं ईसि नियभुयासिहरे। भणिओ य दुग्गिलओ। भद्द, सुदिट्ठं जीवलोयं करेहि। सग्गं तए गन्तव्वं, जीवियं मोत्तूण [3]किं वा ते संपाडियउ त्ति। तओ [4]भयाभिभूएण न जंपियं दुग्गिलएणं। पुणो वि भणिओ, पुणो वि न जंपियं ति। अणावूरियमणोरहो य न वावाइज्जइ त्ति विसण्णो कालसेणो। तं च दट्ठूण चिन्तियं धरणेणं। हन्त मए वि एवं मरियव्वं ति। ता वरं अवेक्खिऊण दीणसत्तघायं काऊण खणमेत्तपाणपरिरक्खणेण इमस्स उवयारं पढमं विवन्नो म्हि। वावडो य मे विणिवायकरणेसु कयन्तो, एसो वि निव्वुओ हवउ त्ति चिन्तिऊण भणिओ कुरङ्गओ। भद्द, निवेएहि एयस्स महापुरिसस्स, जहा 'भयविसण्णो खु एसो तवस्सी, ता किं एइणा; अणभिन्नो अहं पत्थणाए; तहावि भवओ पओयणं [5]पसाहणीयं चेव

क्षिप्तोऽनेन केशेषु कर्षित्वा भयपराधृतसर्वगात्रो दुर्गिलको नाम लेखवाहकः। ढौकितं रक्तचन्दनसनाथं भाजनम्। विगतप्राण इव चर्चितो दुर्गिलकः। कालसेनेन कृष्टं विद्युच्छटाटोपभासुरं मण्डलाग्रम्, वाहितमीषद् निजभुजाशिखरे। भणितश्च दुर्गिलकः। भद्र! सुदृष्टं जीवलोकं कुरु। स्वर्गं त्वया गन्तव्यं, जीवितं मुक्त्वा किं वा ते संपाद्यतामिति। ततो भयाभिभूतेन न जल्पितं दुर्गिलकेन। पुनरपि भणितः पुनरपि न जल्पितमिति। अनापूरितमनोरथश्च न व्यापाद्यते इति विषण्णः कालसेनः। तं च दृष्ट्वा चिन्तितं धरणेन। हन्त मयाऽप्येवं मर्तव्यमिति। ततो वरमप्रेक्ष्य दीनसत्त्वघातं कृत्वा क्षणमात्रप्राणपरिरक्षणेनास्योपकारं प्रथमं विपन्नोऽस्मि। व्यापृतश्च मे विनिपातकरणेषु कृतान्तः, एषोऽपि निर्वृतो भवत्विति चिन्तयित्वा भणितः कुरङ्गकः। भद्र! निवेदय एतस्मै महापुरुषाय, यथा 'भयविषण्णः खल्वेष तपस्वी, ततः किमेतेन, अनभिज्ञोऽहं प्रार्थनायाम्, तथापि भवतः प्रयोजनं प्रसाधनीयमेव प्रार्थये एकां प्रार्थनामिति। निवेदितं काल-

१ केसे क। २ ढोइऊण ख। ३ 'किं भण' इत्यधिकं कपुस्तके। ४ भयाहिहूएण क। ५ पसाहिणीयं क।

पत्थेमि एगं पत्थणं' ति। निवेइयं कालसेणस्स। भणियं च णेण। जीवियं मोत्तूण पत्थेउ भद्दो त्ति। धरणेण भणियं। मोत्तूण एयं मं वावाएसु त्ति। तओ बाहजलभरियलोयणेण अहं को उण एसो परोवयारतल्लिच्छयाए अप्पाणयं वावायणे समप्पेइ; सुमरावेइ मे सत्थवाहपुत्तं' ति भणिऊण मुच्छिओ कालसेणो, निवडिओ धरणिवट्ठे। वीजिओ किसोरएण। लद्धा चेयणा। भणियं णेण। भद्द किसोरय, निरूवेहि एयं, को उण एसो महाणुभावो सत्थवाहपुत्तस्स चेट्ठियं अणुकरेइ। निरूविऊण भणियं किसोरएण। भो इमाए अणन्नसरिसीए आगिईए सो चेवं मे पडिहायइ त्ति। ता सयमेव निरूवेउ पल्लीवई। तओ हरिसविसायगब्भिणं निरूविओ णेण पच्चभिन्नाओ य। छोडिया से बन्धा। खग्गं मोत्तूण निवडिओ चलणेसु। भणियं च णेण। सत्थवाहपुत्त, खमियव्वो मेह एस अवराहो। धरणेण भणियं। भो महापुरिस, अहिप्पेयफलसाहणेण गुणो खु एसो, कहमवराहो त्ति। कालसेणेण चिन्तियं। नूणं न एस मं पच्चभिजाणइ त्ति, तेण

सेनाय। भणितं च तेन–जीवितं मुक्त्वा प्रार्थयतां भद्र इति। धरणेन भणितम्–मुक्त्वा एतं मां व्यापादयेति। ततो बाष्पजलभृतलोचनेन 'अथ कः पुनरेष परोपकारतत्परतया आत्मानं व्यापादने समर्पयति, स्मरयति मे सार्थवाहपुत्रम्' इति भणित्वा मूर्च्छितः कालसेनः, निपतितो धरणीपृष्ठे। वीजितः किशोरकेन। लब्धा चेतना। भणितं च तेन–भद्र किशोरक! निरूपयैनम्, कः पुनरेष महानुभावः सार्थवाहपुत्रस्य चेष्टितमनुकरोति। निरूप्य भणितं किशोरकेन–भो अनयाऽनन्यसदृश्याऽऽकृत्या स एव मे प्रतिभातीति। ततः स्वयमेव निरूपयतु पल्लीपतिः। ततो हर्षविषादगर्भितं निरूपितस्तेन प्रत्यभिज्ञातश्च। छोटितास्तस्य बन्धाः। खड्गं मुक्त्वा निपतितश्चरणयोः। भणितं च तेन–सार्थवाहपुत्र! क्षन्तव्यो ममैषोऽपराधः। धरणेन भणितम्–भो महापुरुष! अभिप्रेतफलसाधनेन गुणः खल्वेषः, कथम-

१ अहो ख। २ सुमरेइ क। ३ संमुच्छिओ क। ४ –सरिसाए ख। ५ च्चेव क। ६ कालसेणेण लद्धा से क। ७ मम क। ८ महासत्त क। ९ पच्चहियाणइ क।

एवं मन्तेइ; ता पयासेमि से अत्ताणयं। भणियं च णेण। सत्थवाहपुत्त, किं ते अहिप्पेयं फलं साहियं ति। धरणेण भणियं। भद्द, पत्थुए वावायणे एयं उज्झिऊण ममेव मरणमणोरहावूरणं ति। कालसेणेण भणियं। सत्थवाहपुत्त, किं ते इमस्स निव्वेयाइसयस्स मरणववसायस्स कारणं। धरणेण भणियं। भो महापुरिस, अलमियाणिं एयाए कहाए। संपाडेउ भवं अत्तणो समीहियं ति। तओ 'अहो से महाणुभावय' त्ति चिन्तिऊण भणियं कालसेणेण। सत्थवाहपुत्त, न सुमरेसि मं सीहविणिवाइयं नागपोययं पिव अत्तणो विणासनिमित्तं अत्तणा चेव जीवाविऊण कयग्घसेहरयभूयं कालसेणं। जीवाविओ अहं तए। मए पुण कओ तुज्झ पच्चुवयारो; विओइओ तुमं सत्थाओ, पाविओ य अप्पत्तपुव्वं इमं ईइसिं अवत्थं ति। तओ सुमरिऊण पुव्ववुत्तन्तं पच्चहियाणिऊण य कालसेणं लज्जावणयवयणं जंपियं धरणेण। भो महापुरिस, को अहं जीवावियव्वस्स, तुह चेव पुण्णपरिणई एस त्ति। कहं च तुमं कयग्घो, जो दिट्ठमेत्त वि

पराध इति। कालसेनेन चिन्तितम्-नूनं नैष मां प्रत्यभिजानातीति तेनैवं मन्त्रयति, ततः प्रकाशयामि तस्मै आत्मानम्। भणितं च तेन-सार्थवाहपुत्र! किं तेऽभिमतं फलं साधितमिति। धरणेन भणितम्-भद्र! प्रस्तुते व्यापादने एतमुज्झित्वा ममैव मरणमनोरथापूरणमिति। कालसेनेन भणितम्-सार्थवाहपुत्र! किं तेऽस्य निर्वेदातिशयस्य मरणव्यवसायस्य कारणम्। धरणेन भणितम्-भो महापुरुष! अलमिदानीमेतया कथया। संपादयतु भवानात्मनः समीहितमिति। ततः 'अहो तस्य महानुभावता' इति चिन्तयित्वा भणितं कालसेनेन। सार्थवाहपुत्र! न स्मरसि मां सिंहविनिपातितं नागपोतकमिवात्मनो विनाशनिमित्तमात्मनैव जीवयित्वा कृतघ्नशेखरभूतं कालसेनम्। जीवितोऽहं त्वया। मया पुनः कृतस्तव प्रत्युपकारः, वियोजितस्त्वं सार्थात्, प्रापितश्चाप्राप्तपूर्वामिमामीदृशीमवस्थामिति। ततः स्मृत्वा पूर्ववृत्तान्तं प्रत्यभिज्ञाय च कालसेनं लज्जावनतवदनं जल्पितं धरणेन। भो महापुरुष! कोऽहं जीवयितव्यस्य, तवैव पुण्यप

१ किं वा पुरिसयारो भणीयइ क।

अहं अन्नाणओ किंपि काऊण एवं ठिओम्हि त्ति। ता अलमेइणा। अह किं पुण इमं पत्थुयं ति। तओ लज्जापराहीणेण न जंपियं कालसेणेण। साहियं च निरवसेसमेव संगमदंसणाइयं नियपाणपरिच्चायववसायावसाणं चेट्ठियं ति किसोरएणं। तओ 'अहो से कयन्नुया, अहो थिरसिणेहया, अहो महाणुभावय' त्ति चिन्तिऊण जंपियं धरणेण। भो महापुरिस, जुत्तमेव गुरुदेवपूयणं पुप्फबलिगन्धचन्दणेहिं, न उण पाणिघाएणं। अवि य

होज्ज जले वि जलणो होज्ज खीरं पि गोविसाणाओ। अमयरसो वि विसाओ न य हिंसाओ हवइ धम्मो॥

दाऊण य अहिओयं देवयठाण जे खलु अभव्वा। घायन्ति जियसयाइं पावेन्ति दुहाइ ते नरए॥

ता विरम एयाओ ववसायाओ त्ति। कालसेणेण भणियं। जं तुमं आणवेसि त्ति। तओ गामदेसलूडणे अन्नाभावे य भक्खणनिमित्त

व्यवसितोऽसीति। कथं च त्वं कृतज्ञः, यो ह्यमात्रेऽपि जने अज्ञानतः किमपि कृत्वा वधं विपद्यसे इति। ततोऽलमेतेन। अथ किं पुनरिदं प्रस्तुतमिति। ततो लज्जापराधीनेन न जल्पितं कालसेनेन। कथितं च निरवशेषमेव संगमदर्शनादिकं निजप्राणपरित्यागव्यवसायावसानं चेष्टितमिति किशोरकेण। ततः 'अहो तस्य कृतज्ञता, अहो स्थिरस्नेहता, अहो महानुभावता' इति चिन्तयित्वा जल्पितं धरणेन। भो महापुरुष! युक्तमेव गुरुदेवपूजनं पुष्पबलिगन्धचन्दनैः न पुनः प्राणिघातेन। अपि च—

भवेज्जलेऽपि ज्वलनो भवेत् क्षीरमपि गोविषाणात्। अमृतरसोऽपि विषाद् न च हिंसाया भवति धर्मः॥

दत्त्वा चाभियोगं देवतायतनेभ्यो ये खल्वभव्याः। घातयन्ति जीवशतानि प्राप्नुवन्ति दुःखानि ते नरके॥

ततो विरम एतस्माद् व्यवसायादिति। कालसेनेन भणितम्-यत्त्वमाज्ञापयसीति। ततो ग्रामदेशलुण्टने अन्नाभावे च भक्षणनिमित्तं च

---

१ पुप्फबलि-क। २ व क। ३ स्स क। ४ इह पुरिस क। ५ भणाति ख। ६ गामाइदेस-ख।

च मोत्तूण कओ अणेण कायम्बरिअडविपविट्ठस्स सत्थस्स पाणिघायणस्स जावज्जीविओ नियमो। फुल्लबलिगन्धचन्दणेहिं पूइया देवया। नीओ णेण सयलचन्दसंगओ नियगेहमेव धरणो। कओ उंचिओ उवयारो।

भुत्तुत्तरकालंमि य उवणीयं से समत्थरित्थं ति। सवराहिवेण तुरियं गैहियं जं सत्थभङ्गंमि ॥

करिकुम्भसमुत्थाणि य महल्लमुत्ताहलाइं पवराइं। दन्ता य गयवराणं चमराणि य जच्चचमरीणं ॥

घेत्तूण य तं रित्थं दाऊण य किंचि चन्दयाणं पि। विहरह जहासुहेणं भणिऊण विसज्जिया तेणं ॥

धरणो वि कालसेणपीईए तत्थेव कंचि कालं गमेऊण विसज्जिओ कालसेणेण, पयट्टो नियपुरिं, पत्तो य कालक्कमेणं। [विंन्नाओ अम्मापिईहिं नायरेहि य] परितुट्टो मे गुरुयणो। निग्गया नयरिमहन्तया। पच्चुवेक्खियं भण्डं संखियं च मोल्लेणं जाव सवाया कोडि

मुक्त्वा कृताऽनेन कादम्बर्यटवीप्रविष्टस्य सार्थस्य प्राणिघातनस्य यावज्जीविको नियमः। पुष्पबलिगन्धचन्दनैः पूजिता देवता। नीतस्तेन सकलचन्द्रसंगतो निजगेहमेव धरणः। कृत उचित उपकारः।

भुक्तोत्तरकाले चोपनीतं तस्मै समस्तरिक्थमिति। शबराधिपेन त्वरितं गृहीतं यत्सार्थभङ्गे ॥

करिकुम्भसमुत्थानि च महामुक्ताफलानि प्रवराणि। दन्ताश्च गजवराणां चामराणि च जात्यचमरीणाम् ॥

गृहीत्वा च तद् रिक्थं दत्त्वा च किंचिद् चन्द्रिनामपि। विहरत यथासुखं भणित्वा विसर्जितास्तेन (धरणेन) ॥

धरणोऽपि च कालसेनप्रीत्या तत्रैव कञ्चित्कालं गमयित्वा विसर्जितः कालसेनेन प्रवृत्तो निजपुरीम्, प्राप्तश्च कालक्रमेण। [विज्ञातो मातापितृभ्यां नागरैश्च]। परितुष्टस्तस्य गुरुजनः। निर्गता नगरीमहान्तः। प्रत्यवेक्षितं भाण्डम्, संख्यातं, च मूल्येन

---

१ उचि, उव–फ–ग। २ तु फ। ३ जं गहिय फ। ४ अय कोष्ठान्तर्गतः पाठो नास्ति फपुस्तके। ५ मुल्लेण घ।

ति। इओ अइक्कन्ते अद्धमासे आगओ देवनन्दी। तस्स वि य निग्गया नयरिमहन्तया। पच्चुवेक्खियं भण्डं संखियं च [1]मोल्लेणं जाव अद्धकोडि त्ति। तओ विलिओ देवनन्दी। समप्पियं पउरभण्डमोल्लं। सेसेण य परमणोरहसंपायणेण सफलं पुरिसभावमणुहवन्तस्स आगया मयणतेरसी। भणिओ य एसो नयरिमहन्तएहिं 'नीसरेहि रहवरं'। धरणेण भणियं। अलं वालकीडाए। पसंसिओ नयरिमहन्तएहिं ॥

अइक्कन्तो य से कोइ कालो परत्थसंपायणसुहमणुहवन्तस्स। निओइयपायं च णेण नियभुओवज्जियं दविणजायं। समुप्पन्ना य से चिन्ता। अवस्समेव पुरिसेण उत्तमकुलपसूएण तिवग्गो सेवियव्वो। तं जहा, धम्मो अत्थो कामो य। तत्थ अपरिचत्तसव्वसंगेण अत्थ-च्चहाणेण होयव्वं ति। तओ चेव तस्स दुवे संपज्जन्ति। तं जहा, धम्मो य कामो य। अन्नं च, एस अत्थो नाम महन्तं देवयारूवं।

यावत् सपादा कोटिरिति। इतोऽतिक्रान्तेऽर्धमासे आगतो देवनन्दी। तस्यापि च निर्गता नगरीमहान्तः। प्रत्यवेक्षितं भाण्डम्, संख्यातं च मूल्येन यावदर्धकोटिरिति। ततो व्यलीको (लज्जितो) देवनन्दी। समर्पितं पौरभाण्डमूल्यम्। शेषेण च परमनोरथसंपादनेन सफलं पुरुषभावमनुभवत आगता मदनत्रयोदशी। भणितश्चैष नगरीमहद्भिः 'निःसारय रथवरम्'। धरणेन भणितम्-अलं बालक्रीडया। प्रशंसितो नगरीमहद्भिः ॥

अतिक्रान्तश्च तस्य कोऽपि कालः परार्थसंपादनसुखमनुभवतः। नियोजितप्रायं च तेन निजभुजोपार्जितं द्रविणजातम्। समुत्पन्ना च तस्य चिन्ता। अवश्यमेव पुरुषेणोत्तमकुलप्रसूतेन त्रिवर्गः सेवितव्यः। तद् यथा-धर्मोऽर्थः कामश्च। तत्रापरित्यक्तसर्वसङ्गेन अर्थप्रधानेन भवितव्यमिति तत एव तस्य द्वौ संपद्येते। तद् यथा-धर्मश्च कामश्च। अन्यच्च-एषोऽर्थो नाम महद् दैवतारूपम्। एष खलु पुरुषस्य

एमो गु पुरिसस्स बहुमाणं वेड्ढावेइ, गोरवं जणेइ, महग्घयं उप्पाएइ, सोहग्गं करेइ, छायामावहइ, कुलं पयासेइ, रूवं पयासेइ, बुद्धिं पयासेइ। अत्थवन्तो हि पुरिसा अदेन्ता वि लोयाणं सलाहणिज्जा हवन्ति। जं चेव करेन्ति, तं चेव तेसिं असोहणं पि सोहणं वण्णिजए। अमग्गणपत्थणं च अणुहवन्ति परत्थसंपायणसुहं। ता जइ वि एस मह पुव्वपुरिसोवज्जिओ अइपभूओ अत्थि, तहावि अलं तेण गुरुयणइणिम्मविएण। ता अहं उवज्जिणेमि, गच्छामि दिसावणिज्जेणं ति। चिन्तिऊण विन्नत्ता जणणिजणया। अणुमन्निओ य णेहिं गओ महया सत्थेणं समहिलिओ पुव्वसमुद्दतडनिविट्ठं वेजयन्तिं नाम नयरिं। दिट्ठो नरवई। बहुमन्निओ य णेणं। निओइयं भण्डं, न समासाइओ इट्ठलाभो। चिन्तियं च णेण। समागओ चेव जलनिहितडं। ता गच्छामि ताव परतीरं। तत्थ मे गयस्स कयाइ अहिलसियपओयणसिद्धी भविस्सइ त्ति। गहियं परतीरगामियं भण्डं। संजत्तियं पवहणं। पसत्थतिहिकरणजोगेण निग्गओ नयरीओ, गओ

बहुमानं वर्धयति, गौरवं जनयति, महार्घ्यतामुत्पादयति, सौभाग्यं करोति, छायामावहति, कुलं प्रकाशयति, रूपं प्रकाशयति, बुद्धिं प्रकाशयति। अर्थवन्तो हि पुरुषा अददतोऽपि लोकानां श्लाघनीया भवन्ति। यदेव कुर्वन्ति तदेव तेषामशोभनमपि शोभनं वर्ण्यते, अभ्यर्थनाविप्रार्थनं चानुभवन्ति परार्थसंपादनसुखमिति। ततो यद्यपि एष मम पूर्वपुरुषोपार्जितोऽतिप्रभूतोऽस्ति, तथापि अलं तेन गुरुप्रणयिनीरमानेन। ततोऽहमुपार्जयामि, गच्छामि दिग्वाणिज्येनेति चिन्तयित्वा विज्ञप्तौ जननीजनकौ। अनुमतश्च ताभ्यां गतो महता सार्थेन समहिलः पूर्वसमुद्रतटनिविष्टां वैजयन्तीं नाम नगरीम्। दृष्टो नरपतिः। बहुमानितश्च तेन। नियोजितं (विक्रीतं) भाण्डम्, न समासादित इष्टलाभः। चिन्तितं च तेन-समागत एव जलनिधितटम्, ततो गच्छामि तावत्परतीरम्। तत्र मे गतस्य कदाचिदभिलषितप्रयोजनसिद्धिर्भविष्यतीति। गृहीतं परतीरगामिकं भाण्डम्। संयात्रितं प्रवहणम्। प्रशस्ततिथिकरणयोगेन निर्गतो नगर्याः, गतः

१ वड्ढेइ क। २ उवज्जिणामि क। ३ दइलाहो क।

समुद्दतीरं, पूइओ अत्थिजणो, अग्घिओ जलनिही। तओ वन्दिऊण गुरुदेवए उवारूढो जाणवत्तं। आगड्ढियाओ वेगहारिणीओ सिलाओ, पूरिओ सियवडो, विमुक्कं जाणवत्तं, गम्मए चीणदीवं ति ॥

अन्नया य अइक्कन्तेसु कइवयदिणेसु कुसलपुरिसविमुक्के विय नाराए वहन्ते जाणवत्ते गयणयलमज्झसंट्ठिए दिणयरंमि आगम्पयन्तो विय मेइणिं धुणन्तो विय समुद्दं उम्मूलन्तो विय कुलसेलजालाणि पयट्टो मारुओ। तओ एरावणो विय गुलुगुलेन्तो पडिसोत्तवाहियसरियामुहं खुहिओ महण्णवो, विसण्णा निज्जामगा। तओ समं गमणारम्भेण ओसारिओ सियवडो, जीवियासा विय विमुक्का नङ्गरसिला निज्जामएहिं। तहावि य तत्थ कंचि वेलं गमेऊण विवन्नं जाणवत्तं। जीवियसेसयाए समासाइयं फलगं, अहोरत्तेण लङ्घिऊण जलनिहिं सुवण्णदीवंमि लग्गो सत्थवाहपुत्तो। चिन्तियं च णेणं। अहो परिणई दइव्वस्स। न याणामि अवत्थं पिययमाए परियणस्स

समुद्रतीरम्, पूजितोऽर्थिजनः, अर्चितो जलनिधिः। ततो वन्दित्वा गुरुदैवतान् उपारूढो यानपात्रम्। आकृष्टा वेगहारिण्यः शिलाः, पूरितः सितपटः, विमुक्तं यानपात्रम्, गम्यते चीनद्वीपमिति।

अन्यदा चातिक्रान्तेषु कतिपयदिनेषु कुशलपुरुषविमुक्ते इव नाराचे वहति यानपात्रे गगनतलमध्यसंस्थिते दिनकरे आकम्पयन्निव मेदिनीं धूनयन्निव समुद्रम् उन्मूलयन्निव कुलशैलजालानि प्रवृत्तो मारुतः। तत ऐरावण इव गुलुगुलायमानः प्रतिस्रोतोवाहितसरिन्मुखं क्षुब्धो महार्णवः, विषण्णा निर्यामकाः। ततः समं गमनारम्भेणापसारितः सितपटः, जीविताशेव विमुक्ता नाङ्गरशिला नियामकैः।

तथापि च तत्र काञ्चिद् वेलां गमयित्वा विपन्नं यानपात्रम्। जीवितशेषतया समासादितं फलकम्, अहोरात्रेण लङ्घित्वा जलनिधिं सुवर्णद्वीपे लग्नः सार्थवाहपुत्रः। चिन्तितं च तेन—अहो परिणतिर्दैवस्य, न जानाम्यवस्थां प्रियतमायाः परिजनस्य च। अथवा किं

१ –सरिहा० ख। २ 'पडिमुत्तवाहिणीए' इत्यधिक० [illegible]। ३ फलयं क। ४ देवस्स ख।

य। अहवा किं विसाएणं। एसो चेव एत्थ पमाणं ति। तओ कयलफलेहिं संपाइया पाणवित्ती। अत्थमिओ सूरिओ। कओ णेण पल्लवसत्थरो, सीयावणयणत्थं च अरणीपओएण पाडिओ जलणो। तेप्पिऊण कंचि कालं पणमिऊण गुरुदेवए य पसुत्तो एसो। अइक्कन्ता रयणी, विउद्धो य। उग्गओ अंसुमाली। दिट्ठं च णेण तं जलणच्छिक्कं सव्वमेव सुवण्णीहूयं धरणिखण्डं। चिन्तियं च णेण। अहो एयं खु धाउखेत्तं; ता पाडेमि एत्थ सुवण्णयं ति। कयाओ इंट्टयाओ, अङ्कियाओ धरणनामएण, उल्लयाणं चेव संपाइया संपुडा, पक्का य सुवण्णमया जाया। एवं च कया णेण दस इंट्टयसंपुडसहस्सा। निबद्धो भिन्नपोयद्धओ॥

इओ य चीणाओ चेव सुवयणसत्थवाहपुत्तसन्तियं असारभण्डभरियं अन्नदीवलग्गसंपावियलच्छिसहियं देवउरगामियं समागयं तमुद्देसं जाणवत्तं। दिट्ठो य भिन्नपोयद्धओ सत्थवाहेणं। लम्बिया य नङ्गरा सुवयणाएसेण। समागया निज्जामगा। दिट्ठो य णेहिं

विषादेन। एष एवात्र प्रमाणमिति। ततः कदलफलैः संपादिता प्राणवृत्तिः। अस्तमितः सूर्यः। कृतस्तेन पल्लवस्रस्तरः, शीतापनयनार्थं चारणिप्रयोगेण पातितो ज्वलनः। तप्त्वा कञ्चित्कालं प्रणम्य गुरुदेवतांश्च प्रसुप्त एषः। अतिक्रान्ता रजनी, विबुद्धश्च। उद्गतोऽंशुमाली। दृष्टं च तेन तद् ज्वलनस्पृष्टं सर्वमेव सुवर्णीभूतं धरणीखण्डम्। चिन्तितं च तेन-अहो एतत्खलु धातुक्षेत्रम्, ततः पातयाम्यत्र सुवर्णकमिति। कृता इष्टकाः, अङ्किता धरणनामकेन, आर्द्रकाणामेव संपादिताः संपुटाः, पक्वाश्च सुवर्णमया जाताः। एवं च कृतानि तेन दश इष्टकासंपुटसहस्राणि। निबद्धो भिन्नपोतध्वजः॥

इतश्च चीनादेव सुवदनसार्थवाहपुत्रसत्कमसारभाण्डभृतमन्यद्वीपलग्नसंप्राप्तलक्ष्मीसहितं देवपुरगामिकं समागतं तमुद्देशं यानपात्रम्। दृष्टश्च भिन्नपोतध्वजः सार्थवाहेन। लम्बिताश्च नाङ्गराः सुवदनादेशेन। समागता निर्यामकाः। दृष्टश्च तैर्धरणो भणितश्च। भो

१-वणयत्थं रा। २ धीसमिऊण रा। ३ धरणितल क। ४ इट्टगाओ क, इट्टगाओ रा। ५ 'महया पडसिणीए' इत्यधिकः क। ६ इत्थ० क।

धरणो भणिओ य। भो भो महापुरिस, एसो चीणवत्थव्वगो देवउरगामी जाणवत्तसंठिओ सुवयणो नाम सत्थवाहपुत्तो भणइ, जहा एहि; कूलं गच्छम्ह। धरणेण भणियं। भद्द, किंभण्डभरियं खु तं जाणवत्तं। निंजामएहिं भणियं। अज्ज, विहिवसेण परिवडिओ खु एसो सत्थवाहपुत्तो विहवेण, न उण पोरुसेणं। ता न सुट्ठु सारभण्डभरियं ति। धरणेण भणियं। जइ एवं, ता अणुवरोहेणं आगच्छउ एत्तियं भूमिं सत्थवाहपुत्तो। निवेइयं सुवयणस्स। आगओ य एसो, भणिओ धरणेण। सत्थवाहपुत्त, न तए कुप्पियव्वं, पओयणं उद्दिसिऊण किंचि पुच्छामि त्ति। सुवयणेण भणियं। भणाउ अज्जो। धरणेण भणियं। केत्तियस्स ते दविणजायस्स जाणवत्तंमि रित्थं। सुवयणेण भणियं। अज्ज, देव्वस्स पडिकूलयाए विणट्ठो खु अहयं। तहावि 'पुरिसयारो न मोत्तव्वो' त्ति उच्छाहमेत्तभण्डमोल्लो सुवण्णसहस्समेत्तस्स घेत्तूण किंपि भण्डं देवउरं पयट्टो म्हि। धरणेण भणियं। जइ एवं, ता परिच्चय तं भण्डं, भरेहि मे सत्तियस्स सुवण्णस्स

भो महापुरुष! एष चीनवास्तव्यो देवपुरगामी यानपात्रसंस्थितः सुवदनो नाम सार्थवाहपुत्रो भणति, यथा एहि, कूलं गच्छामः। धरणेन भणितम्–भद्र! किंभाण्डभृतं खलु तद् यानपात्रम्। निर्यामकैर्भणितम्–आर्य! विधिवशेन परिपतितः खल्वेष सार्थवाहपुत्रो विभवेन, न पुनः पौरुषेण। ततो न सुष्ठु सारभाण्डभृतमिति। धरणेन भणितम्–यद्येवं ततोऽनुपरोधेनागच्छतु एतावतीं भूमिं सार्थवाहपुत्रः। निवेदितं सुवदनस्य। आगतश्चैषः, भणितो धरणेन। सार्थवाहपुत्र! न त्वया कुपितव्यम्, प्रयोजनमुद्दिश्य किंचित् पृच्छामीति। सुवदनेन भणितम्–भणत्वार्यः। धरणेन भणितम्–कियतस्ते द्रविणजातस्य यानपात्रे रिक्थम्। सुवदनेन भणितम्–आर्य! दैवस्य प्रतिकूलतया विनष्टः खल्वहम्। तथापि 'पुरुषकारो न मोक्तव्यः' इति उत्साहमात्रभाण्डमूल्यः सुवर्णसहस्रमात्रस्य गृहीत्वा किमपि भाण्डं देवपुरं प्रवृत्तोऽस्मि। धरणेन भणितम्–यद्येवं ततः परित्यज भाण्डम्, बिभृहि मे सत्कस्य सुवर्णस्य यानपात्रम्, कूलप्राप्तस्य च भवतो

१ निज्जामएग क। २ दरियं क। ३ किंपि क। ४ कित्तियस्स क। ५ णट्ठो क।

जाणवत्तं; कूलपत्तस्स य भवओ पयच्छिस्सं सुवण्णलक्खं ति। सुवयणेण भणियं। किं सुवण्णलक्खेण, तुमं चेव बहुओ त्ति। उज्झियं पुव्वभण्डं। भरियं सुवण्णस्स। ठाविया संखा। उवारूढो धरणो। दिट्ठा य णेण लच्छी। परितुट्ठो एस हियएणं दूमिया य एसा। 'जाया महं एस' त्ति साहियं सुवयणस्स धरणेणं। आणन्दिओ एसो। पयट्टं जाणवत्तं। गयं पञ्चजोयणमेत्तं भूमिभागं॥

एत्थन्तरंमि गयणयलचारिणी वेगागमणेणागम्पयन्ती समुद्दं अयालविज्जू विय असुहया लोयणाणं 'अरे रे दुट्ठसत्थवाहपुत्त, अकओवयारो अणणुजाणियं मए कहिं इमं मईयं दविणजायं गेण्हिऊण गच्छसि' त्ति भणमाणी सुवण्णदीवसामिणी समागया सुवण्णनामा वाणमंतरी। धरियं जाणवत्तं, भणियं च णाए। भो भो निज्जामया, अदाऊण पुरिसबलिं न एत्थ अत्थो घेप्पइ; ता पुरिसबलिं वा देह, अत्थं वा मुयह, वावाएमि वा अहयं ति।[1] धरणेण चिन्तियं। अहो णु खलु मुयाविओ निययरित्थं सुवयणो, उवयारी य एसो

प्रयच्छे सुवर्णलक्षमिति। सुवदनेन भणितम्-किं सुवर्णलक्षेण, त्वमेव बहुक इति। उज्झितं पूर्वभाण्डम्। भृतं सुवर्णेन। स्थापिता संख्या। उपारूढो धरणः। दृष्टा च तेन लक्ष्मीः। परितुष्ट एष हृदयेन। दूना चैषा। 'जाया मम एषा' इति कथितं सुवदनस्य धरणेन। आनन्दित एषः। प्रवृत्तं यानपात्रम्। गतं पञ्चयोजनमात्रं भूमिभागम्।

अत्रान्तरे गगनतलचारिणी वेगागमनेनाकम्पयन्ती समुद्रम्, अकालविद्युदिव असुखदा लोचनयोः 'अरेरे दुष्टसार्थवाहपुत्र! अकृतोपचारोऽननुज्ञातं मया कुत्रेदं मदीयं द्रविणजातं गृहीत्वा गच्छसि' इति भणन्ती सुवर्णद्वीपस्वामिनी समागता सुवर्णानाम्नी वानव्यन्तरी। धृतं यानपात्रम्, भणितं चानया। भो भो निर्यामकाः! अदत्त्वा पुरुषबलिं नात्र अर्थो गृह्यते, ततः पुरुषबलिं वा दत्त अर्थं वा मुञ्चत, व्यापादयामि वा अहमिति। [यद्येतेषामेकमपि न दत्त, ततोऽनर्थः, कृते च न तव भिनद्मि प्रवहणम्] धरणेन चिन्तितम्-अहो

[1] 'जइ एयाणं एक्कं पि न देह तओ अणत्थो, कए य ण तुज्झ भिंदिमि वहणं' इत्यधिकः कपुस्तके, 'तुज्झ भिंदामि पवहणं' इति पाठस्तु गपुस्तके।

लच्छीसंपायणेण, एसा य एवं भणाइ। ता इमं एत्थ पत्तयालं, अहमेव पुरिसबली हवामि त्ति। चिन्तिऊण भणिया वाणमंतरी। भयवइ, अयाणमाणेण मए एवं ववसियं। ता पसीय। अहमेव एत्थ बलिपुरिसो; मं पडिच्छसु त्ति। तीए भणियं। जइ एवं, ता घत्तेहि अप्पाणयं समुद्दे, जेण ते वावाएमि त्ति। लच्छीए चिन्तियं। अणुग्गहीया भयवईए। तओ धरणेण भणियं। वेयस्स[1] सुयण, पावियव्वा तए लच्छी मह गुरूणं ति। भणिऊण पवाहिओ अप्पा। विद्धो य णाए सूलेण, नीओ सुवण्णदीवं[2]। उवसन्ता वाणमंतरी। पयट्टं जाणवत्तं देवउराहिमुहं[3]॥

एत्थन्तरंमि दिट्ठो य एसो कण्ठगयपाणो सुवेलाओ रयणदीवं पत्थिएणं हेमकुण्डलेणं, पच्चभिन्नाओ य तेण। पुव्वपरिचिया य सा हेमकुण्डलस्स वाणमंतरी। तओ 'हा किमेयमकज्जमणुचिट्ठियं' ति भणिऊण मोयाविओ वाणमंतरीओ। पुव्वभणिओसहिवलयवइयरेण

तु खलु मोचितो निजरिपुश्च सुवदनः, उपकारी चैव लक्ष्मीसंपादनेन, एषा चैवं भणति। तत इदमत्र प्राप्तकालम्, अहमेव पुरुषबलिर्भवामि इति। चिन्तयित्वा भणिता वानव्यन्तरी। भगवति! अजानता मयैवं व्यवसितम्। ततः प्रसीद। अहमेवात्र बलिपुरुषः, मां प्रतीच्छेति। तया भणितम्-यद्येवं ततः क्षिप आत्मानं समुद्रे, येन त्वां व्यापादयामीति। लक्ष्म्या चिन्तितम्-अनुगृहीता भगवत्या। ततो धरणेन भणितम्-वयस्य सुवदन! प्रापयितव्या त्वया लक्ष्मीर्मम गुरूणामिति। भणित्वा प्रवाहित आत्मा। विद्धश्चानया शूलेन। नीतः सुवर्णद्वीपम्। उपशान्ता वानव्यन्तरी। प्रवृत्तं यानपात्रं देवपुराभिमुखम्॥

अत्रान्तरे दृष्टश्चैष कण्ठगतप्राणः सुवेलाद् रत्नद्वीपं प्रस्थितेन हेमकुण्डलेन, प्रत्यभिज्ञातश्च तेन। पूर्वपरिचिता च सा हेमकुण्डलस्य वानव्यन्तरी। ततो 'हा किमेतदकार्यमनुष्ठितम्' इति भणित्वा मोचितो वानव्यन्तर्याः। पूर्वभणितौषधिवलयव्यतिकरेण कृतं तस्य व्रणकर्म।

---

१ वयंस क। २ सुवण्णभूमिदीवं क। ३ मुक्कं जाणवत्तं, पयट्टं देवउराभिमुहं इति क।

कयं से वणकम्मं । जीवियसेसेण य पन्नत्तो एसो पच्चभिन्नाओ य णेण हेमकुण्डलो । पुच्छिओ धरणेणं सिरिविजयवुत्तन्तो । साहिओ हेमकुण्डलेण, जहा जीविओ सो महाणुभावो त्ति । परितुट्ठो धरणो । हेमकुण्डलो य घेत्तूण धरणं पयट्टो रयणदीवं । पत्तो य भुयङ्गगन्धव्वसुन्दरीजणारद्धमहुरगेयरवायड्ढियदिन्नावहाणनिचलट्ठियमयजूहं दरियवणकोलघोणाहिघायजज्जरियमहियलुच्छलियमुत्थाकसायसुरहिगन्धवासियदिसायक्कं तीरतरुखुड्डियकुसुममयरन्दवासियासेसविमलजलदुल्ललियरायहंसाउलसरसहस्सकलियं महल्लतरुसिहरावडियकुसुमनियरच्चियवित्थिण्णभूमिभागं उद्दामनागवल्लीनिवहसमालिङ्गियासेसपूगफलीसण्डं वियडघणसुरहिमन्दारमन्दिरारद्धविज्जाहरमिहुणरइसुहं दरियवणहत्थिपीवरकरायड्ढणभग्गसमुत्तुङ्गगलन्तचन्दणवणं तीरासन्नट्ठियघणतमालतरुवीहिओहसियजलहिजलं तरुणतरुविमडमणहरालवालयजलसुहियविविहविहंगनियररवापूरिउद्देसं सिद्धविज्जाहरालयमुत्तुङ्गरयणगिरिसयाहं दीवं नामेण रयणसारं ति ।

जीवितशेषेण च प्रज्ञप्त एष प्रत्यभिज्ञातश्च तेन हेमकुण्डलः । पृष्टो धरणेन श्रीविजयवृत्तान्तः । कथितो हेमकुण्डलेन, यथा जीवितः स महानुभाव इति । परितुष्टो धरणः । हेमकुण्डलश्च गृहीत्वा धरणं प्रवृत्तो रत्नद्वीपम् । प्राप्तश्च भुजङ्गगान्धर्वसुन्दरीजनारब्धमधुरगेयरवाकृष्टदत्तावधाननिश्चलस्थितमृगयूथं दृप्तवनकोलघोणाभिघातजर्जरितमहीतलोच्छलितमुस्ताकषायसुरभिगन्धवासितदिक्चक्रं तीरतरुखण्डितकुसुममकरन्दवासिताशेषविमलजलदुर्ललितराजहंसाकुलसरःसहस्रकलितं महातरुशिखरापतितकुसुमनिकरार्चितविस्तीर्णभूमिभागम् उद्दामनागवल्लीनिवहसमालिङ्गिताशेषपूगफलीषण्डं विकटघनसुरभिमन्दारमन्दिरारब्धविद्याधरमिथुनरतिसुखं दृप्तवनहस्तिपीवरकराकर्षणभग्नसमुत्तुङ्गगलच्चन्दनवनं तीरासन्नस्थितघनतमालतरुवीथ्युपहसितजलधिजलं तरुणतरुविकटमनोहरालवालजलसुहितविविधविहङ्गनिकररवापूरितोद्देशं सिद्धविद्याधरालयोत्तुङ्गरत्नगिरिसनाथं द्वीपं नाम्ना रत्नसारमिति । अपि च—

1 भुयग० क । 2 उद्दामतीर० क । 3 ०कलियं ख । 4 ०विच्छिन्न० क । 5-लंतगलंत० क ।

अवि य ।

रयणायरेण भणियं वियडतरङ्गुच्छलन्तबाहाहिं । सव्वत्तो पियकामिणिरुइरसरीरं व उवगूढं ॥

संभाविऊण फलहरनमियमहीरुहनमिज्जमाणो व्व । परिणयखुडन्तबहुविहतरुकुसुमोवणियपूओ व्व ॥

कमलमहुपाणसेवणजणियकलालावमुहलभमरेहिं । कयसागयसम्माणो व्व अइगओ चूयतरुसण्डं ॥

उवविट्ठो दीहियातीरंमि, वीसमिओ मुहुत्तयं, गहियाइं सहयारफलाइं, मज्जियं दीहियाए, कया पाणवित्ती । पुच्छिओ हेमकुण्डलेण धरणो । कहं तुमं इमीए पाविओ त्ति । साहिओ णेण जहट्ठिओ सयलवुत्तन्तो । हेमकुण्डलेण भणियं । अहो से कूरहिययत्तणं; ता किं एइणा, भण किं ते कीरीयउ त्ति । धरणेण भणियं । कयं सयलकरणिज्जं; किं तु दुत्थिया मे जाया, ता तीए संजोयं मे करेहि ।

रत्नाकरेण गाढं विकटतरङ्गोच्छलद्बाहुभिः । सर्वतः प्रियकामिनीरुचिरशरीरमिव उपगूढम् ॥

संभाव्य फलभरनतमहीरुहनम्यमान इव । परिणतत्रुटद्बहुविधतरुकुसुमोपनीतपूज इव ॥

कमलमधुपानसेवनजनितकलालापमुखरभ्रमरैः । कृतस्वागतसम्मान इव अतिगतश्चूततरुषण्डम् ॥

उपविष्टो दीर्घिकातीरे, विश्रान्तो मुहूर्तकम्; गृहीतानि सहकारफलानि, मज्जितं दीर्घिकायाम्, कृता प्राणवृत्तिः । पृष्टो हेमकुण्डलेन धरणः-कथं त्वमनया प्राप्त इति । कथितस्तेन यथास्थितः सकलवृत्तान्तः । हेमकुण्डलेन भणितम्-अहो तस्याः क्रूरहृदयत्वम्, ततः किमेतेन, भण किं ते क्रियतामिति । धरणेन भणितम्-कृतं सकलकरणीयम्, किन्तु दुःस्थिता मे जाया, ततस्तया संयोगं मे कुरु ।

---

१ अवगूढं ख, उवऊढं क । २ कीरउत्ति क ।

तओ 'रयणगिरीओ पहाणरयणसंजुयं संजोएमि' त्ति चिन्तिऊण भणियं हेमकुण्डलेणं। करेमि संजोयं, किंतु अत्थि इहेव-दीवंमि रयणगिरी नाम पव्वओ। तत्थ सुलोयणो नाम किन्नरकुमारओ मे मित्तो परिवसइ। ता तं पेच्छिऊण नेमि तं देवउरमेव। तहिं गयस्स नियमेणेव तीए सह संजोगो भविस्सइ त्ति। पडिस्सुयं धरणेण। तओ घेत्तूण धरणं पयट्टो रयणपव्वयं।

पत्तो य महुरमारुयमन्दन्दोलेन्तकयलिसंघायं। संघायमिलियकिंपुरिसजक्खपरिभुत्तवणसण्डं॥
वणमण्डविविहफलरससंतुट्ठविहंगसद्दगम्भीरं। गम्भीरजलहिगज्जियहित्थपिओसत्तसिद्धयणं॥
सिद्धयणमिलियचारणसिहरवणारद्धमहुरसंगीयं। संगीयमुरयघोसाणन्दियनच्चन्तसिहिनियरं॥
सिहिनियरमुक्कण्ठियपसन्नवरसिद्धकिन्नरिनिहायं। किन्नरिनिहायसेवियलवङ्गलवलीहरच्छायं॥

ततो 'रत्नगिरेः प्रधानरत्नसंयुतं संयोजयामि' इति चिन्तयित्वा भणितं हेमकुण्डलेन। करोमि संयोगम्, किन्तु अस्तीहैव द्वीपे रत्नगिरिर्नाम पर्वतः। तत्र सुलोचनो नाम किन्नरकुमारो मे मित्रं परिवसति। ततस्तं प्रेक्ष्य नयामि त्वां देवपुरमेव। तत्र गतस्य नियमेनैव तया सह संयोगो भविष्यतीति। प्रतिश्रुतं धरणेन। ततो गृहीत्वा धरणं प्रवृत्तो रत्नपर्वतम्।

प्राप्तश्च मधुरमारुतमन्दान्दोलयत्कदलीसंघातम्। संघातमिलितकिम्पुरुषयक्षपरिभुक्तवनषण्डम्॥
वनषण्डविविधफलरससंतुष्टविहङ्गशब्दगम्भीरम्। गम्भीरजलधिगर्जितत्रस्तप्रियासक्तसिद्धजनम्॥
सिद्धजनमिलितचारणशिखरवनारब्धमधुरसंगीतम्। संगीतमुरजघोषानन्दितनृत्यच्छिखिनिकरम्॥
शिखिनिकरोत्कण्ठितप्रसन्नवरसिद्धकिन्नरीसमूहम्। किन्नरीसमूहसेवितलवङ्गलवलीगृहच्छायम्॥

१ ०संजोयं० क। २ पडियन्नं क। ३-वियर-क। ४-विहंगमरसंतय० क। ५-रुद्द-क। ६-पहिरवहरिसिय-क। ७-कुवियपसन्नरकिन्नरि-क।

छायावन्तमणोहरमणियडविलसन्तरयणनिउरुम्बं । निउरुम्बठिउप्पेहडसिहरोवेयं च रयणगिरिं ॥

तओ य तं पाविऊण महामहल्लतुङ्गरयणसिहरुप्पङ्कनिरुद्धरविरहमग्गं विविहवरसिद्धविज्जाहरङ्गणालालियगमणचलणालत्तयरसर- ञ्जियवित्थिण्णमुत्तासिलायलं दरिविवरविणिग्गयनिज्झरझरन्तझंकाररवायड्ढियदरियवणहत्थिनियरसमाइण्णवियडकडउद्देसं उद्दाममाहवी- लयाहरुच्छङ्गनिद्दयरयायासखिन्नसुहपसुत्तविज्जाहरमिहुणं अइकोउहल्लेण आरुहिउं पयत्तो । किह

चालियलवङ्गलवलीचन्दणगन्धुक्कडेण सिसिरेण । अवणिज्जन्तपरिस्समसंतावो महुरपवणेण ॥

पेच्छन्तो य रुइरदरिमन्दिरामलमणिभित्तिसंकन्तपडिमावलोयणपणयकुवियपसायणूसुयदइयदंसणाहियकुवियवियड्ढसहियणोह- सियमुद्धसिद्धङ्गणासणाहं, कत्थइ य पयारचलियवरचमरिनियरनीहारामलचन्दमऊहनिम्मलुद्दामचमरचवलविक्खेववीइज्जमाणं, कत्थइ य

छायावद्‌मनोहरमणितटविलसद्रत्ननिकुरम्बम् । निकुरम्बस्थितोन्नतशिखरोपेतं च रत्नगिरिम् ॥

ततश्च तं प्राप्य महामहोत्तुङ्गरत्नशिखरसमूहनिरुद्धरविरथमार्गं विविधवरसिद्धविद्याधराङ्गनाललितगमनचरणालक्तरसरञ्जितविस्ती- र्णमुक्ताशिलातलं दरीविवरविनिर्गतनिर्झरझरज्झङ्काररवाकृष्टदृप्तवनहस्तिनिकरसमाकीर्णविकटकटोद्देशम् उद्दाममाधवीलतागृहोत्संगनिर्दयर- तायासखिन्नसुखप्रसुप्तविद्याधरमिथुनम् अतिकुतूहलेनारोढुं प्रवृत्तः । कथम्-

चालितलवङ्गलवलीचन्दनगन्धोत्कटेन शिशिरेण । अपनीयमानपरिश्रमसंतापो मधुरपवनेन ॥

प्रेक्षमाणश्च रुचिरदरीमन्दिरामलमणिभित्तिसंक्रान्तप्रतिमावलोकनप्रणयकुपितप्रसादनोत्सुकदयितदर्शनाधिककुपितविदग्धसखीजनोप- हसितमुग्धसिद्धाङ्गनासनाथम् कुत्रचिच्च प्रचारचलितवरचमरीनिकरनीहारामलचन्द्रमयूखनिर्मलोद्दामचामरचपलविक्षेपवीज्यमानम् नित-

१-नियसन्त-क । २-रुच्चिरं ग, -रुविरं क ।

निगम्वोवइयवियडघणगज्जियायण्णणुन्भन्तधुयसडाजालनहयलुच्छङ्गनिमियकमदरियमयणाहरुञ्जियरवावूरिउद्देसं, अन्नत्थ सरसघणचन्द-
णयणुच्छङ्गविविहपरिहासकीलाणन्दियभुयङ्गमिहुणरमणिज्जं ति। तओ आरुहिऊण रयणसिहरं रयणगिरितिलयभूयं तत्थ य वालक-
यलीपरिवेढियवियडपीढं सोहाविणिज्जियसुरिन्दभवणं उत्तुङ्गतोरणखम्भनिमियवरसालिभञ्जियासणाहं मणहरालेक्खविचित्तवियडभित्ति
रुइरगवक्खवेइओवसोहिअं निम्मलमणिकोट्टिमं सुरहिकुसुमसंपाइयपूओवयारं च गओ सुलोयणसन्तियं मन्दिरं ति। दिट्ठो य णेण
गन्धव्वदत्ताए सह वीणं वायन्तो सुलोयणो। अब्भुट्ठिओ सुलोयणेणं। संपाइओ से उचिओवयारो। पुच्छिओ सुलोयणेणं हेमकुण्डलो।
कुओ भवं कुओ वा एस महापुरिसो किंनिमित्तं वा भवओ आगमणपओयणं ति। तओ सुवेलाओ नियं धरणस्स सुवण्णभूमिसुवलम्भा-
इयं चिन्तियरयणप्पदाणपज्जवसाणं साहियमागमणपओयणं। तेण वि उप्फुल्ललोयणेण पडिस्सुयं। तओ चिट्ठिऊण कइवयदियहे गहियाइं

स्योपचितविकटघनगर्जिताकर्णनोद्भ्रान्तधूतसटाजालनभस्तलोत्संगन्यस्तक्रमदृप्तमृगनाथरुञ्जितरवापूरितोद्देशम्, अन्यत्र सरसघनचन्द-
नयनोत्संगविविधपरिहासक्रीडानन्दितभुजङ्गमिथुनरमणीयमिति। तत आरुह्य रत्नशिखरं रत्नगिरितिलकभूतं तत्र च बालकदलीपरिवेष्टि-
तविकटपीठं शोभाविनिर्जितसुरेन्द्रभवनम् उत्तुंगतोरणस्तम्भन्यस्तवरशालभञ्जिकासनाथं मनोहरलेख्यविचित्रविकटभित्तिं रुचिरगवा-
क्षवेदिकोपशोभितं निर्मलमणिकुट्टिमं सुरभिकुसुमसंपादितपूजोपचारं च गतः सुलोचनसत्कं मन्दिरमिति। दृष्टश्च तेन गन्धर्वदत्तया सह
वीणां वादयन् सुलोचनः। अभ्युत्थितः सुलोचनेन। सम्पादितस्तस्योचितोपचारः। पृष्टः सुलोचनेन हेमकुण्डलः। कुतो भवान् कुतो
वा एष महापुरुषः, किंनिमित्तं वा भवत आगमनप्रयोजनमिति। ततः सुवेलाद् निजं धरणस्य सुवर्णभूमिमुपलभ्यादिकं चिन्तितरत्न-
प्रदानपर्यवसानं कथितमागमनप्रयोजनम्। तेनापि उत्फुल्ललोचनेन प्रतिश्रुतम्। ततः स्थित्वा कतिपयदिवसान् गृहीतानि प्रधानरत्नानि।

---

१ भणियं हेमकुण्डलेण । सुवेलाओ अहमागओ, एसो य सुवण्णभूमीओ, पओयणं पुण पहाणरयणेहिं तो दाणि मे देहि । तेण वि य ।

पहाणरयणाइं[1]। नीओ य णेण धरणो देवउरं। मुक्को नयरबाहिरियाए, समप्पियाणि से रयणाणि। भणिओ य एसो। इहट्ठिओ चेव जायं पडिवालसु त्ति। पडिस्सुयं धरणेण। गओ हेमकुण्डलो॥

धरणो पुण बाहिरियाए चेव कंचि वेलं गमेऊण पविट्ठो नयरं। दिट्ठो य टोप्पसेट्ठिणा[2]। 'अहो कल्लाणागिई अदिट्ठपुव्वो एगागी य दीसइ, ता भवियव्वं एत्थ[3] कारणेणं'[4] ति चिन्तिऊण अहिमयसंभासणपुरस्सरं नीओ णेण गेहं। कओ उवयारो। पुच्छिओ य सेट्ठिणा 'कुओ तुमं' ति। साहिओ णेण मायन्दिनिवासनिग्गमणाइओ देवउरसंपत्तिपज्जवसाणो निययवुत्तन्तो। समप्पियाइं रयणाइं। भणिओ य णेण सेट्ठी। एयाइं संगोवावसु त्ति। संगोवावियाणि[5] सेट्ठिणा॥

इओ य धरणसमुद्दपडणसमणन्तरमेव समासासिया सुवयणेण लच्छी। भणिया य णेण। सुन्दरि, ईइसो एस[6] संसारो, वियोगा-

---

नीतश्च तेन धरणो देवपुरम्। मुक्तो नगरबाह्यायाम्। समर्पितानि तस्मै रत्नानि। भणितश्चैषः-इहस्थित एव जायां प्रतिपालयेति। प्रतिश्रुतं धरणेन। गतो हेमकुण्डलः।

धरणः पुनः बाह्यायामेव काञ्चिद्वेलां गमयित्वा प्रविष्टो नगरम्। दृष्टश्च टोप्पश्रेष्ठिना। 'अहो कल्याणाकृतिरदृष्टपूर्व एकाकी च दृश्यते, ततो भवितव्यमत्र कारणेन' इति चिन्तयित्वा अभिमतसम्भाषणपुरस्सरं नीतस्तेन गेहम्। कृत उपचारः। पृष्टश्च श्रेष्ठिना 'कुतस्त्वम्' इति। कथितस्तेन माकन्दीनिवासनिर्गमनादिको देवपुरसम्प्राप्तिपर्यवसानो निजवृत्तान्तः। समर्पितानि रत्नानि। भणितश्च तेन श्रेष्ठी-एतानि संगोपयेति। संगोपायितानि श्रेष्ठिना।

इतश्च धरणसमुद्रपतनसमनन्तरमेव समाश्वासिता सुवदनेन लक्ष्मीः। भणिता च तेन-सुन्दरि! ईदृश एष संसारः, वियोगावसा-

---

१ पहाणाणि रयणाणि क। २ -सेट्ठिणो क-ख। ३ इत्थ ख। ४ कारणं ति ख। ५ संगोवियाइं क। ६ एव ग।

वसाणाइ एत्थ संगयाइं; ता न तए संतप्पियव्वं। न विवन्नो य एस तुज्झ; अवि य मेज्झं ति। तओ नियडिप्पहाणाए बाहजलभरियलोयणं जंपियं लच्छीए। तए जीवमाणंमि को महं संतावो त्ति। तओ अइक्कन्तेसु कइवयदिणेसु जाणवत्तसंठियं पहूयं सुवण्णमवलोइऊण चिन्तियं सुवयणेणं। विवन्नो खु सो तवस्सी, पंभूयं च एयं दविणजायं, तरुणा य से भारिया रूववई य, संगया य मे चित्तेण; ता किं एत्थ जुत्तं ति। अहवा इयमेव जुत्तं, जं इमीए गहणं ति। को नाम अबालिसो सयमेवागयं लच्छि परिच्चयइ। ता गेण्हामि एयं। तओ 'परिहाससज्झा इत्थिय' त्ति वियड्ढनायगाणुरूवा कया परिहासा, आवज्जियं से हिययं। निविट्ठो घरिणिसद्दो। अत्तट्ठियं सुवण्णयं॥ अइक्कन्ता कइवि दियहा। समागयं कूलं जाणवत्तं। महया दरिसणिज्जेण दिट्ठो सुवयणेण नरवई। परितुट्ठो एसो। 'उस्सुंकमेव तुह जाणवत्तं' ति कओ से पसाओ। गओ जाणवत्तं॥

जल्पितं नाम्यत्र सङ्गतानि, ततो न त्वया संतप्तव्यम्। न विपन्नश्चैष तव, अपि च ममेति। ततो निकृतिप्रधानया बाष्पजलभृतलोचनं जल्पितं लक्ष्म्या। त्वयि जीवति को मम संताप इति। ततोऽतिक्रान्तेषु कतिपयदिनेषु यानपात्रसंस्थितं प्रभूतं सुवर्णमवलोक्य चिन्तितं सुवदनेन। विपन्नः खलु स तपस्वी, प्रभूतं चैतद् द्रविणजातम्, तरुणी च तस्य भार्या रूपवती च, संगता च मे चित्तेन, ततः किमत्र युक्तमिति। अथवा इदमेव युक्तम्, यदस्या ग्रहणमिति। को नामावालिशः स्वयमेवागतां लक्ष्मीं परित्यजति। ततो गृह्णाम्येताम्। ततः 'परिहाससाध्या स्त्री' इति विदग्धनायकानुरूपाः कृताः परिहासाः, आवर्जितं तस्या हृदयम्, निविष्टो गृहिणीशब्दः। आत्मस्थितं सुवर्णम्॥ अतिक्रान्ता कत्यपि दिवसाः। समागतं कूलं यानपात्रम्। महता दर्शनीयेन दृष्टः सुवदनेन नरपतिः। परितुष्ट एषः। 'उच्छुल्कमेव

१ मम मन्दपुण्णस्स। मा अहं महापुरिसपणिहाणा णेण इमाओ अहिययरं मुह पाविस्सत्ति न तरेइ पेक्खिउ देवो। ता किमणेण अईयवत्थुसोयणेण। तज्जिओ य अहमउजपुत्तेण। रापाडेमि तस्स वयणं, पराणेमि एसा रित्थं च सयणसमीवं–इत्यधिकः पाठः क। २ पहूयं क। ३ जुत्तयं ति क। ४ अहिट्ठियं क। ५ जाणवत्तं

एत्थन्तरंमि 'चीणदीवाओ आगयं जाणवत्तं' ति मुणिऊण निग्गओ धरणो। दिट्ठो य णेण सुवयणो लच्छी य। परितुट्ठो हियएणं, दूमिया लच्छी सुवयणो य। दिन्नं से आसणं, पुच्छिओ वुत्तन्तं, साहिओ णेणं। तओ सुवयणेण चिन्तियं। अहो मे कम्मपरिणई, [3]अहो पडिकूलया देव्वस्स। केवलं कयमकज्जं, न संपन्नं समीहियं ति। चिंन्तिऊण भणियं। अज्ज, सोहणं संजायं, जं तुमं जीविओ। ता गेण्हाहि एयं निययरित्थं ति। धरणेण भणियं। सत्थवाहपुत्त, पाणा वि एए तुह सन्तिया, जेण लच्छीए सह समागमो कओ, किमङ्ग पुण रित्थं ति॥ अइक्कन्ता काइ वेला। भणिया य लच्छी णेण। एहि, नयरं पविसम्ह। लच्छीए भणियं। अज्जउत्त, कल्लं पविसिस्सामो, अज्ज उण अज्जउत्तेणावि इहेव वसियव्वं ति। पडिस्सुयमणेण। अब्भङ्गिओ एसो। आलोचियं च लच्छीए सुवयणेण

तव यानपात्रम्' इति कृतस्तस्य प्रसादः। गतो यानपात्रम्॥

अत्रान्तरे 'चीनद्वीपादागतं यानपात्रम्' इति ज्ञात्वा निर्गतो धरणः। दृष्टश्च तेन सुवदनो लक्ष्मीश्च। परितुष्टो हृदयेन, दूना लक्ष्मीः सुवदनश्च। दत्तं तस्यासनम्, पृष्टो वृत्तान्तम्, कथितस्तेन। ततः सुवदनेन चिन्तितम्-अहो मे कर्मपरिणतिः, अहो प्रतिकूलता दैवस्य। केवलं कृतमकार्यं न संपन्नं समीहितमिति चिन्तयित्वा भणितम्। आर्य! शोभनं संजातम्, यत्त्वं जीवितः। ततो गृहाणैतद् निजरिक्थमिति। धरणेन भणितम्-सार्थवाहपुत्र! प्राणा अप्येते तव सत्काः, येन लक्ष्म्या सह समागमः कृतः, किमङ्ग पुना रिक्थमिति। अतिक्रान्ता काचिद्वेला। भणिता च लक्ष्मीस्तेन-एहि नगरं प्रविशावः। लक्ष्म्या भणितम्-आर्यपुत्र! कल्ये प्रवेक्ष्यावः, अद्य पुनरार्यपुत्रेणापि इहैव वस्तव्यमिति। प्रतिश्रुतमनेन। अभ्यङ्गित एषः। आलोचितं च लक्ष्म्या सुवदनेन च। यथा गवेषेत कृतपान

सुवयणो क। १ नयराउ। गओ वेलाउलं-इत्यधिकः क। २ धरणेण क। ३ अत्थि रा। ४ तओ चिन्तिऊण क। ५ सतया क। ६ भणिया य णेण लच्छी क। ७ पविसामो क। ८ पुण क।

य। जहा, अजेव एयं कयपाणभोयणं केणइ उवाएण रयणीए वावाइस्सामो त्ति। मज्जिओ एसो, पाइओ महुं, काराविओ पाणवित्तिं। अइक्कन्तो वासरो, समागया रयणी, अत्थुयं सयणिज्जं। निवण्णो एसो लच्छी य। तओ मयपराहीणस्स सिमिणए विय अव्वत्तं चेट्ठमणुहवन्तस्स दिन्नो इमीए गले पासओ, वलिओ य एसो। परिओसवियसियच्छीए लच्छीए सुवयणेण य विमूढो धरणो मओ त्ति काऊण उज्झिओ जलनिहितडे। गयाइं जाणवत्तं। जलनिहिपवणसंगमेण य समासत्थो एसो। चिन्तियं च णेणं। हन्त किमेयं ति। किं ताव सुविणओ आओ इन्दजालं आओ मइविब्भमो आओ सच्चयं चेव त्ति। उवलद्धं जलनिहितडं। सच्चं चेव त्ति जाओ से विनिच्छओ। उट्ठिऊण चिन्तियमणेण। अहो लच्छीए चरियं, अहो सुवयणस्स पोरुसं। अहवा दुट्ठंगुंठो विय उम्मग्गपत्थिया, किंपागफलभोगो विय मङ्गुलावसाणा, दुस्साहियकिच्चं व्व दोसुप्पायणी, कालरत्ती विय तमोवलित्ता, ईइसा चेव महिलिया होइ। अवि य

भोजनं केनचिदुपायेन रजन्यां व्यापादयिष्याव इति। मज्जित एष, पायितो मधु, कारितः प्राणवृत्तिम्। अतिक्रान्तो वासरः, समागता रजनी, आस्तृतं शयनीयम्। निषण्ण एष लक्ष्मीश्च। ततो मदपराधीनस्य स्वप्ने इवाव्यक्तां चेष्टामनुभवतो दत्तोऽनया गले पाशकः, वलितश्चैषः। परितोषविकसिताक्ष्या लक्ष्म्या सुवदनेन च विमूढो धरणो मृत इति कृत्वा उज्झितो जलनिधितटे। गतौ यानपात्रम्। जलनिधिपवनसंगमेन च समाश्वस्त एषः। चिन्तितं च तेन-हन्त किमेतदिति। किं तावत्स्वप्नः, अथवा इन्द्रजालम्, अथवा मतिविभ्रमः, अथवा सत्यमेवेति। उपलब्धं जलनिधितटम्। सत्यमेवेति जातस्तस्य विनिश्चयः। उत्थाय चिन्तितमनेन-अहो लक्ष्म्याश्चरितम्, अहो सुवदनस्य पौरुषम्। अथवा दुष्टाश्व इव उन्मार्गप्रस्थिता, किंपाकफलभोग इव अमङ्गलावसाना दुःसाधितकृत्येव दोषोत्पादनी, कालरा-

१ मयं चिंतियाणुट्ठाणे-इत्यधिकः क। २ वारिओ ख। ३ अव्वत्तचिट्ठ-क। ४ पासओ गले क। ५ नास्ति कपुस्तके। ६ य समासत्थो य क। ७ सुमिणओ क, सिमिणओ ख। ८ आइ ख। ९ आउ ख। १० -दुट्ठगुंठो ख। ११ -किच्चा विय क।

जलणो वि घेप्पइ सुहं पवणो भुयगो य केणइ नएण। महिलामणो न घेप्पइ बहुएहि वि नयसहस्सेहिं ॥

ता किं इमीए। सुवयणस्स न जुत्तमेयं ति। अहवा मइरा विय मयरायवड्ढणी चेव इत्थिया हवइ त्ति। विसयविसमोहियमणेणं तेणावि ऐयं ववसियं ति।

एवं च चिन्तयन्तो सेट्ठिनिउत्तेहिं कहवि पुरिसेहिं। सूरुग्गमवेलाए दिट्ठो बाहोल्लनयणेहिं ॥

भणिओ य ²तेहिं। सत्थवाहपुत्त, रयणीए न आगओ तुमं ति संजायासङ्केण रयणीए चेव तुज्झ अन्नेसणनिमित्तं पेसिया अम्हे टोप्पसेट्ठिणा त्ति। कहकहवि दिट्ठो सि संपयं। ता एहि, गच्छम्ह, निव्ववेहि अणेयचिन्ताणलपलित्तं सेट्ठिहिययं। तओ 'अहो पुरिसाणमन्तरं' ति चिन्तिऊण पयट्टो धरणो, पविट्ठो ³नयरिं, दिट्ठो य णेण सेट्ठी। पइरिक्कंमि भणिओ सेट्ठिणा। वच्छ, कुओ तुमं किं वा

त्रिरिव तमोऽवलिप्ता ईदृश्येव महिला भवति। अपि च–

ज्वलनोऽपि गृह्यते सुखं पवनो भुजगश्च केनचिन्नयेन। महिलामनो न गृह्यते बहुभिरपि नयसहस्रैः ॥

ततः किमनया। सुवदनस्य न युक्तमेतदिति। अथवा मदिरेव मदरागवर्धन्येव स्त्री भवतीति। विषयविषमोहितमनसा तेनाप्येतद् व्यवसितमिति।

एवं च चिन्तयन् श्रेष्ठिनियुक्तैः कथमपि पुरुषैः। सूर्योद्गमवेलायां दृष्टो बाष्पार्द्रनयनैः ॥

भणितश्च तैः। सार्थवाहपुत्र! रजन्यां नागतस्त्वमिति संजाताशङ्केन रजन्यामेव तवान्वेषणनिमित्तं प्रेषिता वयं टोप्पश्रेष्ठिनेति। कथंकथमपि दृष्टोऽसि साम्प्रतम्। तत एहि, गच्छामः, निर्वापय अनेकचिन्तानलप्रदीप्तं श्रेष्ठिहृदयम्। ततः 'अहो पुरुषाणामन्तरम्' इति

---

१ एवं क। २ तेहिं क। ३ नयरं क।

विमणदुम्मणो दीससि त्ति। तओ 'लज्जावणिज्जयं अणाचिक्खणीयमेयं' ति चिन्तिऊण बाहोल्ललोयणेण न जंपियं धरणेण। सेट्ठिणा भणियं। वच्छ, सुयं मए, जहा आगयं जाणवत्तं चीणाओ, ता तं तुमए उवलद्धं न व त्ति। तओ सगग्गयक्खरं [2]जंपियं धरणेणं। अज्ज, उवलद्धं ति। सोगाइरेगेण य पवत्तं से बाहसलिलं। तओ 'नूणं विवन्ना से भारिया, अन्नहा कहं ईइसो सोगपसरो' त्ति चिन्तिऊण भणियं टोप्पसेट्ठिणा। वच्छ, अवि तं चेव तं जाणवत्तं ति। धरणेण भणियं 'आमं'। सेट्ठिणा भणियं। अवि कुसलं ते भारियाए। धरणेण भणियं। अज्ज, कुसलं। सेट्ठिणा भणियं। ता किमन्नं ते उव्वेयकारणं। धरणेण भणियं। अज्ज, न किंचि आचिक्खियव्वं ति। सेट्ठिणा भणियं ता किं विमणो सि। धरणेण भणियं 'आमं'। सेट्ठिणा भणियं 'किमामं'। धरणेण भणियं 'एयं'। सेट्ठिणा भणियं 'किमेयं'। धरणेण भणियं 'न किंचि'। सेट्ठिणा भणियं। वच्छ, किमेएहिं सुन्नभासिएहिं। आचिक्ख सब्भावं। न य अहं

चिन्तयित्वा प्रवृत्तो धरणः, प्रविष्टो नगरीम्, दृष्टश्च तेन श्रेष्ठी। प्रतिरिक्ते भणितः श्रेष्ठिना। वत्स! कुतस्त्वम्, किंवा विमनोदुर्मना दृश्यसे इति। ततो 'लज्जनीयमनाख्यानीयमेतद्' इति चिन्तयित्वा बाष्पार्द्रलोचनेन न जल्पितं धरणेन। श्रेष्ठिना भणितम्—वत्स! श्रुतं मया, यथाऽऽगतं यानपात्रं चीनाद्, ततस्तत् त्वयोपलब्धं नवेति। ततः सगद्गदाक्षरं जल्पितं धरणेन। आर्य! उपलब्धमिति। शोकातिरेकेण च प्रवृत्तं तस्य बाष्पसलिलम्। ततो 'नूनं विपन्ना तस्य भार्या, अन्यथा कथमीदृशः शोकप्रसरः' इति चिन्तयित्वा भणितं टोपश्रेष्ठिना। वत्स! अपि तदेव तद् यानपात्रमिति। धरणेन भणितम्—'ओम्'। श्रेष्ठिना भणितम्—अपि कुशलं ते भार्यायाः। धरणेन भणितम्—आर्य! कुशलम्। श्रेष्ठिना भणितम्—ततः किमन्यत्ते उद्वेगकारणम्। धरणेन भणितम्—आर्य! न किञ्चिदाख्यातव्यमिति। श्रेष्ठिना भणितम्—ततः किं विमना असि। धरणेन भणितम्—'ओम्'। श्रेष्ठिना भणितम्—'किमोम्'। धरणेन भणितम्—'एतद्'। श्रेष्ठिना

१ जंपियं धरणेणं ण किंचि आचिक्खणीय ति ख। २ जंपियमणेण क।

उज्जोग्गो आनिसिरागयस्स, पडिवन्नो य तए गुरू। तओ 'न जुत्तं गुरुआणाखण्डणं' ति चिन्तिऊण जंपियं धरणेण। अज्ज, 'अज्ज-
स्स भाव' त्ति करिय ईइसं पि भाणीयइ त्ति। सेट्ठिणा भणियं। वच्छ, नत्थि अविसओ गुरुयणाणुवत्तीए। धरणेण भणियं। अज्ज,
जइ एवं, ता कुसलं मे भारियाए जीविएणं, न उण सीलेणं। सेट्ठिणा भणियं। कहं वियाणसि। धरणेण भणियं 'कज्जओ'। सेट्ठिणा
भणियं। कहं विय। तओ आनिवेइओ से भोयणाइओ जलनिहितडपज्जवसाणो सयलवुत्तन्तो। तं च सोऊण कुविओ टोप्पसेट्ठी सुव-
यणस्स। परिसंठविय धरणं गओ नरवइसमीवं। विन्नत्तो णेण सुवयणं पइ जहट्ठियमेव नरवई। सद्दाविओ राइणा सुवयणो, भणिओ य
एसो। सत्थवाहपुत्त, पभूयं ते रित्थं सुणीयइ। ता फुडं जंपसु, कहमेयं तए विढत्तं ति। तओ अजायासङ्केण भणियं सुवयणेण। देव,
कुलक्कमागयं। राइणा भणियं। आरिया कहं ति। तेण भणियं। गुरुविहुणा। तओ पुलइओ टोप्पसेट्ठी। भणियं च णेण। देव, सव्वं

भणितम्-'किमेतत्'। धरणेन भणितम्-'न किञ्चित्'। श्रेष्ठिना भणितम्-किमेतैः शून्यभाषितैः, आचक्ष्व सद्भावम्। न चाहमयोग्य
आनिदेशस्य, प्रतिपन्नश्च त्वया गुरुः। ततो 'न युक्तं गुर्वाज्ञाखण्डनम्' इति चिन्तयित्वा जल्पितं धरणेन। आर्य! 'आर्यस्याज्ञा' इति
कृत्वा ईदृशमपि भाण्यते इति। श्रेष्ठिना भणितम्-वत्स! नास्त्यविषयो गुरुजनानुवृत्त्याः। धरणेन भणितम्-आर्य! यद्येवं ततः कुशलं
मे भार्याया जीवितेन, न पुनः शीलेन। श्रेष्ठिना भणितम्-कथं विजानासि। धरणेन भणितम्-कार्यतः। श्रेष्ठिना भणितम्-कथमिव।
ततः आख्यातस्तस्य भोजनादिको जलनिधितटपर्यवसानः सकलवृत्तान्तः। तच्च श्रुत्वा कुपितः टोप्पश्रेष्ठी सुवदनस्य। परिसंस्थाप्य
धरणं गतो नरपतिसमीपम्। विज्ञप्तोऽनेन सुवदनं प्रति यथास्थितमेव नरपतिः। शब्दायितो राज्ञा सुवदनः, भणितश्चैषः। सार्थवाहपुत्र!
प्रभूतं ते रिक्थं श्रूयते, ततः स्फुटं जल्प, कथमेतत् त्वयोपार्जितमिति। ततोऽजाताशङ्केन भणितं सुवदनेन-देव कुलक्रमागतम्। राज्ञा

१ °प्पोडुओ क, पुरेडओ ख।

अलियं ति। सुवयणेण भणियं।[1] किं पुण एत्थ सच्चयं। सेट्ठिणा भणियं। धरणसन्तियं रित्थं भारिया य; एयं सच्चयं[2] ति। तओ संखुद्धहियएणं जंपियं सुवयणेण। भो भो अउव्वजोइसिय, को एत्थ पच्चओ; रायकुलं खु एयं। टोप्पसेट्ठिणा भणियं साहारणं रायकुलं; पच्चओ पुण, सो चेव जीवइ त्ति। सुवयणेण भणियं। महाराय, न मए धरणस्स नामं पि आयण्णियं ति। परिक्खउ देवो। राइणा भणियं। भो भो सेट्ठि, आणेहि धरणं, तुमं पि तं महिलियं ति। पेसिया णेहिं[3] सह रायपुरिसेहिं नियपुरिसा। आणिओ य णेहिं हियएणाणिच्छमाणो वि सेट्ठिउवरोहभावियचित्तो धरणो, इयरेहि य [4]भयहित्थहियया लच्छि त्ति। पुलइयाइं राइणा, भणियं च णेण। सुन्दरि, दिट्ठो तए एस कहिंपि सत्थवाहपुत्तो। तीए भणियं। देव, न दिट्ठो त्ति। तओ पुच्छिओ धरणो। सत्थवाहपुत्त, अवि एसा ते भारिया। धरणेण भणियं। देव, किमणेण पुच्छिएण; सुयं चेव देवेणं, जं जंपियमिमीए। राइणा भणियं। सत्थवाहपुत्त, अओ चेव

भणितम्–भार्या कथमिति। तेन भणितम्–गुरुवितीर्णा। ततो दृष्टः टोप्पश्रेष्ठी। भणितं च तेन–देव! सर्वमलीकमिति। सुवदनेन भणितम्–किं पुनरत्र सत्यम्। श्रेष्ठिना भणितम्–धरणसत्कं रिक्थं भार्या च, एतत् सत्यमिति। ततः संक्षुब्धहृदयेन जल्पितं सुवदनेन। भो भो अपूर्वज्योतिषिक! कोऽत्र प्रत्ययः, राजकुलं खल्वेतत्। टोप्पश्रेष्ठिना भणितम्–साधारणं राजकुलम्, प्रत्ययः पुनः स एव जीवतीति। सुवदनेन भणितम्–महाराज! न मया धरणस्य नामापि आकर्णितमिति। परीक्षतां देवः। राज्ञा भणितम्–भो भोः श्रेष्ठिन्! आनय धरणम्, त्वमपि तां महिलामिति। प्रेषिता आभ्यां सह राजपुरुषैर्निजपुरुषाः। आनीतश्च तैर्हृदयेनानिच्छन्नपि श्रेष्ठ्युपरोधभावितचित्तो धरणः, इतरैश्च भयत्रस्तहृदया लक्ष्मीरिति। दृष्टौ राज्ञा। भणितं च तेन–सुन्दरि! दृष्टस्त्वया एष कुत्रापि सार्थवाहपुत्रः। तया भणितम्–देव! न दृष्ट इति। ततः पृष्टो धरणः। सार्थवाहपुत्र! अप्येषा ते भार्या। धरणेन भणितम्–देव! किमनेन पृष्टेन, श्रुतमेव देवेन

---

१ भो किं क। २ सच्चं ति क। ३ 'देवस्स' इत्यधिकः ख। ४ भयभिन्नहियया क।

पुच्छामि। धरणेण भणियं। देव, जइ एवं देवस्स अणुबंधो, ता आसि भारिया, न उण संपयं ति। राइणा भणियं। एसो सत्थवाह-पुत्तो दिट्ठो तए आसि। धरणेण भणियं। देव, एसो चेव जाणइ त्ति। राइणा भणिओ सुवयणो। सत्थवाहपुत्त; किं दिट्ठो तुमए एस कहिंपि। सुवयणेण भणियं। देव, मए[2] ताव एसो न दिट्ठो त्ति। राइणा भणियं। होउ, किं एइणा; साहेह तुब्भे किं एत्थ रित्थमाणं[3]। सुवयणेण भणियं। देव, एत्थ खलु दससहस्साणि सोवण्णिगाण इट्ठासंपुडाणं, अन्नं पि थेवयं खु सुरित्तं भण्डं[4] ति। पुच्छिओ इयरो वि[5]। धरणेण भणियं। देव, एवमेयं। राइणा भणियं। भो किंपमाणा खु[6] ते संपुडा। धरणेण भणियं। देव, न याणामि। राइणा भणियं। कहं निययभण्डस्स वि पमाणं न याणासि। धरणेणं भणियं। देव, एवं चेव ते कया, जेण न जाणामि[7]। तओ पुच्छिओ सुवयणो। भद्द, तुमं साहेहि। तेण भणियं।

पृच्छामि। धरणेन भणितम्-देव! यद्येवं देवस्यानुबन्धः, तत आसीद् भार्या, न पुनः साम्प्रतमिति। राज्ञा भणितम्-एष सार्थवाहपुत्रो दृष्टस्त्वयाऽऽसीत्?। धरणेन भणितम्-देव! एष एव जानातीति। राज्ञा भणितः सुवदनः। सार्थवाहपुत्र! किं दृष्टस्त्वयैष कुत्रापि। सुवदनेन भणितम्-देव! मया तावदेष न दृष्ट इति। राज्ञा भणितम्-भवतु, किमेतेन, कथयत यूयम्, किमत्र रिक्थमानम्। सुवदनेन भणितम्-देव! अत्र खलु दश सहस्राणि सौवर्णिकानामिष्टासंपुटानाम्, अन्यदपि स्तोकं खलु सुरक्षितं भाण्डमिति। पृष्ट इतरोऽपि। धरणेन भणितम्-देव! एवमेतद्। राज्ञा भणितम्-भोः किंप्रमाणाः खलु ते संपुटाः। धरणेन भणितम्-देव! न जानामि। राज्ञा भणितम्-कथं निजभाण्डस्यापि प्रमाणं न जानासि। धरणेन भणितम्-देव! एवमेव ते कृताः, येन न जानामि। ततः पृष्टः सुवदनः। भद्र! त्वं कथय। तेन भणितम्-देव अहमपि निःसंशयं न जानामि। राज्ञा भणितम्-भो एवं

---

१ भणियं सुवयण! ख। २ मए सो न दिट्ठो क। ३ रित्थपमाणं ति क। ४ सिरिभंडं ति क। ५ 'राइणा' इत्यधिकः क। ६ एए इह क। ७ याणामि क।

देव,अहमवि निस्संसयं न याणामि। राइणा भणियं। भो एवं ववत्थिए किं मए कायव्वं ति। धरणेण भणियं। देव, थेवमेयं[1] कारणं। किं बहुणा जंपिएणं। अविथाउगो अहं एयस्स; ता गिण्हउ रित्थं भारियं च एसो त्ति। सुवयणेण भणियं। भो महापुरिस! एयं पि भवओ पहूयमेव, जं मे आलो न दिन्नो त्ति। धरणेण भणियं। पसिद्धो अहं आलदायगो। सुवयणेण भणियं। जइ न आलदायगो, ता किमेयं पत्थुयं ति। टोप्पसेट्ठिणा भणियं। अरे रे निल्लज्ज पावकम्म, एवं पि ववहरिउं एवं जंपसि त्ति। पुणो वि अमरिसाइसएण भणियं टोप्पसेट्ठिणा। महाराय, किं बहुणा जंपिएण। जइ एयं न धरणसन्तियं रित्थं एसा ये भारिया, ता मज्झ सव्वस्ससहिया[3] पाणा नियरणं ति। आणावेउ देवो सयले दिव्वे त्ति। धरणेणं चिन्तियं। अवहरिओ खु एसो मह सिणेहाणुबन्धेण[4]; ता न जुत्तं संपयं पि उदासीणयं काउं ति। जंपियमणेण। देव, जइ एत्थ अणुबन्धो तायस्स, ता अलं दिव्वेहिं; अन्नो वि एत्थ उवाओ अत्थि चेव। राइणा भणियं। कहेहि, कीइसो उवाओ त्ति। धरणेण भणियं। देव, ते मए संपुडा सनामेणं चेव अङ्किय त्ति। राइणा भणियं। किं तुज्झ

व्यवस्थिते किं मया कर्तव्यमिति। धरणेन भणितम्-स्तोकमेतत् कारणम्, किं बहुना जल्पितेन। अवियात्कोऽहमेतस्य, ततो गृह्णातु रिक्थं भार्यां चैव इति। सुवदनेन भणितम्-भो महापुरुष! एतदपि भवतः प्रभूतमेव, यन्मे आलो न दत्त इति। धरणेन भणितम्-प्रसिद्धोऽहमालदायक। सुवदनेन भणितम्-यदि नालदायकस्ततः किमेतत्प्रस्तुतमिति। टोप्पश्रेष्ठिना भणितम्-अरेरे निर्लज्ज पापकर्मन्! एवमपि व्यवहृत्य एवं जल्पसीति। पुनरपि अमर्षातिशयेन भणितं टोप्पश्रेष्ठिना। महाराज! किं बहुना जल्पितेन, यद्येतद्धरणसत्कं रिक्थमेषा वा भार्या ततो मम सर्वस्वसहिताः प्राणा निकरणमिति। आज्ञापयतु देवः सकलान् दिव्यानिति। धरणेन चिन्ततम्-अपहृतः खलु एष मम स्नेहानुबन्धेन, ततो न युक्तं साम्प्रतमपि उदासीनतां कर्तुमिति। जल्पितमनेन। देव! यद्यत्रानुबन्धस्तातस्य

१ थेवमिणं ग। २ वेभिया क। ३ सहियस्स ख। ४ नेहाणुबधेण क।

नामं। धरणेण भणियं। देव, धरणो त्ति। इयरो वि पुच्छिओ। तेण भणियं। देव, सुवयणो त्ति। राइणा भणियं। जइ एवं, तो छिन्नो खु ववहारो; नवरं आणेह एत्थेव केइवि संपुडे त्ति। तओ पेसियं पञ्चउलं, आणिया संपुडा, निहालिया राइणा बाहिं, न दिट्ठं धरणनामयं। भणियं च णेण। भो नत्थि एत्थ धरणनामयं। सुवयणेण भणियं। देवो पमाणं त्ति। अन्नं च देव, देवस्स पुरओ एयं महन्तं पि अलियं जंपिऊण अज्ज वि पाणे धारेइ त्ति। जाणियं देवेण, जं एएण पमाणीकयं। राइणा भणियं। भो धरण, किमेयं ति। धरणेण भणियं। देव, न अन्नहा एयं; फोडाविऊण मज्झं निरूवेउ देवो। तओ एयमायण्णिऊण संखुद्धो सुवयणो, हरिसिओ टोप्पसेट्ठी। सद्दाविया सुवण्णयारा, फोडाविया संपुडा, दिट्ठं धरणनामयं। कुविओ राया सुवयणस्स लच्छीए य। भणियं च णेणं। हरे वावाएह एयं वाणियगवेसधारिणं महाभुयंगं, निव्वासेह य एयं मम रज्जाओ चित्तसीलजीवियं अलच्छि, समप्पेह य समत्थमेव

ततोऽलं दिव्यैः, अन्योऽप्यत्र उपायोऽस्त्येव। राज्ञा भणितम्–कथय, कीदृश उपाय इति। धरणेन भणितम्–देव! ते मया संपुटाः स्वनामैवाङ्किता इति। राज्ञा भणितम्–किं तव नाम। धरणेन भणितम्–देव! धरण इति। इतरोऽपि पृष्टः। तेन भणितम्–देव! सुवदन इति। राज्ञा भणितम्–यद्येवं तच्छिन्नः खलु व्यवहारः, नवरमानयतात्रैव कत्यपि संपुटानिति। ततः प्रेषितं पञ्चकुलम्, आनीताः संपुटाः। निभालिता राज्ञा बहिः, न दृष्टं धरणनाम। भणितं च तेन–भो! नास्त्यत्र धरणनाम। सुवदनेन भणितम्–देवः प्रमाणमिति। अन्यच्च देव! देवस्य पुरत एव महदपि अलीकं जल्पित्वा अद्यापि प्राणान् धारयतीति। ज्ञातं देवेन, यदेतेन प्रमाणीकृतम्। राज्ञा भणितम्–भो धरण! किमेतदिति। धरणेन भणितं–देव! नान्यथा एतद्, स्फोटयित्वा मध्यं निरूपयतु देवः। तत एतदाकर्ण्य संक्षुब्धः सुवदनः, हृष्टः टोप्पश्रेष्ठी। शब्दायिताः सुवर्णकाराः। स्फोटिताः संपुटाः। दृष्टं धरणनाम। कुपितो राजा सुवदनस्य लक्ष्म्याश्च। भणितं

१ एत्थेव आणेह य। २ कइ इह ■। ३ तो पेसिऊण पञ्चउलं आणिया ■। ४ एयमेत्तं पि क। ५ धरेइ त्ति ■। ६ उवलद्ध क।

रित्थं धरणसत्थवाहस्स। अन्नं च भण, भो महापुरिस, किं ते अवरं कीरउ। धरणेण भणियं। देव, अलं मे रित्थेण। करेउ देवो पसायं सुवयणस्स अभयप्पयाणेणं। तओ 'अहो से महाणुभावय' त्ति चिन्तिऊण भणियं राइणा। सत्थवाहपुत्त, न जुत्तमेयं, तहावि अलङ्घणीयवयणो तुमं ति; ता तुमं चेव जाणसि। धरणेण भणियं। देवपसाओ त्ति, अणुग्गहीओ अहं देवेण। राइणा भणियं। भो सत्थवाहपुत्त, गेण्हाहि नियंयरित्थं। धरणेण भणियं। जं देवो आणवेइ। तओ नरिन्दपञ्चउलाहिट्ठिओ सह सुवयणेणं गओ वेलाउलं धरणो, उवगणियं सुवण्णयं पंचउलेण, समप्पियं धरणस्स। तओ धरणेण भणियं। भो सुवयण! परिच्चय विसायं, अङ्गीकरेहि पोरुसं, देव्वोवरोहेण कस्स वा खलियं न जायइ त्ति। अन्नं च, भणिओ मए तुज्झ सुवण्णलक्खो, तए पुण महाणुभावत्तणेण अहमेव पडिवन्नओ, न उण सुवण्णलक्खो। भणियं च तए आसि 'किं सुवण्णलक्खेण, तुमं चेव मे बहुमओ त्ति। अणग्घेयं च एयं

च तेन-अरे व्यापादयतैतं वाणिजकवेषधारिणं महाभुजङ्गम्, निर्वासयत चैतां मम राज्याद् विपन्नशीलजीवितामलक्ष्मीम्, समर्पयत समस्तमेव रिक्थं धरणसार्थवाहस्य। अन्यच्च, भण भो महापुरुष! किं तेऽपरं क्रियताम्। धरणेन भणितम्-अलं मे रिक्थेन। करोतु देवः प्रसादं सुवदनस्याभयप्रदानेन। ततः 'अहो तस्य महानुभावता' इति चिन्तयित्वा भणितं राज्ञा। सार्थवाहपुत्र! न युक्तमेतद्, तथाऽप्यलङ्घनीयवचनस्त्वमिति, ततस्त्वमेव जानासि। धरणेन भणितम्-देवप्रसाद इति, अनुगृहीतोऽहं देवेन। राज्ञा भणितम्-भोः सार्थवाहपुत्र! गृहाण निजरिक्थम्। धरणेन भणितम्-यद्देव आज्ञापयति। ततो नरेन्द्रपञ्चकुलाधिष्ठितः सह सुवदनेन गतो वेलाकुलं धरणः, उपगणितं सुवर्णं पञ्चकुलेन, समर्पितं धरणस्य। ततो धरणेन भणितम्-भोः सुवदन! परित्यज विषादम्, अङ्गीकुरु पौरुषम्, दैवोपरोधेन कस्य वा स्खलितं न जायते इति। अन्यच्च भणितो मया तव सुवर्णलक्षम्, त्वया पुनर्महानुभावत्वेनाहमेव बहु मत, न पुनः

१ करीयउ ख। २ नियरित्थं क। ३ दिव्वोवरोहेण क-ख। ४ संजायइ त्ति क। ५ बहुओ ग।

संभमवयणं। ता गेण्हाहि संपयं, जं ते पडिहाएइ। एवं च भणिओ समाणो लज्जिओ सुवयणो। न जंपियं च तेण। तओ दाऊण अट्ठ सुवण्णलक्खे संपूइऊण नरवइं तओ काउं सयलसुत्थं भण्डस्स गओ टोप्पसेट्ठिगेहं। ठिओ कंचि वेलं सह सेट्ठिणा। उवगयाए भोयणवेलाए कयमज्जणा पभुत्ता एए। भुत्तुत्तरकाले य चलणेसु निवडिऊण भणिओ धरणेण टोप्पसेट्ठी। जाएमि अहं किंचि वत्थुं तायं, जइ न करेइ मम पणयभङ्गं ताओ। तओ हरिसवसुप्फुल्ललोयणेण 'अहो अहं कयत्थो, अहो अहं धन्नो, अहो मम सुजीवियं, अहो मम सुलद्धो जम्मो त्ति, जओ ईइसेणावि महाणुभावेण सयलसत्तकप्पतरुकप्पेण तिहुयणचिन्तामणीभूएण वि अहं पत्थिज्जामि' त्ति चिन्तिऊण भणियं टोप्पसेट्ठिणा। वच्छ, जइ वि सकलत्तं सपुत्तपरियणं दासत्तनिमित्तं ममं जाएसि, तहावि अहं तुह महापुरिसचेट्ठिएण आकरिसियचित्तो न खण्डेमि ते पत्थणापणयं। धरणेण भणियं। ताय, जइ एवं ता देहि तिन्नि वायाओ। ईसि विहसि-

सुवर्णलक्षम्। भणितं च त्वयाऽऽसीत् 'किं सुवर्णलक्षेण, त्वमेव मे बहुमत इति। अनर्घ्यं चैतत् संभ्रमवचनम्। ततो गृहाण साम्प्रतं यत्ते प्रतिभाति। एवं च भणितः सन् लज्जितः सुवदनः। न जल्पितं च तेन। ततो दत्त्वा अष्ट सुवर्णलक्षान् संपूज्य नरपतिं ततः कृत्वा सकलसुस्थं भाण्डस्य गतः टोप्पश्रेष्ठिगेहम्। स्थितः काञ्चिद् वेलां सह श्रेष्ठिना। उपगतायां च भोजनवेलायां कृतमज्जनौ प्रभुक्तौ एतौ। भुक्तोत्तरकाले च चरणयोर्निपत्य भणितो धरणेन टोप्पश्रेष्ठी। याचेऽहं किञ्चिद् वस्तु तातम्, यदि न करोति मम प्रणयभङ्गं तातः। ततो हर्षवशोत्फुल्ललोचनेन 'अहो अहं कृतार्थः, अहो अहं धन्यः, अहो मम सुजीवितम्, अहो मम सुलब्धं जन्मेति, यत ईदृशेनापि महानुभावेन सकलसत्त्वकल्पतरुकल्पेन त्रिभुवनचिन्तामणीभूतेनापि अहं प्रार्थ्ये' इति चिन्तयित्वा भणितं टोप्पश्रेष्ठिना। वत्स! यद्यपि सकलत्रं सपुत्रपरिजनं दासत्वनिमित्तं मां याचसे तथाप्यहं तव महापुरुषचेष्टितेनाकृष्टचित्तो न खण्डयामि ते प्रार्थनाप्रणयम्।

१ आगयाए क। २. आकरसिय-ग।

उण 'जाय, जो एगं वायं लोप्पइ, सो तिन्नि वि लोप्पयन्तो किं केणावि धरिउं पारीयइ' त्ति भणिऊण टोप्पसेट्ठिणा कयाओ तिन्नि वायाओ। 'ताय, अणुग्गहीओ' त्ति भणिऊण हेमकुण्डलविज्जाहरविदिन्नमहग्घेयपुव्वसमप्पियरयणसहस्सं मग्गिओ टोप्पसेट्ठिभण्डारिओ। तेण वि य 'जं अज्जो आणवेइ' त्ति भणिऊण समप्पियाइं गहिऊण रयणाइं। तओ ताण मज्झे अद्धं गहेऊण टोप्पसेट्ठिस्स चलणपूयं कोऊण पुणो वि णिवडिओ पाएसु 'ताय, एसा सा पत्थण'त्ति भणमाणो धरणो। तओ 'अह कहं छलिओ अहमणेणं' ति सुइरं चिन्तिऊण 'अगहिए य विलक्खीभविस्सइ एसो, निवारिओ अहं इमिणा अणागयं चेव' उट्ठविओ धरणो 'वच्छ, पडिवन्ना ते पत्थणा' भणमाणेण टोप्पसेट्ठिणा ॥

तओ बहुमन्निओ सेट्ठिणा महया सत्थेण समागओ निययनयरिं। आवासिओ बाहिं। जाओ लोयवाओ, जहा आगओ धरणो

धरणेन भणितम्-तात! यद्येवं-ततो देहि तिस्रो वाचः। ईषद् विहस्य 'जात! य एकां वाचं लुम्पति स तिस्रोऽपि लुम्पन् किं केनापि धर्तुं पार्यते' इति भणित्वा टोप्पश्रेष्ठिना कृतास्तिस्रो वाचः। 'तात! अनुगृहीतः' इति भणित्वा हेमकुण्डलविद्याधरवितीर्णमहार्घ्यपूर्वसमर्पितरत्नसहस्रं मार्गितः टोप्पश्रेष्ठिभाण्डागारिकः। तेनापि च 'यद् आर्य आज्ञापयति' इति भणित्वा समर्पितानि गृहीत्वा रत्नानि। ततस्तेषां मध्ये अर्धं गृहीत्वा टोप्पश्रेष्ठिनश्चरणपूजां कृत्वा पुनरपि निपतितः पादयोः 'तात! एषा सा प्रार्थना' इति भणन् धरणः। ततोऽथ 'कथं छलितोऽहमनेन' इति सुचिरं चिन्तयित्वा 'अगृहीते च विलक्षीभविष्यति एषः, निवारितोऽहमनेन अनागतमेव' उत्थापितो धरणो 'वत्स! प्रतिपन्ना ते प्रार्थना' भणता टोप्पश्रेष्ठिना ॥

ततो बहुमानितः श्रेष्ठिना महता सार्थेन समागतो निजनगरीम्। आवासितो बहिः। जातो लोकवादः, यथा आगतो धरण इति।

१ केणवि क। २ -महग्घय-क। ३ करेऊण क। ४ अगहीएहिं क। ५ नियाइओ क।

त्ति। निग्गओ राया पच्चोणिं। पवेसिओ णेण महाविभूईए। नेऊण निययभवणं, पूइओ मज्जणाइणा नियाभरणपज्जवसाणमुवयारप्पयाणेणं। गओ नियभवणं। तुट्ठा य से जणणिजणया। विइण्णं महादाणं, कया सव्वाययणेसु पूया। अइक्कन्ता काइ वेला। तओ उवणिमन्तियं महारायं पूइओ अणेणं सविसेसं। सम्माणिया य जहारुहपडिवत्तीए पउरचाउव्वेज्जाइया, पडिपूइओ य तेहिं। तओ पुच्छिओ जणणिजणएहिं। वच्छ, अवि कहिं ते घेरिणि त्ति। धरणेण भणियं। अलं तीए कहाए। चिन्तियं च णेहिं। हन्त कयं तीए, जं इत्थिउचियं। ता अलं इमस्स मम्मघट्टणेण इमिणा जंपिएणं। अन्नओ अवगच्छिसं ति। एत्थन्तरंमि महापुरिसयाखित्तहियओ विम्हयवसेणुप्फुल्ललोयणो कयमुद्दङ्गसासणावणनिमित्तं पुणो वि धरणसमीवं समागओ राया। कओ धरणेण समुचिओवयारो। पुच्छिओ य आगमणपओयणं। सिट्ठो से नियया हिप्पाओ राइणा। तओ चलणेसु निवडिऊण भणियं धरणेण। देव, अलं मुद्दङ्गेहिं; किं तु

निर्गतो राजा (पच्चोणीं दे.) सम्मुखम्। प्रवेशितस्तेन महाविभूत्या, नीत्वा निजभवनं पूजितो मज्जनादिना निजाभरणपर्यवसानोपचारप्रदानेन। गतो निजभवनम्। तुष्टौ च तस्य जननीजनकौ। वितीर्णं महादानम्। कृता सर्वायतनेषु पूजा। अतिक्रान्ता कापि वेला। तत उपनिमन्त्र्य महाराजं पूजितोऽनेन सविशेषम्। सन्मानिताश्च यथार्हप्रतिपत्त्या पौरचातुर्विद्यादयः, प्रतिपूजितश्च तैः। ततः पृष्टो जननीजनकाभ्याम्। वत्स! अपि कुत्र ते गृहिणीति। धरणेन भणितम्—अलं तस्याः कथया। चिन्तितं ताभ्याम्—हन्त कृतं तया यत् स्त्र्युचितम्। ततोऽलमस्य मर्मघट्टनेनानेन जल्पितेन। अन्यतोऽवगमिष्याव इति। अत्रान्तरे महापुरुषताक्षिप्तहृदयो विस्मयवशेनोत्फुल्ललोचनः कृतमुद्राङ्कशासनार्पणनिमित्तं पुनरपि धरणसमीपं समागतो राजा। कृतो धरणेन समुचितोपचारः। पृष्टश्चागमनप्रयोजनम्। शिष्ट-

१ अइक्कंतो कोइ कालो क। २ उवणिमंतिओ महाराया क। ३ णेण क। ४ –विज्जाइया ख। ५ घरणि त्ति क–ख। ६ कइउद्दंगसेमेणावद्दनिमित्तं क। ७ –समुचिउवयारो क।

'माणणीओ देवो' त्ति करिय पत्थेमि पत्थणीयं। राइणा भणियं। भणाउ अज्जो। तेण भणियं। पयच्छउ देवो नियरज्जे सव्वसत्ताणं बन्दिमोक्खणं सव्वसत्ताणमभयप्पयाणं चे। तओ अहो से महाणुभावया, अहो महापुरिसचेट्ठियं सत्थवाहपुत्तस्स' त्ति भणिऊण आणत्तो पडिहारो। हरे कारवेहि चारयघण्टपओएण मम रज्जे सयलबन्दिमोक्खं, सव्वसत्ताणमभयपयाणं च दवावेहि त्ति। तओ 'जं देवो आणवेइ' त्ति भणिऊण संपाडियं देवसासणं। सप्पुरिसचेट्ठिएण य परितुट्ठा से जणणिजणया। परिओसवियसियच्छेहिं कयमणेहिं राइणो उचियं करणिज्जं। तओ धरणेण सह कंचि वेलं गमेऊण निग्गओ राया॥

धरणो वि चिरयालमिलियवयंसयसमेओ गओ मलयसुन्दराभिहाणं उज्जाणं। उवलद्धो य नागलयामण्डवंमि कीलानिमित्तमागओ कुवियं पियपणइणिं पसायन्तो रेविलगो नाम कुलउत्तगो। सुमरियं लच्छीए। चिन्तियं च णेणं। अहो णु खलु एवमपरमत्थपेच्छीणि

स्तस्य निजाभिप्रायो राजा। ततश्चरणयोर्निपत्य भणितं धरणेन। देव! अलं मुद्राङ्कैः, 'किन्तु माननीयो देवः' इति कृत्वा प्रार्थये प्रार्थनीयम्। राज्ञा भणितम्-भणत्वार्यः। तेन भणितम्-प्रयच्छतु देवो निजराज्ये सर्वसत्त्वानां बन्दिमोक्षणं सर्वसत्त्वानामभयप्रदानं च। ततः 'अहो तस्य महानुभावता, अहो महापुरुषचेष्टितं सार्थवाहपुत्रस्य' इति भणित्वा आज्ञप्तः प्रतीहारः। अरे कारय चारकघण्टाप्रयोगेण मम राज्ये सकलबन्दिमोक्षम्, सर्वसत्त्वानामभयप्रदानं च दापयेति। ततो 'यद् देव आज्ञापयति' इति भणित्वा संपादितं देवशासनम्। सत्पुरुषचेष्टितेन च परितुष्टौ तस्य जननीजनकौ। परितोषविकसिताक्षाभ्यां कृतमनोभ्यां राज्ञ उचितं करणीयम्। ततो धरणेन सह काञ्चिद् वेलां गमयित्वा निर्गतो राजा॥

धरणोऽपि चिरकालमिलितवयस्यसमेतो गतो मलयसुन्दराभिधानमुद्यानम्। उपलब्धश्च नागलतामण्डपे क्रीडानिमित्तमागतः कुपितां

१ बधणमोक्खं। २ दवावेहि त्ति इत्यधिकः क। ३ रइविलगो ख।

कामिजणहिययाइं हरन्ति। समागओ संवेगं। गओ य उज्जाणेकदेसंसंठियं असोयवीहियं।

दिट्ठो य णेण तहियं फासुयदेसंमि वियलियवियारो। सीसगणसंपरिवुडो आयरिओ अरहदत्तो त्ति ॥

अच्चन्तसुद्धचित्तो नाणी विविहतवसोसियसरीरो। निज्जियमयणो वि दढं अणङ्गसुहसिद्धिवल्लिच्छो ॥

तं पेच्छिऊण चिन्ता जाया धरणस्स एस लोयंमि। जीवइ सफलं एक्को चत्तो जेणं घरावासो।

घरिणी अत्थो सयणो माया य पिया य जीवलोयंमि। माइन्दजालसरिसा तहवि जणो पावमायरइ ॥

जा वि उवयारबुद्धी घरिणीपमुहेसु सा वि मोहफलं। मोत्तूण जओ धम्मं न मरणधम्मीणमुवयारो ॥

सो पुण संपाडेउं न तीरए आसवानियत्तेहिं। आसवविणिवित्ती वि य गिहासमं आवसन्तेहिं ॥

मियमणयिनीं प्रलादयन् रेविलको नाम कुलपुत्रकः। स्मृत लक्ष्म्याः। चिन्तितं च तेन–अहो नु रजवेयमपरमार्थप्रेक्षीणि कामिजनहृदयानि भवन्ति। समागतः संवेगम्। गतश्च उद्यानैकदेशसंस्थितामशोकवीथिकाम्।

दृष्टश्च तेन तत्र प्रासुकदेशे विगलितविकारः। शिष्यगणसंपरिवृत आचार्योऽर्हद्दत्त इति ॥

अत्यन्तशुद्धचित्तो ज्ञानी विविधतपःशोषितशरीरः। निर्जितमदनोऽपि दृढमनङ्गसुखसिद्धितत्परः ॥

तं प्रेक्ष्य चिन्ता जाता धरणस्यैष लोके। जीवति सफलमेकस्त्यक्तो येन गृहावासः ॥

गृहिणी अर्थः स्वजनो माता च पिता च जीवलोके। मायेन्द्रजालसदृशास्तथापि जनः पापमाचरति ॥

याऽपि उपकारबुद्धिः गृहिणीप्रमुखेषु सापि मोहफलम्। मुक्त्वा यतो धर्मं न मरणधर्मणामुपकारः ॥

---

१ –देसहिंयं क। २ –सरिसं क।

नियमा तत्थारम्भो आरम्भेणं च वड्ढई हिंसा। हिंसाए कओ धम्मो न देसिओ सत्थयारेहिं ॥
पज्जन्ते वि य एसो सव्वेणं चेव जीवलोयंमि। नियमेणमुज्झियव्वो ता अलमेएण पावेणं ॥
एवं च चिन्तयन्तो पत्तो संजायचरणपरिणामो। गुरुपायमूलमणहं सवयंसो[3] निव्वुइपुरं व ॥
अह वन्दिओ य घेणं भगवं सवयंसएण साहू य। तेहिं चिय धम्मलाहो दिन्नो सव्वेसि विहिपुव्वं ॥
उवविट्ठा य सुविमले मुणीण पुरओ उ उववणुच्छङ्गे। अह पुच्छिया य गुरुणा कत्तो तुब्भे त्ति महुरगिरं ॥

एवं च पुच्छिए समाणे जंपियं धरणेण। भयवं, इओ चेव अम्हे। अन्नं च; अत्थि मे गिहासमपरिच्चायबुद्धी। ता आइसउ भयवं, जं मए कायव्वं ति। तओ 'अहो से आगिई, अहो विवेगो' त्ति चिन्तिऊण आसयपरिक्खणनिमित्तं जंपियं अरहयत्तेणं[4]। वच्छ,

---

स पुनः संगादपितुं न शक्यते आस्रवानिवृत्तेः। आस्रवविनिवृत्तिरपि च गृहाश्रममायसङ्गिः ॥
नियमात्तत्रारम्भ आरम्भेण च वर्धते हिंसा। हिंसया कुतो धर्मो न देशितः शास्त्रकारैः ॥
पर्यन्तेऽपि चैषः सर्वेणैव जीवलोके। नियमेनोज्झितव्यस्ततोऽलमेतेन पापेन ॥
एवं च चिन्तयन् प्राप्तः संजातचरणपरिणामः। गुरुपादमूलमनघं सवयस्यो निर्वृतिपुरमिव ॥
अथ वन्दितश्च तेन भगवान् सवयस्येन साधवश्च। तैरेव धर्मलाभो दत्तः सर्वेषां विधिपूर्वम् ॥
उपविष्टाश्च सुविमले मुनीनां पुरतस्तु उपवनोत्संगे। अथ पृष्टाश्च गुरुणा कुतो यूयमिति मधुरगिरा ॥

एवं च पृष्टे सति जल्पितं धरणेन-भगवन्! इत एव वयम्। अन्यच्च, अस्ति मे गृहाश्रमपरित्यागबुद्धिः, तत आदिशतु भगवान्, यन्मया

---

१ वड्ढइ पा। २ हिंसाइ कओ य फ। ३ सवयसो फ। ४ अरहदत्तेण फ।

परिचत्तगिहासमेणं निब्भच्छिऊण नियनियविसयलालसाइं इन्दियाइं विज्झविय कसायाणलं निरीहेणं चित्तेणं सयलसोक्खनिहाणभूओ संजमो कायव्वो। अन्नहा परिचत्तो वि अपरिचत्तो गिहासमो त्ति। सो पुण अणाइविसयभावणाभावियस्स जीवस्स अच्चन्तदुक्खयरो। पाविऊण वि एयं पुव्वकयकम्मदोसेण केइ न तरन्ति परिवालिउं, मुज्झन्ति नियकज्जे, परिकप्पेन्ति असयालम्बणाइं; विमुक्कसंजमा य ते, आउसो, न गिही न पव्वइयगा उभयलोगविहलं नामन्ति मणुयत्तणं। एवं ववत्थिए अमुणिऊण हेओवाएयाइं अतुलिऊणम-प्पाणयं न जुत्तो गिहासमपरिच्चाओ त्ति। धरणेण भणियं। एयमेयं, जं तुब्भे आणवेह। किं तु

हेओ गिहासमो मे बुद्धी समणत्तणं उवाएयं। तुलणा वि विवेगो च्चिय किलेसवसयाण सत्ताणं॥

भयवया चिन्तियं। अहो से मउण्णया, मुणिओ णेण जहट्ठिओ संसारो, समुप्पन्ना जिणधम्मबोही। ता पसंसेमि एयं साहेमि य

कर्तव्यमिति। ततः 'अहो तस्यार्हता, अहो विवेकः' इति चिन्तयित्वा आचार्यपरीक्षणनिमित्तं अल्पितमर्हद्दत्तेन। वत्स! परित्यक्तगृहाश्रमेण निर्भर्त्स्य निजनिजविषयलालसानीन्द्रियाणि विध्याप्य कषायानलं निरीहेन चित्तेन सकलसौख्यनिधानभूतः संयमः कर्तव्यः। अन्यथा परित्यक्तोऽप्यपरित्यक्तो गृहाश्रम इति। स पुनरनादिविषयभावनाभावितस्य जीवस्यात्यन्तदुःखकरः। प्राप्याप्येतं पूर्वकृतकर्मदोषेण केऽपि न शक्नुवन्ति परिपालयितुम्, मुह्यन्ति निजकार्ये, परिकल्पयन्त्यसदालम्बनानि, विमुक्तसंयमाश्च ते आयुष्मन्! न गृहिणो न प्रव्रजितका उभयलोकविफलं नाशयन्ति मनुजत्वम्। एवं व्यवस्थितेऽज्ञात्वा हेयोपादेयानि अतोलयित्वाऽऽत्मानं न युक्तो गृहाश्रमपरित्याग इति। धरणेन भणितम्-एवमेतद्, यद् यूयमाज्ञापयत। किन्तु

हेयो गृहाश्रमो मे बुद्धिः श्रमणत्वमुपादेयम्। तुलनाऽपि विवेक एव क्लेशवशगानां सत्त्वानाम्॥

१ निब्भच्छि क। २ -जुत्तो क। ३ परिकप्पेंति क। ४ नवंति क।

इमस्स इमीए दुल्लहत्तणं, जेण वयंसगाण वि से संबोहो समुप्पज्जइ। भणियं च णेण। वच्छ, धन्नो तुमं, नायं तए जाणियव्वं, संपत्ता संयललोयदुल्लहा जिणधम्मबोही। ता जहट्ठियासेवणेण एयं चेव सफलं करेहि, संसिज्झइ य तुह समीहियं। न खलु अणब्भत्थनिरइयारकुसलमग्गा एवंविहा हवन्ति, अवि य अपरमत्थपेच्छिणो विसयलोलुया य। एयवइयरं च निसुणेहि मे चरियं। धरणेण भणियं 'कहेउ भयवं'। अरहदत्तायरिएण भणियं। सुण।

अत्थि इहेव वासे अयलउरं नाम नयरं। तत्थ जियसत्तू राया, पुत्ता य से अवराजिओ समरकेऊ य। अवराजिओ जुवराया, इयरो य कुमारो। दिन्ना इमस्स कुमारभुत्तीए उज्जेणी। एवं च अइक्कन्तो कोइ कालो। अन्नया य विथक्को समरकेसरी नाम पच्चन्तनरवई। तओ अवराजिओ तप्पसाहणनिमित्तं गओ। पसाहिओ य एसो। आगच्छमाणेण य मुत्तिमन्तो विय पुण्णोदओ संपत्तो इमेण धम्मा-

---

भगवता चिन्तितम्-अहो तस्य सपुण्यता, ज्ञातोऽनेन यथा स्थितः संसारः, समुत्पन्ना जिनधर्मबोधिः, ततः प्रशंसाम्येतम्, कथयामि चास्मै अस्या दुर्लभत्वम्, येन वयस्यानामपि तस्य संबोधः समुत्पद्यते। भणितं च तेन-वत्स ! धन्यस्त्वम्, ज्ञातं त्वया ज्ञातव्यम्, संप्राप्ता सकललोकदुर्लभा जिनधर्मबोधिः। ततो यथास्थितासेवनेन एतामेव सफलां कुरु, संसिध्यति च तव समीहितम्। न खल्वनभ्यस्तनिरतिचारकुशलमार्गा एवंविधा भवन्ति, अपि चापरमार्थप्रेक्षिणो विषयलोलुपाश्च। एतद्व्यतिकरं च निश्रृणु मे चरितम्। धरणेन भणितम्-कथयतु भगवान्। अर्हद्दत्ताचार्येण भणितम्-शृणु।

अस्तीहैव वर्षे अचलपुरं नाम नगरम्। तत्र जितशत्रू राजा, पुत्रौ च तस्य अपराजितः समरकेतुश्च। अपराजितो युवराजः, इतरश्च कुमारः। दत्ताऽस्य कुमारभुक्त्यां उज्जयिनी। एवं व्यतिक्रान्तः कोऽपि कालः। अन्यदा च (वितथक्को दे॰) विरुद्धः समरकेसरी

---

१ तेलोक्कु-क। २ जहट्ठिय से-क। ३ भारहे वासे। ४ पुत्तो य क-ख।

रामसन्निवेसे सयलमणोरहचिन्तामणी राहो नाम आयरिओ त्ति। तं च दट्ठूण समुप्पन्नो एयस्स संवेगो। पुच्छिओ णेण [1]जहाविहीए धम्मो। कहिओ भयवया जहोवइट्ठो परमगुरूहिं। पडिबुद्धो य एसो। खओवसममुवगयं चारित्तमोहणीयं। तओ [2]माइन्दजालसरिसं जीवलोयमव-गच्छिय पव्वइओ एसो। करेइ तवसंजमुज्जोयं॥ अन्नया य गुरुपायमूलंमि अहासंजमं विहरमाणो गओ वगरासन्निवेसं। एत्थन्तरंमि समा-गया तत्थ उज्जेणीओ [3]राहायरियस्स अन्तेवासिणो [4]अज्जराहुखमासमणसन्तिया गुरुसमीवं साहुणो त्ति। कया [5]से उचियपडिवत्ती। पुच्छि-या निरुवसग्गविहारमुज्जेणीए। कहिओ य णेहिं सुन्दरो विहारो; केवलं रायपुत्तो पुरोहियपुत्तो य अभद्दया, ते जहोवलद्धीए खलियारेन्ति साहुणो, तन्निमित्तो उवसग्गो त्ति। तओ एयमायण्णिय चिन्तियमवराजिएण। अहो पमत्तया समरकेउणो, जेण परियणं पि न निय-मेइ। [6]ता अणुन्नविय गुरुं गच्छामि अहमुज्जेणिं। उवसामेमि [7]ते कुमारे, ||| संचिणन्तु अबोहिमूलाइं। संसारवद्धणे य साहुपओसो।

धर्मारामसन्निवेशे सकलमनोरथचिन्तामणी राहो नामाचार्य इति। तं च दृष्ट्वा समुत्पन्न एतस्य संवेगः। पृष्टोऽनेन यथाविधि धर्मः। कथितो भगवता यथोपदिष्टः परमगुरुभिः। प्रतिबुद्धश्चैषः। क्षयोपशममुपगते चारित्रमोहनीयम्। ततो मायेन्द्रजालसदृशं जीवलोकमवगत्य प्रव्रजित एषः। करोति तपःसंयमोद्योगम्। अन्यदा च गुरुपादमूले यथासंयमं विहरन् गतस्तगरासन्निवेशम्। अत्रान्तरे समागतास्तत्रो-ज्जयिन्या राहाचार्यस्यान्तेवासिन आर्यराहुक्षमाश्रमणसत्का गुरुसमीपं साधव इति। कृता तेषामुचितप्रतिपत्तिः। पृष्टा निरुपसर्गविहार-मुज्जयिन्याम्। कथितस्तैः सुन्दरो विहारः, केवलं राजपुत्रः पुरोहितपुत्रश्चाभद्रकौ, तौ यथोपलब्ध्या खलीकुरुतः (उपद्रवतः) साधून्, तन्निमित्त उपसर्ग इति। तत एतदाकर्ण्य चिन्तितमपराजितेन। अहो प्रमत्तता समरकेतोः, येन परिजनमपि न नियमयति। ततोऽनु-

---

१ जहाविहं धम्म क। २ माइंदयाल-क। ३ राहायरियधम्मभाइयणासाओ क। ४ अज्जराह-क। ५ तेसिं क। ६ तो क। ७ अयं पाठो नास्ति क।

अत्थि मे तदुवसामणसत्ती। तओ अणुन्नविय गुरुं पेसिओ गुरुणा समागओ उज्जेणिं, पविट्ठो य अज्जराहुखमासमणगच्छे। कयं से उचियकरणिज्जं। समागया भिक्खावेला। पयट्टो एसो। भणिओ य साहूहिं। पाहुणया तुब्भे, ता अच्छह त्ति। तेण भणियं। न अच्छामि, अत्तलद्धिओ अहं, नवरं ठवणकुलाईणि[1] दंसेह। तओ दिन्नो से चेल्लओ, दंसियाणि कुलाणि, वारिओ य णेणं 'एयं पडणीयगेहं; मा पविसेज्जसु' त्ति भणिऊण नियत्तो चेल्लओ। पविट्ठो य एसो पढममेव कुमारगेहं। महया सद्देण धम्मलाहियमणेणं। तं च दट्ठूण भीयाओ अन्तेउरियाओ। 'हा कट्ठं, इसी कयत्थिज्जिस्सइ' त्ति चिन्तिऊण सन्निओ य णाहिं 'लहु निग्गच्छसु' त्ति। तओ अवहीरिऊण बेहिराविडं[2] च काऊण महया सद्देण धम्मलाहियमणेणं। एत्थन्तरंमि धम्मलाहसद्दं सोऊण हम्मियतलाओ पहट्ठमुहपङ्कया समागया कुमारया। ढंकियं[3] दुवारं। अइसएणं वन्दिओ णेहिं साहू। कयं धम्मलाहणं। भणिओ य णेहिं। भो पव्वइयगा, 'नच्चसु' त्ति।

ज्ञाप्य गुरुं गच्छाम्यहमुज्जयिनीम्। उपशमयामि तौ कुमारौ, मा संचिन्वातामबोधिमूलानि। संसारवर्धने च साधुप्रद्वेषः। अस्ति मे तदुपशमनशक्तिः। ततोऽनुज्ञाप्य गुरुं प्रेपितो गुरुणा समागत उज्जयिनीम्, प्रविष्टश्चार्यराहुक्षमाश्रमणगच्छे। कृतं तस्योचितकरणीयम्। समागता भिक्षावेला। प्रवृत्त एषः। भणितश्च साधुभिः। प्राघूर्णका यूयम्, तत आध्वमिति। तेन भणितम्—न आसे, आत्मलब्धिकोऽहम्, नवरं स्थापनाकुलादीनि दर्शयत। ततो दत्तस्तस्य शिष्यः, दर्शितानि कुलानि, वारितश्च तेन 'एतत्प्रत्यनीकगेहम्, मा प्रविश' इति भणित्वा निवृत्तः शिष्यः। प्रविष्टश्चैष प्रथममेव कुमारगेहम्। महता शब्देन धर्मलाभितमनेन। तं च दृष्ट्वा भीता अन्तःपुरिकाः। हा कष्टम्, ऋषिः कदर्थयिष्यते' इति चिन्तयित्वा संज्ञितश्च ताभिः 'लघु निर्गच्छ' इति। ततोऽवधीर्य बधिरघूत्तितां (?) च कृत्वा महता शब्देन धर्मलाभितमनेन। अत्रान्तरे धर्मलाभशब्दं श्रुत्वा हर्म्यतलाद् प्रहृष्टमुखपङ्कजौ समागतौ कुमारौ। स्थगितं द्वारम्।

१—कुलादीणि क। २ बहिरावहिरोविडं च क, बहिराविड च ख। ३ ढक्कियं तं ख।

तेण भणियं। कहं गीयवाइएण विणा नच्चामि। कुमारेहिं भणियं। अम्हे गीयवाइयं करेमो। साहुणा भणियं 'सुन्दरं' त्ति। विसमतालं कयं गीयवाइयमणेहिं। अकुद्धो वि हियएणं कुद्धो साहू। भणियं च णेण। अरे रे गोवालदारया, इमिणा विन्नाणेण ममं नच्चावेह त्ति। एयं सोऊण कुविया कुमारा, साहुताडणनिमित्तं च धाविया अभिमुहं[1]। तेण वि य 'न अन्नो उवाओ' त्ति कलिऊण करुणापहाणचित्तेण निज्जुद्धवावारकुसलेणं सणियं चेव घेत्तूण सव्वसंधीसु विओइओ एक्को[2]। तओ धाविओ दुइओ, सो वि तहेव। तओ दुवारमुग्घाडिऊण गओ साहू। एगन्ते[3] ठिओ सज्झायजोगेणं। इयरे वि निच्चेट्ठा तहेव चिट्ठन्ति। दिट्ठा परियणेणं, उदएण सिञ्चिऊण ससंभमं वाहित्ता, जाव न जंपन्ति, तओ निवेइयं रायपुरोहियाणं, जहा इमिणा वुत्तन्तेण केणइ साहुणा कुमारा एवं कय त्ति। तओ ते निरूविऊण आयरियसमीवं गओ राया। पणमिओ य णेणायरिओ, भणिओ य। भयवं, खमेह एयमवराहं वालयाणं। आयरिएण भणियं। किमेयं वि

अतिशयेन वन्दितस्ताभ्यां साधुः। कृत धर्मलाभनम्। भणितश्च ताभ्याम्-'भो प्रव्रजितक! नृत्य' इति। तेन भणितम्-कथं गीतवाद्येन विना नृत्यामि। कुमारैर्भणितम्-आवां गीतवाद्यं कुर्वः। साधुना भणितम् 'सुन्दरम्' इति। विषमतालं कृतं गीतवाद्यमाभ्याम्। अक्रुद्धोऽपि हृदयेन क्रुद्धः साधुः। भणितं च तेन- अरेरे गोपालदारकौ! अनेन विज्ञानेन मां नर्तयतमिति। एतच्छ्रुत्वा कुपितौ कुमारौ, साधुताडननिमित्तं च धावितावभिमुखम्। तेनापि च 'नान्य उपायः' इति कलयित्वा करुणाप्रधानचित्तेन नियुद्धव्यापारकुशलेन शनैरेव गृहीत्वा सर्वसंधिषु वियोजित एकः। ततो धावितो द्वितीयः, सोऽपि तथैव। ततो द्वारमुद्घाट्य गतः साधुः। एकान्ते स्थितः स्वाध्याययोगेन। इतरावपि निश्चेष्टौ तथैव तिष्ठतः। दृष्टौ परिजनेन, उदकेन सिक्त्वा ससंभ्रमं व्याहृतौ, यावद् न जल्पतः। ततो निवेदितं राजपुरोहिताभ्याम्, यथाऽनेन वृत्तान्तेन केनचित् साधुना कुमारौ एवं कृताविति। ततस्तौ निरूप्य आचार्यसमीपं गतो राजा। प्रणत-

---

१ अहिमुहं क। २ एगो क। ३ एग- क।

नावगच्छामि। कहिओ से वुत्तन्तो राइणा। तओ आयरिएण भणियं। वीयरागसासणसंपायणरया तप्पहावओ विइयपरमत्था परलोयभीरुयत्तणेण य इहलोयसरीरे दढमपडिबन्धयाए खमेन्ति सयलसत्ताणं साहुणो न पुण पाणभएणं ति। तहावि कारणं पइ समायरियं जइ केणावि भवे, तओ पुच्छावेमि साहुणो। तओ आयरिएण पुच्छिया साहुणो। तेहिं भणियं। भयवं, न अम्हे वियाणामो त्ति। आयरिएण भणियं। महाराय, नेयमिह साहूहिं ववसियं। राइणा भणियं। भयवं, साहुणा न एत्थ संदेहो। आयरिएण भणियं। महाराय, जइ एवं, ता एवं भविस्सइ। अत्थि एगो आगन्तुगो साहू; तेणेयमणुचिट्ठियं भवे। राइणा भणियं। भयवं, कहिं पुण सो साहू। आयरिएण भणियं। दंसेह से तयं। दंसिओ एगेण साहुणा नाइदूरंमि चेव सालतरुवरसमीवे झाणसंठिओ त्ति। पच्चभिन्नाओ य राइणा। कुमारावराहलज्जिएणं पणमिओ य णेणं। दिन्नो से धम्मलाहो। भणिओ य पच्छा। भो महासावगा, जुत्तमेयं जं तुज्झ सन्तिए रज्जे इसीणं

अ तेनाचार्यः, भणितश्च। भगवन्! क्षमस्वैतमपराधं बालकयोः। आचार्येण भणितम्-किमेतदिति नावगच्छामि। कथितस्तस्य वृत्तान्तो राज्ञा। तत आचार्येण भणितम्-वीतरागशासनसंपादनरतास्तत्प्रभावतो विदितपरमार्थाः परलोकभीरुकत्वेन च इहलोकशरीरे दृढमप्रतिबन्धतया क्षमयन्ति सकलसत्त्वान् साधवः, न पुनः प्राणभयेनेति। तथापि कारणं प्रति समाचरितं यदि केनापि भवेत् ततः प्रच्छयामि साधून्। तत आचार्येण पृष्टाः साधवः। तैर्भणितम्-भगवन्! न वयं विजानीम इति। आचार्येण भणितम्-महाराज! नेदमिह साधुभिर्व्यवसितम्। राज्ञा भणितम्-भगवन्! साधुना, नात्र संदेहः। आचार्येण भणितम्-महाराज! यद्येवं तत एवं भविष्यति। अस्त्येक आगन्तुकः साधुः, तेनेदमनुष्ठितं भवेत्। राज्ञा भणितम्-भगवन्! कुत्र पुनः स साधुः। आचार्येण भणितम्-दर्शयतास्य तम्। दर्शित एकेन साधुना नातिदूरे एव सालतरुवरसमीपे ध्यानसंस्थित इति। प्रत्यभिज्ञातश्च राज्ञा। कुमारापराधलज्जितेन प्रणतश्च तेन। दत्तस्तस्य

१ -रवपहावओ ख, -रयाण क। २ साहू क। ३ आगन्तुओ क।

कयत्थणा कुमाराणं अणाहत्तणं च। तओ बाहजलभरियलोयणेण राइणा भणियं। भयवं, लज्जिओ म्हि अहियं इमिणा पमायचरिएणं। अत्थि मम एस दोसो; तहावि भयवं करेह अणुग्गहं, संजोएह ते कुमारे। साहुणा भणियं। संजोएमि चरणगुणविहाणेणं न उण, अन्नह त्ति। राइणा भणियं। भयवं, अणुमयं ममेयं, नवरं कुमारा पुच्छियव्व त्ति। साहुणा भणियं। लहुं पुच्छेह। राइणा भणियं। भयवं, न सक्केन्ति ते जंपिउं। साहुणा भणियं। एहि, तत्थेव वच्चामो; अहं जंपावेमि त्ति। आगया कुमाराण समीवं। दिट्ठा य णेहिं परमजोगिणो व्व निरुद्धसयलचेट्ठा कुमारा। आयत्तीकयं च तेसिं साहुणा वयणमेत्तं। पुच्छिया य णेणं। भो कुमारया, इसिकयत्थणापमायजणियकम्मतरुकुसुमुग्गमपुव्वरूवमेयं, फलं तु निरयाइवेयणा। ता जइ भे अत्थि पच्छायावो, ता पवज्जह कम्मतरुमहाकुहाडं पव्वज्जं। मोएमि अहं इमाओ उवद्दवाओ, भवामि य परलोयसाहणुज्जयाणं सहाओ त्ति। कुमारेहिं भणियं। भयवं, अणुग्गहो त्ति।

धर्मलाभः, भणितश्च पश्चात्। भो महाश्रावक! युक्तमेतद् यत् तव सत्के राज्ये ऋषीणां कदर्थना कुमाराणामनाथत्वं च। ततो बाष्पजलभृतलोचनेन राज्ञा भणितम्–भगवन्! लज्जितोऽस्मि अधिकमनेन प्रमादचरितेन। अस्ति ममैष दोषः, तथापि भगवन्! कुर्वनुग्रहम्, संयोजय तौ कुमारौ। साधुना भणितम्–संयोजयामि चरणगुणविधानेन न पुनरन्यथेति। राज्ञा भणितम्–भगवन्! अनुमतं ममैतद्, नवरं कुमारौ प्रष्टव्याविति। साधुना भणितम्–लघु पृच्छत। राज्ञा भणितम्–भगवन्! न शक्नुतस्तौ जल्पितुम्। साधुना भणितम्–एहि तत्रैव व्रजाव, अहं जल्पयामीति। आगतौ कुमारयोः समीपम्। दृष्टौ च ताभ्यां परमयोगिनाविव निरुद्धसकलचेष्टौ कुमारौ। आयत्तीकृतं च तयोः साधुना वचनमात्रम्। पृष्टौ च तेन–भो कुमारौ! ऋषिकदर्थनाप्रमादजनितकर्मतरुकुसुमोद्गमपूर्वरूपमेतत्, फलं तु निरयादिवेदना। ततो

१ कुमाराण य अणाहत्तण त्ति क। २ राइणा बाह– । ३ अहय क। ४ करेउ क। ५ परमजोइणो क। ६ वयणमेय क। ७ नरयाइ–क। ८ 'जइ य न नारयतिरियमणुयदुक्खाण भायणो' इत्यधिकं क। ९ हवामि य क।

लज्जिया अम्हे इमिणा पमायचरिएणं,अत्थि यो महन्तो अणुयावो, पवज्जामो य पव्वज्जं जइ गुरू अणुजाणन्ति । तओ अणुन्नाया गुरूहिं। संजोइया साहुणा अङ्गसंघाएण परमगुणसंघाएण य । तओ पवन्ना पव्वज्जं । परिणया य तेसिं समणगुणा । एवं च जहुत्तकारीणं अइक्कन्तो कोइ कालो । ताणं च पुरोहियकुमारस्स कम्मोदएणं विइयजिणधम्मसारस्स वि 'बला इमिणा पव्वाविय' त्ति समुप्पन्नो गुरुपओसो । न निन्दिओ पेणं नालोइओ गुरुणो । तओ मरिऊणं अहाउयक्खएण समुप्पन्नो ईसाणदेवलोए भुञ्जेइ दिव्वभोए। अइक्कन्तो कोइ कालो रइसागरावगाढस्स ।

अन्नया य वरच्छरापरिगयस्स मिलाणाइं सुरहिकुसुमदामाइं, पयम्पिओ कप्पपायवो, पणट्ठाओ हिरिसिरीओ, उवरत्ताइं देवदू-

यदि युवयोरस्ति पश्चात्तापः, ततः प्रपद्येथां कर्मतरुमहाकुठारं प्रव्रज्याम् । मोचयाम्यहमस्मादुपद्रवात्, भवामि च परलोकसाधनोद्यतयोः सहाय इति। कुमारैर्भणितम्-भगवन्! अनुग्रह इति। लज्जितावावामनेन प्रमादचरितेन, अस्त्यावयोर्महाननुतापः, प्रपद्यावहे च प्रव्रज्यां यदि गुरवोऽनुजानन्ति । ततोऽनुज्ञातौ गुरुभिः । संयोजितौ साधुना अङ्गसंघातेन परमगुणसंघातेन च । ततः प्रपन्नौ प्रव्रज्याम्। परिणताश्च तयोः श्रमणगुणाः । एवं च यथोक्तकारिणोरतिक्रान्तः कोऽपि कालः। तयोश्च पुरोहितकुमारस्य कर्मोदयेन विदितजिनधर्मसारस्यापि 'बलादनेन प्रव्राजितः' इति समुत्पन्नो गुरुप्रद्वेषः। न निन्दितस्तेन, नालोचितो गुरोः। ततो मृत्वा यथायुःक्षयेण समुत्पन्न ईशानदेवलोके भुङ्क्ते दिव्यभोगान्। अतिक्रान्तः कोऽपि कालो रतिसागरावगाढस्य।

अन्यदा च वराप्सरःपरिगतस्य म्लानानि सुरभिकुसुमदामानि, प्रकम्पितः कल्पपादपः, प्रनष्टे ह्रीश्रियौ, उपरक्तानि देवदूष्यानि,

१ अतरिसचरिएणं क। २ अम्हाण क। ३ अणुतावो क। ४ 'पुलोइओ [illegible] साहुणो(णा)। तओ साहिऊण सयधिवुत्तंत इमस्स' इत्यधिक क। ५–पुत्तरस क। ६ अवरत्ताइ क।

साइं, समुप्पन्नो दीणभावो, उत्थरियं निद्दाए, विउडिओ कामरागो, भमडिया दिट्ठी, समुप्पन्नो कम्पो, चियम्भिया अरइ त्ति। तओ तेण चिन्तियं 'हन्त, किमेयं' ति। वियाणियाइं चवणलिङ्गाइं, विसण्णो हियएणं, विद्दाणो परियणो, विलवियं अच्छराहिं। तओ 'किमिमिणा मोहचेट्ठिएणं; पुच्छामि ताव भयवन्तं पउमनाहं तित्थयरं, कहिं मे उववाओ, सुलहबोहिओ वा न व' त्ति समागओ पुव्वविदेहं। पणमिओ तेलोक्कनाहो पुच्छिओ य। सिट्ठं भयवया। उववाओ ते जम्बुद्दीवदाहिणड्ढभरहे कोसम्बीए नयरीए। दुल्लह-बोहिओ तुमं। संचिणियं तुमए गुरुपओसेण इमिणा पगारेण अबोहिबीयं। नीसेसमाचिक्खिओ पुव्वभववइयरो। तओ तेण चिन्तियं। हन्त एद्दहमेत्तस्स वि गुरुपडणीयभावस्स दारुणो विवागो त्ति। भयवया भणियं। भो देवाणुप्पिया, न एस थेवो[1]। इह खलु इहलोगोवयारी वि कयन्नुणा बहु मन्नियव्वो, किमङ्ग पुण परलोगोवयारी। परलोगोवयारिणो य गुरवो; जओ फेडन्ति मिच्छत्तवाहिं, पणा-

समुत्पन्नो दीनभावः, उत्स्तृत (आक्रान्तं) निद्रया, विकुटितः (विनष्टः) कामरागः, भ्रान्ता दृष्टिः, समुत्पन्नः कम्पः, विजृम्भिता अरतिरिति। ततस्तेन चिन्तितम्–'हन्त किमेतद्' इति। विज्ञातानि च्यवनलिङ्गानि, विषण्णो हृदयेन, विद्राणः परिजनः, विलपितमप्सरोभिः। ततः 'किमनेन मोहचेष्टितेन, पृच्छामि तावद् भगवन्तं पद्मनाभं तीर्थंकरम्, कुत्र मे उपपातः, सुलभबोधिको वा न वा' इति समागतः पूर्व-विदेहम्। प्रणतस्त्रैलोक्यनाथः पृष्टश्च। शिष्टं भगवता–उपपातस्ते जम्बूद्वीपदक्षिणार्धभरते कौशाम्ब्यां नगर्याम्। दुर्लभबोधिकस्त्वम्। संचितं त्वया गुरुप्रद्वेषेण अनेन प्रकारेणाबोधिबीजम्। निःशेषमाख्यातः पूर्वभवव्यतिकरः। ततस्तेन चिन्तितम्–हन्त एतावन्मात्रस्यापि गुरुप्रत्यनीकभावस्य दारुणो विपाक इति। भगवता भणितम्–भो देवानुप्रिय! नैष स्तोकः। इह खलु इहलोकोपकार्यपि कृतज्ञेन बहु मानयितव्यः, किमङ्ग पुनः परलोकोपकारी। परलोकोपकारिणश्च गुरवः, यतः स्फेटयन्ति मिथ्यात्वव्याधिम्, प्रणाशयन्ति अज्ञानतिमिरम्,

१ अत्थेः क। २ थोवो ख।

सेन्ति अन्नाणतिमिरं, ठवेन्ति परमपयसाहियाए किरियाए, चोइन्ति खलिएसु, संथवेन्ति गुणरयणे। एवं च, देवाणुप्पिया, मोएन्ति जम्मजरामरणरोयसोयबहुलाओ संसारवासाओ, पावेन्ति सासयं[3] सुहं सिद्धिं त्ति। ता एवंविहेसु वि पओसो गुणपओसभावेण नासेइ सम्मत्तं, जणेइ अन्नाणं, चालेइ साहुकिरियं। तओ य से जीवे तहाविहकिलिट्ठपरिणामपरिणए खणमेत्तेणावि, देवाणुप्पिया, तहा बन्धेइ कम्मं, जहा पावेइ अणेगभवियं मिच्छत्तमोहं ति। अओ चेव बेमि।

सम्मत्तनाणसहिया एगन्तपमायवज्जिणो पुरिसा। इहपरभवनिरवेक्खा तरंन्ति नियमेण भवजलहिं ॥

न उँण सेस त्ति। देवेण चिन्तियं। एवमेयं, न अन्नहा। ता न याणामि, किंपज्जवसाणो मे एसो अबोहिलाभो त्ति। भयवया भणियं। थेवनियाणो खु एसो; ता अणन्तरभवे चेव भविस्सइ अवसाणं ति। देवेण भणियं। भयवं, कुओ सयासाओ। भयवया

स्थापयन्ति परमपदसाधिकायां क्रियायाम्, चोदयन्ति स्खलितेषु, संस्तुवन्ति (प्रशंसन्ति) गुणरत्नानि। एवं च देवानुप्रिय! मोचयन्ति जन्मजरामरणरोगशोकबहुलात्संसारवासात्, प्रापयन्ति शाश्वतं सुखं सिद्धिमिति। तत एवंविधेष्वपि प्रद्वेषो गुणप्रद्वेषभावेन नाशयति सम्यक्त्वम्, जनयत्यज्ञानम्, चालयति साधुक्रियाम्। ततश्च स जीवस्तथाविधक्लिष्टपरिणामपरिणतः क्षणमात्रेणापि देवानुप्रिय! तथा बध्नाति कर्म यथा प्राप्नोत्यनेकभविकं मिथ्यात्वमोहमिति। अत एव ब्रवीमि।

सम्यक्त्वज्ञानसहिता एकान्तप्रमादवर्जिनः पुरुषाः। इहपरभवनिरपेक्षास्तरन्ति नियमेन भवजलधिम् ॥

न पुनः शेषा इति। देवेन चिन्तितम्–एवमेतद्, नान्यथा। ततो न जानामि किंपर्यवसानो मे एषोऽबोधिलाभ इति। भगवता भणितम्–स्तोकनिदानः खल्वेषः, ततोऽनन्तरभवे एव भविष्यति अवसानमिति। देवेन भणितम्–भगवन्! कुतः सकाशात्। भगवता

---

१ ठविंयंति क, ठविंति ख। २ सठवेंति क। ३ सासयसुहं क। ४ नासेइ क। ५ निरयंति भवभरं क। ६ पुण क।

मणियं । मूयगावरनामाओ नियभाउणो त्ति । देवेण भणियं । भयवं, किं पुण तस्स पढमनामं, केण वा कारणेण इमं से दुइयं ति।

भगवया भणियं । सुण ।

पढमनामं से असोगदत्तो; मूयगो पुण इमेणं कारणेणं । इमीए चेव कोसम्बीए अईयसमयंमि तावसो नाम सेट्ठी अहेसि । सो य दाणाइकिरियासमेओ वि पमाई, बहुविहवसंपन्नो वि निच्चवावडो । तओ अट्टज्झाणदोसेण मरिऊण समुप्पन्नो नियगेहंमि चेव सूयरो । जायं से पुव्वोवभुत्तपएसावलोयणेणं जाईसरणं । अन्नया य उवट्ठिए पिइदिवसए सिद्धपाए भोयणे समासन्नाए परिवेसणवेलाए अवहरियमज्जारमंसाए सूवयारीए वेलाइक्कमगिहवइभएणं मंसनिमित्तं पच्छन्नमेव वावाइऊण विससिओ कोलो । तहा कोहाभिभूओ य मरिऊण समुप्पन्नो तंमि चेव गेहे भुयङ्गमत्ताए त्ति । तत्थ वि तं चेव दट्ठूण हम्मियं तं च सूवयारिं भयसंभमाभिभूयस्स परिणाम-

भणितम्-मूकापरनाम्नो निजभ्रातुरिति । देवेन भणितम्-भगवन् ! किं पुनस्तस्य प्रथमनाम, केन वा कारणेनेदं तस्य द्वितीयमिति ।

भगवता भणितम्-शृणु ।

प्रथमनाम तस्याशोकदत्तः, मूकः पुनरनेन कारणेन । अस्यामेव कौशाम्ब्यामतीतसमये तापसो नाम श्रेष्ठ्यासीत् । स च दानादिक्रिया-समेतोऽपि प्रमादी, बहुविभवसंपन्नोऽपि नित्यव्यापृतः । तत आर्तध्यानदोषेण मृत्वा समुत्पन्नो निजगेहे एव शूकरः । जातं तस्य पूर्वोप-भुक्तप्रदेशावलोकनेन जातिस्मरणम् । अन्यदा चोपस्थिते पितृदिवसे सिद्धप्राये भोजने समासन्नायां परिवेषणवेलायां अपहृतमार्जारमांसया (मार्जारापहृतमांसया) सूपकार्या वेलातिक्रमगृहपतिभयेन मांसनिमित्तं प्रच्छन्नमेव व्यापाद्य विशस्तः (पाचितः) । कोलः । तथा क्रोधाभिभूतश्च मृत्वा समुत्पन्नस्तस्मिन्नेव गेहे भुजङ्गमतयेति । तत्रापि च तमेव दृष्ट्वा हर्म्यं तां च सूपकारीं भयसंभ्रमाभिभूतस्य परिणामविशेषतः समुत्पन्नं

१ -समेतो ख । २ पमादी क । ३ पिउ-क । ४ -गह-क ।

विसेसओ समुप्पन्नं से जाइसरणं। विचित्तयाए कम्मपरिणामस्स न गहिओ कसाएहिं, अणुगम्पियं च णेणं। एत्थन्तरंमि उवलद्धो सूवयारीए। तओ णाए कओ कोलाहलो 'सप्पो सप्पो' त्ति। [3]तं च सोऊण समागया मोग्गरवावडग्गहत्था कम्मयरा। वावाइओ णेहिं। समुप्पन्नो य तहा अकामनिज्जराए मरिऊण नियंयपुत्तस्स चेव नागदत्ताभिहाणस्स बन्धुमईए भारियाए कुच्छिंसि पुत्तत्ताए त्ति। जाओ उचियसमएणं। कयं च से नामं असोगदत्तो त्ति। तओ अइक्कन्तसंवच्छरस्स तं चेव सूवयारिं पेच्छिय जणणिजणए य अचिन्तयाए कम्मसामत्थस्स समुप्पन्नं से जाईसरणं। चिन्तियं च णेणं। वहुया जणणी, सुओ चेव य पिया। अंओ पेच्छणयसमाणस्स धिरत्थु संसारवासस्स। ता कहमहं वहुयं चेव जणणिं सुयं च तायं वाहरेमि त्ति। पडिवन्नं मूयगवयं। जाओ लोयवाओ 'अहो एस मूयगो' त्ति। एवं च अइक्कन्ता दुवालस संवच्छरा। समागओ तत्थ चउणाणाइसयसंपन्नो मेहनाओ नाम मुणिवरो। मुणिओ य से

तस्य जातिस्मरणम्। विचित्रतया कर्मपरिणामस्य न गृहीतः कषायैः। अनुकम्पितं च तेन। अत्रान्तरे उपलब्धः सूपकार्या। ततोऽनया कृतः कोलाहलः 'सर्पः सर्पः' इति। तं च श्रुत्वा समागता मुद्गरव्यापृताग्रहस्ताः कर्मकराः। व्यापादितस्तैः। समुत्पन्नश्च तथाऽकामनिर्जरया मृत्वा निजपुत्रस्यैव नागदत्ताभिधानस्य बन्धुमत्या भार्यायाः कुक्षौ पुत्रतयेति। जात उचितसमयेन। कृतं च तस्य नाम अशोकदत्त इति। ततोऽतिक्रान्तसंवत्सरस्य तामेव सूपकारीं प्रेक्ष्य जननीजनकौ चाचिन्त्यतया कर्मसामर्थ्यस्य समुत्पन्नं तस्य जातिस्मरणम्। चिन्तितं च तेन–वधूर्जननी, सुत एव च पिता। अतः प्रेक्षणकसमानस्य धिगस्तु संसारवासस्य। ततः कथमहं वधूमेव जननीं सुतं च तातं व्याहरामीति। प्रतिपन्नं मूकव्रतम्। जातो लोकवादः 'अहो एष मूकः' इति। एवं चातिक्रान्ता द्वादश संवत्सराः। समागतस्तत्र चतुर्ज्ञानातिशयसम्पन्नो मेघनादो नाम मुनिवरः। ज्ञातश्च तस्यानेन हृदयभावः। प्रेषितो वचनविन्यासकुशलः सुमङ्गलाभिधान ऋषिर्नागदे-

---

१ सूवगारीए क। २ कओ अणाए को–क। ३ तओ मोग्गरवावडग्गहत्था आगया कम्म–क। ४ नियपुत्तस्स क। ५ नडपेच्छणय–क।

अणेण हिययभावो । पेसिओ वयणविन्नासकुसलो सुमङ्गलाभिहाणो इसी नागदेवगेहं, भणिओ य एसो । वत्तव्वओ तए तत्थ गिहालिन्दंगनिविट्ठो असोगदत्तो । जहा, भो कुमारया, पेसिओ म्हि गुरुणा, सो य एवं भणाइ ।

तावस किमिणा मूणव्वएण पडिवज्ज जाणिउं धम्मं । मरिऊण सूअरोरग जाओ पुत्तस्स पुत्तो त्ति ॥

तओ 'जं भयवं आणवेइ' त्ति त्ति भणिऊण गओ सो रिसी । साहिओ गुरुसंदेसओ । पणामपुव्वयं भणियं च णेणं । भयवं, कत्थ सो गुरू । इसिणा भणियं । कुमार, सक्कावयारे चेइयंमि । तेण भणियं । एहि, गच्छम्ह । विम्हिओ मूयगपरियणो । चिन्तियं च णेणं । अहो सामत्थं भयवओ; ता जाउ एसो, कयाइ सोहैणयरं भवे । गओ मेहनायगुरुसमीवं । वन्दिओ गुरू । धम्मलाहिओ गुरुणा । पुच्छिओ असोगदत्तेणं । भयवं, कहं पुण तुमं मईयं वुत्तन्तं जाणासि । तेण भणियं । नाणबलेणं ति । 'अहो ते नाणाइ-

ममेहम्, भणितक्षेपः । वक्तव्यस्त्वया तत्र 'गृहालिन्दकनिविष्टोऽशोकदत्तः । यथा भोः कुमार ! प्रेषितोऽस्मि गुरुणा, स चैवं भणति-

तापस ! किमनेन मौनव्रतेन प्रतिपद्यस्व ज्ञात्वा धर्मम् । मृत्वा सूकरोरगौ, जातः पुत्रस्य पुत्र इति ॥

ततो 'यद् भगवान् आज्ञापयति' इति भणित्वा गतः स ऋषिः । कथितो गुरुसंदेशकः । प्रणामपूर्वकं भणितं च तेन । भगवन् ! कुत्र स गुरुः । ऋषिणा भणितम्-कुमार ! शक्रावतारे चैत्ये । तेन भणितम्-एहि, गच्छावः । विस्मितो मूकपरिजनः । चिन्तितं च तेन-अहो सामर्थ्यं भगवतः, ततो यातु एषः, कदाचित् शोभनतरं भवेत् । गतो मेघनादगुरुसमीपम् । वन्दितो गुरुः । धर्मलाभितो गुरुणा । पृष्टोऽशोकदत्तेन । भगवन् ! कथं पुनस्त्वं मदीयं वृत्तान्तं जानासि । तेन भणितम्-ज्ञानबलेनेति । 'अहो ते ज्ञानातिशयः' इति विस्मितो-

१ अलिन्दकः-बहिर्द्वारप्रकोष्ठकः । २ भणइ ख । ३ सोहणय(यं) भवे क ।

सओ' त्ति विम्हिओ असोगदत्तो। तओ भयवया 'पडिवुज्झिस्सइ' त्ति नाऊण कहिओ से धम्मो। पडिवुद्धो एसो। पुव्ववासणाए य नावगयं से मूयगाभिहाणं। ता एएण कारणेण इमं से दुइयं नामं ति।

एवं च सिट्ठे समुप्पन्नो से पमोओ। पुच्छिओ य भयवं। अह कहिं केण वा पगारेणं अहं संवुज्झिस्सं ति। भयवया भणियं। वेयड्ढपव्वए नियकुण्डलजुवलयदरिसणेणं भविस्सइ ते पडिबोहो। तओ वन्दिऊण भयवन्तं गओ कोसम्बिं नयरिं। दिट्ठो मूयगो, साहिओ से वुत्तन्तो, जहा उप्फालिओ भयवया। सबहुमाणं हत्थे गेण्हिऊण भणिओ य एसो। ता अवस्समहं तए पडिबोहियव्वो त्ति। तेण भणियं। जइस्समहं जहासत्तीए। तओ तेण नीओ वेयड्ढपव्वयं, दंसियं सिद्धाययणकूडं। भणिओ य एसो। भो मम दुवे चेव अच्चन्तपियाणि एत्थ जम्मंमि, इमं सिद्धाययणकूडं रयणावयंसगाभिहाणं च कुण्डलजुयलं ति। ता चिट्ठउ इमं इहं, कायव्वं

ऽशोकदत्तः। ततो भगवता 'प्रतिभोत्स्यते' इति ज्ञात्वा कथितस्तस्य धर्मः। प्रतिवुद्ध एषः। पूर्ववासनया च नापगतं तस्य मूकाभिधानम्। तत एतेन कारणेनेदं तस्य द्वितीयं नामेति।

एवं च शिष्टे समुत्पन्नस्तस्य प्रमोदः। पृष्टश्च भगवान्, अथ कुत्र केन वा प्रकारेणाहं सम्भोत्स्यामीति। भगवता भणितम्–वैताढ्यपर्वते निजकुण्डलयुगलदर्शनेन भविष्यति ते प्रतिबोधः। ततो वन्दित्वा भगवन्तं गतः कौशाम्बीं नगरीम्। दृष्टो मूकः, कथितस्तस्य वृत्तान्तः, यथा कथितो भगवता। सबहुमानं हस्ते गृहीत्वा भणितश्चैषः। ततोऽवश्यमहं त्वया प्रतिबोधितव्य इति। तेन भणितम्–यतिष्येऽहं यथाशक्ति। ततस्तेन नीतो वैताढ्यपर्वतम्, दर्शितं सिद्धायतनकूटम्। भणितश्चैषः–भो! मम द्वावेवात्यन्तप्रियावत्र जन्मनि, इदं सिद्धायतनकूटं रत्नावतंसकाभिधानं च कुण्डलयुगलमिति। ततस्तिष्ठतु इदमिह, कर्तव्यं त्वया पूर्वकथितमिति। न्यस्तं शिला-

१ भगवया क। २ पडिवुज्झइ क। ३ तो क। ४ हत्थेणं क। ५ भो भो क। ६ –जुवलयं ति क।

तए पुव्वसाहियं ति । 'निम्मियं सिलासंघायविवरेगदेसे कुण्डलजुयलं, समप्पियं च इमस्स चिन्तामणिरयणं। भणिओ य एसो । एयं सु चिन्तामेत्तपडिवन्नसहायभावं साहेइ इहलोयपडिबद्धं एगदिवसे एगपओयणं । ता एयसामत्थओ वेयड्ढगमणमणुचिट्ठियव्वं ति । पडिवन्नमणेण । आगया कोसम्बिं । गओ देवो निययविमाणं । चावन्नो कालक्कमेणं । समुप्पन्नो बन्धुमईकुच्छीए । जाओ से सरयसमयंमि सहयारेसु दोहलो । असंपज्जमाणे य तंमि समुप्पन्ना से अरई, पव्वायं वयणकमलं, पीडिओ गब्भो, संजायं किसत्तणं । एत्थन्तरंमि पयट्टो लोयवाओ । अहो एसा असंपाइयदोहला न जीवइ त्ति । तओ माइनेहमोहिएणं असोगदत्तेणं 'न तित्थयरभासियं निप्फलं, ता भविस्सइ, न अन्नहा वि वेयड्ढगमणं' ति चिन्तिऊण चिन्तियाइं चिन्तामणिरयणसन्निहाणंमि सहयाराइं । समुप्पन्नाणि य इमाइं । संपाडिओ दोहलो । पसूया एसा । जाओ य से दारओ । कयं च से नामं अरहदत्तो त्ति ।

संघातविवरैकदेशे कुण्डलयुगलम्, समर्पितं चास्य चिन्तामणिरत्नम्। भणितश्चैषः। एतत्खलु चिन्तामात्रप्रतिपन्नसहायभावं साधयति इहलोकप्रतिबद्धमेकदिवसे एकप्रयोजनम्। तत एतत्सामर्थ्यतो वैताढ्यगमनमनुष्ठातव्यमिति। प्रतिपन्नमनेन। आगतौ कौशाम्बीम्। गतो देवो निजविमानम्। व्यापन्नः कालक्रमेण। समुत्पन्नो बन्धुमतीकुक्षौ। जातस्तस्य शरत्समये सहकारेषु दोहदः। असंपद्यमाने च तस्मिन् समुत्पन्ना तस्या अरतिः, म्लानं वदनकमलम्, पीडितो गर्भः, संजातं कृशत्वम्। अत्रान्तरे प्रवृत्तो लोकवादः, अहो एषाऽसंपादितदोहदा न जीवतीति। ततो मातृस्नेहमोहितेनाशोकदत्तेन 'न तीर्थकरभाषितं निष्फलम्, ततो भविष्यति, नान्यथाऽपि वैताढ्यगमनम्' इति चिन्तयित्वा चिन्तितानि चिन्तामणिरत्नसन्निधाने सहकाराणि। समुत्पन्नानि चेमानि। संपादितो दोहदः। प्रसूतैषा। जातश्च तस्या दारकः। कृतं च तस्य नाम अर्हद्दत्त इति।

१ णिम्मिय ख। २ जाओ य ख। ३ –डोहला क। ४ निप्फलं भविस्सइ ख। ५ अन्नहा वेयड्ढ–ख। ६ डोहलो क। ७ जाओ से क।

पत्तो य बालभावं। तओ सो असोगदत्तो नेइ तं साहुसमीवं, पाडेइ चलणेसु, रुयइ य तओ। एवं च अइक्कन्तो कोइ कालो। पत्तो कुमारभावं। साहिओ णेण जिणभासिओ धम्मो, न परिणओ य तस्स। पुणो वि साहिओ, पुणो वि न परिणओ त्ति। एवं च अइक्कन्तो कोइ कालो। पुणो वि कहिओ असोगदत्तेण पुव्वभववइयरो, न परिणओ य अरहयत्तस्स। भणिओ य णेणं असोगदत्तो। किमिमिणा पलविएणं ति। तओ सो एयवइयरेणेव 'अहो सामत्थं कम्मपरिणईए' त्ति चिन्तिऊण पडिवन्नो समणलिङ्गं। अरहदत्तेण वि य परिणीयाओ चत्तारि सेट्ठिदारियाओ। भुञ्जमाणस्स पवरभोए अइक्कन्तो कोइ कालो॥

तओ परिवालिऊणमणइयारं सामण्णं अहाउयस्स खएण देवलोयमुवगओ असोयदत्तो। सुयं च णेणं, जहा असोगदत्तसमणगो पञ्चत्तमुवगओ त्ति। तओ समुब्भूओ अरहदत्तस्स सोगो। कयं उद्धदेहियं। समुप्पन्नो य सो बंभलोए। दिन्नो उवओगो, विन्नाओ य

प्राप्तश्च बालभावम्। ततः सोऽशोकदत्तो नयति तं साधुसमीपम्, पातयति चरणयोः, रोदिति च ततः। एवं चातिक्रान्तः कोऽपि कालः। प्राप्तः कुमारभावम्। कथितस्तेन जिनभाषितो धर्मः, न परिणतश्च तस्य। पुनरपि कथितः, पुनरपि न परिणत इति। एवं चातिक्रान्तः कोऽपि कालः। पुनरपि कथितोऽशोकदत्तेन पूर्वभवव्यतिकरः, न परिणतश्चार्हद्दत्तस्य। भणितश्च तेनाशोकदत्तः, किमनेन प्रलपितेनेति। ततः स एतद्व्यतिकरेणैव 'अहो सामर्थ्यं कर्मपरिणतेः' इति चिन्तयित्वा प्रतिपन्नः श्रमणलिङ्गम्। अर्हद्दत्तेनापि च परिणीताश्चतस्रः श्रेष्ठिदारिकाः। भुञ्जानस्य प्रवरभोगान् अतिक्रान्तः कोऽपि काल.।

ततः परिपाल्यानतिचारं श्रामण्यं यथायुष्कस्य क्षयेण देवलोकमुपगतोऽशोकदत्तः। श्रुतं च तेन, यथाऽशोकदत्तश्रमणः पञ्चत्वमुपगत इति। ततः समुद्भूतोऽर्हद्दत्तस्य शोकः। कृतमौर्ध्वदेहिकम्। समुत्पन्नश्च स ब्रह्मलोके। दत्त उपयोगः। विज्ञातश्चावधिना अर्हद्-

१ चरणेसु क। २ अरिहयत्तस्स क। ३ अहाउयक्खएण ख।

ओहिणा अरहदत्तवइयरो। आभोइयं च णेणं 'न एस एवं पडिवुज्झइ' त्ति। पत्थुओ उवाओ। अयण्डंमि चेव समुप्पाइओ से वाही। संजायं जलोयरं, परिसुक्काओ भुयाओ, सूणं चलणजुयलं, मिलाणाइं लोयणाइं, जड्डिया जीहा, पणट्ठा निद्दा, उवगया अरई, समुब्भूया महावेयणा। विसण्णो य एसो। सद्दाविया वेज्जा। उवन्नत्थं सव्वसारं। भणियं च णेण। अवहर एयं वेयणं। पउत्ताइं ओसहाइं; न जाओ से विसेसो। पच्चक्खाओ वेज्जेहिं। तओ वेयणाइसयमोहिएण भणियं। न चएमि एयं अणेगतिव्ववेयणाभिभूयं दिवसमेत्तमवि सरीरगं धारेउं। ता देह मे कट्ठाणि, पविसामि जलणं ति। एयं सोऊण विद्दाणा बन्धवा, मुच्छियाओ पत्तीओ, परोविओ परियणो। एत्थन्तरंमि सो देवो सबरवेज्जरूवं काऊण गहियगोणेत्तओ आगओ कोसम्बिं। उग्घोसियं च णेणं अरहदत्तघरसमीवे। अहं खु सबरवेज्जो फेडेमि सीसवेयणं, सुणावेमि वहिरं, अवणेमि तिमिरं, पणासेमि खसरं, उम्मूलेमि मलवाहिं, पसमेमि सूलं, नासेमि जलोयरं

व्यतिकरः। आभोगितं च तेन 'नैष एवं प्रतिबुध्यते' इति। प्रस्तुत उपायः। अकाण्डे एव समुत्पादितस्तस्य व्याधिः। संजातं जलोदरम्, परिशुष्कौ भुजौ, शूनं (शोथवत्) चरणयुगलम्, म्लाने लोचने, जडा जिह्वा, प्रनष्टा निद्रा, उपगताऽरतिः, समुद्भूता महावेदना। विषण्णश्चैषः। शब्दायिता वैद्याः। उपन्यस्तं सर्वसारम्। भणितं च तेन-अपहरैतां वेदनाम्। प्रयुक्तान्यौषधानि, न जातस्तस्य विशेषः। प्रत्याख्यातो वैद्यैः। ततो वेदनातिशयमोहितेन भणितम्-न शक्नोम्येतदनेकतीव्रवेदनाभिभूतं दिवसमात्रमपि शरीरकं धारयितुम्। ततो दत्त मे काष्ठानि, प्रविशामि ज्वलनमिति। एतच्छ्रुत्वा विद्राणा बान्धवाः, मूर्च्छिताः पत्न्यः, प्ररुदितः परिजनः। अत्रान्तरे स देवः शबरवैद्यरूपं कृत्वा गृहीतगोणीत्रय आगतः कौशाम्बीम्। उद्घोषितं च तेन अर्हद्दत्तगृहसमीपे। अहं खलु शबरवैद्यः स्फेटयामि शीर्षवेदनाम्, श्रावयामि बधिरम्, अपनयामि तिमिरम्, प्रणाशयामि खसरम् (कच्छूम्), उन्मूलयामि मलव्याधिम्, प्रशमयामि शूलम्, नाश-

१ देहि ग। २ एव क। ३ -गोणत्तणओ क। ४ वहिरिय क। ५ समामि क। ६ उयर ख।

त्ति। एयं सोऊण सद्दिओ सबहुमाणं। भणिओ य से परियणेणं। भद्द, अवणेहि इमस्स महोयरं; जं मग्गियं दिज्जइ त्ति। तेण भणियं। धम्मवेज्जो अहं, न उण अत्थलोलुओ; ता अलं मे अत्थेणं। किं तु किच्छसज्झो एस वाही, न सुहेणं अवेइ। एत्थ खलु परिहरियव्वं नियाणं, सेवियव्वो पडिवक्खो। नियाणं च दुविहं हवइ, इहलोइयं पारलोइयं च। तत्थ इहलोइयं अपच्छासेवणजणिओ वायाइधाउक्खोहो, पारलोइयं पावकम्मं। तत्थ 'इहलोइयं पि न पारलोइयसंबन्धमन्तरेणं' ति पारलोइयं परिहरियव्वं ति। तत्थ वि पहाणभावओ मिच्छत्तं। परिहरिए य तंमि समुप्पन्नसम्मत्तभावेण पइदिवसमेव आसेवियव्वाइं नाणचरणाइं, कायव्वो पढमचरिमपोरुसीसु चित्तमलविसोहणो जिणवयणसज्झाओ, सोयव्वो बिइयपोरुसीए हियाहियभावदंसगो तस्स अत्थो, मणवयणकायजोगेहिं न हिंसियव्वा पाणिणो, न जंपियव्वमलियं, न गेण्हियव्वमदत्तयं, न सेवियव्वमबम्भं, न कायव्वो मुच्छाइ परिग्गहो, न भुञ्जियव्वं रयणीए, खायव्वा खन्ती,

यामि जलोदरमिति। एतच्छ्रुत्वा शब्दितः सबहुमानम्, भणितश्च स परिजनेन। भद्र! अपनयास्य महोदरम्, यन्मार्गितं दीयते इति। तेन भणितम्-धर्मवैद्योऽहम्, न पुनरर्थलोलुपः, ततोऽलं मेऽर्थेन। किन्तु कृच्छ्रसाध्य एष व्याधिः, न सुखेनापैति। अत्र खलु परिहर्तव्यं निदानम्, सेवितव्यः प्रतिपक्षः। निदानं च द्विविधं भवति-ऐहलौकिकं पारलौकिकं च। तत्रैहलौकिकमपथ्यासेवनजनितो वातादिधातुक्षोभः, पारलौकिकं पापकर्म। तत्र 'ऐहलौकिकमपि न पारलौकिकसम्बन्धमन्तरेण' इति पारलौकिकं परिहर्तव्यमिति। तत्रापि प्रधानभावतो मिथ्यात्वम्। परिहृते च तस्मिन् समुत्पन्नसम्यक्त्वभावेन प्रतिदिवसमेवासेवितव्ये ज्ञानचरणे, कर्तव्यः प्रथमचरमपौरुष्योश्चित्तमलविशोधनो जिनवचनस्वाध्यायः, श्रोतव्यो द्वितीयपौरुष्यां हिताहितभावदर्शकस्तस्यार्थः, मनोवचनकाययोगैर्न हिंसितव्याः प्राणिनः, न जल्पितव्यमलीकम्, न ग्रहीतव्यमदत्तम्, न सेवितव्यमब्रह्म, न कर्तव्यो मूर्च्छया परिग्रहः, न भोक्तव्यं रजन्याम्, क्षन्तव्या क्षान्ति,

१ पोरिसीसु क। २ पोरिसीए क। ३ तस्सत्थो क।

भाविगव्वं मद्दवं, वज्जियव्वा माया, निहणियव्वो लोहो, हिण्डियव्वं अपडिबद्धेणं, वसियव्वं सेलकाणणुज्जाणेसु, वज्जियव्वो आरम्भो, भविगव्वं निरीहेणं। एवं च, भो देवाणुप्पिया, अवेइ भवजलोयरं पि, किमङ्ग पुण एयं इहलोयमेत्तपडिबद्धं॥

तओ परियणेण चिन्तियं 'मरणाओ वरमिमं' ति। भणिओ य एसो परियणेण। भो अरहदत्त, अलं मरणेणं, एयं करेहि'त्ति। तओ 'मरणाओ वि एयमहियपरं, तहावि का अन्ना गइ' त्ति चिन्तिऊण जंपियमणेणं 'जं वो रोयइ'त्ति॥

सवरवेज्जेण भणियं। जइ एवं, ता पेच्छ मे वेज्जसत्तिं। इयाणिं चेव पन्नवेमि; किं तु निच्छिएण होयव्वं, न दायव्वो मोहपसरो, न सोयव्वं वयणमकल्लाणमित्ताणं, न कायव्वा कुसीलसंसग्गी, न बहु मन्नियव्वं इहलोयवत्थुं, न मोत्तव्वो अहं, न खण्डियव्वा मम आणत्ती'। पडिस्सुयमणेणं। तओ आलिहियं वेज्जेण मन्तमण्डलं, मिलिओ नयरिजणवओ, ठाविओ मण्डलंमि अरहदत्तो, सव्वजण-

भावयितव्यं मार्दवम्, वर्जनीया माया, निहन्तव्यो लोभः, हिण्डितव्यमप्रतिबद्धेन, वस्तव्यं शैलकाननोद्यानेषु, वर्जयितव्य आरम्भः, भवितव्यं निरीहेण। एवं च भो देवानुप्रिय! अपैति भवजलोदरमपि किमङ्ग पुनरेतदिहलोकमात्रप्रतिबद्धम्। ततः परिजनेन चिन्तितम्—'मरणाद् वरमिदम्' इति। भणितश्चैष परिजनेन—भो अर्हद्दत्त! अलं मरणेन, एतत्कुर्विति। ततो 'मरणादप्येतदधिकतरम्, तथापि काऽन्या गतिः' इति चिन्तयित्वा जल्पितमनेन 'यद् वो रोचते' इति। शबरवैद्येन भणितम्—यद्येवं ततः प्रेक्षस्व मे वैद्यशक्तिम्। इदानीमेव प्रमापयामि, किन्तु निश्चितेन भवितव्यम्, न दातव्यो मोहप्रसरः, न श्रोतव्यं वचनमकल्याणमित्राणाम्, न कर्तव्यः कुशीलसंसर्गः, न बहु मानयितव्यमिहलोकवस्तु, न मोक्तव्योऽहम्, न खण्डयितव्या ममाज्ञप्तिः। प्रतिश्रुतमनेन। ततः आलिखितं वैद्येन मन्त्रमण्डलम्, मिलितो नगरीजनव्रजः, स्थापितो मण्डलेऽर्हद्दत्तः, सर्वजनसमक्षमेवाभिमन्त्र्य प्रयुक्तान्यौपधानि, स्थगितो धवलपटेन, स्मृता मातृस्थानविद्या,

[1] मोयव्वं वयणमकल्लाणमित्ताणं वर्जं क।

समक्खमेव अहिमन्तिऊण पउत्ताइं ओसहाइं, ठइओ धवलपडएणं, सुमरिया माइड्ढाणविज्जा, देवसत्तीए कोलाहली कओ एसो। तओ मोयावेऊण अक्कन्दभेरवे, लोट्टाविऊण महियलंमि, भञ्जाविऊण अङ्गमङ्गाइं, गमिउं विचित्तमोहे जम्बालकलमलओ अइभीसणो रूवेणं असोयव्वभासी [सवणपन्थाओ पुट्ठो किं पुण दंसणस्स] दुरहिगन्धिणा देहेण नियरूवसरिसअट्ठुत्तरवाहिसयपरिवारिओ विवाग-सव्वस्सं पिव पावकम्मस्स निप्फेडिओ से मुत्तिमन्तो चेव मायावाहि त्ति। दिट्ठो य लोएणं। तओ विम्हिओ लोओ। कओ णेण कोलाहलो। अहो महाणुभावया सबरवेज्जस्स, अउव्ववेज्जमग्गेण अदिट्ठपुव्वेण अम्हारिसेहिं निप्फेडिओ मुत्तिमन्तो चेव वाहि त्ति। अहो अच्छरियं; पउणो अरहदत्तो, वाहिविगमेण समागया से निद्दा। थेववेलाए पडिबोहिओ सबरवेज्जेणं। भणिओ य णेणं। भद्द, पेच्छप्पणोच्चयं महापावकम्मवाहिं। ता तहा करेज्जासि, न उणो जहा इमेणं घेप्पसि त्ति। दिट्ठो अरहदत्तेणं। विम्हिओ एसो। जायं से भयं। भणिओ य सबरवेज्जेणं। भद्द, मोयाविओ ताव तुमं मए इमाओ पावकम्मवाहिकिलेसाओ, पाविओ आरोग्गसुहेकदेसं। अओ

दैवशक्त्या कोलाहली कृत एषः। ततो मोचयित्वाऽऽक्रन्दभैरवान् लोटयित्वा महीतले भञ्जयित्वाऽङ्गाङ्गानि गमयित्वा विचित्रमोहान् (जम्बालकलमलओ दे.) दुर्गन्धी अतिभीषणो रूपेण अश्रोतव्यभाषी [श्रवणपथस्यापि च स्पृष्टः किं पुनर्दर्शनस्य] दुरभिगन्धिना देहेन निजरूपसदृशाष्टोत्तरव्याधिशतपरिवृतो विपाकसर्वस्वमिव पापकर्मणो निष्फेटितस्तस्य मूर्तिमानिव मायाव्याधिरिति। दृष्टश्च लोकेन। ततो विस्मितो लोकः। कृतोऽनेन कोलाहलः। अहो महानुभावता शवरवैद्यस्य, अपूर्ववैद्यमार्गेण अदृष्टपूर्वेणास्मादृशैर्निष्फेटितो मूर्तिमानेव व्याधिरिति। अहो आश्चर्यम्। प्रगुणोऽर्हद्दत्तः, व्याधिविगमेन समागता तस्य निद्रा। स्तोकवेलायां प्रतिबोधितः शवरवैद्येन। भणितश्चानेन-भद्र! प्रेक्षस्व आत्मनश्चैव महापापकर्मव्याधिम्। ततस्तथा कुर्याः, न पुनर्यथाऽनेन गृह्यसे इति। दृष्टोऽर्हद्दत्तेन। विस्मित

१ -मङ्गुवङ्गाइं क।

परं भद्देण सयमेव तहा कायव्वं, जहा सयलपावकम्मवाहिविगमो होइ, तव्विगमे य संपज्जिस्सइ ते जम्मजरामरणविरहियं एगन्तनि-प्पच्चवायं आसंसारमपत्तपुव्वं आरोग्गसुहं ति। अहं पि गहिओ चेव इमिणा पावकम्मवाहिणा; अवणीया य भवओ विय काइ मत्ता इमस्स मए, सेसावणयणत्थं च 'अजोगो उत्तिमोवायस्स' त्ति पयट्टो इमिणा पयारेणं। ता तुमं पि उत्तमोवायं वा पडिवज्ज एयं वा मज्झ सन्तियं चेट्ठियं ति। लोएण भणियं। 'को उण एत्थ उत्तमोवाओ। सबरवेज्जेण भणियं। जिणसासणंमि पव्वज्जापवज्जणं। तत्थ खलु पडिवन्नाए पव्वज्जाए परिवालिज्जमाणीए जहाविहिं न संभवइ एस वाही, सिग्घमेव य अवेइ अवसेसं ति। ईइसा य मज्झ जाई, जेण न होइ सा इमीए सयलदुक्खसेलवज्जासणी महापव्वज्जा। तुमं पुण भद्द उत्तमजाइगुणओ जोग्गो इमीए महापव्वज्जाए। ता एयं वा गेण्ह, गहियगोणसओ मए वा सह विहरसु त्ति। लोएण भणियं। भो सुन्दरमिमं, तुज्झ भाया वि पव्वइओ चेव; ता एयं

एवा। जातं तस्य भयम्। भणितश्च शबरवैद्येन। भद्र! मोचितस्तावत् त्वं मयाऽस्मात् पापकर्मव्याधिक्लेशात्, प्रापित आरोग्यसुखैकदे-शम्। अतः परं भद्रेण स्वयमेव तथा कर्तव्यम्, यथा सकलपापकर्मव्याधिविगमो भवति, तद्विगमे च संपत्स्यते ते जन्मजरामरणवि-रहितमेकान्तनिष्प्रत्यपायमासंसारमप्राप्तपूर्वमारोग्यसुखमिति। अहमपि गृहीत एवानेन पापकर्मव्याधिना, अपनीता च भवत इव काचि-न्मात्राऽस्य मया, शेषापनयनार्थं च 'अयोग्य उत्तमोपायस्य' इति प्रवृत्तोऽनेन प्रकारेण। ततस्त्वमपि उत्तमोपाय वा प्रतिपद्यस्व, एतद्वा मम सत्कं चेष्टितमिति। लोकेन भणितम्-कः पुनरत्र उत्तमोपायः। शबरवैद्येन भणितम्-जिनशासने प्रव्रज्याप्रपदनम्। तत्र खलु प्रतिपन्नायां प्रव्रज्यायां परिपाल्यमानायां यथाविधि न सम्भवत्येष व्याधिः, शीघ्रमेव चापैत्यवशेषमिति। ईदृशी च मम जातिः, येन न भवति साऽस्यां सकलदुःखशैलवज्राशनिर्महाप्रव्रज्या। त्वं पुनर्भद्र! उत्तमजातिगुणतो योग्योऽस्याः महाप्रव्रज्यायाः। तत एतां गृहाण,

१ -सेसमपत्त-क। २ इण क-ख। ३ जहाविह क।

ववसउ' त्ति ॥

तओ अरहदत्तेण अणिच्छमाणेणावि चित्तेणं पडिवन्नमेयं। आगओ कोइ तहाविहो साहू। तओ पडिवन्नो एयस्स समीवे पव्वज्जं दव्वओ, न उण भावओ त्ति। गओ सबरवेज्जो॥

अइक्कन्ता कइवि दियहा। मिच्छत्तोदएणं च समुप्पन्ना इमस्स अरई। तओ परिचइय पोरुसं, अणवेक्खिऊण नियकुलं, अगणिऊण वयणिज्जं, अणालोइऊण आयइं परिच्चत्तमणेण दव्वलिङ्गं। आगओ सगिहं। पवत्तो पडिकूलसेवणे। गया कइवि वासरा। आभोइयं देवेण। कओ से पुव्ववाही। विसण्णो एसो। निन्दिओ लोएणं। संसारसिणेहेणं गविट्ठो से बन्धवेहिं सबरवेज्जो। लद्धो देव्वजोएणं। भणिओ य णेहिं। भद्द, कुविओ सो तस्स वाही। ता करेहि से अणुग्गहं, उवसामेहि एयं' ति। सबरवेज्जेण भणियं। किं

गृहीतश्रमणव्रतो मया वा मम विहर इति। लोकेन भणितम्-भो! सुन्दरमिदम्, तव भ्रातापि प्रव्रजित एव, तत् मलव् व्यवस्येति।

ततोऽर्हद्दत्तेनानिच्छताऽपि चित्तेन प्रतिपन्नमेतद्। आगतः कोऽपि तथाविधः साधुः। ततः प्रतिपन्न एतस्य समीपे प्रव्रज्यां द्रव्यतः, न पुनर्भावत इति। गतः शबरवैद्यः।

अतिक्रान्ताः कत्यपि दिवसाः। मिथ्यात्वोदयेन च समुत्पन्नाऽस्यारतिः। ततः परित्यज्य पौरुषम्, अनपेक्ष्य निजकुलम्, अगणयित्वा वचनीयम्, अनालोच्यायतिं परित्यक्तमनेन द्रव्यलिङ्गम्। आगतः स्वगृहम्। प्रवृत्तः प्रतिकूलसेवने। गताः कत्यपि वासराः। आभोगितं दैवेन। कृतस्तस्य पूर्वव्याधिः। विषण्ण एषः। निन्दितो लोकेन। संसारस्नेहेन गवेषितस्तस्य बान्धवैः शबरवैद्यः। लब्धो दैवयोगेन। भणितश्च तैः। भद्र! कुपितः स तस्य व्याधिः। ततः कुरु तस्यानुग्रहम्, उपशमय एतमिति। शबरवैद्येन भणितम्-किं कृतमपथ्यमिति।

१ के रि क।

कयमपच्छं ति। बन्धवेहिं भणियं। भद्द, लज्जिया अम्हे तस्स चरिएणं; तहावि करेह अणुग्गहं ति। सवरवेज्जेण भणियं। जइ एवं पुणो वि पव्वयइ। तओ अणिच्छमाणो वि हियएण पव्वइओ। तहेव उवसामिऊण वाहिं गओ सवरवेज्जो॥

अइक्कन्तेसु कइवयदिणेसु तहेव उप्पव्वइओ। आहोइयं[1] देवेणं। कओ से तिव्वयरवेयणो वाही। भणिओ य बन्धवेहिं। किं पुण तुमं एवं पि अत्ताणयं न लक्खेसि। ता परिच्चयसु वा जीवियं, करेहि वा तस्स वयणं ति। तेण भणियं। करेमि संपयं, जइ तं पेच्छामि त्ति। गवेसिओ सवरवेज्जो बन्धवेहिं, दिट्ठो य दे[2]व्वजोएणं। लज्जावणयवयणं भणिओ य णेहिं। अजुत्तं चेव ववसियं [3]ते पुत्तएण, गहिओ य एसो तिव्वयरेण वाहिणा; ता को उ[4]ण इह उवाओ त्ति। सवरवेज्जेण भणियं। नत्थि तस्स उवाओ; विसयलोलुओ खु एसो पुरिसयाररहिओ य। ता थेवमियमेयस्स, बहुययराओ य अग्गओ तिरियनारएसु विडम्बणाओ। तहावि तुम्हाण उवरोहओ

बान्धवैर्भणितम्-भद्र! लज्जिता वयं तस्य चरितेन, तथापि कुर्वनुग्रहमिति। शबरवैद्येन भणितम्-यद्येवं पुनरपि प्रव्रजति। ततोऽनिच्छन्नपि हृदयेन प्रव्रजितः। तथैवोपशमय्य व्याधिं गतो शबरवैद्यः।

अतिक्रान्तेषु कतिपयदिनेषु तथैवोत्प्रव्रजितः। आभोगित देवेन। कृतस्तस्य तीव्रतरवेदनो व्याधिः। भणितश्च बान्धवैः। किं पुनस्त्वमेवमपि आत्मानं न लक्षयसि। ततः परित्यज वा जीवितं कुरु वा तस्य वचनमिति। तेन भणितम्-करोमि साम्प्रतम्, यदि तं पश्यामीति। गवेषितः शबरवैद्यो बान्धवैः, दृष्टश्च दैवयोगेन। लज्जावनतवदनं भणितश्च तैः। अयुक्तमेव व्यवसितं ते पुत्रकेण, गृहीतश्चैष तीव्रतरेण व्याधिना, ततः कः पुनरिहोपायः इति। शबरवैद्येन भणितम्-नास्ति तस्योपायः, विषयलोलुपः खल्वेष पुरुषकाररहितश्च। ततः स्तोकमिदमेतस्य, बहुतराश्चाग्रतः तिर्यग्नारकेषु विडम्बनाः। तथापि युष्माकमुपरोधतश्चिकित्साम्येकशः, यदि मयैव सह हिण्डते इति।

१ आभोइयं क। २ दिव्व-ख। ३ तेण क। ४ उण क-ख।

चिकिच्छामि एक्कसि, जइ मए चेव मह हिण्डइत्ति। पडिवन्नमणेहिं, साहियं च अरहदत्तस्स। संखुद्धो य एसो। तहावि 'का अन्ना गइ' त्ति चिन्तिऊण पडिवन्नमणेण। आणिओ सवरवेज्जो। भणिओ य णेणं। भद्द, पच्छिमा खेड्डिया; ता सुन्दरेण होयव्वं। सव्वहा जमहं करेमि, तं चेव तुमए कायव्वं; न मोत्तव्वो य अहयं ति। पडिवन्नं अरहदत्तेणं। तिगिच्छिओ य एसो। भणिओ य लोएणं। भो सत्थवाहपुत्त, मा संपयं पि कुपुरिसचेट्ठियं करिस्ससि। समप्पिओ से गोणत्तओ। निग्गया नयरीओ, गया य गामन्तरं। कया देवेण माया। दिट्ठं च णेहिं धूमन्धयारियं नहयलं, सुओ हाहारवगब्भिणो वंसफुट्टणसद्दो, पुलइया दिट्ठिदुक्खया जालावली। विन्नायं य णेहिं, जहा पलित्तो एस गामो त्ति। तओ विज्झवणनिमित्तं घेत्तूण तणभारयं धाविओ देवो। भणिओ य णेणं। भो किं तणभारएणं पलित्तं विज्झविज्जइ। देवेण भणियं। किमेत्तियं वियाणासि। तेण भणियं। कहं न-याणामि। देवेण भणियं। जइ जा-

प्रतिपन्नमेभिः, कथितं चार्हद्दत्तस्य। संक्षुब्धश्चैषः। तथापि 'काऽन्या गतिः' इति चिन्तयित्वा प्रतिपन्नमनेन। आनीतः शबरवैद्यः। भणितश्च तेन। भद्र! पश्चिमा (खेड्डिया दे.) द्वारिका (चरम उपाय इत्यर्थः,) ततः सुन्दरेण भवितव्यम्। सर्वथा यदहं करोमि तदेव त्वया कर्तव्यम्, न मोक्तव्यश्चाहमिति। प्रतिपन्नमर्हद्दत्तेन। चिकित्सितश्चैषः।। भणितश्च लोकेन। भो सार्थवाहपुत्र! मा साम्प्रतमपि कुपुरुषचेष्टितं करिष्यसि। समर्पितस्तस्य गोणत्रिकः। निर्गतौ नगर्याः, गतौ च ग्रामान्तरम्॥ कृता देवेन माया। दृष्टं च ताभ्यां धूमान्धकारितं नभस्तलम्। श्रुतो हाहारवगर्भितः वंशस्फुटनशब्दः, दृष्टा दृष्टिदुःखदा ज्वालावलिः। विज्ञातं च ताभ्याम्, यथा प्रदीप्त एष ग्राम इति। ततो विध्यापननिमित्तं गृहीत्वा तृणभारकं धावितो देवः। भणितश्च तेन। भोः किं तृणभारकेण प्रदीप्तं विध्याप्यते। देवेन भणितम्-किमेतावद् विजानासि। तेन भणितम्-कथं न जानामि। देवेन भणितम्-यदि जानासि ततः कथमज्ञानपवनसंधुक्षितमनेकदे-

१ अरहयत्तस्स क, अरिहदत्तस्स ग। २ करेज्जसु त्ति क। ३ वंसफुडण-क। ४ तणभारेण क।

अणेगदेहिन्धणं कोहाइसंपलित्तं गेहियदेहिन्धणो पुणो वि गिहवासं पविससि। ठिओ तुण्हिक्को, न
पणि. ना रहमन्नाणपवणसंधुक्खियं
संवुद्धो य ॥
गया कंचि भूमिभागं। पयट्टो देवो तिक्खकण्टयाउलेणं अडविमग्गेणं। इयरेण भणियं। भो किं पुण तुमं पन्थं मोत्तूण अडविं
परिगमि। देवेण भणियं। किमेत्तियं जाणसि। तेण भणियं। कहं न-याणामि। देवेण भणियं। जइ जाणसि, ता कहं मोक्ख-
मग्गं मोत्तूण अणेगवसणगारयसंकुलं संसाराडविं पविससि। ठिओ तुण्हिक्को, न संवुद्धो य। गया कंचि भूमिभागं। आवासिया गाम-
देवउले। तत्थ पुण वाणमंतरो लोएण अच्चिज्जमाणो हेट्ठामुहो पडइ; पुणो वि ठविओ, पुणो वि पडइ। तेण भणियं। अहो वाणमंत-
रस्स अहन्नया, जो अच्चिओ उवरिहुत्तो य कओ हेट्ठामुहो पडइ। देवेण भणियं। किमेयं वियाणसि। तेण भणियं। किमेत्थ जाणि-
यव्वं। देवेण भणियं। जइ एवं, ता कीस तुमं अच्चणिज्जट्ठाणे देवगइसिद्धिगईओ पडुच्च उवरिहुत्तो वि किज्जमाणो परिणामदारुण
इन्धनं क्रोधादिसंप्रदीप्तं गृहीतदेहेन्धनः पुनरपि गृहवासं प्रविशसि। स्थितः तूष्णिकः, न संबुद्धश्च।
गतौ कंचिद् भूमिभागम्। प्रवृत्तो देवः तीक्ष्णकण्टकाकुलेनाटवीमार्गेण। इतरेण भणितम्-भोः किं पुनस्त्वं पन्थानं मुक्त्वाऽटवीं
प्रविशसि। देवेन भणितम्-किमेतावद् जानासि। तेन भणितम्-कथं न जानामि। देवेन भणितम्-यदि जानासि, ततः कथं मोक्षमार्गं
मुक्त्वाऽनेकव्यसनश्वापदसंकुलां संसाराटवीं प्रविशसि। स्थितः तूष्णिकः, न संबुद्धश्च। गतौ कंचिद् भूमिभागम्। आवासितौ ग्रामदेव-
कुले। तत्र पुनर्वानमन्तरो लोकेनार्च्यमानोऽधोमुखः पतति, पुनरपि स्थापितः पुनरपि पतति। तेन भणितम्-अहो वानमन्तरस्याधन्यता,
योऽर्चित (उवरिहुत्तो दे) ऊर्ध्वाभिमुखश्च कृतोऽधोमुखः पतति। देवेन भणितम्-किमेतद् विजानासि। तेन भणितम्-किमत्र ज्ञातव्यम्।
देवेन भणितम्-यद्येवं ततः कस्मात्त्वमर्चनीयस्थाने देवगतिसिद्धिगती प्रतीत्य ऊर्ध्वाभिमुखोऽपि क्रियमाणः परिणामदारुणगृहवासप्रपदनेन

१ पविय क।

गिहवासपवज्जणेणं निरयगइतिरियगइगमणभावओ हेट्ठामुहो पडसि। ठिओ तुण्हिक्को, न संबुद्धो य ॥

गया कंचि भूमिभागं। दिट्ठो य नाणापयारे कणियकुण्डए चइऊण अच्चन्तदुरहिगन्धअसुइयं भुञ्जमाणओ सूयरो। तेण भणियं। अहो अविवेगो सूयरस्स, जो कणियकुण्डए चइऊण असुइयं भुञ्जइ त्ति। देवेण भणियं। किमेत्तियं वियाणसि। तेण भणियं। किमेत्थ वियाणियव्वं। देवेण भणियं। जइ एवं, ता कीस तुमं अच्चन्तसुहरूवं समणत्तणं चइऊण असुइए विसए बहु मन्नसि त्ति। ठिओ तुण्हिक्को न संबुद्धो य ॥

गया थेवं भूमिभागं। कया देवेण माया। दिट्ठो य णेहिं छेत्तन्तरोवारियादूरदेसट्ठियविमुक्कजुंजुमयचारी सुक्ककूवतडेक्कदेससंजाय-दुरुव्वापवाललवबद्धाहिलासो तन्निमित्तमेव अज्झवसाएणं कूवपडणेणं अणासाइऊण दुरुव्वापवाललवं विसमपडिकूवेकदेसेसु संचुण्णि-

निरयगतितिर्यग्गतिगमनभावतोऽधोमुखः पतसि। स्थितः तूष्णिको न संबुद्धश्च।

गतौ कञ्चिद् भूमिभागम्। दृष्टश्च नानाप्रकारान् कणिककुण्डान् त्यक्त्वाऽत्यन्तदुरभिगन्धाशुचिकं भुञ्जानः सूकरः। तेन भणितम्-अहो अविवेकः सूकरस्य, यः कणिककुण्डान् त्यक्त्वाऽशुचिकं भुङ्क्ते इति। देवेन भणितम्-किमेतावद् विजानासि। तेन भणितम्-किमत्र विज्ञातव्यम्। देवेन भणितम्-यद्येवं ततः कस्मात्त्वमत्यन्तसुखरूपं श्रमणत्वं त्यक्त्वाऽशुचिकान् विषयान् बहु मन्यसे इति। स्थितस्तूष्णीकः, न संबुद्धश्च। गतौ स्तोकं भूमिभागम्। कृता देवेन माया। दृष्टश्च ताभ्यां क्षेत्रान्तर-(ओवारिय दे.) राशीकृतादूरदेशस्थित-विमुक्तजुम्जुमयचारिः शुष्ककूपतटैकदेशसंजातदूर्वाप्रवाललवबद्धाभिलापस्तन्निमित्तमेवाध्यवसायेन कूपपतनेनानासाद्य दूर्वाप्रवाललवं

१ -दुरभि-क। २ अज्झवसिएण क।

पंङ्कोवक्को पडिओ त्ति। तं च दट्ठूणं भणियं अरहद्त्तेणं। अहो मूढया वइल्लस्स, जेण मोत्तूण जुंजुंमयचारिं कूववडतडसंठियं दुरुव्वालयमहिलसन्तो तत्थेव पडिओ। देवेण भणियं। किंमेत्तियं वियाणसि। तेण भणियं। कहं न-याणामि। देवेण भणियं। जइ जाणसि, ता कहं ठाणन्तरोयारियजुंजुमयचारिरूवं महन्तं सुरसोक्खमुज्झिय दुरुव्वापवालतुल्ले तुच्छे माणुससोक्खंमि बद्धाहिलासो पाडेसि अप्पाणयं सुक्कहूवसरिसीए दोग्गईए त्ति॥

एयमायण्णिऊण विवलिओ से कम्मरासी। चिन्तियं च णेणं। अहो अमाणुसो एसो। कहमन्नहा एवं वाहरइ। सोहणं च एयं। भाया वि मे एवं चेव कहियव्वं ति। ता पुच्छामि ताव, को उण एत्थ परमत्थो त्ति। पुच्छिओ य। भो को उण तुमं असोयदत्तो विव मम वच्छलो त्ति। देवेण भणियं। परियायन्तरगओ सो चेव असोयदत्तो म्हि। इयरेण भणियं। को पच्चओ। देवेण भणियं।

पिप्पलतलनिकुञ्जीकरीषेषु मंजूषिताक्रोपाक्रो वलीवर्द इति। तं च दृष्ट्वा भणितमर्हद्दत्तेन। अहो मूढता बलीवर्दस्य, येन मुक्त्वा जुञ्जुमयचारिं कूपावटतटसंस्थितं दूर्वाल्यमभिलषन् तत्रैव पतितः। देवेन भणितम्-किमेतावद् विजानासि। तेन भणितम्-कथं न जानामि। देवेन भणितम्-यदि जानासि ततः कथं स्थानान्तरावतीरत-(ओयारियं दे. राशीकृतम्) जुञ्जुमयचारिरूपं महत् सुरसौख्यमुज्झित्वा दूर्वामवालतुल्ये तुच्छे मानुषसौख्ये बद्धाभिलाषः पातयस्यात्मानं शुष्ककूपसदृश्यां दुर्गत्यामिति।

एतदाकर्ण्य विवलितस्तस्य कर्मराशिः। चिन्तितं च तेन-अहो अमानुष एषः, कथमन्यथैवं व्याहरति। शोभनं चैतद्। भ्रात्राऽपि मे एवमेव कथयितव्यमिति। ततः पृच्छामि तावत्, कः पुनरत्र परमार्थ इति। पृष्टश्च। भोः! कः पुनस्त्वमशोकदत्त इव मम वत्सल इति। देवेन भणितम्-पर्यायान्तरगतः स एवाशोकदत्तोऽस्मि। इतरेण भणितम्-कः प्रत्ययः। देवेन भणितम्-त्वया मया च प्रतिबोध-

१-३ पङ्को क-ख। २ जुं-क-ग। ३ किमेव क। ४ जाव घ।

तुमए मए य पडिबोहनिमित्तं आसि जहा वेयड्ढपव्वए कुण्डलजुवलयं ठवियं, ता तं चेवं दंसेमि त्ति; किमन्नेण पच्चएणंति। पडिस्सुयमणेणं। तओ दिव्वरूवेण होऊणं नीओ वेयड्ढपव्वयं, दंसियं से सिद्धाययणकूडंमि रयणाययंसयं कुण्डलजुवलयं। तं चेव पेक्खिऊण विचित्तयाए कम्मपरिणामस्स समुप्पन्नं जाईसरणं। पडिबुद्धो एसो, पव्वइओ य भावओ। खामिओ देवेणं। गओ देवो।।

ताणं च अहयं, भो धरण, पुरोहियकुमारो त्ति। ता न एवं, देवाणुप्पिया, अणब्भत्थकुसलमूलाणं विराहयाणं च वुड्ढी हवइ, न य अविराहयाणं विणिज्जियमहामोहसत्तूणं अणुट्ठाणं न निव्वहइ, न य इमाओ अन्नं सुन्दरयरं ति। ता समीहियसंपायणेण करेहि सफलं मणुयत्तणं। धरणेण भणियं। जं भयवं आणवेइ, किं तु साहेमि जणणिजणयाणमेयवइयरं, कयाइ संबुज्झन्ति ति। भयवया भणियं। जुत्तमेयं। तओ पडिबुद्धवयंसयसमेओ पविट्ठो नयरिं। कहिओ य णेण जणणिजणयाण वइयरो। पडिबुद्धा य एए। सलाहिओ गिहा-

निमित्तमासीद् यथा वैताढ्यपर्वते कुण्डलयुगलं स्थापितम्, ततस्तदेव दर्शयामीति, किमन्येन प्रत्ययेनेति। प्रतिश्रुतमनेन। ततो दिव्यरूपेण भूत्वा नीतो वैताढ्यपर्वतम्, दर्शितं तस्य सिद्धायतनकूटे रत्नायतंसकं कुण्डलयुगलम्। तदेव प्रेक्ष्य विचित्रतया कर्मपरिणामस्य समुत्पन्नं जातिस्मरणम्। प्रतिबुद्ध एषः। प्रव्रजितश्च भावतः, क्षामितो देवेन। गतो देवः।

तेषां चाहं भो धरण! पुरोहितकुमार इति। ततो नैव देवानुप्रिय! अनभ्यस्तकुशलमूलानां विराधकानां च वृद्धिर्भवति। न चाविराधकानां विनिर्जितमहामोहशत्रूणामनुष्ठानं न निर्वहति, न चास्मादन्यत् सुन्दरतरमिति। ततः समीहितसंपादनेन कुरु सफलं मनुजत्वम्। धरणेन भणितम्-यद् भगवानाज्ञापयति, किन्तु कथयामि जननीजनकयोरेतद्व्यतिकरम्, कदाचित् संभोत्स्येते इति। भगवता भणितम्-युक्तमेतद्। ततः प्रतिबुद्धवयस्यसमेतः प्रविष्टो नगरीम्। कथितश्च तेन जननीजनकयोर्व्यतिकरः। प्रतिबुद्धौ चैतौ।

१ तं चेव पच्चयनिमित्तं तव दंसेमि क। २ तत्तो रा।

गमपरिगाओ। कयं उचियकरणिजं। पवन्नो जहाविहीए सह जणणिजणएहिं वयंसएहि य अरहदत्तगुरुसमीवे समणत्तणं ॥

अइक्कन्तो कोइ कालो। अहिज्जियं सुत्तं, आसेविओ किरियाकलावो। संपत्तो एगल्लविहारपडिमापडिवत्तिजोग्गयं। समुप्पन्ना से इच्छा। पुच्छिया य णेण गुरवो, 'उचिओ' त्ति कलिऊण अणुजाणिओ य णेहिं। भावियाओ भावणाओ। पडिवन्नो एगल्लविहारपडिमं। गामे एगराएण नगरे पञ्चराएण य विहरमाणो समागओ तामलित्तिं। ठिओ पडिमाए ॥

इओ य सा लच्छी देवउरनिव्वासिया गवेसाविया सुनयणेण, दिट्ठा य नन्दिवद्धणाभिहाणसन्निवेसे, घडिया य णेणं। तओ सो तं गहेऊण गओ नियपदीवं ॥

अइक्कन्तो कोइ कालो। पुणो आगओ तामलित्तिं। ठिओ बाहिरियाए। दिट्ठो य सो रिसी उज्जाणमुवगयाए कहवि लच्छीए,

---

गृहाश्रमपरित्यागः। कृतमुचितकरणीयम्। प्रपन्नो यथाविधि सह जननीजनकाभ्यां वयस्यैश्चार्हद्दत्तगुरुसमीपे श्रमणत्वम्।

अतिक्रान्तः कोऽपि कालः। अधीतं सूत्रम्। आसेवितः क्रियाकलापः। संप्राप्त एकाकिविहारप्रतिमाप्रतिपत्तियोग्यताम्। समुत्पन्ना तस्येच्छा, पृष्टाश्च तेन गुरवः। 'उचितः' इति कलयित्वाऽनुज्ञातश्च तैः। भाविता भावनाः। प्रतिपन्न एकाकिविहारप्रतिमाम्। ग्रामे एकरात्रेण नगरे पञ्चरात्रेण विहरन् समागतस्तामलिप्तीम्। स्थितः प्रतिमया।

इतश्च सा लक्ष्मीर्देवपुरनिर्वासिता गवेषिता सुनयनेन। दृष्टाश्च नन्दीवर्धनाभिधानसन्निवेशे, घटिता च तेन। ततः स तां गृहीत्वा गतो निजद्वीपम्।

अतिक्रान्तः कोऽपि कालः। पुनरागतस्तामलिप्तीम्। स्थितो बाह्यायाम्। दृष्टश्च स ऋषिरुद्यानमुपगतया कथमपि लक्ष्म्या, प्रत्यभि-

पच्चभिन्नाओ य णाए। तओ गरुययाए कम्मपरिणामस्स[1] वियम्भिओ से कोवाणलो। आहया विय वज्जेणं। चिन्तियं च णाए। अहो मे पावपरिणई, पुणो वि एसो दिट्ठो त्ति। ता इमं एत्थ पत्तयालं। ठवेमि एयस्स[2] समीवे छिन्नकङ्कणं कण्ठाहरणं, 'अहो मुट्ठा मुट्ठ' त्ति करेमि कोलाहलं। तओ विवित्तयाए उज्जाणस्स दरिसणेण कण्ठाहरणस्स संभावियचोरभावो चण्डसासणेण राइणा वावाइज्जिस्सइ त्ति। गहिया य सुए भिक्खुरूवधारिणो सलोत्ता चेव तक्करा वावाइया य। ता 'लिङ्गिणो वि चोरियं करेन्ति' समुप्पन्ना पसिद्धि त्ति। चिन्ति-ऊण संपाडियमिमीए। धाविया आरक्खिया, गहिओ सो रिसी। वोल्लाविओ तेहि य जाव न जंपइ त्ति, गवेसियं कण्ठाहरणं; दिट्ठं च नाइदूरे। तओ 'छिन्नकङ्कणं' ति सद्दाविया नयरि[3]जणवया। साहियं नरवइस्स। 'अहो अउव्वो तक्करो' त्ति विम्हिओ राया। भणियं च णेणं, निरूविऊण वावाएह त्ति। पुच्छिओ दण्डवासिएहिं। जाव न जंपइ त्ति, तओ 'अहो से कवडवेसो' त्ति अहिययरं कुविएहिं

ज्ञातश्च तया। ततो गुरुकतया कर्मपरिणामस्य विजृम्भितस्तस्य कोपानलः। आहतेव वज्रेण। चिन्तितं च तया-अहो मे पापपरिणतिः, पुनरप्येष दृष्ट इति। तत इदमत्र प्राप्तकालम्। स्थापयाम्येतस्य समीपे छिन्नकङ्कणं कण्ठाभरणम्, 'अहो मुषिता मुषिता' इति करोमि कोलाहलम्। ततो विविक्ततयोद्यानस्य दर्शनेन कण्ठाभरणस्य संभावितचौरभावश्चण्डशासनेन राज्ञा व्यापादयिष्यते इति। गृहीताश्च श्वो भिक्षुरूपधारिणःसलोप्त्रा एव तस्करा व्यापादिताश्च। ततो 'लिङ्गिनोऽपि चौर्यं कुर्वन्ति' समुत्पन्ना प्रसिद्धिरिति। चिन्तयित्वा संपादितमनया। धाविता आरक्षकाः, गृहीतःस ऋषिः। वादितश्च तैश्च यावन्न जल्पतीति, गवेषितं कण्ठाभरणम्, दृष्टं च नातिदूरे॥ ततः 'छिन्नकङ्कणम्' इति शब्दायिता नगरीजनव्रजाः। कथितं नरपतये। 'अहो अपूर्वः तस्करः' इति विस्मितो राजा। भणितं च तेन-निरूप्य व्यापादयतेति।

१ पावकम्मस्स क। २ एयसमीवे क। ३ नयर—क।

पाविओ वज्झथामं ति। निहया सूलिया। उक्खित्तो मुणिवरो। आघोसियं चण्डालेणं। भो भो नायरया, एएण समणवेसधारिणा परदव्वावहारो कओ त्ति वावाइज्जइ एसो; ता अन्नो वि जइ परदव्वावहारं करिस्सइ, तं पि राया सुतिक्खेणं दण्डेण एवं चेव वावाइस्सइ त्ति। भणिऊण मुक्को य सो भयवं चण्डालेहिमुवरि सूलियाए। तप्पहावेण धरणितलमुवगया सूलिया, न विद्धो खु अहासन्निहियदेवयानिओएणं, निवडिया कुसुमवुट्ठी। 'जयइ भयवं धम्मो' त्ति उट्ठाइओ कलयलो। साहियं नरवइस्स। संजायपमोओ य आगओ राया। वन्दिओ णेण भयवं। पुच्छिओ विम्हियमणेणं। भयवं, कहं पुण इमं वत्तं ति। न जंपियं भयवया। भणियं मन्तिणा। देव, वयविसेससंगओ खु एसो, कहमियाणिं पि मन्तइस्सइ। ता तं चेव सत्थवाहघरिणिं सद्दावेऊण पुच्छेह।

नृपो दण्डपालिकैः, वायच जल्पतीति। ततः 'अहो तस्य कपटचेष्टाः' इति अधिकतरं कुपितैः प्रापितो वध्यस्थानमिति। निहता शूलिका। उत्क्षिप्तो मुनिवरः। आघोषितं चाण्डालेन। भो भो नागरा! एतेन श्रमणवेषधारिणा परद्रव्यापहारः कृत इति व्यापाद्यते एषः, ततोऽन्योऽपि यदि परद्रव्यापहारं करिष्यति तमपि राजा सुतीक्ष्णेन दण्डेन एवमेव व्यापादयिष्यति इति। भणित्वा मुक्तश्च स भगवान् चाण्डालैरुपरि शूलिकायाम्। तपःप्रभावेण धरणीतलमुपगता शूलिका। न विद्धः खलु यथासन्निहितदेवतानियोगेन, निपतिता कुसुमवृष्टिः। 'जयति भगवान् धर्मः' इत्युत्थितः कलकलः। कथितं नरपतये। संजातप्रमोदश्चागतो राजा। वन्दितस्तेन भगवान्। पृष्टो विस्मितमनसा। भगवन्! कथं पुनरिदं वृत्तमिति। न जल्पितं भगवता। भणितं मन्त्रिणा–देव! व्रतविशेषसंगतः खल्वेषः, कथमिदानीमपि मन्त्रयिष्यते। ततस्तामेव सार्थवाहगृहिणीं शब्दापयित्वा पृच्छत।

१ उत्थाइओ कल-स।

तओ पेसिया दण्डवासिया। जेणरवाओ इमं वइयरं आयण्णिऊण पलाणा एसा, न दिट्ठा दण्डवासिएहिं। निवेइयं च राइणो- देव, पलाणा खु एसा, न दीसए गेहमाइएसुं। भणियं च णेणं। अरे सम्मं गवेसिऊणं आणेह। गया दण्डवासिया। गविट्ठा आरामसुन्नदेवउलाइएसुं। न दिट्ठा एसा। दिट्ठो य कुओइ एयमायण्णिय एयवइयरेणेव पलायमाणो सुवयणो। गहिओ दण्डवासिएहिं, आणीओ नरवइसमीवं। निवेइयं राइणो। देव, नत्थि सा तामलित्तीए, एसो य किल तीए भत्तारो त्ति, दिट्ठो य पलायमाणो गहिओ अम्हेहिं संपयं देवो पमाणं ति। निरूविओ सुवयणो, भणिओ य एसो। भद्द, कहिं ते घरिणि त्ति। तेण भणियं। देव, न जाणामि। राइणा भणियं। ता कीस तुमं पलाणो त्ति। सुवयणेण भणियं। देव, भएण। राइणा भणियं। कुओ निरवराहस्स भयं। सुवयणेण भणियं। देव, अत्थि अवराहो। राइणा भणियं। को अवराहो। सुवयणेण भणियं। देव, तहाविहकलत्तसंगहो

ततः प्रेषिता दण्डपाशिकाः। अनरवाहिनं व्यतिकरमाकर्ण्य पलायितैषा। न दृष्टा दण्डपाशिकैः। निवेदितं च राज्ञे। देव! पलायिता खल्वेषा न दृश्यते गेहादिषु। भणितं च तेन–अरे सम्यग्गवेषयित्वाऽऽनयत। गता दण्डपाशिकाः। गवेषिताऽऽरामशून्यदेवकुलादिषु। न दृष्टैषा। दृष्टश्च कुतोऽप्येतमाकर्ण्य एतद्व्यतिकरेणैव पलायमानः सुवदनः। गृहीतो दण्डपाशिकैः, आनीतो नरपतिसमीपम्। निवेदितं राज्ञे। देव! नास्ति सा ताम्रलिप्त्याम्, एष च किल तस्या भर्तेति, दृष्टश्च पलायमानो गृहीतोऽस्माभिः, साम्प्रतं देवः प्रमाणमिति। निरूपितः सुवदनः भणितश्चैषः। भद्र! कुत्र ते गृहिणीति। तेन भणितम्–देव! न जानामि। राज्ञा भणितम्–ततः कस्मात्त्वं पलायित इति। सुवदनेन भणितम्–देव! भयात्। राज्ञा भणितम्–कुतो निरपराधस्य भयम्। सुवदनेन भणितम्–देव! अस्त्यपराधः। राज्ञा भणितम्–कोऽपराधः। सुवदनेन भणितम्–देव!

---

१ ग ह उत क। २ ग क। ३ पे आणेह इत्येव क।

त्ति। राइणा भणियं। भो अभयमेव तुज्झ। ता साहेहि अवितहं, को उण भयवओ तीए य वइयरो त्ति। निरूविओ सुवयणेण भयवं, पच्चभिन्नाओ य णेणं। तओ महापुरिसचरियविम्हयक्खित्तहियएणं बाहोल्ललोयणं जंपियमणेणं। देव, अणाचिक्खणीओ वइयरो, ता ण सक्कुणोमि आचिक्खिउं। राइणा भणियं। भद्द, ईइसो एस संसारो, किमेत्थ अपुव्वयं ति; ता साहेउ भद्दो। सुवयणेण भणियं। देव, जइ एवं, ता विवित्तमाइसउ देवो। तओ राइणा पुलोइओ परियणो ओसरिओ य। तओ धरणदंसणसंजायपच्छायावेण जंपियं सुवयणेणं। देव पावकम्मो अहं पुरिससारमेओ, न उण पुरिसो त्ति। निवेइयं देवस्स। पुरिसो खु देव अकज्जायरणविरओ सच्चाहिसन्धी कयन्नुओ परलोयभीरू परोवयारनिरओ य हवइ, जहा एस भयवं ति। राइणा भणियं। कहमेयंविहो पुरिससारमेओ हवइ त्ति, ता पत्थुयं भणसु। तओ साहिओ सुवयणेणं दीवदंसणाइओ अट्ठसुवन्नलक्खपयाणपज्जवसाणो धरणवइयरो। तुट्ठो य से राया।

तथाविधकलत्रसंग्रह इति। राज्ञा भणितम्–भो! अभयमेव तव। ततः कथयावितथम्, कः पुनर्भगवतस्तस्याश्च व्यतिकर इति। निरूपितः सुवदनेन भगवान्, प्रत्यभिज्ञातश्च तेन। ततो महापुरुषचरितविस्मयाक्षिप्तहृदयेन बाष्पार्द्रलोचनं जल्पितमनेन। देव! अनाख्यानीयो व्यतिकरः, ततो न शक्नोम्याख्यातुम्। राज्ञा भणितम्–भद्र! ईदृश एष संसारः, किमत्रापूर्वमिति, ततः कथयतु भद्रः। सुवदनेन भणितम्–देव! यद्येवं ततो विविक्तमादिशतु देवः। ततो राज्ञा दृष्टः परिजनोऽपसृतश्च। ततो धरणदर्शनसंजातपश्चात्तापेन जल्पितं सुवदनेन। देव! पापकर्माऽहं पुरुषसारमेयः, न पुनः पुरुष इति। निवेदितं देवाय पुरुषः खलु देव! अकार्याचरणविरतः सत्याभिसन्धिः कृतज्ञः परलोकभीरुः परोपकारनिरतश्च भवति, यथैष भगवानिति। राज्ञा भणितम्–कथमेवंविधः पुरुषसारमेयो भवतीति, ततः प्रस्तुतं भण। ततः कथितः सुवदनेन द्वीपदर्शनादिकोऽष्टसुवर्णलक्षप्रदानपर्यवसानो धरणव्यतिकरः। तुष्टश्च तस्य राजा। मुक्तश्च तेन सुवदनः।

मुक्को य पेण सुवयणो। वन्दिऊण भयवन्तं लज्जापराहीणयाए तुरियमेव गओ सुवयणो। धरणाणुराएण य अज्जमंगुसमीवे सोऊण धम्मं परियाणिऊण मिच्छत्तं पच्छाणुयावाणलदड्ढकम्मिन्धणो पवन्नो समणत्तणं। राया वि पूइऊण भयवन्तं पविट्ठो नयरिं॥

लच्छी वि महाभयाभिभूया पलाइऊण तामलित्तीओ अवहरियवसणालंकारा तक्करेहिं जाममेत्ताए सव्वरीए पत्ता कुसत्थलाभिहाणं सन्निवेसं। तत्थ पुण तीए चेव रयणीए पारद्धं पुरोहिएणं रायमहिसीए सव्वविग्घविघाययं चरुकम्मं। पज्जालिओ सन्निवेसबाहिरियाए चउप्पहथण्डिलंमि जलणो, विइण्णा निसियकड्ढियासिणो दिसावाला, समारोविओ नहभिन्नतन्दुलसमेओ चरू, पत्थुओ मन्तजावो। एत्थन्तरंमि जलन्तमवलोइऊण सत्थो, भविस्सइ' त्ति आगया लच्छी, सिवारावसमणन्तरं च दिट्ठा दिसावालेहिं। पेच्छिऊण 'अहो एसा सा रक्खसि' त्ति भीया य एए, मुक्काइं मण्डलग्गाइं, थम्भिया ऊरुया, पयम्पियाओ भुयाओ, विमुक्का विय जीविएणं निवडिया

वन्दित्वा भगवन्त लज्जापराधीनतया त्वरितमेव गतः सुवदनः। धरणानुरागेन च आर्यमङ्गुसमीपे श्रुत्वा धर्मं परिज्ञाय मिथ्यात्वं पश्चादनुतापानलदग्धकर्मेन्धनः प्रपन्नः श्रमणत्वम्। राजापि पूजयित्वा भगवन्तं प्रविष्टो नगरीम्।

लक्ष्मीरपि महाभयाभिभूता पलाय्य तामलिप्त्या अपहृतवसनालंकारास्तस्करैर्याममात्रायां शर्वर्यां प्राप्ता कुशस्थलाभिधानं सन्निवेशम्। तत्र पुनस्तस्यामेव रजन्यां प्रारब्धं पुरोहितेन राजमहिष्याः सर्वविघ्नविघातकं चरुकर्म। प्रज्वालितः सन्निवेशबाह्यायां चतुष्पथस्थण्डिले ज्वलनः, वितीर्णा निशितकृष्टासयो दिक्पालाः, समारोपितो नखभिन्नतन्दुलसमेतश्चरुः, प्रस्तुतो मन्त्रजापः। अत्रान्तरे ज्वलन्तमवलोक्य 'सार्थो भविष्यति' इत्यागता लक्ष्मीः। शिवारावसमनन्तरं च दृष्टा दिक्पालैः। प्रेक्ष्य 'अहो एषा सा राक्षसी' इति भीताश्चैते,

१-सारालङ्कारा क। २ रयणीए क।

धरणिवट्ठे। एत्थन्तरंमि 'भो भो मा बीहसु, इत्थिया अहं' ति भणमाणी समागया पुरोहियसमीवं। दिट्ठा विगयवसणा। तओ पोरुसमवलम्बिऊण 'रक्खसी एस' त्ति केसेसु गहिया अणेणं। 'अरे मा बीहसु' त्ति विबोहिया दिसावाला। उट्ठिया य एए। बद्धा खु एसा। पेसिया सन्निवेसं। साहियं नरवइस्स। तेण वि य 'न पीइसज्झा रक्खसि' त्ति खाविऊण नियममंसं, विट्टालिऊण असुइणा, कयत्थिऊण नाणाविडम्बणाहिं, निब्भच्छिऊण य सरोसं तओ निव्वासिय त्ति। अलभमाणी य गामाइसु पवेसं परिब्भमन्ती अडवीए पुव्वकयकम्मपरिणामेण विय घोररूवेणं वावाइया मइन्देणं। समुप्पन्ना य एसा धूमप्पहाए निरयपुढवीए सत्तरससागरोवमट्ठिई नारगो[1] त्ति॥

मुक्तानि मण्डलाग्राणि, स्तम्भिता ऊरवः, प्रकम्पिता भुजाः। विमुक्ता इव जीवितेन निपतिता धरणीपृष्ठे। अत्रान्तरे 'भो भो! मा बिभीत, स्त्री अहम्' इति भणन्ती समागता पुरोहितसमीपम्। दृष्टा विगतवसना। ततः पौरुषमवलम्ब्य 'राक्षसी एषा' इति केशेषु गृहीताऽनेन। 'अरे मा बिभीत' इति विबोधिता दिक्पालाः। उत्थिताश्चैते। बद्धा खल्वेषा। प्रेषिता सन्निवेशम्। कथितं नरपतेः। तेनापि च 'न प्रीतिसाध्या राक्षसी' इति खादयित्वा निजमांसं संसृज्याशुचिना, कदर्थयित्वा नानाविडम्बनाभिर्निर्भर्त्स्यं च सरोषं ततो निर्वासितेति। अलभमाना च ग्रामादिषु प्रवेशं परिभ्रमन्त्यटव्यां पूर्वकृतकर्मपरिणामेनेव घोररूपेण व्यापादिता मृगेन्द्रेण। समुत्पन्ना चैषा धूमप्रभायां निरयपृथिव्यां सप्तदशसागरोपमस्थितिर्नारक इति।

---

[1] नारओ त्ति क-ख

धरणो वि भगवं अहासंजमं विहरिऊण पवड्ढमाणसुहपरिणामो काऊण संलेहणं पवन्नो पायवगमणं। विवन्नो कालक्कमेणं, समुप्पन्नो आरणाभिहाणे देवलोए चन्दकन्ते विमाणे एक्कवीससागरोवमाऊ वेमाणिओ त्ति ॥

छट्ठं भवग्गहणं समत्तं ॥

धरणोऽपि च भगवान् यथासंयमं विहृत्य प्रवर्धमानशुभपरिणामः कृत्वा संलेखनां प्रपन्नः पादपगमनम्। विपन्नः कालक्रमेण, समुत्पन्न आरणाभिधाने देवलोके चन्द्रकान्ते विमाने एकविंशतिसागरोपमायुर्वैमानिक इति।

इति श्रीयाकिनीमहत्तरासूनुपरमगुणानुरागिभगवच्छ्रीहरिभद्रसूरिविरचितायां समरादित्यकथायां पण्डितभगवानदासकृते संस्कृतछायानुवादे षष्ठो भवः समाप्तः ॥



छट्ठो भवो समत्तो

